नमो नमः श्रीगुरुप्रेमसूरये ।

पू.कलिकालसर्वज्ञ-आचार्यदेवश्रीहेमचन्द्रसूरिविनिर्मितं

# श्रीत्रिषष्टिशलाकापुरुषचरितम् ।

## भाग-५ (पर्व : ८-९)

प्रेरकाः

प.पू. वैराग्यदेशनादक्ष-आचार्य-श्रीमद्विजय-हेमचंद्रसूरीश्वराः
पू.पंन्यास-कल्याणबोधिविजयगणिवरश्च ।

प्रकाशकः

श्री जिनशासन आराधना ट्रस्ट

# श्रीत्रिषष्टिशलाकापुरुषचरितम् ।

प्रथमावृत्तिः ।
वि.सं. २०६०
वीर सं. २५३०
इस.सं. २००४

## भाग-५ (पर्व : ८-९)

१००० प्रतयः ।
मूल्य रु. ७००
(संपूर्ण सेटना)

**પ્રાપ્તિસ્થાન**

શ્રી જિનશાસન આરાધના ટ્રસ્ટ
C/o. બી.સી. જરીવાલા
શોપ નં. ૫, બદ્રીકેશ્વર સોસાયટી,
મરીનડ્રાઈવ, 'ઈ' રોડ,
મુંબઈ-૪૦૦૦૦૩. ફોન : ૨૨૪૧૪૩૬૦

શ્રી જિનશાસન આરાધના ટ્રસ્ટ
C/o. ચંદ્રકાંતભાઈ સંઘવી,
૬/બી, અશોકા કોમ્પલેક્ષ,
રેલ્વે ગરનાળા પાસે,
પાટણ (ઉ.ગુ.)

દ્રવ્ય સહાયક

# શ્રુતસર્જન સુકૃત પ્રશસ્તિ

## જૈન કાવ્યસાહિત્યના અજોડ ગ્રંથરત્નસમા 'શ્રીત્રિષષ્ટિશલાકાપુરુષચરિતં'ના સંપૂર્ણ ૧૦ પર્વોના પ્રકાશનનો લાભ લેનાર મહાનુભાવો

---

૧. શ્રી વર્ધમાન શ્વે.મૂ.પૂ. જૈન સંઘ, વાલકેશ્વર, મુંબઈ

૨. શ્રી માટુંગા જૈન શ્વે.મૂ.પૂ. તપાગચ્છ સંઘ એન્ડ ચેરીટીઝ (માટુંગા, મુંબઈ)
(પૂ. મુનિરાજ શ્રી પ્રશાંતવલ્લભવિજયજી મ.સા.ની પ્રેરણાથી)

૩. શાહ મંછાલાલ જગરૂપજી સિરોહીવાળા પરિવાર તરફથી
શ્રુતભક્તિ નિમિત્તે, જેથી કેવળજ્ઞાનની પ્રાપ્તિ થાય.
હ. શા. ચંપાલાલજી, સુનીલ, શ્રેયાંસ, પ્રણય, શોભનાબેન,
ઉષા, સંગીત, નિશા, શ્રુતિ આદિ બેટા પોતા પરિવાર
(પૂ. મુનિરાજ શ્રી ધર્મરત્નવિજયજી મ.સા.ની પ્રેરણાથી)



## પ્રકાશકીય

સુગૃહિત નામધેય પ.પૂ. કલિકાલ સર્વજ્ઞ આચાર્ય ભગવંત શ્રીમદ્ વિજયહેમચંદ્રસૂરીશ્વરજી રચિત "શ્રીત્રિષષ્ટિશલાકાપુરુષચરિતં" મહાકાવ્ય ગ્રંથના દશ પર્વને છ ભાગમાં પ્રકાશિત કરી સંઘના ચરણે ધરતા ટ્રસ્ટ અત્યંત આનંદની અનુભૂતિ કરે છે. આ કાવ્યગ્રંથમાં ૨૪ તીર્થંકર ભગવંતો, ૧૨ ચક્રવર્તી, ૯ વાસુદેવ, ૯ પ્રતિવાસુદેવ, ૯ બળદેવ આમ કુલ ૬૩ શલાકાપુરુષના જીવન ચરિત્રને અતિ અદ્ભૂત શૈલીમાં આલેખવામાં આવેલ છે.

શલાકાપુરુષ એટલે વિશ્વના શ્રેષ્ઠ મહાપુરુષો...

આ પૂર્વે પણ ટ્રસ્ટ દ્વારા પર્વ ૨-૩-૪-૫-૬ પ્રકાશિત કરવામાં આવેલ છે. પરંતુ આ ગ્રંથની જૈન સંઘમાં અતિ જરૂરિયાત હોઈ દશે દશ પર્વને સેટ સ્વરૂપે પુનઃ પ્રકાશિત કરવામાં આવી રહ્યા છે. દશે દશ પર્વનું નવું કંપોઝ કરવામાં આવેલ છે. સુંદર-ટકાઉ અને કિંમતી કાગળ ઉપર તેનું મુદ્રણ કરવામાં આવેલ છે. જેથી વર્ષો સુધી તેની જીવંતતા બની રહે.

નવું કંપોઝ કરી આ ગ્રંથનું પનુઃ પ્રકાશિત કરવાનું કામ ઘણું જ કપરું હતું, પરંતુ પૂ. આચાર્ય ભગવંતશ્રીના શિષ્યો મુનિશ્રી રત્નબોધિવિજયજી, મુનિશ્રી સૌમ્યરત્નવિજયજી તથા મુનિ શ્રી જિનપ્રેમવિજયજીની ચીવટપૂર્વકની મહેનતથી આ કાર્ય સરળ બન્યું છે. મુનિરાજ શ્રી પદ્મબોધિવિજયજી અને મુનિરાજ શ્રી પ્રશાંતવલ્લભવિજયજી પણ કેટલાક પર્વોના પ્રુફો તપાસવામાં સહાયક બન્યાં છે.

'એમ.બાબુલાલ પ્રિન્ટરી'નાં માલિક શ્રી કીર્તિભાઈએ પણ પ્રિન્ટીંગ કાર્યમાં સખત જહેમત ઉઠાવી છે. ભવિતવ્યતાવશ અધવચ્ચે જ તેઓ દિવંગત થયા. બાકીનું કાર્ય શ્રી શ્રેણિકભાઈ તથા શ્રી ધવલભાઈએ સાંગોપાંગ પાર પાડ્યું. તેઓ પણ ધન્યવાદને પાત્ર છે.

દરેક ભાગમાં ગ્રંથમાં આવતા બોધદાયક બધા સુભાષિતોનો સંગ્રહ પણ મુનિઓએ કર્યો છે જે વાચકવર્ગને ઘણો જ ઉપયોગી થશે. આ કાવ્યના પઠન-પાઠન દ્વારા સૌ કોઈ સમ્યગ્જ્ઞાનસંપન્ન બને, પરમાત્મભક્તિસંપન્ન બને, વૈરાગ્યસંપન્ન બને અને આત્મશુદ્ધિ કરી 'મોક્ષ' પ્રાપ્ત કરનારા બને. શ્રુતભક્તિનો વિશેષ લાભ મળ્યા કરે એ જ શ્રુતાધિષ્ઠાયિકા શ્રી સરસ્વતીદેવીને પુનઃ પુનઃ પ્રાર્થના.....

લિ. ચંદ્રકુમારભાઈ જરીવાલા, લલીતભાઈ કોઠારી, પુંડરીકભાઈ એ. શાહ



प.पू. पंजाबदेशोद्धारक-आचार्य-
श्रीमद्विजयानंदसूरि म. ( पू. आत्मारामजी म. ) ।



प.पू. जिनभक्तिरसिक-
उपाध्यायश्रीवीरविजयगणीवराः ।



प.पू. न्यायविशारद-गच्छाधिपति-
श्रीमद्विजयभुवनभानुसूरीश्वराः ।



प.पू. समतासागर-पंन्यास-
श्रीपद्मविजयगणिवराः ।



प.पू. सकलागमरहस्यवेदि-
आचार्यदेव-श्रीमद्विजयदानसूरीश्वराः ।



प.पू. सिद्धांतमहोदधि-
आचार्यदेव-श्रीमद्विजयप्रेमसूरीश्वराः ।

॥ वंदना तेहने माहरी श्वास मांहे सो वार ॥

## દિવ્યકૃપા

સુવિશુદ્ધ સંયમના બળે સેંકડો સુવિહિત શ્રમણ રત્નોનું સર્જન કરનારા
પ.પૂ. આચાર્ય ભગવંત શ્રીમદ્ વિજય **પ્રેમસૂરીશ્વરજી** મહારાજા
સંઘ, શાસન અને સેંકડો શિષ્યોની જવાબદારી વચ્ચે વર્ધમાન તપની ૧૦૮ ઓળી કરનારા
પ.પૂ. આચાર્ય ભગવંત શ્રીમદ્ વિજય **ભુવનભાનુસૂરીશ્વરજી** મહારાજા
કેન્સરની ઘોર બિમારીમાં પણ માસક્ષમણાદિ તપના આરાધક, બેજોડ સમતાના ધારક
પ.પૂ. પંન્યાસપ્રવર શ્રી **પદ્મવિજયજી** મહારાજા

## શુભઆશિષ

શાસ્ત્રનિષ્ઠા, વ્યવહાર કુશળતા અને પૂર્ણ પ્રેમ અને વાત્સલ્ય ભાવના બળે વિરાટ શ્રમણ સમુદાયનું
સફળ સંચાલન કરનારા ગચ્છાધિપતિ આચાર્ય ભગવંત શ્રીમદ્ વિજય **જયઘોષસૂરીશ્વરજી** મહારાજા

## પ્રેરક-માર્ગદર્શક

વૈરાગ્યમય દેશના દ્વારા અનેકોના હૈયાને અરિહંતમય કરનારા
પ.પૂ. આચાર્ય ભગવંત શ્રીમદ્ વિજય **હેમચંદ્રસૂરીશ્વરજી** મહારાજા

# પ્રસ્તાવના

## *અદ્‌ભુત કલાકૃતિની આછેરી ઝલક*

"ત્રિષષ્ટિશલાકા પુરૂષ ચરિત્ર" એટલે વર્તમાનમાં ઉપલબ્ધ જૈન સાહિત્યના નજરાણાનું એક ઝળકતું કાવ્યરત્ન, તમામ સાધુ સાધ્વીજી ભગવંતોનું લાડીલું કાવ્યરત્ન, સંસ્કૃતના પ્રારંભિક અભ્યાસ પછી ભાષા ઉપર વિશેષ પ્રભુત્વ પ્રાપ્ત કરવા 'ત્રિષષ્ટિ કાવ્ય' એ સર્વમાન્ય આધારસ્તંભ સમુ કાવ્ય છે. દશ પર્વનું સાંગોપાંગ વાંચન થતા બુદ્ધિપ્રતિભા-જ્ઞાનપ્રતિભા અને વૈરાગ્યપ્રતિભા પૂરબહારમાં ખીલી ઊઠે છે. કારણ, આ કાવ્ય બેજોડ છે. તેમાં કયો રસ નથી એ જ સવાલ છે.

આ મહાકાવ્યના સ્રષ્ટા છે કલિકાલસર્વજ્ઞ શ્રી હેમચંદ્રસૂરીશ્વરજી મહારાજા. કાવ્યનો વિષય છે વિશ્વના સર્વશ્રેષ્ઠ 'ત્રેસઠ' પુરૂષોના જીવનચરિત્રનો ચિતાર... કથાઓની રોચકતા સાથે વ્યવહારિક જીવન પ્રસન્નતાપૂર્વક કેમ જીવવું ? તેના કિમિયા બતાવાયા છે. આધ્યાત્મિક વિકાસ સાધવાની માસ્ટર કી બતાડી છે. પરમાત્મભક્તિમાં તરબોળ કરી દે એવા ભાવવાહી શબ્દોના સાથિયા પૂરાયા છે, તો સંસાર ઉપર ફિટકાર ઊભો થઈ જાય એવા વૈરાગ્યરસના ધોધ પણ કાવ્યમાં વહી રહ્યા છે.

જીવનની દશા અને દિશાઓ બદલી નાંખે એવી સૂક્તિઓનાં ભંડાર ભરેલા છે. તો અજ્ઞાનતાના અંધકાર ઉલેચી જીવનમાં જ્ઞાનનો ઝગમગાટ પથરાય એવા ખજાનાનો પણ તોટો નથી.

બુદ્ધિને ધારદાર બનાવે એવી તર્ક સંગત વાતોથી કાવ્યની ઉપાદેયતા વધી છે તો હૃદયને ભીનું ભીનું કરી દે એવી આર્દ્ર વાતોથી કાવ્યની આકર્ષકતા વધી છે.

કાવ્યકૃતિની કલાસુંદરતા તેના કર્તાના જીવનવૈભવ અને જ્ઞાનની અગાધતાને આભારી હોય છે.

નવ-નવ સૈકા પૂર્વે થયેલા હેમચંદ્રાચાર્યનું નામ આજે પણ માત્ર ગુજરાતના જ નહીં પણ વિશ્વના ખૂણે-ખૂણે ગુંજી રહ્યું છે. કો'ક તેમને કલિકાલ સર્વજ્ઞ કહે છે, કો'ક Ocean of knowledge કહે છે, તો કોઈ સરસ્વતીનો શણગાર કહે છે. ૧૧૬૨ થી ૧૨૨૯ સુધીનો કાળ જાણે હેમયુગ જ બની ગયો હતો.

||૧||

શું એમની દિવ્ય પ્રતિભા હશે ! કે ગુર્જરેશ્વરોના ઉન્નત મસ્તકો તેમને નમતા હોય, સરસ્વતીના તટ ઉપર સરસ્વતીનો સાક્ષાત્કાર કરાવતા જે સૂરીશ્વરના ચરણોને મોટા રાજરાજેશ્વરો સ્વર્ણ કમલથી પૂજતા હોય, પ્રકાંડ વિદ્વાનો પણ તેમની બુદ્ધિ પ્રતિભા જોઈ પાણી પાણી થઈ જતા હોય.



ગુજરાતની ધરા ઉપર એમણે જે ઉપકારો કર્યા છે તેને શબ્દસ્થ કરવા અશકય છે, ઘર-ઘરમાં આજે પળાતી અહિંસા અને જયણાના ઝરણાનું મૂળ છે ‘કલિકાલ સર્વજ્ઞ’.

સરસ્વતીની સાધના કરી સ્વયં જ્ઞાનસિદ્ધ બન્યા અને જ્ઞાનનો ધોધ વહેવડાવી અનેકોના મિથ્યાંધકારોને દૂર કર્યા. સદાચાર અને સુસંસ્કારોના સિંચનથી ગુજરાતની ધરતીને ગુણનિષ્પન્ન બનાવી હતી.

સિદ્ધરાજ જયસિંહ જેવા પ્રતાપી રાજાઓને પ્રતિબોધ કરી તેમને જૈન ધર્મના રાગી બનાવ્યા હતાં. તેના દ્વારા જૈન શાસનની જબરજસ્ત પ્રભાવનાઓ કરાવી હતી. આચાર્યશ્રીના ઉપદેશનું પાલન કરી સિદ્ધરાજે ‘સિદ્ધવિહાર’, ‘રાયવિહાર’ જેવા ઉત્તુંગ અને ભવ્ય જિનાલયોના સર્જન કર્યા હતા.

સિદ્ધરાજની વિનંતિથી ‘સિદ્ધ-હેમ’ નામના શબ્દાનુશાસનની રચના કરી. આ દુષ્કરસર્જનને પટ્ટહસ્તી ઉપર સ્થાપી શોભાયાત્રા દ્વારા આખા ગામમાં ફેરવી આચાર્યશ્રીની વિદ્વત્તાનું ગૌરવ આસમાને પહોંચાડ્યું. સંસ્કૃત-પ્રાકૃત-શૌરસેની-માગધી-પિશાચી-ચૂલિકાપિશાચી-અપભ્રંશ વિ. ભાષાઓનું સાંગોપાંગ બોધ કરાવતું આ વ્યાકરણ વિશ્વનું બેજોડ સર્વમાન્ય રાષ્ટ્રીય વ્યાકરણ બન્યું. ત્રણસો લહિયાઓ બેસાડી સિદ્ધરાજે આ વ્યાકરણની સેંકડો-હજારો નકલો લખાવી ગામેગામ મોકલી.

પ્રજા સુખચેનથી રહી શકે અને રાજા પણ રાજ્યને સુરાજ્ય બનાવી શકે એવા કિમિયાઓનો પ્રકાશ પાથરતાં “અર્હન્નીતિ” જેવા ગ્રંથોના સર્જનમાં પણ તેમણે ક્યાંય કચાશ છોડી નથી.

॥૨॥

યોગશાસ્ત્ર (મૂળ ૧૨૦૦ શ્લોક અને બાર હજાર શ્લોક પ્રમાણ સ્વોપજ્ઞ ટીકા સહિત) જેવા ગ્રંથો સર્જી યોગસાધના અને ધ્યાન સાધનાની દુનિયામાં દિવ્ય પ્રકાશ પાથર્યો. સાધુ અને શ્રાવક જીવનની આચારચર્યાઓને અદ્ભુત રીતે તેમાં વણી લીધી.

દશ પર્વથી અલંકૃત "ત્રિષષ્ટિ શલાકા પુરૂષ ચરિત્ર મહાકાવ્ય" સર્જન કરીને તો આ હેમચંદ્રાચાર્યે ખરેખર કમાલ કરી છે. ઉક્ત તમામ વિષયોને અને ભાવોને જાણે આ એક કાવ્યમાં સમન્વિત ન કર્યા હોય !..!..!

શું પદલાલિત્ય !... શું અદ્‌ભૂત છંદરચના ! કેવી રોચક સૂક્તિઓ ! કેવી ભાવવાહી પ્રભુ સ્તુતિઓ ! કેવા મોહક કથારસના
॥૩॥ ખળખળ વહેતા રસઝરણાં ! કોના વખાણ કરવા ? કોને ચઢિયાતા કહેવા ? બધુ જ રોચક-મોહક અને અદ્‌ભૂત રસસભર....

આ મહાકાવ્યના વાંચનથી મહાપુરૂષોના જીવન કવનનો બોધ તો થાય જ, સાથે જીવન જીવવાની કળા આત્મસાત્ થાય અને વૈરાગ્યરસની પુષ્ટિ પણ થાય.

'સિદ્ધરાજની વિનંતિથી જેમ 'સિદ્ધહેમ વ્યાકરણ'ની રચના હેમચંદ્રસૂરિજીએ કરી, તેમ વીતરાગ સ્તોત્ર-યોગશાસ્ત્ર અને ત્રિષષ્ટિ શલાકા પુરુષ ચરિત્ર જેવા ગ્રંથરત્નોના સર્જન મારા (જેવાના બોધ) માટે કર્યું છે,' એવી કુમારપાળની વાચાને આચાર્યશ્રી સ્વયં ત્રિ.શ.પુ.માં શબ્દસ્થ કરે છે.

**पूर्वं पूर्वजसिद्धराजनृपतेर्भक्तिस्पृशो याञ्चया**
**सांगं व्याकरणं सुवृत्ति–सुगमं चक्रुर्भवन्तः पुराः ।**
**मद्धेतोरथ योगशास्त्रममलं लोकाय च द्व्याश्रय–**
**श्छंदोऽलङ्कृतिनामसंग्रहमुखान्यन्यानि शास्त्राण्यपि ॥**
**लोकोपकारकरणे स्वयमेव यूयं, सज्जा स्थ यद्यपि तथाऽप्यहमर्थयेऽदः ।**
**मादृग्जनस्य प्रतिबोधकृते शलाका–पुंसां प्रकाशयत वृत्तमपि त्रिषष्टेः ॥**

આચાર્યશ્રીના મુખમાંથી સરસ્વતીને પ્રવાહ ખળખળ વહેતો, આઠ/દશ લહિયાઓ એક સાથે બેસી તેને ક્રમશઃ ઝીલતા-આલેખતા, ॥૩॥
તેઓ પરસ્પર એવી સમજૂતી કે કળાથી ગ્રંથ આલેખતા કે આખો ગ્રંથ સહજ સુંદર રીતે સંકલિત થઈ જતો.

અનેક ગ્રંથોના નૂતન સર્જન-પઠન-પાઠન, પ્રતિલિપિકરણ, જ્ઞાન પ્રચાર-પ્રસાર વિ. જ્ઞાનવર્ધક પ્રવૃત્તિઓ દ્વારા ગુજરાતને અને ખાસ કરીને ગુજરાતની રાજધાની પાટણને વિદ્યાનું ધામ બનાવ્યું.

કયો વિષય તેમના માટે વણખેડયો હતો ? એ એક સવાલ છે. શબ્દાનુશાસન-લિંગાનુશાસન-કાવ્યાનુશાસન-છંદોનુશાસન અને વાદાનુશાસન આ પાંચ અનુશાસનોનું સર્જન વિશ્વના બેજોડ સર્જન કહી શકાય.

॥૪॥ શબ્દાનુશાસન-લિંગાનુશાસન, ધાતુ પારાયણ, ઉણાદિગણપાઠ, લઘુવૃત્તિ, બૃહદ્‌વૃત્તિ, બૃહન્ન્યાસ વિ.ના સર્જન કરી શબ્દશાસ્ત્રને સમૃદ્ધ કર્યું.

અભિધાનચિંતામણિ, દેશીનામમાલા, અનેકાર્થ સંગ્રહ, નિઘંટુ શેષ આ ચાર મહાકોષો વિ.ના સર્જન કરી શબ્દાર્થશાસ્ત્રની ગરિમા વધારી છે.

કાવ્યાનુશાસન અને છંદોનુશાસનની રચના કરી છંદશાસ્ત્ર, અલંકારશાસ્ત્ર, અપભ્રંશ સાહિત્યના ખજાનાને તરબતર કરી દીધું. કવિઓ અને સાહિત્યકારો માટે આ ગ્રંથો તો જાણે પ્રાણ કરતાં ય મૂલ્યવાન બની ગયા.

બે આશ્રયવાળા દ્વયાશ્રય જેવા મહાકાવ્યની રચના તો એવી અદ્‌ભૂત રીતે કરી છે કે જેમાં સમસ્ત શબ્દાનુશાસન, સિદ્ધરાજનો દિગ્વિજય ચૌલુકયવંશનો અમર ઈતિહાસ, પાટણની પ્રશસ્તિ અને ગુજરાતની ગૌરવગાથા મૂળરાજથી માંડીને કુમારપાળ સુધીનો ગુજરાતનો ઈતિહાસ વિ. બધુ એક સાથે વણાઈ જાય અને કાવ્યની દેદિપ્યમાનતા સોળે કળાએ ખીલી ઉઠે.

પ્રમાણમીમાંસા જેવા ગ્રંથો સર્જી ન્યાયનું સતલ ઊંડાણ ખેડ્યું, તો અન્યયોગવ્યવચ્છેદ-અયોગવ્યવચ્છેદ અને વીતરાગસ્તોત્ર જેવા ગ્રંથોના નિર્માણ કરી ન્યાયની કઠણ શૈલીમાં પરમાત્મભક્તિના ભાવોને ગુંથી લીધા, ન્યાયની કર્કશ શૈલી અને ભક્તિના ભાવોને ક્યાં તાલમેળ મળે ? પણ આ જ તો તેમની ભક્તિ અને વિદ્વત્તાપૂર્ણ સર્જનકળાનો કસબ હતો.

આ થઈ તેમના સાહિત્યસર્જનની વાત...

શ્રી કલિકાલસર્વજ્ઞએ લાખોમાં એક કહી શકાય એવા ગુર્જરેશ્વર કુમારપાળ જેવા શ્રાવકરત્નનું સર્જન-ઘડતર કર્યું. ॥૪॥
અઢાર દેશમાં અભયદાનની ઉદ્‌ઘોષણા કરી, રાજ્યમાંથી સાત વ્યસનોને તિલાંજલી અપાવી. અપુત્રીઓનું ધન રાજગ્રાહ્ય બનતું અટકાવ્યું. ત્રિભુવન વિહાર-કુમારવિહાર જેવા ૧૪૪૪ ગગનચુંબી જિનચૈત્યોથી પૃથ્વીને મઢી દીધી. નિર્દોષ પશુઓના નિર્મમ બલીઓ ચઢાવવાની પ્રથા જાનના જોખમે બંધ કરાવી, લગભગ ૨૧ જેવા વિરાટ જ્ઞાનભંડારોના નિર્માણ કર્યા, સમ્યક્ત્વ

સહિત બાર વ્રત ગ્રહણ કર્યા. અનેક જર્જરિત જિનાલયોના જીર્ણોદ્ધાર કરાવ્યા, અનેક દાનશાળાઓ ખોલી, લગભગ ચૌદ કરોડ રૂપિયાનો સદ્‌વ્યય કરી નિર્ધન અને અલ્પપુન્યવાળા સાધર્મિક બંધુઓની કાયાપલટ કરી દીધી, પ્રજા ઉપરના ઘણા આકરા કરવેરાઓ માફ કરાવ્યા. શત્રુંજય-ગિરનારના છ'રી પાલિત સંઘો કઢાવ્યા. યોગશાસ્ત્ર-વીતરાગ સ્તોત્ર જેવા સૂત્રો કંઠસ્થ કર્યા.



મોટી ઉંમરે ધર્મ પામ્યા છતાં શાસનના એક એક અંગની જબરદસ્ત આરાધના કરી લીધી. શ્રી કલિકાલસર્વજ્ઞ આચાર્ય ભગવંતે આ એક પરમાર્હત્ શ્રાવકરત્નનું સર્જન કરી તેના દ્વારા જગતભરમાં અને વિશેષ કરી ગુજરાતમાં શાસનની બેજોડ પ્રભાવના કરી જૈન ધર્મનો ડંકો વગાડી દીધો હતો.

જાણવા મુજબ આ શ્રી હેમચંદ્રસૂરિજીએ પાંત્રીશ હજાર જેટલા માનવોને ધર્મોપદેશ દ્વારા નવા જૈન બનાવ્યા હતા.

આચાર્ય હેમચંદ્રસૂરિજીએ 'શિષ્યસર્જન'નું કાર્ય પૂરી ચીવટથી કર્યુ હતું. આ. બાલચંદ્રસૂરિ મ., આ. રામચંદ્રસૂરિ મ., આ. મહેન્દ્રસૂરિ મ., પં. વર્ધમાનગણિ મ., પં. ગુણચંદ્રગણિ મ., પં. યશશ્ચંદ્રગણિ મ., પં. ઉદયચંદ્રગણિ મ. મુનિ દેવચંદ્રજી, પં. ઉદયસાગરગણિ જેવા વિદ્વાન, કવિ, શાસ્ત્રમર્મજ્ઞ શિષ્યોના સર્જન કરી એક મહાન કાર્ય આચાર્યશ્રીએ કર્યુ. આચાર્યશ્રીના આ વિદ્વાન શિષ્યરત્નોએ પણ વિવિધ વિષયક અનેક ગ્રંથોના સર્જન કરી જૈન સાહિત્ય સંગ્રહને સમૃદ્ધ કરવામાં અનેરૂ યોગદાન આપ્યું છે.

વિદ્વત્તા સાથે હેમચંદ્રાચાર્યની નમ્રતા પણ ગજબ કોટીની હતી. "બધું જ્ઞાનસંપાદન ગુરુની પાસે અને તેમની કૃપાથી જ થયું છે." એવું સ્પષ્ટ તેમણે જ ત્રિ.શ.પુ.ની પ્રશસ્તિમાં જણાવ્યું છે.

**आचार्यो हेमचंद्रोऽभूत्तत्पदांभोजषट्पदः ।**
**तत्प्रसादादधिगत–ज्ञान–संपत्महोदयः ॥**

દિગ્ગજ વિદ્વાનો પણ હેમચંદ્રાચાર્યની બહુમુખી પ્રતિભાથી અત્યંત પ્રભાવિત હતા, તેમની સ્તુતિ કરતા થાકતા ન હતા, આટલી નાની જિંદગીમાં આટલું વિરાટ સર્જન કાર્ય કઈ રીતે કરી શકયા, એ બધા માટે આશ્ચર્યરૂપ હતું. ॥૫॥

**किं स्तुमः शब्दपाथोधेः हेमचंद्रयतेर्मतिम् ।**
**एकेनापि हि येनेदृक् कृतं शब्दानुशासनम् ॥**

||૬||

"એકલપંડે આટલુ સર્જન કરનારની શું સ્તુતિ કરીએ ?" એમ કહી બધા અટકી ગયા.

માતા પાહિણી અને પિતા ચાચિંગના કુળમાં આવેલ ચાંગાએ સંવત ૧૧૫૦માં પાંચ વર્ષે દીક્ષા ગ્રહણ કરી સોમચંદ્રમુનિ બન્યા. મુનિ સોમચંદ્રનું જીવન નિર્દોષ અને પવિત્ર હતું. તેમની દૃષ્ટિ નિર્મળ હતી, કચરામાં પણ સોનાના દર્શન થતા હતા.

એકદા ગુરુ સાથે નિર્ધન બનેલા શ્રેષ્ઠિપુત્રના ઘરે ગોચરી ગયા. ખૂણામાં પડેલ કચરાનો ઢગલો તેમને સોનાનો દેખાયો, તેમને થયું 'જેને ઘરે સોનાના ઢગલા છે તે આવો નિર્ધન !" ચાલાક શ્રેષ્ઠિપુત્રએ તુરંત બાલમુનિ સોમચંદ્રને કચરાના ઢગલા ઉપર બેસાડ્યા અને તે બ્રહ્મચારીના નૈષ્ઠિક સંયમ પ્રભાવથી કચરાનો ઢગલો સોનાનો બની ગયો. ત્યારપછી મુનિ સોમચંદ્ર, સોમચંદ્રને બદલે 'હેમચંદ્ર' તરીકે ખ્યાત થયા. પાછળથી આચાર્ય બનેલા મુનિ હેમચંદ્રએ રૈવતાવતાર તીર્થમાં (ખંભાતમાં) સરસ્વતીદેવીની સાધના કરી તેમને પ્રત્યક્ષ કરી હતી તેમની અનહદ કૃપા વરદાન મેળવી તેઓ ધન્ય બન્યા હતા.

વિ.સં. ૧૧૬૬માં ખંભાતનગરે પૂજ્યશ્રીની આચાર્યપદવી થઈ, ત્યારે માતા પાહિણીએ પણ દીક્ષા ગ્રહણ કરી હતી. ઉત્તમ સંયમ પાળી માતા સાધ્વીએ અંતસમયે જ્યારે પાટણમાં અણસણ કર્યું ત્યારે આચાર્યશ્રીએ પણ ત્રણ લાખ શ્લોક સર્જનનું પુન્યભેટણું આપી અપાર માતૃભક્તિ પ્રદર્શિત કરી હતી.

ગુરુકૃપા અને સરસ્વતીની મહેર, આ બે બળના જોરે તેમણે દિગ્ગજ જેવા ગણાતા દિગંબરાચાર્યને વાદમાં પછડાટ આપી હતી અને શ્વેતામ્બર સંપ્રદાયનો જયજયકાર ફેલાવ્યો હતો.

આચાર્યશ્રી બેજોડ વિદ્વાન તો હતા જ, સાથે અચ્છા જ્યોતિર્વિદ્-ભવિષ્યવેત્તા પણ હતા, એક પ્રતિષ્ઠા મહોત્સવમાં આચાર્યશ્રીએ જાહેર કર્યું હતું કે "મારું આયુષ્ય હવે માત્ર છ મહિનાનું જ બાકી છે અને મારા સ્વર્ગવાસ બાદ છ મહિના પછી કુમારપાળનું પણ મૃત્યુ થશે" અને અક્ષરશઃ તેમજ થયું હતું. ||૬||

૧૨૨૯માં પાટણમાં સંઘ સમક્ષ પોતાના આજ્ઞાંકિત અને વફાદાર શિષ્ય આ. રામચંદ્રસૂરિને પોતાની પાટ સોંપી આચાર્યશ્રી સમાધિપૂર્વક કાળધર્મ પામ્યા હતા, રાજકવિ સોમેશ્વરદેવના મોઢામાંથી તે સમયે શબ્દો સરી પડયા : **"वैदुष्यं विगताश्रयं श्रितवति श्रीहेमचंद्रे दिवम्"** આ. હેમચંદ્રસૂરિ દેવલોક પામ્યાથી વિદ્વતા જાણે આશ્રયવગરની થઈ ગઈ.

આવા મહાપુરુષ રચિત ત્રિષષ્ટિ શલાકા પુરુષ ચરિત્ર એક અદ્‌ભુત મહાકાવ્ય છે. કરૂણરસ, શૌર્યરસ, ભક્તિરસ, વૈરાગ્યરસ વિ. બધા રસોનો શ્રેષ્ઠ સમન્વય છે. છંદો સુંદર છે. અલંકાર અદ્‌ભુત છે, રચના મનોહર છે, શૈલી સરળ છે, ભાવો ગહન છે, ઉપમાઓ અલૌકિક છે, કથાઓ મનોહર છે, સૂક્તિઓ ચોટદાર છે, સ્તુતિઓ ભાવવાહી છે, દેશનાઓ અસરકારક છે, ઉપદેશો પ્રેરક છે, પદલાલિત્ય અનુપમ છે.

ટુંકમાં કહીએ તો બધું જ અદ્‌ભૂત... અદ્‌ભૂત... અદ્‌ભૂત છે.

આ ચરિત્ર દશ પર્વમાં વિભક્ત છે, પ્રત્યેક પર્વમાં અનેક સર્ગો છે, ચરિત્રમાં કથાનકો સાથે ઈતિહાસો, પૌરાણિક કથાઓ, શાસ્ત્ર અને સિધ્ધાંતની વાતો, ગહન તત્ત્વજ્ઞાન અને કર્મસિદ્ધાંતોની વાતો પણ વણી લેવામાં આવી છે.

- પહેલા પર્વમાં આદીશ્વર ભગવાન-ભરતચક્રીના ચરિત્ર
- બીજા પર્વમાં અજિતનાથ ભગવાન-સગરચક્રીના ચરિત્ર
- ત્રીજા પર્વમાં સંભવનાથ ભગવાનથી શીતલનાથ ભગવાન સુધીના ૮ ભગવાનના ચરિત્રો.
- ચોથા પર્વમાં શ્રેયાંસનાથ ભગવાનથી ધર્મનાથ ભગવાન સુધીના પાંચ તીર્થંકરો, પાંચ વાસુદેવો, પાંચ પ્રતિવાસુદેવો, પાંચ બળદેવો, મઘવા અને સનત્કુમાર ચક્રવર્તી આમ ૨૨ મહાપુરુષોના ચરિત્ર.
- પાંચમા પર્વમાં શાંતિનાથ ભગવાનનું ચરિત્ર (તેઓ તીર્થંકર અને ચક્રવર્તી બંને હતા, એટલે બે ચરિત્ર ગણત્રીમાં લેવાયા છે.)
- છટ્ઠા પર્વમાં કુંથુનાથ ભગવાનથી મુનિસુવ્રતસ્વામી સુધીના ચાર તીર્થંકર, ચાર ચક્રવર્તી, ૨ વાસુદેવ, ૨ પ્રતિવાસુદેવ, ૨ બળદેવ આમ ૧૪ મહાપુરુષોના ચરિત્ર.
- સાતમા પર્વમાં નમિનાથ ભગવાન-૧૦માં ચક્રી હરિષેણ, ૧૧માં ચક્રી જય, આઠમાં બળદેવ-વાસુદેવ - પ્રતિવાસુદેવો ક્રમશઃ રામ-લક્ષ્મણ-રાવણ આ છના ચરિત્રો છે. આ ચરિત્ર જૈન રામાયણના નામે પ્રચલિત છે.
- આઠમાં પર્વમાં નેમિનાથ ભગવાન, નવમા વાસુદેવ, બળદેવ, પ્રતિવાસુદેવ ક્રમશઃ કૃષ્ણ-બળભદ્ર અને જરાસંઘ આ ચાર મહાપુરુષના ચરિત્ર છે. ઉપરાંત-પાંડવો અને કૌરવોના ચરિત્રો પણ છે.
- નવમા પર્વમાં પાર્શ્વનાથ ભગવાન અને બ્રહ્મદત્ત ચક્રી ચરિત્ર છે.
- દશમા પર્વમાં મહાવીર ચરિત્ર છે, બીજા પર્વો કરતાં આ પર્વ મોટું છે. ૧૩ સર્ગ છે. અંતે ગ્રંથકારની પ્રશસ્તિ છે.

||૭||

સાથ સાથ શ્રણિક, કાણક, સુલસા, અભયકુમાર, ચેડારાજા, હલ્લ-વિહલ્લ, મેઘકુમાર, નંદિષેણ, ચેલ્લણા, દુર્ગંધા, આર્દ્રકુમાર, ઋષભદત્ત, દેવાનંદા, જમાલી, શતાનિક, ચંડપ્રદ્યોત, મૃગાવતી, આનંદ વિ. દશ શ્રાવક, ગોશાળો, હાલિક, પ્રસન્નચંદ્ર, દુર્દરાંક દેવ, ગૌતમ સ્વામી, પુંડરીક, કંડરીક, અંબડ, દશાર્ણભદ્ર, ધન્ના-શાલિભદ્ર, રોહિણેય, ઉદાયન, શતાનિક પુત્ર, કપિલ કેવલી, કુમારનંદી, ઉદાર્ય, કુલવાલક, કુમારપાળ વિ. અનેક ચરિત્ર ખૂબ રોચક શૈલીમાં આલેખન થયા છે.

૩૬ હજાર શ્લોક પ્રમાણ આ કૃતિમાં તીર્થંકરોની દેશનાના માધ્યમે અનેક શાસ્ત્રીય સિદ્ધાંતોની અદ્ભૂત વિવેચના કરાઈ છે. ખળખળ વહેતી સરિતાના નીર જેવા મુલાયમ અને મધુર કથાનકોની સાથે સાથે કઠણ-કર્કશ અને ગહન એવા નય-પ્રમાણના સ્વરૂપો, ક્ષેત્રસમાસ-જીવવિચાર-કર્મસ્વરૂપ, આત્મસિધ્ધિ-બાર ભાવના જેવા વિષયોને પણ સરળ શૈલીમાં રજૂ કરી આચાર્યશ્રીએ પોતાની કામણગારી વિદ્વત્તાને છતી કરી છે.

દશમાં પર્વમાં પ્રદર્શિત કરેલ કુમારપાળનું ભવિષ્યકથન અને અંતિમ ગ્રંથ સર્જન પ્રશસ્તિ આ બે વસ્તુ ઘણી મહત્ત્વની અને સૂચક છે.

આ એક મહાકાવ્યના વાંચનથી, પઠન-પાઠનથી આત્મિક સુખોની પ્રજ્ઞા સોળે કળાએ ખીલી ઉઠે છે અને સર્વતોવ્યાપી બોધ પ્રાપ્ત થાય છે એ નિર્વિવાદ વાત છે.

ત્રિષષ્ટિ એ જૈન સમાજ અને સવિશેષ સાધુ-સાધ્વીજીઓ માટે અતિલોકપ્રિય કાવ્ય છે. અધ્યયન-અધ્યાપનના ક્ષેત્રે સવિશેષ તેની ઉપયોગિતા છે.

કલિકાલસર્વજ્ઞની આ અજાયબ કાવ્યકૃતિ આજે સેંકડો વર્ષ પછી પણ આપણને ઉપલબ્ધ થઈ છે તે આપણું પ્રકૃષ્ટ પુન્ય છે.

હજુ સુધી સેંકડો વર્ષો સુધી આ સુકૃતસર્જન સુરક્ષિત રહે એ શુભાશયથી પ્રસ્તુત પ્રકાશન સાકાર થઈ રહ્યું છે.

અમારા પૂ. ગુરુદેવશ્રી વૈરાગ્યદેશનાદક્ષ આચાર્ય ભગવંત શ્રીમદ્ વિજય હેમચંદ્રસૂરીશ્વરજી મહારાજાની પ્રેરણાથી 'શ્રી જિનશાસન આરાધના ટ્રસ્ટ' જિનશાસનના સાતે ક્ષેત્રની અનુપમ ભક્તિ કરી રહ્યું છે. તેમાં પણ છેલ્લા ૧૫ વર્ષથી

॥૮॥

શ્રુતભક્તિનો મહાયજ્ઞ આરંભાયો છે. જીર્ણ-શીર્ણ થયેલા લગભગ ૨૭૫થી અધિક ગ્રંથોના જીર્ણોદ્ધાર થયા છે. અને ભારતભરના જ્ઞાનભંડારોમાં આ તમામ ગ્રંથો ભેટસ્વરૂપે મોકલાયા છે.



ત્રિષષ્ટિનાં દશે દશ પર્વના પ્રકાશનની ઘણી જ આવશ્યકતા હતી જે આજે પરિપૂર્ણ થઈ રહી છે. તે જૈન સંઘ માટે અતિ આનંદનો વિષય છે.

આવા વિરાટ પ્રકાશનકાર્ય માટે ઘણું મોટું યોગદાન જરૂરી હોય છે.

પ.પૂ. મુનિરાજશ્રી રત્નબોધિવિજયજી મ.સા.

પ.પૂ. મુનિરાજશ્રી સૌમ્યરત્નવિજયજી મ.સા.

પ.પૂ. મુનિરાજશ્રી જિનપ્રેમવિજયજી મ.સા.

આદિ મહાત્માઓએ સખત પરિશ્રમ લઈ પ્રસ્તુત પ્રકાશનને સાકાર કર્યું છે. મહાત્માઓની આ શ્રુતભક્તિ ખરેખર અનુમોદનીય છે.

પ્રાંતે એક જ કામના કે... પ્રસ્તુત કાવ્યરચનાના પઠન-પાઠનમાંથી સૌ કોઈ વૈરાગ્યભાવથી ભાવિત બનો, પ્રભુભક્તિમાં લીન બનો... રાગદ્વેષથી મુક્ત બની, શીઘ્ર મુક્તિગામી બનો... એજ

**લિ.**

**પ.પૂ. વૈરાગ્યદેશનાદક્ષ આચાર્ય ભગવંતશ્રી હેમચંદ્રસૂરીશ્વરજી મ.ના**

**વિનેય પંન્યાસ કલ્યાણબોધિવિજયજી ગણિ**

**સં. ૨૦૫૯ ભાદરવા વદ ૪ તા. ૧૪-૯-૦૩ વડોદરા**

**(૧૦૦મી ઓળી પારણા દિન)**

॥૧॥

# ॥ सूरिप्रेमाष्टकम् ॥

रचयिता : पन्यासश्रीकल्याणबोधिविजयगणी ।

(उपजातिः)

प्रकृष्टशक्तावपि मुक्तवान् हि
व्याख्यानदाने परसत्त्ववान् यः ।
ब्रह्मैकनिष्ठामनुपालनाय
पायात्स पापात् परमर्षि–प्रेमः ॥१॥

मिष्टान्नभोज्यानि फलानि यो हि
आम्रप्रमुखाण्यपि भुक्तवान्न ।
मां जिह्मजिह्वाजडनागपाशात्
पायात्स पापात् परमर्षि–प्रेमः ॥२॥

आक्रोशसोढाऽनपराधकारी
स्वरक्षणे यस्य न काऽपि वाञ्छा ।
अहो प्रशान्ति–र्नतमस्तकर्षिः
पायात्स पापात् परमर्षि–प्रेमः ॥३॥

वृद्धेऽपि काये बहुरुग्निकाये
न यस्य काङ्क्षा प्रतिकर्मणे हि ।
अन्तोऽरियोद्धा भवभीतिधर्ता
पायात्स पापात् परमर्षि–प्रेमः ॥४॥

मुग्धीकृता दृक् चरितं निरीक्ष्य
गुणैकपश्या–परिकुण्ठितापि ।
यन्नामतो सिध्यति वाञ्छितं द्राक्
पायात्स पापात् परमर्षि–प्रेमः ॥५॥

आयुःक्षयेण च्युतयोगयागः
समागतश्चैव गतश्च सेद्धुं ।
प्राणाँश्च दत्त्वा जिनशासनाय
पायात्स पापात् परमर्षि–प्रेमः ॥६॥

क्वासन्नसिद्धस्य पुनो मयाप्तिः ?
क्व तद्गुणाब्धे–र्लवलेशलब्धि ?
तथापि याचे भवरागनागात्
पायात्स पापात् परमर्षि–प्रेमः ॥७॥

यदीयसेवा इयमेव शिष्टा
यदाशयस्य प्रतिपालनैव ।
श्रीहैमचन्द्रेप्सितमेकमेव
पायात्स पापात् परमर्षि–प्रेमः ॥८॥

॥१०॥

# ॥ सूरिभुवनभान्वष्टकम् ॥

रचयिता : पन्यासश्रीकल्याणबोधिविजयगणी ।

(वसंततिलका)

सज्ज्ञानदीप्तिजननैक–सहस्रभानो !
सद्दर्शनोच्छ्र्यविधौ परमाद्रिसानो !
दुष्कर्मभस्मकरणैकमनःकृशानो !
भावाद् भजे भुवनभानुगुरो ! भवन्तम् ॥१॥

यो वर्द्धमानतपसामतिवर्द्धमान–
भावेन भावरिपुभिः प्रतियुध्यमानः ।
क्रुच्छद्मलोभरहितो गलिताभिमानो
भावाद् भजे भुवनभानुगुरो ! भवन्तम् ॥२॥

तेजः परं परमतेज इतो समस्ति
कुदृष्टिभिद्तदमिचंदनि चामिदृष्टिः ।
भूताऽपि शैलमनसां नयनेऽश्रुवृष्टिः
भावाद् भजे भुवनभानुगुरो ! भवन्तम् ॥३॥

तुभ्यं नमो भविकपङ्कजबोधभानो !
तुभ्यं नमो दुरितपङ्कविशोषभानो !
तुभ्यं नमो निबिडमोहतमोघ्नभानो !
भावाद् भजे भुवनभानुगुरो ! भवन्तम् ॥४॥

गुणैर्महानसि गुरो ! गुरुताप्रकर्ष !
पापेष्वपि प्रकृतदृष्टिपियूषवर्ष !
वृत्त्यैकपूतपरिशुद्धवचोविमर्श !
भावाद् भजे भुवनभानुगुरो ! भवन्तम् ॥५॥

कल्लोलकृद्वर–कृपा भवतो विभाति
विस्फुर्जते लसदनर्घ्यगुणाकरोऽन्तः ।
गम्भीरताऽतिजलधे ! नयनिम्नगाधे
भावाद् भजे भुवनभानुगुरो ! भवन्तम् ॥६॥

सीमानमत्र न गता न हि सा कलाऽस्ति
प्रक्रान्तदिक्सुगुणसौरभभाग्गुरोऽसि
दृष्टाश्च दोषनिकरा दशमीदशायां
भावाद् भजे भुवनभानुगुरो ! भवन्तम् ॥७॥

त्वद्पादपद्मभ्रमरेण देव !
श्रीहेमचन्द्रोक्तिकृता सदैव ।
भानो ! नुतोऽसि ननु भक्तिभावात्
त्वत्संस्मृतिसाश्रुससम्भ्रमेण ॥८॥ (इन्द्रवज्रा)

||११||

# શ્રુતસમુદ્ધારક

૧. ભાણબાઈ નાનજી ગડા, મુંબઈ(પ.પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મ.સા.ના ઉપદેશથી).

૨. શેઠ આણંદજી કલ્યાણજી, અમદાવાદ.

૩. શ્રી શાંતિનગર શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, અમદાવાદ.
(પ.પૂ. તપસમ્રાટ આચાર્યદેવ શ્રીમદ્વિજય હિમાંશુસૂરિ મ.સા.ની પ્રેરણાથી).

૪. શ્રી શ્રીપાળનગર જૈન ઉપાશ્રય ટ્રસ્ટ, વાલકેશ્વર, મુંબઈ(પ.પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્ વિજય રામચંદ્રસૂરિ મ.સા.ની દિવ્યકૃપા તથા પૂ. આચાર્યદેવ શ્રીમદ્વિજય મિત્રાનંદ સૂ.મ.સા.ની પ્રેરણાથી).

૫. શ્રી લાવણ્ય સોસાયટી શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, અમદાવાદ.(પ.પૂ. પંન્યાસજી શ્રી કુલચંદ્રવિજયજી ગણિવર્યની પ્રેરણાથી).

૬. નયનબાળા બાબુભાઈ સી. જરીવાળા હા. ચંદ્રકુમાર, મનીષ, કલ્પનેશ (પ.પૂ. મુનિરાજ શ્રી કલ્યાણબોધિ વિજયજી મ.સા. પ્રેરણાથી).

૭. કેશરબેન રતનચંદ કોઠારી હ. લલિતભાઈ (પ.પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્ વિજય જયઘોષસૂરીશ્વરજી મહારાજની પ્રેરણાથી)

૮. શ્રી શ્વેતામ્બર મૂર્તિપૂજક તપગચ્છીય જૈન પૌષધશાળા ટ્રસ્ટ, દાદર, મુંબઈ.

૯. શ્રી મુલુંડ શ્વેતામ્બર જૈન સંઘ, મુલુંડ, મુંબઈ(આચાર્યદેવ શ્રી હેમચંદ્રસૂરિ મ.સા.ની પ્રેરણાથી).

૧૦. શ્રી શાંતાક્રુઝ શ્વે. મૂર્તિ. તપાગચ્છ સંઘ, શાંતાક્રુઝ, મુંબઈ (આચાર્યદેવશ્રી હેમચંદ્રસૂરિ મ.સા.ની પ્રેરણાથી).

॥૧૨॥

||૧૩||

૧૧. શ્રી દેવકરણ મૂળજીભાઈ જૈન દેરાસર પેઢી, મલાડ (વેસ્ટ), મુંબઈ (પ.પૂ. મુનિરાજશ્રી સંયમબોધિ વિ.મ.સા.ની પ્રેરણાથી).

૧૨. સંઘવી અંબાલાલ રતનચંદ જૈન ધાર્મિક ટ્રસ્ટ, ખંભાત, (પૂ.સા.શ્રી વસંતપ્રભાશ્રીજી મ. તથા પૂ.સા.શ્રી સ્વયંપ્રભાશ્રીજી મ. તથા પૂ.સા. શ્રી દિવ્યયશાશ્રીજી મ.ની પ્રેરણાથી મૂળીબેનની આરાધનાની અનુમોદનાર્થે).

૧૩. બાબુ અમીચંદ પનાલાલ આદીશ્વર જૈન ટેમ્પલ ચેરીટેબલ ટ્રસ્ટ, વાલકેશ્વર, મુંબઈ-૪૦૦ ૦૦૬. (પૂ. મુનિરાજ શ્રી અક્ષયબોધિવિજયજી મ.સા. તથા પૂ. મુનિરાજ શ્રી મહાબોધિવિજયજી મ.સા. તથા પૂ. મુનિરાજશ્રી હિરણ્યબોધિવિજયજી મ.સા.ની પ્રેરણાથી).

૧૪. શ્રી શ્રેયસ્કર અંધેરી ગુજરાતી જૈન સંઘ, મુંબઈ(પૂ. મુનિશ્રી હેમદર્શન વિ.મ. તથા પૂ. મુનિશ્રી રમ્યઘોષ વિ.મ.ની પ્રેરણાથી).

૧૫. શ્રી જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ, મંગળપારેખનો ખાંચો, શાહપુર, અમદાવાદ. (પ.પૂ. આચાર્યદેવ શ્રી રૂચકચંદ્રસૂરિ મ.ની પ્રેરણાથી).

૧૬. શ્રી પાર્શ્વનાથ શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, સંઘાણી સ્ટેટ, ઘાટકોપર (વેસ્ટ), મુંબઈ. (પૂ. કલ્યાણબોધિવિ.મ.ની પ્રેરણાથી).

૧૭. શ્રી નવજીવન સોસાયટી જૈન સંઘ, બોમ્બે સેન્ટ્રલ, મુંબઈ. (પૂ. મુનિરાજ શ્રી અક્ષયબોધિ વિ.મ.ની પ્રેરણાથી).

૧૮. શ્રી ઘાટકોપર જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ, ઘાટકોપર (વેસ્ટ), મુંબઈ (વૈરાગ્યદેશનાદક્ષ પૂ.આ. શ્રી હેમચંદ્રસૂરિ મ.સા.ની પ્રેરણાથી).

૧૯. શ્રી કલ્યાણજી સોભાગચંદ જૈન પેઢી પિંડવાડા (રાજ.) (સિદ્ધાંતમહોદધિ સ્વ. આચાર્ય શ્રી વિજય પ્રેમસૂરીશ્વરજી મ.ના સંયમજીવનની અનુમોદનાર્થે).

||૧૩||

॥१४॥

૨૦. શ્રી આંબાવાડી શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, અમદાવાદ. (પૂ. મુનિ શ્રી કલ્યાણબોધિ વિ. મ.ની પ્રેરણાથી).

૨૧. શ્રી જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ, વાસણા, અમદાવાદ. (પૂ. આચાર્ય શ્રી નરરત્નસૂરિ મ.ના સંયમજીવનની અનુમોદનાર્થે પૂજ્ય તપસ્વીરત્ન આચાર્ય શ્રી હિમાંશુસૂરીશ્વરજી મ.સા.ની પ્રેરણાથી).

૨૨. શ્રી પ્રેમવર્ધક આરાધક સમિતિ, ધરણીધર, દેરાસર, પાલડી, અમદાવાદ. (પૂ. ગણિવર્ય શ્રી અક્ષયબોધિવિજયજી મ.ની પ્રેરણાથી).

૨૩. શ્રી મહાવીર જૈન શ્વે.મૂ.પૂજક સંઘ, પાલડી, અમદાવાદ. શેઠ કેશવલાલ મૂળચંદ જૈન ઉપાશ્રય. (પ.પૂ. આચાર્યશ્રી રાજેન્દ્રસૂરિ મહારાજની પ્રેરણાથી).

૨૪. શ્રી માટુંગા જૈન શ્વે. મૂર્તિપૂજક તપગચ્છ સંઘ એન્ડ ચેરીટીઝ, માટુંગા, મુંબઈ.

૨૫. શ્રી જીવિત મહાવીરસ્વામી જૈન સંઘ, નાંદિયા. (રાજસ્થાન) (પૂ. ગણિવર્ય શ્રી અક્ષયબોધિવિજયજી મ.સા. તથા મુનિશ્રી મહાબોધિવિજયજી મ.સા.ની પ્રેરણાથી).

૨૬. શ્રી વિશા ઓશવાળ તપગચ્છ જૈન સંઘ, ખંભાત. (વૈરાગ્યદેશનાદક્ષ પ.પૂ. આચાર્યદેવ શ્રી હેમચંદ્રસૂરિ મ.સા.ની પ્રેરણાથી).

૨૭. શ્રી વિમલનાથ જૈન દેરાસર આરાધક સંઘ, બાણગંગા, વાલકેશ્વર, મુંબઈ-૪૦૦ ૦૦૬.

૨૮. શ્રી પાલીતાણા ચાતુર્માસ આરાધના સમિતિ. (પરમપૂજ્ય વૈરાગ્ય દેશનાદક્ષ આચાર્યદેવ શ્રીમદ્ વિજય હેમચંદ્રસૂરીશ્વરજી મહારાજ સાહેબના સંવત ૨૦૫૩ના પાલીતાણા મધ્યે ચાતુર્માસ પ્રસંગે થયેલ જ્ઞાનદ્રવ્યની ઉપજમાંથી).

૨૯. શ્રી સીમંધર જિન આરાધક ટ્રસ્ટ, એમરલ્ડ એપાર્ટમેન્ટ, અંધેરી(ઈ.) મુંબઈ, (પ્રેરક-મુનિશ્રી નેત્રાનંદવિજયજી).

૩૦. શ્રી ધર્મનાથ પોપટલાલ હેમચંદ જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ, જૈનનગર, અમદાવાદ.

॥१४॥

૩૧. શ્રી કૃષ્ણનગર જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ, સૈજપુર, અમદાવાદ. (પ.પૂ. આચાર્ય વિજય હેમચંદ્રસૂરીશ્વરજી મ.સા.ના કૃષ્ણનગર મધ્યે સંવત ૨૦૫૨ના ચાતુર્માસ નિમિત્તે પ.પૂ. મુનિરાજ શ્રી કલ્યાણબોધિવિજય મ.સા.ની પ્રેરણાથી).



૩૨. શ્રી બાબુભાઈ સી. જરીવાળા ટ્રસ્ટ, નિઝામપુરા, વડોદરા-૩૯૦ ૦૦૨. (પ્રેરક - મુનિશ્રી કલ્યાણબોધિ વિજયજી મ.)

૩૩. શ્રી ગોડી પાર્શ્વનાથજી ટેમ્પલ ટ્રસ્ટ, પૂના.
(પૂ. ગચ્છાધિપતિ આચાર્યદેવ શ્રીમદ્ વિજય જયઘોષસૂરીશ્વરજી મ.સા. તથા પૂ. મુનિરાજ શ્રી મહાબોધિવિજયજી મ.સા.ની પ્રેરણાથી).

૩૪. શ્રી શંખેશ્વર પાર્શ્વનાથ જૈન શ્વેતામ્બર મંદિર ટ્રસ્ટ, ભવાની પેઠ, પુના. (પૂ. મુનિરાજ શ્રી અનંતબોધિવિજયજી મ.સા.ની પ્રેરણાથી).

૩૫. શ્રી રાંદેર રોડ જૈન સંઘ, સુરત.
(પૂ.પં. શ્રી અક્ષયબોધિ વિજયજી મ.સા.ની પ્રેરણાથી)

૩૬. શ્રી શ્વેતામ્બર મૂર્તિપૂજક તપાગચ્છ દાદર જૈન પૌષધશાળા ટ્રસ્ટ, આરાધના ભુવન, દાદર, મુંબઈ(મુનિશ્રી અપરાજિત વિ.મ.ની પ્રેરણાથી).

૩૭. શ્રી જવાહરનગર જૈન શ્વે. મૂર્તિ સંઘ, ગોરેગામ, મુંબઈ.
(પૂ.આ. શ્રી રાજેન્દ્રસૂરિ મ.સા.ની પ્રેરણાથી).

॥૧૫॥

૩૮. શ્રી કન્યાશાળા જૈન ઉપાશ્રય, ખંભાત (પૂ. પ્રવર્તિની શ્રી રંજનશ્રીજી મ.સા., પૂ. પ્રવર્તિની શ્રી ઈંદ્રશ્રીજી મ.સા.ના સંયમજીવનની અનુમોદનાર્થે પ.પૂ. સા. શ્રી વિનયપ્રભાશ્રીજી મ.સા. તથા પ.પૂ.સા. શ્રી વસંતપ્રભાશ્રીજી મ.સા.

તથા પ.પૂ. સાધ્વીજી શ્રી સ્વયંપ્રભાશ્રીજી મ.સા.ની પ્રેરણાથી).

૩૯. શ્રી માટુંગા જૈન શ્વેતામ્બર મૂર્તિપૂજક તપાગચ્છ સંઘ એન્ડ ચેરીટીઝ, માટુંગા, મુંબઈ. (પંન્યાસ પ્રવર શ્રી જયસુંદરવિજયજી ગણિવર્યની પ્રેરણાથી).

૪૦. શ્રી શંખેશ્વર પાર્શ્વનાથ શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, ૬૦ ફૂટ રોડ, ઘાટકોપર (ઈ.) (પૂ.પં. શ્રી વરબોધિવિજયજી ગણિવર્યની પ્રેરણાથી).

૪૧. શ્રી આદિનાથ શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ, નવસારી. (પ.પૂ.આ. શ્રી ગુણરત્નસૂરિ મ.ના શિષ્ય પૂ. પંન્યાસજી શ્રી પુણ્યરત્નવિજયજી ગણિવર્યની તથા પૂ.પં. યશોરત્નવિજયજી ગણિવર્યની.

૪૨. શ્રી કોઈમ્બતુર જૈન શ્વેતામ્બર મૂર્તિપૂજક સંઘ, કોઈમ્બતુર.

૪૩. શ્રી પંકજ સોસાયટી જૈન સંઘ ટ્રસ્ટ, પાલડી, અમદાવાદ. (પ.પૂ.આ. શ્રી ભુવનભાનુસૂરિ મ.સા.ની ગુરૂમૂર્તિ પ્રતિષ્ઠા પ્રસંગે થયેલ આચાર્ય પંન્યાસ-ગણિ પદારોહ દીક્ષા વગેરે નિમિત્તે થયેલ જ્ઞાનનિધિમાંથી).

૪૪. શ્રી મહાવીર સ્વામી જૈન શ્વેતામ્બર મૂર્તિપૂજક દેરાસર, પાવાપુરી, ખેતવાડી, મુંબઈ(પ્રેરક મુનિશ્રી રાજપાલવિજયજી તથા પં. શ્રી અક્ષયબોધિ વિ.મ.).

૪૫. શ્રી હીરસૂરીશ્વરજી જગદ્ગુરૂ શ્વેતામ્બર મૂર્તિપૂજક જૈન સંઘ ટ્રસ્ટ, મલાડ(પૂર્વ), મુંબઈ.

૪૬. શ્રી પાર્શ્વનાથ શ્વે. મૂર્તિપૂજક જૈન સંઘ, સંઘાણી એસ્ટેટ, ઘાટકોપર (વેસ્ટ), મુંબઈ (પ્રેરક ગણિ શ્રી કલ્યાણબોધિવિજયજી મ.).

૪૭. શ્રી મરીન ડ્રાઈવ જૈન આરાધક ટ્રસ્ટ (મુંબઈ).

૪૮. શ્રી સહસ્રફણા પાર્શ્વનાથ જૈન દેરાસર ઉપાશ્રય ટ્રસ્ટ, બાબુલનાથ મુંબઈ (ગણિવર્ય અપરાજિત વિજયજીના શિષ્ય મુનિશ્રી સત્ત્વભૂષણવિજયજીની પ્રેરણાથી).

॥૧૬॥

૪૯. શ્રી ગોવાલિયા ટેંક જૈન સંઘ મુંબઈ (પૂ. આચાર્યદેવશ્રી હેમચંદ્રસૂરિ મ.ના શિષ્ય ગણિવર્યશ્રી કલ્યાણબોધિવિજયજી મ.ની પ્રેરણાથી).

૫૦. શ્રી ધર્મનાથ પોપટલાલ હેમચંદ જૈન શ્વે. મૂ. પૂ. સંઘ જૈન નગર અમદાવાદ (પૂ. મુનિ શ્રી સત્યસુંદર વિ.ની પ્રેરણાથી).

૫૧. રતનબેન વેલજી ગાલા પરિવાર, મુલુંડ મુંબઈ (મુનિશ્રી રત્નબોધિ વિ.ની પ્રેરણાથી).

૫૨. શ્રી વિમલનાથ જૈન દેરાસર આરાધક સંઘ બાણગંગા, વાલકેશ્વર, મુંબઈ-૬. (પ્રેરક-પૂ.આ. હેમચંદ્રસૂરિ મ.)

૫૩. શ્રી વાડીલાલ સારાભાઈ દેરાસર ટ્રસ્ટ, પ્રાર્થના સમાજ, મુંબઈ (મુનિ શ્રી રાજપાલવિજયજી તથા પંન્યાસજી શ્રી અક્ષયબોધિવિજયજી ગણિ).

૫૪. શ્રી પ્રીન્સેસ સ્ટ્રીટ, લુહાર ચાલ જૈન સંઘ (પ્રેરક-ગણિ કલ્યાણબોધિ વિ.મ.)

૫૫. શ્રી ધર્મશાંતિ ચેરીટેબલ ટ્રસ્ટ, કાંદીવલી (ઈ.), (પ્રેરક : પૂ. મુનિશ્રી રાજપાલવિજયજી મ.સા., પૂ.પં. શ્રી અક્ષયબોધિવિજયજી મ.સા.).

૫૬. પૂ.સા.શ્રી સૂર્યયશાશ્રીજી તથા પૂ.સા.શ્રી સુશીલયશાશ્રીજીના પાર્લા (ઈસ્ટ) કૃષ્ણકુંજમાં થયેલ ચાતુર્માસની જ્ઞાનનિધિની આવકમાંથી.

૫૭. શ્રી પ્રેમવર્ધક દેવાસ શ્વે. મૂ.પૂ. જૈન સંઘ (દેવાસ-અમદાવાદ).

૫૮. શ્રી પાર્શ્વનાથ જૈન સંઘ, સમારોડ, વડોદરા.
(પ્રેરક : પં. શ્રી કલ્યાણબોધિવિજયજી ગણિવર્ય).

૫૯. શ્રી મુનિસુવ્રત સ્વામી જૈન દેરાસર ટ્રસ્ટ, લક્ષ્મીપુરા જૈન સંઘ, કોલ્હાપુર.
(પ્રેરક : પૂ.આ.શ્રી જયસુંદરસૂરિજી મ.ના શિષ્ય મુનિશ્રી પ્રેમસુંદરવિ.)

॥૧૭॥

||૧૮||

૬૦. શ્રી ધર્મનાથ પોપટલાલ હેમચંદ જૈનનગર શ્વે. મૂ.પૂ. જૈન સંઘ, નવા શારદામંદિર રોડ, અમદાવાદ. (પ્રેરક : પૂ. પુણ્યરતિવિજયજી મ.)

૬૧. શ્રી દિપક જ્યોતિ જૈન સંઘ, કાલા ચોકી, પરેલ, મુંબઈ. (પ્રેરક : પૂ.પં.શ્રી ભુવનસુંદરવિજયજી તથા શ્રી ગુણસુંદરવિજયજી).

૬૨. શ્રી પદ્મમણિ જૈન શ્વે. તીર્થ પેઢી પાબલ, જિ. પુના.
(પં. કલ્યાણબોધિ વિ.મ.ની વર્ધમાન તપની ૧૦૦ ઓળીની આરાધનાની અનુમોદનાર્થે).
પં. વિશ્વકલ્યાણ વિ.મ.ની પ્રેરણાથી.

૬૩. ૐકારસૂરીશ્વરજી આરાધના ભવન, સુરત. (પ્રેરક : પૂ. આ.શ્રી ગુણરત્નસૂરિજીના શિષ્ય મુનિશ્રી જિનેશરત્ન વિ.મ.).

૬૪. શ્રી ગોડી પાર્શ્વનાથ જૈન શ્વે. મૂ. પૂ. તપ. સંઘ
નાયડુ કોલોની, ઘાટકોપર (ઈસ્ટ), મુંબઈ.

૬૫. શ્રી આદીશ્વર શ્વે. મૂ.પૂ. જૈન સંઘ, ગોરેગામ, મુંબઈ.

૬૬. શ્રી આદીશ્વર જૈન શ્વે. ટ્રસ્ટ, સાલેમ.
પ્રેરક પૂ. ગચ્છાધિપતિશ્રી જયઘોષસૂરિજી મ.

૬૭. શ્રી ગોવાલિયા ટેંક જૈન સંઘ, મુંબઈ.

||૧૮||

||૧૧||

## શ્રી જિનશાસન આરાધના ટ્રસ્ટ–મુંબઈ
### દ્વારા પ્રકાશિત થયેલા ગ્રંથોની સૂચિ

૧ જીવવિચાર પ્રકરણ સટીક, દંડક પ્રકરણ સટીક, કાયસ્થિતિ સ્તોત્રાભિધાન સટીક
૨ ન્યાયસંગ્રહ સટીક
૩ ધર્મસંગ્રહ સટીક ભાગ-૧
૪ ધર્મસંગ્રહ સટીક ભાગ-૨
૫ ધર્મસંગ્રહ સટીક ભાગ-૩
૬ જીવસમાસ ટીકાનુવાદ
૭ જંબુદ્વીપ સંગ્રહણી સટીક
૮ સ્યાદ્વાદમંજરી સાનુવાદ
૯ સંક્ષેપ સમરાદિત્ય કેવળી ચરિત્ર
૧૦ બૃહત્ ક્ષેત્રસમાસ સટીક
૧૧ બૃહત્ સંગ્રહણી સટીક
૧૨ બૃહત્ સંગ્રહણી સટીક
૧૩ ચેઈયવંદણ મહાભાસ
૧૪ નયોપદેશ સટીક
૧૫ પુષ્પમાળા (મૂળ અનુવાદ)
૧૬ મહાવીરચરિયં
૧૭ મલ્લિનાથ ચરિત્ર
૧૮ વાસુપૂજ્ય ચરિત્ર
૧૯ શાંતસુધારસ સટીક
૨૦ શ્રાદ્ધગુણ વિવરણ
૨૧ તત્ત્વજ્ઞાન તરંગિણી
૨૨ ત્રિષષ્ઠિશલાકાપુરુષ ચરિત્ર પર્વ ૩/૪
૨૩ ત્રિષષ્ઠિશલાકાપુરુષ ચરિત્ર પર્વ ૫/૬
૨૪ અષ્ટસહસ્રી તાત્પર્ય વિવરણ
૨૫ મુક્તિપ્રબોધ
૨૬ વિશેષણવતીવંદન પ્રતિક્રમણ અવચૂરી
૨૭ પ્રવ્રજ્યા વિધાનકુલક સટીક
૨૮ ચૈત્યવંદન ભાષ્ય (સંઘાચાર ભાષ્ય સટીક)
૨૯ વર્ધમાનદેશના પદ્ય (ભાગ-૧ છાયા સાથે)
૩૦ વર્ધમાનદેશના પદ્ય (ભાગ-૨ છાયા સાથે)
૩૧ વ્યવહાર શુદ્ધિ પ્રકાશ
૩૨ અનેકાન્ત વ્યવસ્થા પ્રકરણ
૩૩ પ્રકરણ સંદોહ
૩૪ ઉત્પાદાદિસિદ્ધિ પ્રકરણ સટીક
૩૫ અભિધાન વ્યુત્પત્તિ પ્રક્રિયા કોશ ભાગ-૧ (ચિંતામણિ ટીકાનું અકારાદિ ક્રમે સંકલન)
૩૬ અભિધાન વ્યુત્પત્તિ પ્રક્રિયા કોશ ભાગ-૨ (ચિંતામણિ ટીકાનું અકારાદિ ક્રમે સંકલન)

||૧૧||

૩૭ પ્રશ્નોત્તર રત્નાકર (સેનપ્રશ્ન)
૩૮ સંબોધસપ્તતિ સટીક
૩૯ પંચવસ્તુ સટીક
૪૦ શ્રી જંબુસ્વામી ચરિત્ર
૪૧ શ્રી સમ્યક્ત્વ સપ્તતિ સટીક
૪૨ ગુરુ ગુણ ષટ્ત્રિંશત્ષટ્ત્રિંશિકા સટીક
૪૩ સ્તોત્ર રત્નાકર
૪૪ ઉપદેશ સપ્તતિ
૪૫ ઉપદેશ રત્નાકર
૪૬ શ્રી વિમલનાથ ચરિત્ર
૪૭ સુબોધા સમાચારિ
૪૮ શાંતિનાથ ચરિત્ર ગ્રંથ
૪૯ નવપદ પ્રકરણ સટીક ભાગ-૧
૫૦ નવપદ પ્રકરણ સટીક ભાગ-૨
૫૧ નવપદ પ્રકરણ લઘુ વૃતિ
૫૨ શ્રાદ્ધ પ્રકરણ વૃત્તિ
૫૩ શ્રી પાર્શ્વનાથ ચરિત્ર
૫૪ વિજયપ્રશસ્તિ ભાષ્ય (વિજયસેનસૂરિ ચરિત્ર)
૫૫ કુમારપાળ મહાકાવ્ય સટીક (પ્રાકૃતદ્વયાશ્રય)
૫૬ ધર્મરત્ન પ્રકરણ સટીક ભાગ-૧
૫૭ ધર્મરત્ન પ્રકરણ સટીક ભાગ-૨
૫૮ ઉપદેશ પદ ભાગ-૧
૫૯ ઉપદેશ પદ ભાગ-૨
૬૦ શ્રાદ્ધદિનકૃત્ય ભાગ-૧
૬૧ શ્રાદ્ધદિનકૃત્ય ભાગ-૨
૬૨ પાર્શ્વનાથ ચરિત્ર
૬૩ વિચાર રત્નાકર
૬૪ ઉપદેશ સપ્તતિકા
૬૫ દેવેન્દ્ર નરકેન્દ્ર પ્રકરણ
૬૬ પુષ્પ પ્રકરણ માળા
૬૭ ગુર્વાવલી
૬૮ પુષ્પ પ્રકરણ
૬૯ નેમિનાથ મહાકાવ્ય
૭૦ પાંડવ ચરિત્ર ભાગ-૧
૭૧ પાંડવ ચરિત્ર ભાગ-૨
૭૨ પાર્શ્વનાથ ચરિત્ર ગદ્ય
૭૩ હીર પ્રશ્નોત્તરાણિ
૭૪ ધર્મવિધિ પ્રકરણ
૭૫ સુપાર્શ્વનાથ ચરિત્ર ભાગ-૧
૭૬ દેવધર્મ પરીક્ષાદિ ગ્રંથો
૭૭ સુપાર્શ્વનાથ ચરિત્ર ભાગ-૨-૩
૭૮ પ્રકરણત્રયી
૭૯ સમતાશતક (સાનુવાદ)
૮૦ ઉપદેશમાળા-પુષ્પમાળા
૮૧ પૃથ્વીચંદ્ર ચરિત્ર
૮૨ ઉપદેશમાળા
૮૩ પાઈયલચ્છી નામમાલા
૮૪ દોઢસો સવાસો ગાથાના સ્તવનો
૮૫ દ્વિવર્ણ રત્નમાલા
૮૬ શાલિભદ્ર ચરિત્ર
૮૭ અનંતનાથ ચરિત્ર પૂજાષ્ટક
૮૮ કર્મગ્રંથ અવચૂરી
૮૯ ઉપમિતિ ભવ પ્રપંચ કથા ભા. ૧

॥૨૦॥

૯૦ ધર્માબિન્દુ સટીક
૯૧ પ્રશમરતિ સટીક
૯૨ માર્ગણાદ્વાર વિવરણ
૯૩ કર્મસિદ્ધિ
૯૪ જંબુસ્વામી ચરિત્ર અનુવાદ
૯૫ ચૈત્યવંદન ભાષ્ય સાનુવાદ
૯૬ ગુણવર્મા ચરિત્ર સાનુવાદ
૯૭ સવાસો દોઢસો ગાથા સ્તવનો
૯૮ દ્વાત્રિંશદ્વાત્રિંશિકા
૯૯ કથાકોષ
૧૦૦ જૈન તીર્થ દર્શન
૧૦૧ જૈન કથા સંગ્રહ ભાગ-૧
૧૦૨ જૈન કથા સંગ્રહ ભાગ-૨
૧૦૩ જૈન કથા સંગ્રહ ભાગ-૩
૧૦૪ રયણસેહર નિવકહા સટીક
૧૦૫ આરંભસિદ્ધિ
૧૦૬ નેમિનાથ ચરિત્ર ગદ્ય
૧૦૭ મોહોન્મૂલનમ્ (વાદસ્થાનમ્)
૧૦૮ શ્રી ભુવનભાનુ કેવળી ચરિત્ર (અનુવાદ)
૧૦૯ શ્રી ચંદ્રપ્રભસ્વામી ચરિત્ર (અનુવાદ)
૧૧૦ આપણા જ્ઞાનમંદિરો
૧૧૧ પ્રમાલક્ષણ
૧૧૨ આચાર પ્રદીપ
૧૧૩ વિવિધ પ્રશ્નોત્તર
૧૧૪ આચારોપદેશ અનુવાદ
૧૧૫ પટ્ટાવલી સમુચ્ચય ભાગ-૧
૧૧૬ પટ્ટાવલી સમુચ્ચય ભાગ-૨
૧૧૭ રત્નાકરાવતારિકા અનુવાદ ભાગ-૧
૧૧૮ રત્નાકરાવતારિકા અનુવાદ ભાગ-૨
૧૧૯ ચૈત્યવંદન ચોવીસી તથા પ્રશ્નોત્તર ચિંતામણી
૧૨૦ દાન પ્રકાશ (અનુવાદ)
૧૨૧ કલ્યાણ મંદિર લઘુશાંતિ સટીક
૧૨૨ ઉપદેશ સપ્તતિકા (ટીકાનુવાદ) પુસ્તક
૧૨૩ પ્રતિક્રમણ હેતુ (પુસ્તક)
૧૨૪ જૈન કુમારસંભવ મહાકાવ્ય
૧૨૫ દેવચંદ્ર સ્તનાવલિ
૧૨૬ આનંદકાવ્ય મહોદધિ ભાગ-૧
૧૨૭ શ્રી પર્યંત આરાધના સૂત્ર (અવચૂરી અનુવાદ સાથે)
૧૨૮ જિનવાણી (તુલનાત્મકદર્શન વિચાર)
૧૨૯ પ્રશ્નોત્તર પ્રદીપ ગ્રંથ
૧૩૦ પ્રાચીન કોણ ? શ્વેતામ્બર કે દિગમ્બર (ગુજરાતી)
૧૩૧ જંબૂદ્વીપ સમાસ (અનુવાદ)
૧૩૨ સુમતિ ચરિત્ર (અનુવાદ)
૧૩૩ તત્ત્વામૃત (અનુવાદ)
૧૩૪ ત્રિષષ્ઠિશલાકા પુરુષ ચરિત્ર પર્વ-૧
૧૩૫ ત્રિષષ્ઠિશલાકા પુરુષ ચરિત્ર પર્વ-૨
૧૩૬ જૈન કથા સંગ્રહ ભાગ-૪ (પ્રતાકાર સંસ્કૃત)

॥૨૧॥

॥૨૨॥

૧૩૭ જૈન કથા સંગ્રહ ભાગ-૫
(પ્રતાકાર સંસ્કૃત)
૧૩૮ જૈન કથા સંગ્રહ ભાગ-૬
(પ્રતાકાર સંસ્કૃત)
૧૩૯ જૈન ધર્મ ભક્તિ કંચનમાળા
(સાનુવાદ) ભાગ-૧
૧૪૦ જૈન ધર્મ ભક્તિ કંચનમાળા
(સાનુવાદ) ભાગ-૨
૧૪૧ શ્રીમોક્ષપદ સોપાન
(ચૌદ ગુણસ્થાનકનું સ્વરૂપ)
૧૪૨ રત્નશેખર રત્નવતી કથા
(પર્વતિથિ માહાત્મ્ય પર)
૧૪૩ ષષ્ઠિશતકમ્ (સાનુવાદ)
૧૪૪ નમસ્કાર મહામંત્ર (નિબંધ)
૧૪૫ જૈન ગોત્ર સંગ્રહ
(પ્રાચીન જૈન ઈતિહાસ સહિત)
૧૪૬ નયમાર્ગદર્શન યાને સાતનયનું
સ્વરૂપ

૧૪૭ મહોપાધ્યાયશ્રી વીરવિજયજી
મહારાજા ચરિત્ર
૧૪૮ મુક્તિ માર્ગદર્શન યાને
ધર્મપ્રાપ્તિના હેતુઓ
૧૪૯ ચેતોદૂતમ્
૧૫૦ મૂર્તિમંડન પ્રશ્નોત્તર
૧૫૧ પિંડવિશુદ્ધિ અનુવાદ
૧૫૨ નંદિસૂત્ર (મૂળ)
૧૫૩ નંદિસૂત્ર સટીક (બીજી
આવૃત્તિ)
૧૫૪ નંદિસૂત્ર ચૂર્ણિ સટીક
૧૫૫ અનુયોગ દ્વાર સટીક
૧૫૬ દશવૈકાલિક સટીક
૧૫૭ દશવૈકાલિક સટીક
૧૫૮ ઓઘનિર્યુક્તિ સટીક
૧૫૯ પિંડનિર્યુક્તિ સટીક
૧૬૦ આવશ્યક સૂત્રની ટીકા ભાગ-૧
૧૬૧ આવશ્યક સૂત્રની ટીકા ભાગ-૨
૧૬૨ આવશ્યક સૂત્રની ટીકા ભાગ-૩

૧૬૩ આવશ્યક સૂત્રની ટીકા ભાગ-૪
૧૬૪ આવશ્યક સૂત્રની ટીકા ભાગ-૧
૧૬૫ આવશ્યક સૂત્રની ટીકા ભાગ-૨
૧૬૬ આવશ્યક સૂત્રની ટીકા ભાગ-૩
૧૬૭ આવશ્યક સૂત્રની દીપિકા
ભાગ-૧
૧૬૮ આવશ્યક સૂત્રની દીપિકા
ભાગ-૨
૧૬૯ આવશ્યક સૂત્રની દીપિકા
ભાગ-૩
૧૭૦ ઉત્તરાધ્યયન સટીક ભાગ-૧
૧૭૧ ઉત્તરાધ્યયન સટીક ભાગ-૨
૧૭૨ ઉત્તરાધ્યયન સટીક ભાગ-૩
૧૭૩ જંબુદ્વીપ પ્રજ્ઞપ્તિ ભાગ-૧
૧૭૪ જંબુદ્વીપ પ્રજ્ઞપ્તિ ભાગ-૨
૧૭૫ જીવાજીવાભિગમ સૂત્ર ભાગ-૧
૧૭૬ જીવાજીવાભિગમ સૂત્ર ભાગ-૨
૧૭૭ રાજપ્રશ્નીય
૧૭૮ આચારાંગ દીપિકા

॥૨૨॥

૧૭૯ ભગવતી સૂત્ર ભાગ-૧
૧૮૦ ભગવતી સૂત્ર ભાગ-૨
૧૮૧ ભગવતી સૂત્ર ભાગ-૩
૧૮૨ પન્નવણા સૂત્ર સટીક ભાગ-૧
૧૮૩ પન્નવણા સૂત્ર સટીક ભાગ-૨
૧૮૪ ઋષિભાષિતસૂત્ર
૧૮૫ હરિભદ્રીય આવશ્યક ટીપ્પણક
૧૮૬ સૂર્યપ્રજ્ઞપ્તિ સટીક
૧૮૭ આચારાંગ દીપિકા ભાગ-૧
૧૮૮ સૂત્રકૃતાંગ દીપિકા
૧૮૯ ઠાણાંગ સટીક ભાગ-૧
૧૯૦ ઠાણાંગ સટીક ભાગ-૨
૧૯૧ અનુયોગદ્વાર મૂળ
૧૯૨ સમવાયાંગ સટીક
૧૯૩ આચારાંગ દીપિકા ભાગ-૨
૧૯૪ સૂત્રકૃતાંગ સટીક ભાગ-૧
૧૯૫ સૂત્રકૃતાંગ સટીક ભાગ-૨
૧૯૬ ભગવતી સૂત્ર
૧૯૭ કલ્પસૂત્ર પ્રદીપિકા
૧૯૮ કલ્પસૂત્ર કૌમુદિ
૧૯૯ આનંદ કાવ્ય મહોદધિ ભાગ-૩
૨૦૦ શ્રી શ્રુતજ્ઞાન અમીધારા
૨૦૧ ઉત્તરાધ્યયન સૂત્રમૂળ
૨૦૨ ઉપધાન વિધિ પ્રેરક વિધિ
૨૦૩ હીરસ્વાધ્યાય ભાગ-૧
૨૦૪ હીરસ્વાધ્યાય ભાગ-૨
૨૦૫ ચૈત્યવંદનાદિ ભાષ્યત્રયી (વિવેચન)
૨૦૬ ભોજપ્રબંધ
૨૦૭ શ્રી વસ્તુપાલ ચરિત્ર (ભાષાંતર)
૨૦૮ શ્રી યોગબિંદુ સટીક
૨૦૯ ગુરુ ગુણ રત્નાકર કાવ્યમ્
૨૧૦ જગદ્ગુરુ કાવ્યમ્
૨૧૧ યોગદૃષ્ટિસમુચ્ચય (અનુવાદ)
૨૧૨ જૈન જ્યોતિર્ગ્રંથ સંગ્રહ
૨૧૩ પ્રમાણ પરિભાષા
૨૧૪ પ્રમેય રત્નકોષ
૨૧૫ જૈન સ્તોત્ર સંગ્રહ ભાગ-૨
૨૧૬ શ્રી યોગદૃષ્ટિસમુચ્ચય (ભાવાનુવાદ)
૨૧૭ નવસ્મરણ (ઈંગ્લીશ સાર્થ અનુવાદ)
૨૧૮ આઠ દૃષ્ટિની સજ્ઝાય
૨૧૯ આગમસાર (દેવચંદ્રજી)
૨૨૦ નયચક્રસાર (દેવચંદ્રજી)
૨૨૧ ગુરુ ગુણષટ્ત્રિંશિકા (દેવચંદ્રજી)
૨૨૨ પંચકર્મગ્રંથ (દેવચંદ્રજી)
૨૨૩ વિચાર સાર (દેવચંદ્રજી)
૨૨૪ શ્રી પર્યુષણ પર્વાદિક પર્વોની કથાઓ
૨૨૫ વિમળ મંત્રીનો રાસ
૨૨૬ બૃહત્ સંગ્રહણી અંતર્ગત યંત્રોનો સંગ્રહ
૨૨૭ દમયંતી સંગ્રહ
૨૨૮ બૃહત્સંગ્રહણી યંત્ર
૨૨૯ જૈન સ્તોત્ર સંગ્રહ
૨૩૦ યશોધર ચરિત્ર

॥२३॥

||૨૪||

૨૩૧ ચદ્રવારશુભાદ કથા ચતુષ્ટયમ્
૨૩૨ વિજયાનંદ અભ્યુદયમ્ મહાકાવ્ય
૨૩૩ જૈનધર્મવરસ્તોત્ર-ગોધૂલિકાર્થ-સભાચમત્કારેતિ
૨૩૪ અનેકાર્થ રત્નમંજૂષા
૨૩૫ સિરિપાસનાહચરિયં
૨૩૬ સમ્યક્ત્વ કૌમુદી (ભાષાંતર)
૨૩૭ વિમલનાથ ચરિત્ર (અનુવાદ)
૨૩૮ જૈન કથારત્નકોષ ભાગ-૧ (અનુવાદ)
૨૩૯ જૈન કથારત્નકોષ ભાગ-૨
૨૪૦ જૈન કથારત્નકોષ ભાગ-૩
૨૪૧ શત્રુંજય તીર્થોદ્ધાર (અનુવાદ)
૨૪૨ જૈન સ્તોત્ર તથા સ્તવનસંગ્રહ સાર્થ
૨૪૩ વસ્તુપાલ ચરિત્ર
૨૪૪ સિદ્ધપ્રાભૃત સટીક
૨૪૫ સૂક્તમુક્તાવલી
૨૪૬ નલાયનમ્ (કુબેરપુરાણમ્)
૨૪૭ બંધહેતુદયત્રિભંગી પ્રકરણાદિ
૨૪૮ ધર્મપરીક્ષા
૨૪૯ આગમીય સૂક્તાવલ્યાદિ
૨૫૦ જૈન તત્ત્વસાર સટીક
૨૫૧ ન્યાયસિદ્ધાંતમુક્તાવલી
૨૫૨ હૈમધાતુપાઠ
૨૫૩ નવીન પૂજા સંગ્રહ
૨૫૪ સિદ્ધચક્રારાધન વિધિ વિ. સંગ્રહ
૨૫૫ નાયાધમ્મકહાઓ (પુસ્તક)
૨૫૬ પ્રમાણનયતત્વાલોકાલંકાર (સાવ.)
૨૫૭ તત્ત્વાર્થધિગમસૂત્ર (ગુજરાતી)
૨૫૮ વિચાર સપ્તતિકા સટીક -વિચારપંચાશિકા સટીક
૨૫૯ અધ્યાત્મસાર સટીક
૨૬૦ લીલાવતી ગણિત
૨૬૧ સંક્રમકરણ ભા. ૧ પુસ્તક
૨૬૨ સંક્રમકરણ ભાગ ૨ પુસ્તક
૨૬૩ ભક્તામરસ્તોત્રમ્ પ્રત
૨૬૪ ષટ્સ્થાનકપ્રકરણ પ્રત
૨૬૫ સુવ્રતઋષિકથાનક- સંવેગદ્રુમકંદલી
૨૬૬ શ્રી શત્રુંજય મહાતીર્થોદ્ધાર (મૂળ)
૨૬૭ જીવાનુશાસનમ્
૨૬૮ પ્રબંધ ચિંતામણી (હિન્દી ભાષાંતર)
૨૬૯ દેવચંદ્ર ભાગ-૨
૨૭૦ ભાનુચંદ્રગણિત
૨૭૧ દિગ્વિજય મહાકાવ્ય
૨૭૨ વિજ્ઞપ્તિ લેખ સંગ્રહ
૨૭૩ આબૂ ભાગ-૧
૨૭૪ આબૂ ભાગ-૨
૨૭૫ આબૂ ભાગ-૩
૨૭૬ આબૂ ભાગ-૪
૨૭૭ આબૂ ભાગ-૫
૨૭૮ ન્યાયાપ્રકાશ
૨૭૯ શોભનસ્તુતિ
૨૮૦ ઋષભપંચાશિકા
૨૮૧ કુમારવિહારશતકમ્

||૨૪||

# अष्टमपर्वणि विषयानुक्रमः ।

## श्रीनेमिनाथजिन–कृष्णवासुदेव–बलभद्रबलदेव–जरासंधप्रतिवासुदेव–चरितम् ।


| क्र. | विषयः । | पृष्ठ क्र. |
|---|---|---|
| | प्रथमः सर्गः । | |
| १ | पूर्वभवचरिते प्रथमो धनभवः । | १–११ |
| २ | पूर्वभवचरिते द्वितीयो देवलोकभवः । | १२ |
| ३ | पूर्वभवचरिते तृतीयो चित्रगतिविद्याधरभवः । | १३–२० |
| ४ | पूर्वभवचरिते चतुर्थो देवभवः । | २१ |
| ५ | पूर्वभवचरिते पञ्चमोऽपराजितभवः । | २२–३५ |
| ६ | पूर्वभवचरिते षष्ठो देवभवः । | ३६ |
| ७ | पूर्वभवचरिते सप्तमः शंखभवः । | ३७–४१ |
| ८ | पूर्वभवचरितेऽष्टमो देवभवः । | ४२ |
| | द्वितीयः सर्गः । | |
| ९ | यदुवंशोत्पत्तिः । | ४३ |
| १० | वसुदेवस्य पूर्वभवचरिते नंदिषेणभवः । | ४४–४६ |
| ११ | कंसस्य पूर्वभवः । | ४७ |
| १२ | कंसजन्म । | ४८ |
| १३ | वसुदेवकंसयोर्मिलनम् । | ४९–५० |


॥२५॥

| क्र. | विषयः । | पृष्ठ क्र. |
|---|---|---|
| १४ | कंसेन राज्यग्रहणम् । | ५१–५२ |
| १५ | वसुदेवस्य विदेशगमनम् । | ५३ |
| १६ | वसुदेवस्य विद्याधरकन्यया सह विवाहः । | ५४–५५ |
| १७ | वसुदेवस्य गन्धर्वसेनया सह विवाहः । | ५६–५७ |
| १८ | गन्धर्वसेनावृत्तान्तः । | ५८—६६ |
| १९ | वसुदेवस्य नीलयशसा सह विवाहः । | ६७–६८ |
| २० | वसुदेवस्य सोमश्रिया सह विवाहः । | ६९ |
| २१ | इन्द्रजालिकेन वसुदेवस्य हरणम् । | ७० |
| २२ | नारदोत्पत्तिः । | ७१ |
| २३ | वसुदेवस्य राजपुत्रीभिः विवाहः । | ७२ |
| २४ | वसुदेवस्य सार्थवाहकन्यया विवाहः । | ७३ |
| २५ | वसुदेवस्य नृपपुत्र्या विवाहः । | ७४–७५ |
| २६ | वसुदेवस्य मदनवेगया विवाहः । | ७६ |
| २७ | मदनवेगा वृत्तान्तः । | ७७ |
| २८ | जरासंधपुरुषैर्वसुदेवग्रहणम् । | ७८ |
| २९ | वेगवतीवृत्तान्तः । | ७९–८० |
| ३० | एणीपुत्रवृत्तान्तः । | ८१–८५ |
| ३१ | वसुदेवस्य प्रियङ्गुसुन्दर्या विवाहः । | ८६ |
| ३२ | वसुदेवस्य प्रज्ञप्त्यादिविद्याप्तिः । | ८७ |


॥२६॥

| क्र. | विषयः । | पृष्ठ क्र. |
|---|---|---|
| ३३ | वसुदेवस्य प्रभावत्योपयमनम् । | ८८ |
| | तृतीयः सर्गः । | |
| ३४ | नल–दमयंत्योः पूर्वभवः । | ८९–९२ |
| ३५ | कनकवत्या वसुदेवेऽनुरागः । | ९३–९५ |
| ३६ | कनकवती स्वयंवरः । | ९६–१०६ |
| ३७ | नलदमयंतीपूर्वभवचरिते मम्मणवीरमतिभवः । | १०७ |
| ३८ | नलदमयंतीपूवभवचरिते धन्यधूसरीभवः । | १०८–११० |
| ३९ | नलदवदंती(दमयंती) जन्म । | १११–११२ |
| ४० | दवदंत्या यौवनम् । | ११३–११४ |
| ४१ | दवदंत्या स्वयंवरः । | ११५–१२० |
| ४२ | नलकदंबयोर्युद्धम् । | १२१–१२३ |
| ४३ | द्यूते कूबरेण नलस्य पराजयः । | १२४–१२५ |
| ४४ | नलदवदंत्योर्देशत्यागः । | १२६–१२९ |
| ४५ | नलेन वने कृतो दवदंतीत्यागः । | १३०–१३३ |
| ४६ | दवदंतीसतीत्वप्रभावः । | १३४–१३७ |
| ४७ | दवदंत्या तापसादीनां प्रतिबोधः । | १३८–१३९ |
| ४८ | सिंहकेसरिणो मुनेः केवलज्ञानम् । | १४० |
| ४९ | कर्परदेववृत्तान्तः । | १४१–१४३ |


॥२७॥

||२८||


| क्र. | विषयः । | पृष्ठ क्र. |
|---|---|---|
| ५० | दवदंत्या सप्तसंवत्सरं यावद् गुहायां वसनम् । | १४४ |
| ५१ | दवदंत्या अज्ञातवासः । | १४५–१४९ |
| ५२ | मातृस्वस्रा दवदंतीति ज्ञानम् । | १५०–१५५ |
| ५३ | दवदंत्या पितृमिलनम् । | १५६–१५७ |
| ५४ | सर्पदंशेन नलस्य कुब्जीभवनम् । | १५८–१६० |
| ५५ | नलस्य सूपकाररुपेण वसनम् । | १६१–१६४ |
| ५६ | दवदंत्या अलिकसंवत्सरः । | १६४–१६८ |
| ५७ | नलदवदंत्योर्मिलनम् । | १६९–१७२ |
| ५८ | वसुदेव–कनकवत्योर्विवाहः । | १७३ |
| | **चतुर्थः सर्गः ।** | |
| ५९ | रोहिणीस्वयंवरः । | १७४–१७५ |
| ६० | समुद्रविजय–वसुदेवयोर्मिलनम् । | १७६–१७८ |
| | **पञ्चमः सर्गः ।** | |
| ६१ | बलदेववासुदेवपूर्वभवचरिते ललिताङ्गदत्तभवः । | १७९–१८० |
| ६२ | बलदेव जन्म । | १८१ |
| ६३ | नारदोत्पत्तिः । | १८२ |
| ६४ | वसुदेव–देवक्योर्विवाहः । | १८३–१८४ |
| ६५ | कंसेन छद्मना वसुदेव–देवकी–प्रतारणम् । | १८५–१८६ |


||२८||

||२९||


| क्र. | विषयः । | पृष्ठ क्र. |
|---|---|---|
| ६६ | कृष्णस्य जन्मादि । | १८७–१९१ |
| ६७ | श्रीनेमिनाथजन्मादि । | १९२–१९३ |
| ६८ | कंसेन कृष्णप्रवृत्ति परिज्ञानम् । | १९४–१९७ |
| ६९ | कृष्णबलरामयोर्मथुरागमनम् । | १९८–२०१ |
| ७० | कंसवधः । | २०२–२०३ |
| ७१ | जरासंधस्य कृष्णरामयोर्वधाय यत्नकरणम् । | २०४–२०८ |
| ७२ | द्वारिकानिर्माणम् । | २०९–२१२ |
| | षष्ठः सर्गः । | |
| ७३ | नारदस्यावज्ञा । | २१३–२१४ |
| ७४ | कृष्ण–रुक्मिणी–विवाहः । | २१५–२१८ |
| ७५ | कृष्णस्य जांबवती–लक्ष्मणा–सुसीमा–पद्मावती–गान्धारीभिः सह विवाहः । | २१९–२२१ |
| ७६ | प्रद्युम्नजन्म । | २२२–२२४ |
| ७७ | प्रद्युम्नपूर्वभवः । | २२५–२३० |
| ७८ | रुक्मिणीपूर्वभवः । | २३१–२३२ |
| ७९ | द्रौपदीस्वयंवरः । | २३३–२३४ |
| ८० | द्रौपदीपूर्वभवः । | २३५–२४० |
| ८१ | पाण्डवानां वनवासः । | २४१ |
| ८२ | प्रद्युम्नस्य विद्याप्राप्तिर्मातृवञ्चनं पितृभ्यां मिलनं च । | २४२–२५१ |


||२९||

| क्र. | विषयः । | पृष्ठ क्र. |
|---|---|---|
| | **सप्तमः सर्गः ।** | |
| ८३ | जांबवतीसत्यभामयोर्पुत्रप्राप्तिः । | २५२–२५४ |
| ८४ | प्रद्युम्नवैदर्भीविवाहः । | २५५–२५८ |
| ८५ | शांबविवाहः । | २५९–२६१ |
| ८६ | कृष्णजरासंधयुद्धम् । | २६२–२८७ |
| ८७ | कृष्णस्य त्रिखण्डेश्वरत्वम् । | २८८–२९१ |
| ८८ | सागरचन्द्र–कमलामेला–विवाहः । | २९२–२९५ |
| | **नवमः सर्गः ।** | |
| ८९ | नेमिकृष्णयोर्बलपरीक्षा । | २९६–२९८ |
| ९० | कृष्णान्तःपुरेण नेमिकुमारस्य विवाहाय प्रेरणम् । | २९९–३०४ |
| ९१ | श्रीनेमिकुमारविवाहोत्सवः । | ३०५–३११ |
| ९२ | श्रीनेमिदीक्षा । | ३१२–३१५ |
| ९३ | राजीमतिकृतो रथनेमिप्रतिबोधः । | ३१६ |
| ९४ | श्रीनेमिजिनस्य कैवल्यं देशना च । | ३१७–३२६ |
| | **दशमः सर्गः ।** | |
| ९५ | द्रौपदीहरणम् । | ३२७–३२९ |
| ९६ | द्रौपद्यानयनम् । | ३३०–३३३ |
| ९७ | देवक्या देवप्रभावेण पुत्रप्राप्तिः । | ३३४–३३६ |


॥३०॥

| क्र. | विषयः । | पृष्ठ क्र. |
|---|---|---|
| ९८ | गजसुकुमालदीक्षा । | ३३७–३३८ |
| ९९ | देवकृता कृष्णपरीक्षा । | ३३९–३४२ |
| १०० | कृष्णस्य स्वसुताप्रतिबोधः । | ३४३–३४४ |
| १०१ | कृष्णेन तीर्थकृन्नामकर्मार्जनम् । | ३४५ |
| १०२ | ढंढणकुमारदीक्षा । | ३४६–३४७ |
| १०३ | रथनेमिप्रतिबोधः। | ३४८–३४९ |
| | एकादशः सर्गः । | |
| १०४ | द्वारिकाविनाशः । | ३५०–३५९ |
| १०५ | कृष्णस्य मरणम् । | ३५९–३६२ |
| | द्वादशः सर्गः । | |
| १०६ | बलदेवस्य विलापः दीक्षा स्वर्गगमनं च । | ३६४–३७० |
| १०७ | श्रीनेमिनाथनिर्वाणं पाण्डवनिर्वाणं च । | ३७१–३७४ |


## नवमपर्वणि विषयानुक्रमः ।


| क्र. | विषयः । | पृष्ठ क्र. |
|---|---|---|
| | प्रथमः सर्गः । | |
| | ब्रह्मदत्तचक्रिचरितम् । | |
| १ | ब्रह्मदत्तचक्रिणः पूर्वभवाः । | १–८ |


॥३१॥

| क्र. | विषयः । | पृष्ठ क्र. |
|---|---|---|
| २ | ब्रह्मदत्तजन्म । | ९ |
| ३ | दीर्घचुलन्योर्दुराचारः । | १०-११ |
| ४ | ब्रह्मदत्तवधप्रयासः । | १२-१५ |
| ५ | ब्रह्मदत्तस्य पलायनं विवाहः भ्रमणं च । | १६-३५ |
| ६ | ब्रह्मदत्तस्य षट्खण्डेश्वरत्वम् । | ३६-४५ |
| ७ | ब्रह्मदत्तस्यान्धीकरणं नरकगमनं च । | ४६-४८ |
| | **श्रीपार्श्वनाथचरितम् ।** | |
| | **द्वितीयः सर्गः ।** | |
| ८ | पूर्वभवचरिते प्रथमो मरुभूतिभवः । | ४९-५२ |
| ९ | पूर्वभवचरिते द्वितीयो हस्तिभवः । | ५३-५६ |
| १० | पूर्वभवचरिते तृतीयो देवभवः । | ५७ |
| ११ | पूर्वभवचरिते चतुर्थः किरणवेगविद्याधरभवः । | ५८-५९ |
| १२ | पूर्वभवचरिते पञ्चमो देवभवः । | ६० |
| १३ | पूर्वभवचरिते षष्ठो वज्रनाभभवः । | ६१-६३ |
| १४ | पूर्वभवचरिते सप्तमो देवभवः । | ६४ |
| १५ | पूर्वभवचरितेऽष्टमो सुवर्णबाहुचक्रिभवः । | ६५-७२ |
| १६ | पूर्वभवचरिते नवमो देवभवः । | ७३ |


॥३२॥

| क्र. | विषयः । | पृष्ठ क्र. |
|---|---|---|
| | **तृतीयः सर्गः ।** | |
| १७ | पार्श्वप्रभोश्च्यवनं जन्मादि च । | ७४–७८ |
| १८ | पार्श्वकुमारस्य विवाहः । | ७९–९० |
| १९ | पार्श्वकुमारस्य दीक्षा । | ९१–९२ |
| २० | मेघमालिकृतोपसर्गः । | ९३–९६ |
| २१ | पार्श्वजिनस्य केवलज्ञानं देशना च । | ९७–१०३ |
| | **चतुर्थः सर्गः ।** | |
| २२ | सागरदत्तस्य विवाहः । | १०४–१०५ |
| २३ | सागरदत्तस्य दीक्षा । | १०६–१०७ |
| २४ | बन्धुदत्तस्य विवाहः विदेशप्रेषणं च । | १०८–१११ |
| २५ | बन्धुदत्तस्य स्वदेशं प्रति प्रयाणम् । | ११२–१२२ |
| २६ | बन्धुदत्तस्य स्वदेशगमनम् । | १२३ |
| २७ | बन्धुदत्तपूर्वभवकथनम् । | १२४–१२६ |
| २८ | बन्धुदत्तदीक्षा । | १२७ |
| २९ | पार्श्वजिनस्य निर्वाणम् । | १२९ |


॥३३॥

# अष्टमपर्वान्तर्गतानि सुभाषितानि ।




| क्र. | सुभाषितम् । | पृष्ठ क्र. |
|---|---|---|
| १ | को हि दीपे सत्यग्निमीक्षते । | ६ |
| २ | अर्थः स्वभावसंसिद्धो न हि याञ्चामपेक्षते । | ८ |
| ३ | धर्मः करणीयः शुभैषिणा । | ११ |
| ४ | मंत्रशक्तेर्हि नावधिः । | १४ |
| ५ | महतामन्वयं श्रोतुं कस्य नोत्कण्ठते मनः । | १४ |
| ६ | को वस्तुमिच्छेदीदृक्षे संसारेऽत्यन्तदारुणे । | १६ |
| ७ | अतुल्यरुपलावण्यः कस्य चित्रीयते न हि । | २० |
| ८ | अन्यायी यदि वा न्यायी, त्रातव्यः शरणागतः । | २२ |
| ९ | विना सिंहकिशोरेण को ह्यलं हंत दन्तिने । | २३ |
| १० | कामान्धा किं न कुर्वते । | २६ |
| ११ | बहुरत्ना हि भूरियम् । | ३२ |
| १२ | पूर्वजन्मनिदानं हि नान्यथा जातु जायते । | ५२ |
| १३ | रहस्यं खलु नारीणां हृदये न चिरं स्थिरम् । | ५३ |
| १४ | पुण्यैः किं न हि सिद्ध्यति । | ७७ |
| १५ | शर्करातोऽपि मधुरा वार्तार्धकथिता सती । | ९२ |


॥३४॥

| क्र. | सुभाषितम् । | पृष्ठ क्र. |
|---|---|---|
| १६ | सूत्थाना हि नरोत्तमाः । | ९४ |
| १७ | धर्मकर्म बह्वन्तरायकम् । | १०७ |
| १८ | धर्मजुषां न किम् । | १०७ |
| १९ | महिषीचारणं ह्याद्यमाभीराणां कुलव्रतम् । | १०८ |
| २० | पलायनमपि श्रेयो यस्योदर्कोऽतिनिर्मलः । | १२३ |
| २१ | निरीहस्य हि किं नृपः । | १२३ |
| २२ | ज्येष्ठपत्नी हि मातृवत् । | १२५ |
| २३ | सतीनां नास्ति दुष्करम् । | १२५ |
| २४ | कुर्यात् पुरुषकारः किं दैवे वक्रत्वमीयुषि । | १२९ |
| २५ | सूर्योऽस्तमाप कथयन्निव संपदनित्यताम् । | १२९ |
| २६ | शीलं सतीनां सर्वाङ्गरक्षामंत्रो हि शाश्वतः । | १३० |
| २७ | दुर्दशापतितानां हि स्त्रीणां धैर्यगुणः कुतः ? | १३३ |
| २८ | चिरं न हि नर्मापि शर्मदम् । | १३३ |
| २९ | पतिं विनाऽपि तद्वेश्माऽभिभवायैव योषिताम् । | १३३ |
| ३० | सर्वत्र कुशलं तासां स्त्रीणां या स्युः प्रतिव्रताः । | १३४ |
| ३१ | सुलभा धनिनां हि भिः । | १३४ |
| ३२ | अवाप्तक्षीरपाणाय कस्मै रोचेत कांजिका । | १३९ |
| ३३ | क्रोधो दुःखानुबन्धकः । | १४१ |


॥३५॥

| क्र. | सुभाषितम् । | पृष्ठ क्र. |
|---|---|---|
| ३४ | तपःक्लेशसहानां हि न मोक्षोऽपि दवीयसि । | १४२ |
| ३५ | महाभयं प्राणभयं सर्वेषामपि देहिनाम् । | १४४ |
| ३६ | अप्येकाहपरिव्रज्यावश्यं स्वर्गापवर्गदा । | १४४ |
| ३७ | दैवं दुर्बलघाति हि । | १४५ |
| ३८ | महर्द्धय इवामोघवचना हि पतिव्रताः । | १४५ |
| ३९ | प्रमाणमंतःकरणं खल्विष्टानिष्टनिर्णये । | १५० |
| ४० | कियत् क्षेमं दुरात्मनाम् । | १५२ |
| ४१ | सेवां मनस्वी कः कुर्यात् कुर्याद् वा तर्हि भूपतेः । | १५२ |
| ४२ | नारीणामातुरत्वे हि न दूरे नयनोदकम् । | १५४ |
| ४३ | न कश्चिद्बलवान् विधेः । | १५६ |
| ४४ | इष्टे दृष्टे नवमिव दुःखं भवति देहिनाम् । | १५७ |
| ४५ | जीवन् हि प्राणी भद्राणि पश्यति । | १५८ |
| ४६ | भाग्ये हि विजयो नृणां पाणिपद्मे मरालति । | १७१ |
| ४७ | स्नेहो हि याति जन्मशतान्यपि । | १७३ |
| ४८ | पिता बाल्ये हि शासिता । | १७५ |
| ४९ | स्वयंवरे कन्यकानां प्रमाणं हि वृत्तो नरः । | १७५ |
| ५० | मुदे हि स्वो गुणाधिकः । | १७७ |
| ५१ | मोघीभवेद्वज्रमपि न पुनर्मुनिभाषितम् । | १८४ |


॥३६॥

| क्र. | सुभाषितम् । | पृष्ठ क्र. |
|---|---|---|
| ५२ | न मायापि पाप्मने भ्रूणरक्षणात् । | १८७ |
| ५३ | न खलु स्वामिशासने युक्तायुक्तविचारोऽर्हः सेवकानां कदाचन । | २०५ |
| ५४ | प्रातस्तनितमब्दानां किं वा भवति निष्फलम् ? | २१५ |
| ५५ | उद्भ्रान्तस्य महांभोधेः सानुमंतोऽपि के पुरः ? | २८५ |
| ५६ | परेषामेव शस्त्राणि स्वकानि स्युर्महात्मनाम् । | २८७ |
| ५७ | विभिन्ना कर्मणां गतिः । | ३०५ |
| ५८ | प्राणभयं सर्वेषां हि महद्भयम् । | ३०९ |
| ५९ | स्वयं स्वं कर्म भुज्यते । | ३११ |
| ६० | सर्वोऽपि विमृशन् वेत्ति विमृशेद्विरलः पुनः । | ३१२ |
| ६१ | महतां प्रतिपन्नं हि यावज्जीवमपि स्थिरम् । | ३१३ |
| ६२ | कन्यादानं सकृत् खलु । | ३१४ |
| ६३ | पशवोऽपि हि धन्यास्ते स्वयं स्वापत्यलालकाः । | ३३६ |
| ६४ | महद्भिः किं दुरासदम् ? । | ३४० |
| ६५ | मद्यमूलो ह्यनर्थः स्यादिति मद्यं न्यवारयत् । | ३५१ |
| ६६ | दुर्लंघ्या भवितव्यता । | ३५६ |
| ६७ | सुप्तप्रमत्तभ्रूणर्षिस्त्रीषु हि प्रहरेत कः ? । | ३६४ |
| ६८ | नैवाऽन्यथा सर्वज्ञभाषितम् । | ३६६ |


॥३७॥

||३८||

# परिशिष्टः ।

## नवमपर्वान्तर्गतानि सुभाषितानि ।


| क्र. | सुभाषितम् । | पृष्ठ क्र. |
|---|---|---|
| १ | अपकारिष्वपि कृपा सतां किं नोपकारिषु ? | २ |
| २ | चित्रा हि चित्तवृत्तिः शरीरिणाम् । | २ |
| ३ | स्वर्गाय जायतेऽवश्यमप्येकाहकृतं तपः । | २ |
| ४ | जनो हि जीवितव्यार्थी तन्नास्ति न करोति यत् । | ३ |
| ५ | सहेत कः स्वदारेषु पारदारिकविप्लवम् । | ३ |
| ६ | अलंघ्या भवितव्यता । | ६ |
| ७ | आदरेण गृहीतं हि किं वा न स्यान्मनस्विनाम् । | ६ |
| ८ | संभोगभूमयोऽपि स्युस्तपसे शान्तचेतसाम् । | ६ |
| ९ | पापाः सर्वत्र शंकिताः । | ६ |
| १० | क्षीरपाणमिवाहीनामपकारोऽसतां यतः । | ६ |
| ११ | आपोऽपि तप्यन्ते वह्नितापतः । | ७ |
| १२ | उत्तिष्ठति यतो वह्निस्तत्र विध्यापयेत् सुधीः । | ७ |
| १३ | भवादृशाः (मुनयः) समदृशो ह्यपकार्युपकारिषु । | ७ |
| १४ | मान्यं हि गुरुशासनम् । | ८ |
| १५ | छलान्वेषी हि मन्मथः । | ९ |


||३८||

| क्र. | सुभाषितम् । | पृष्ठ क्र. |
|---|---|---|
| १६ | विषयेच्छा बलीयसी । | ९ |
| १७ | आधिपत्यं हि प्रायोऽन्धंकरणं नृणाम् । | १० |
| १८ | दुर्वाराणीन्द्रियाणि हि । | ११ |
| १९ | अहो सर्वंकषः स्मरः । | ११ |
| २० | सत्यो हि विरलाः स्त्रियः । | ११ |
| २१ | पोषकस्यापि नात्मीयो मार्जार इव दुर्जनः । | ११ |
| २२ | तिरश्चोऽपि हि रक्षन्ति पुत्रान् प्राणानिवात्मनः । | १२ |
| २३ | धीमद्भ्यः को न शंकते ? । | १३ |
| २४ | कुतो निद्रा महात्मनाम् ? । | १४ |
| २५ | प्रायस्तेजोऽनुमानेन जायन्ते प्रतिपत्तयः । | १५ |
| २६ | भोगिनामुपतिष्ठन्ते भोगाः काममचिन्तिताः । | १६ |
| २७ | एकत्रावस्थानं सद्विषां कुतः । | १६ |
| २८ | समये खलु पौरुषम् । | १६ |
| २९ | तापसा ह्यतिथिप्रियाः । | १६ |
| ३० | प्रमाणमन्तःकरणं अविज्ञातेऽपि वस्तुनि । | १६ |
| ३१ | अन्यथा चिन्तितं कार्यं दैवं घटयतेऽन्यथा । | २० |
| ३२ | आकृत्यैव हि तत्सर्वं विदन्ति ननु तद्विदः । | २१ |
| ३३ | नवीभवन्ति दुःखानि संजाते हीष्टदर्शने । | २२ |


॥३९॥

||४०||


| क्र. | सुभाषितम् । | पृष्ठ क्र. |
|---|---|---|
| ३४ | मायया किं न साध्यते ? | २४ |
| ३५ | निम्नानां छद्मबाह्यं कुतो जयः ? | २६ |
| ३६ | अनुरुपवरप्राप्त्यै स्त्रीणां नाऽन्यो मनोरथः । | २७ |
| ३७ | हंत प्रहारिणि हरौ हरिणानां कुतः स्थितिः ? | २८ |
| ३८ | स्वामिभक्तिप्रभावो हि भृत्यानां कवचायते । | २९ |
| ३९ | अज्ञाता अति पूज्यन्ते महान्तो मूर्तिदर्शनात् । | २९ |
| ४० | बुद्धिः कर्मानुसारिणी । | ३१ |
| ४१ | नाऽन्यथा हि मुनेर्गिरः । | ३१ |
| ४२ | भोगी हि भाजनं स्त्रीणां सरितामिव सागरः । | ३२ |
| ४३ | नात्ति शाकिन्यपि समर्पितं । | ३५ |
| ४४ | राजहंसो हि गृह्णाति विभज्य क्षीरमम्भसः । | ४० |
| ४५ | उपक्रमेत को नाम स्वतः सिद्धे प्रयोजने ? | ४० |
| ४६ | कुतः कृतनिदानानां बोधिबीजसमागमः ? | ४१ |
| ४७ | कालदृष्टाहिना दष्टे कियत्तिष्ठन्ति मान्त्रिकाः ? | ४१ |
| ४८ | आपो नार्यश्च नीचगा । | ४२ |
| ४९ | गतयो भिन्नमार्गा हि कर्माधीनाः शरीरिणाम् । | ४५ |
| ५० | पशुवत्पशुपाला हि न विमृश्य विधायिनः । | ४६ |
| ५१ | नाऽऽज्ञा लंघ्या विधेः खलु । | ४६ |


||४०||

| क्र. | सुभाषितम् । | पृष्ठ क्र. |
|---|---|---|
| ५२ | अशुभं वा शुभं वाऽपि सर्वं हि महतां महत् । | ४७ |
| ५३ | विपन्ने पितरि प्रायो ज्यायान् पुत्रो धुरन्धरः । | ५० |
| ५४ | सर्वो जिजीविषुः । | ५५ |
| ५५ | पूर्वजन्माभिसंबद्धस्नेहो हि बलवत्तरः । | ५८ |
| ५६ | कुलीनानां गुर्वाज्ञा हि बलीयसी । | ६२ |
| ५७ | सद्वल्लभो दुर्लभस्तु तादृक् पुण्योदयः कुतः ? | ८० |
| ५८ | दक्षैः किं नोपलक्ष्यते । | ८० |
| ५९ | फलप्राप्त्यनुसारेण प्रायेण हि मनोरथः । | ८१ |
| ६० | ज्ञानं मिथ्यादृशां कुतः ? । | ९२ |
| ६१ | नार्हद्गीर्जातु निष्फला । | १०२ |
| ६२ | प्रज्ञावत्सूपदेशो हि स्याज्जले तैलबिन्दुवत् । | १०२ |
| ६३ | फलदो ह्युद्यमो नृणाम् । | १०५ |
| ६४ | दुःखितो दुःखितानां हि पीडां जानाति मानसीम् । | ११४ |


॥४१॥

॥ अर्हम् ॥

## कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यविनिर्मितं

# श्रीत्रिषष्टिशलाकापुरुषचरितम् ।

## अष्टमं पर्व

### श्रीअरिष्टनेमिजिन-
### रामबलदेव-कृष्णवासुदेव-जरासंधप्रतिवासुदेवचरितम् ।

# प्रथमः सर्गः ।

पूर्वभव–चरिते प्रथमो धनभवः ।

ॐ नमो विश्वनाथाय जन्मतो ब्रह्मचारिणे । कर्मवल्लीवनच्छेदनेमये[1]ऽरिष्टनेमये ॥ १ ॥

श्रीनेमेरर्हतः कृष्णविष्णो रामस्य सीरिणः । जरासिन्धुप्रतिहरेश्चरितं कीर्तयिष्यते ॥ २ ॥

जंबुद्वीपे द्वीपेऽत्रैव क्षेत्रेऽत्रैवास्ति भारते । अचलायाः शिरोरत्नं नाम्नाचलपुरं पुरम् ॥ ३ ॥

तत्राभूद्विक्रमधनाभिधानो वसुधाधवः[2] । यथार्थनामा समरे विक्रमाक्रान्तशात्रवः[3] ॥ ४ ॥

कृतान्त इव दुष्प्रेक्ष्योऽसुहृदां सुहृदां पुनः । स नेत्रानंदजननो निशाकर इवाभवत् ॥ ५ ॥

कल्पद्रुमः प्रणयिनां वज्रदंडश्च वैरिणाम् । चकासामास तस्योच्चैर्दोर्दंड[4]श्चंडतेजसः ॥ ६ ॥

---

१ नेमिश्चक्रधारा । २ पृथ्वीपतिः । ३ विक्रमेणाक्रांतः शत्रुसमूहः शत्रुबलं वा येन सः । ४ हस्तः ।

पूर्वभवचरिते प्रथमो धनभवः ।

तं दिग्भ्यः संपदोऽभ्येयुः [1]स्रवन्त्य इव सागरम् । प्रादुरासन् कीर्तयश्च ततोऽद्रेरिव निर्झराः ॥ ७ ॥
सधर्मचारिणी तस्य [2]धरणीव सदा स्थिरा । धारिणी नाम विशदशीलालंकारधारिणी ॥ ८ ॥
सर्वांगरुपसुभगा पुण्यलावण्यशालिनी । सा तस्य भूपतेर्मूर्तिमतीव श्रीरराजत ॥ ९ ॥
गत्या गिरा च हंसीव पद्मिनीव श्रियः पदम् । भर्तुर्हृदि पदं चक्रे सा [3]प्रसून इवालि[4]नी ॥ १० ॥
सान्यदा यामिनीशेषे चूतं [5]मत्तालिकोकिलम् । उत्पन्नमंजरीपुञ्जं फलितं स्वप्नमैक्षत ॥ ११ ॥
तेन पाणिस्थितेनोचे कोऽप्येवं रुपवान् पुमान् । तवांगणे रोप्यतेऽसावद्य चूतोऽयमुच्चकैः ॥ १२ ॥
कियत्यपि गते कालेऽन्यत्रान्यत्र निधास्यते । उत्कृष्टोत्कृष्टफलभाग्नववारावधिर्ह्यसौ ॥ १३ ॥
सा भर्तुराख्यत्तं स्वप्नं सोऽपि तज्ज्ञैर्व्यचारयत् । सूनुः प्रकृष्टस्ते भावीत्याचख्युस्तेऽपि चोन्मुदः ॥ १४ ॥
अन्यत्रान्यत्र चूतस्य नवकृत्वस्तु रोपणम् । न जानीमः केवलं तत्फलं जानाति केवली ॥ १५ ॥
श्रुत्वा तद्वचनं देवी मुदिता तत्प्रभृत्यपि । बभार गर्भं सा [6]रत्नगर्भेव निधिमुत्तमम् ॥ १६ ॥
काले च सुषुवे पुत्रं पवित्राकारधारिणम् । धारिण्यर्कमिव प्राची जगतो हर्षकारणम् ॥ १७ ॥
सूनोर्जन्मोत्सवो राज्ञा महादानपुरःसरम् । अकारि दिवसे पुण्ये धन इत्यभिधापि च ॥ १८ ॥
मातापित्रोः प्रमोदेन सह प्रववृधे धनः । अंकादंकं नीयमानो धात्रीभिरिव पार्थिवैः ॥ १९ ॥

---

१ नद्यः । २ पृथ्वीव । ३ पुष्पे । ४ भ्रमरी । ५ मत्ता अलयो भ्रमराः कोकिलाश्च यस्मिंस्तम् । ६ पृथ्वीव ।

कलाकलापमखिलं कलयामास स क्रमात् ।[1] अनंगलीलोपवनं यौवनं प्रत्यपादि च ॥ २० ॥
इतश्च कुसुमपुरे पुरेऽभूत्पृथिवीपतिः । सिंहः सिंह इवौ[2]जस्वी यशस्वी रणकर्मसु ॥ २१ ॥
चंद्रलेखेव विमला विमला नाम तस्य तु । प्राणप्रिया महादेवी देवीवाभून्महीचरी ॥ २२ ॥
तस्यां बहुनां पुत्राणामुपर्यनुपमाकृतिः । कन्या धनवती नाम जज्ञे सिंहमहीपतेः ॥ २३ ॥
रत्यादिरमणीरुपं जयंती रुपसंपदा । क्रमेण ववृधे साथ कला जग्राह चाखिलाः ॥ २४ ॥
अन्यदा [3]कुमुदानन्दे समये समुपस्थिते । सा सखीभिः परिवृता ययावुद्यानमीक्षितुम् ॥ २५ ॥
[4]फुल्लसप्तच्छदोद्भ्राम्यद्भ्रमरोद्गितिबन्धुरे ।[5] पञ्चबाणबाणीभूतनवबाणद्रुकोरके ॥ २६ ॥
उन्मत्तसारसद्वंद्वक्रेंकारमुखरीकृते । स्वच्छांबुसरसीक्रीडत्कलहंसकुलाकुले ॥ २७ ॥
[6]गायदारामिकारम्यैरिक्षुवाटैर्मनोरमे । तत्रोपवने देवीव स्वच्छन्दं विजहार सा ॥ २८ ॥
॥ त्रिभिर्विशेषकम् ॥
विहरन्ती च सा कश्चिदशोकस्य तरोस्तले । एकं चित्रकरं चित्रपट्टिकापाणिमैक्षत ॥ २९ ॥
तां चित्रपट्टिकां तस्माद्धनवत्याः सखी बलात् ।[7] कमलिन्याददे तत्र नररुपं ददर्श च ॥ ३० ॥



---

१ अनंगस्य लीला क्रीडा तस्या उपवनम् । २ बलवान् । ३ कुमुदानामानंदो विकासो यस्मिन् वसन्तर्ताावित्यर्थः । ४ विकसितसप्तच्छदवृक्षेऽधिकभ्राम्यतां भ्रमराणां गायनेन बन्धुरं व्याप्तं तस्मिन् । ५ कामदेवस्य बाणीभूता नूतना बाणवृक्षकोरका यस्मिंस्तस्मिन् । ६ गायन्त्य आरामिकस्त्रियस्ताभी रम्यैः । ७ कमलिनी नाम सखी ।

रुपेण विस्मिता तेन सा प्रोचे चित्रकृन्नरम् । कस्येदमद्भुतं रुपं सुरासुरनरेष्वहो ॥ ३१ ॥
यद्वा संभाव्यते नेदं तेषु रुपं[1] कदाचन । स्वकौशलं दर्शयितुं[2] स्वबुद्धयैवालिखः खलु ॥ ३२ ॥
अनेकजननिर्माणश्रान्तस्य जरतो विधेः । ईदृग्निर्माणनिष्णत्वं कुतस्तस्य भविष्यति ॥ ३३ ॥
अथोचे चित्रकृत्स्मित्वा नात्र मे चित्रकर्मणि । यथादृष्टलिखनीये मनागपि हि कौशलम् ॥ ३४ ॥
अयं खलु मयालेखि युवा निरुपमाकृतिः । धनोऽचलपुराधीशश्रीविक्रमधनात्मजः ॥ ३५ ॥
प्रत्यक्षं प्रेक्ष्य यस्तं हि प्रेक्षते चित्रवर्तिनम् । स कूटलेखक इति मां निन्दति मुहुर्मुहुः ॥ ३६ ॥
तमदृष्टवती त्वं तु मयापि लिखितं ननु । दृष्ट्वा विस्मयसे मुग्धे कूपमंडूकसन्निभा ॥ ३७ ॥
सुरस्त्रियोऽपि मुह्यंति दृष्ट्वा तद्रूपमद्भुतम् । मया स्वदृग्विनोदार्थमलेखि तु यथामति ॥ ३८ ॥
धनवत्यपि तत्रस्था शुश्राव च ददर्श च । मकरध्वजबाणानां गोचरत्वमियाय च ॥ ३९ ॥
कमलिन्याललापैवं दृग्विनोदाय साध्विदम् । अलेखीरद्भुतं रुपं तत्कल्पो[3]ऽसि विवेक्यसि ॥ ४० ॥
एवमुक्त्वा कमलिनी प्रारेभे गन्तुमग्रतः । तत्कालशून्यहृदया कथंचिद्धनवत्यपि ॥ ४१ ॥
[4]व्यावृत्तवृन्तपद्माभमुखी पश्चाद्विलोकिनी । पदे पदे प्रस्खलन्ती गृहं धनवती ययौ ॥ ४२ ॥

---

१ वृद्धस्य । २ निष्णत्वं प्रवीणत्वं पारंगतत्वं वा । ३ कल्पः कुशलः । ४ व्यावृत्तं निवृत्तं वृन्तं यस्यैतादृशस्य पद्मस्येवाभा यस्यैतादृशं मुखं यस्याः सा ।

चित्रस्थधनरुपेणाक्षिप्ता धनवती ततः । नाससाद रतिं क्वापि मरालीव मरौ गता ॥ ४३ ॥
विदांचकार क्षामांगी न तृष्णां न क्षुधां च सा । निशायामपि नाशेत वनाकृष्टेव वारणी[1] ॥ ४४ ॥
स्मारं स्मारं धनरुपं लिखितं कीर्तितं च तत् । शिरः[2]कंपांगुलीनृत्तभ्रूक्षेपान्साकरोन्मुहुः ॥ ४५ ॥
धनध्यानपरवशा यद्यत्किंचिदचेष्टत । जन्मान्तरकृतमिव नास्मरत्तत्तदापि सा ॥ ४६ ॥
विमुक्तोद्वर्तनस्नानचर्चालंकरणा सती । साहर्निशं धनं दध्यौ योगिनीवेष्टदेवताम् ॥ ४७ ॥
तामन्यदा कमलिनी पप्रच्छ कमलेक्षणे । केनाधिना व्याधिना वा बाध्यसे यदसादृशी ॥ ४८ ॥
कृतकृत्रिमकोपा तमूचे धनवती ततः । बाह्यो जन इवैवं त्वं किं पृच्छसि न वेत्सि किम् ॥ ४९ ॥
द्वितीयं हृदयं मेऽसि जीवितव्यं ममासि वा । न हि त्वं मे सखीमात्रं त्वत्प्रश्नेनास्मि लज्जिता ॥ ५० ॥
ऊचे कमलिनी युक्तमुपालब्धास्मि मानिनि । मनःशल्यमहं जाने तवोत्तुंगं मनोरथम् ॥ ५१ ॥
धनं कामयसे नूनं तस्मादालेख्यदर्शनात् । यदज्ञयेव पृष्टासि मया तन्नर्म[3]मात्रकम् ॥ ५२ ॥
स्थानेऽनुरागं ते ज्ञात्वा सचिन्ता तत्प्रभृत्यपि । अपृच्छं ज्ञानिनं किं स्यान्मत्सख्याश्चिन्तितो वरः ॥ ५३ ॥
भावीति सोऽपि चाचख्यौ दर्शितप्रत्ययः सदा । तद्धीरा भव शीघ्रं ते सेत्स्यत्येव मनोरथः ॥ ५४ ॥
तयेत्याश्वासिता धैर्यं भेजे धनवती तदा । पितरं वन्दितुं चागाद्दिव्यनेपथ्यधारिणी ॥ ५५ ॥

१ हस्तिनी । २ शिरःकंपाश्चांगुलीनृत्तं च भ्रूक्षेपश्च तान् । ३ हास्यमात्रम् ।

तां विसृज्य पिता दध्यौ वरार्हेयं सुता मम । कोऽनुरुपो वरोऽमुष्या भविष्यति महीतले ॥ ५६ ॥
एवं चिरं चिन्तयतस्तस्य राज्ञः समाययौ । प्राक्प्रेषितो निजो दूतः श्रीविक्रमधनान्नृपात् ॥ ५७ ॥
राजकार्यं स आख्याय स्थितः सन् सिंहभूभुजा । तत्रापश्यः किमाश्चर्यमित्युक्तः सोऽवदत्पुनः ॥ ५८ ॥
तदपश्यं न यद्विद्याधरेष्वपि सुरेष्वपि । धनस्य विक्रमधनसूनो रुपं मनोरमम् । ५९ ॥
तदैवाचिन्तयं योग्यो धनवत्या वरो ह्ययम् । स्रष्टुः सृष्टिप्रयासोऽस्तु सफलः संगमेनयोः ॥ ६० ॥
प्रीतो राजाब्रवीत् साधु स्वयं मत्कार्यचिन्तक । मां कन्यावरचिन्ताब्धिमग्नमुद्धृतवानसि ॥ ६१ ॥
तद्धनस्य धनवती संप्रदानाय बुद्धिमन् । गच्छाद्य विक्रमधनं प्रार्थयस्व ममाज्ञया ॥ ६२ ॥
तदा चंद्रवती नाम धन[1]वत्यनुजा ययौ । पितरं वंदितुं तच्चाश्रौषीत् सर्वं तयोर्वचः ॥ ६३ ॥
ययौ स दूतः स्वगृहं मुदिता चन्द्रवत्यपि । एत्याचख्यौ धनवत्यै तद्दिष्ट्यालापपूर्वकम् ॥ ६४ ॥
धनवत्यप्युवाचैवं [2]प्रत्येम्येतद्गिरा न हि । अज्ञानेन वदत्येषा परमार्थं न बुध्यते ॥ ६५ ॥
स दूतः प्रेषितो मन्ये कार्येणान्येन केनचित् । इयं तु मुग्धा मत्कार्यमवबुद्धवती खलु ॥ ६६ ॥
कमलिन्यब्रवीदत्र दूतः सोऽद्यापि तिष्ठति । जानीहि तन्मुखात् को हि दीपे सत्यग्निमीक्षते ॥ ६७ ॥
इत्युक्त्वा भावविज्ञा सा तत्र तं दूतमानयत् । अश्रौषीत्तन्मुखात्सर्वं हृष्टा धनवती स्वयम् ॥ ६८ ॥

---

१ कनीयसी स्वसा । २ विश्वसिमि ।

अर्पणीयो धनस्यायं मल्लेख इति भाषिणी । धनवत्यार्पयत्तस्य लिखित्वा पत्रकं स्वयम् ॥ ६९ ॥
ततः स दूतः प्रययौ पुरेऽचलपुरे द्रुतम् । अन्तरास्थानमासीनमुपतस्थे[१] च विक्रमम् ॥ ७० ॥
तमूचे विक्रमः कच्चित् कुशलं सिंहभूपतेः । शीघ्रं भूयस्त्वदागत्या विकल्पैः प्लाव्यते मनः ॥ ७१ ॥
सोऽप्यूचे कुशलं सिंह इह मां प्राहिणोत्पुनः । सुतां धनवतीं दातुं त्वत्सुताय धनाय सः ॥ ७२ ॥
यथा धनकुमारोऽयं रुपोत्कृष्टस्तथैव सा । अस्तूचितोऽनयोर्योगः स्वर्णमण्योरिवाधुना ॥ ७३ ॥
अग्रेऽपि युवयोः स्नेहः संबन्धेनामुना पुनः । विशिष्टो भवताद्वारिसेकेनेव महीरुहः ॥ ७४ ॥
आमेत्युदित्वा नृपतिः सत्कृत्य विससर्ज तम् । जगामोपधनं[२] सोऽपि द्वारपालनिवेदितः ॥ ७५ ॥
नत्वोपविश्य शंसित्वा स स्वं चागमकारणम् । प्रैषीदं धनवत्येति जल्पन् पत्रकमार्पयत् ॥ ७६ ॥
तन्मुद्रां धनकुमारः स्फोटयित्वा स्वपाणिना । तत्पत्रं वाचयामास मदनस्येव शासनम् ॥ ७७ ॥
विशेषितश्रीः[३] शरदा यौवनेनेव पद्मिनी । परिम्लानमुखी वांच्छत्यादित्यकरपीडनम् ॥ ७८ ॥
दध्यौ धनोऽपि काप्येषा तस्याश्छेकोक्तिरद्भुता[४] । स्नेहातिशयमाख्याति मयि चित्तविवर्त्तिनम् ॥ ७९ ॥
विमृश्येति स्वहस्तेन लिखित्वा सोऽपि पत्रकम् । धनवत्यै तस्य हस्ते हारेण सममार्पयत् ॥ ८० ॥
धनेनापि विसृष्टः सन् स दूतः शीघ्रमाययौ । आख्यच्च विक्रमेणार्थं प्रतिपन्नं[५] महीपतेः ॥ ८१ ॥

१ सभामध्ये । २ धनकुमारसमीपम् । ३ विशेषिता श्रीः शोभा यस्याः सा । ४ छेकोक्तिश्चाटुवचनम् । ५ स्वीकृतम्

गत्वा नत्वा धनवत्यै लेखं हारं च सोऽर्पयन् । ऊचे तुभ्यं धनेनैतौ स्वहस्तलिखितार्पितौ ॥ ८२ ॥
गृह्णती पाणिपद्मेन हारमिन्दुकरामलम् । प्रस्फोट्य मुद्रां तं लेखं धनवत्यप्यवाचयत् ॥ ८३ ॥
यत्प्रमोदयते सूर्यः पद्मिनीकरपीडनात् । सोऽर्थः स्वभावसंसिद्धो न हि याञ्चामपेक्षते ॥ ८४ ॥
वाचयित्वेति सा हृष्टा दध्यौ पुलकमालिनी[1] । अन्वज्ञासीन्ममार्थं स श्लोकार्थेनामुना खलु ॥ ८५ ॥
अयं हि कंठन्यासाय मुक्ताहारः सुधोज्ज्वलः । तेन स्वदोर्लताश्लेषसत्यंकारो ममार्पितः ॥ ८६ ॥
एवं विचिन्त्य सा हारं निदधे कंठकन्दले । द्राक् पारितोषिकं दत्वा तं दूतं विससर्ज च ॥ ८७ ॥
राजाथ तां दिने पुण्ये सहितां वृद्धमंत्रिभिः । प्रजिधाय[2]चलपुरे परमर्द्धिसमन्विताम् ॥ ८८ ॥
तां यांतीमशिषन्[3]माता विमला विमलाशया । भूयाः सदा श्वशुरयोर्भक्ता पत्यौ च देववत् ॥ ८९ ॥
सपत्नीष्वप्यनुकूला दक्षिणा[4] च परिच्छदे[5] । पत्युः प्रसादेऽनुत्सिक्ता[6]पमानेऽप्यविकारभाक् ॥ ९० ॥ ॥ युग्मम् ॥
एवमाद्यनुशिष्याश्रुमुखी सा तां कथंचन । व्यसृजत् पौनरुक्तेन परिरंभं[7] वितन्वती ॥ ९१ ॥
धनवत्यपि तां नत्वाध्यारुह्य शिबिकां वराम् । चचाल सपरीवारा छत्रचामरमंडिता ॥ ९२ ॥
सा क्रमेणाचलपुरे पौरैः साश्चर्यमीक्षिता । साक्षाद्धनकुमारस्य श्रीरिवागात् स्वयंवरा ॥ ९३ ॥
अवात्सीद्बहिरुद्याने शिबिरं विनिवेश्य सा । ऋद्ध्या महत्या ववृते विवाहश्च शुभेऽहनि ॥ ९४ ॥

१ पुलकानां रोमाञ्चानां मालास्या अस्तीति तथा । २ प्राहिणोत् । ३ शिक्षामदात् । ४ दाक्षिण्यवती । ५ परिवारे । ६ अनुद्धता । ७ आलिंगनम् ।

[१]क्रमुको नागवल्ल्येव तडितेव नवांबुदः । तया नवोढया रेजे धनोऽभिनवयौवनः ॥ ९५ ॥
रत्या स्मर इव स्वैरं धनवत्या समं धनः । रममाणोऽनयत् कालं कमप्येकमुहूर्त्तवत् ॥ ९६ ॥
प्रत्यक्ष इव रे[२]वन्तश्चलत्कांचनकुंडलः । स विक्रमयमाणोऽश्वं ययावुद्यानमन्यदा ॥ ९७ ॥
चतुर्ज्ञानधरं तत्र पवित्रितवसुन्धरम् । वसुन्धरं नाम मुनिं सोऽद्राक्षीद्देशनापरम् । ९८ ॥
स प्रणम्य यथास्थानमुपविश्य च भक्तिभाक् । शुश्राव देशनां तस्मात् कर्णामृतरसायनम् ॥ ९९ ॥
आगाच्च विक्रमधनो धारिणी धनवत्यपि । सर्वेऽपि तं मुनिं नत्वा शुश्रुवुर्धर्मदेशनाम् ॥ १०० ॥
देशनान्ते व्यज्ञपयत्तं विक्रमधनो नृपः । धने गर्भस्थिते माता स्वप्ने चूतद्रुमैक्षत ॥ १०१ ॥
तस्योत्कृष्टोत्कृष्टफलस्यान्यत्रान्यत्र रोपणम् । भविष्यति नवकृत्व इत्याख्यात्तत्र कोऽपि ना[३] ॥ १०२ ॥
नववारारोपणस्य कथयार्थं प्रसीद नः । कुमारजन्मनाप्यन्यज्ज्ञातं स्वप्नफलं मया ॥ १०३ ॥
सम्यग्ज्ञानायोपयुज्य मनसा सोऽपि कुत्रचित् । दूरे स्थितं केवलिनं पृच्छति स्म समाहितः ॥ १०४ ॥
केवल्यपि हि विज्ञाय तत्प्रश्नं केवलश्रिया । अरिष्टनेमिचरितमाख्यन्नवभवात्मकम् ॥ १०५ ॥
मनोऽवधिभ्यां स मुनिर्ज्ञात्वाख्यत्ते सुतो धनः । भवेनानेनैष नवोत्कृष्टोत्कृष्टान् भवान् गमी ॥ १०६ ॥
भवे च नवमेऽरिष्टनेमिर्नाम्नेह भारते । द्वाविंशस्तीर्थकृद्भावी यदुवंशसमुद्भवः ॥ १०७ ॥

१ क्रमुको वृक्षविशेषः "सोपारी" इति भाषायाम् । २ रेवन्तः सूर्यपुत्रः । ३ पुरुषः ।

श्रुत्वा च तन्मुनिवचः सर्वे मुमुदिरेतराम् । जिनधर्मे च सर्वेषां भावोऽभूद्भद्रकस्तदा ॥ १०८ ॥
तं नत्वा विक्रमो वेश्म ययौ सह धनादिभिः । विहारक्रमनिरतः सूरिरप्यन्यतोऽगमत् ॥ १०९ ॥
ऋतूचिताभिः क्रीडाभिर्धनवत्या समं धनः । अन्वभूद्विषयसुखं दोगुन्दुक इवामरः ॥ ११० ॥
सोऽन्यदा मज्जनक्रीडां कर्तुं क्रीडासरस्यगात् । धनवत्या समं पत्न्या श्रीसपत्न्येव रुपतः ॥ १११ ॥
तत्राशोकतरोर्मूले शान्तो रस इवांगवान् । घर्मश्रमतृषाक्रान्तः शुष्कताल्वोष्ठपल्लवः ॥ ११२ ॥
स्फूटत्पादाब्जरुधिरसिक्तोर्वीको विमूर्छितः । धनवत्या मुनिः कोऽपि पतन् पत्युः प्रदर्शितः ॥ ११३ ॥
॥ युग्मम् ॥
संभ्रमादभिसृत्योभौ मुनिं तमुपचेरतुः । शिशिरैरुपचारैस्तौ चक्रतुश्चाप्तचेतनम् ॥ ११४ ॥
तं च स्वस्थं प्रणम्योचे धनो धन्योऽस्मि सर्वथा । कल्पद्रुम इवावन्यां मया प्राप्तोऽसि संप्रति ॥ ११५ ॥
पर्यन्तदेशे वसतामस्माकं त्वादृशैः समम् । संसर्गो दुर्लभश्छायाद्रुमैर्मरुनृणामिव ॥ ११६ ॥
पृच्छ्यसे किं तु भगवन्नवस्थेयं कुतोऽभवत् । न चेत्ते जायते खेदो न गोप्यं चास्ति शंस तत् ॥ ११७ ॥
सोऽब्रवीद्भववासेन खेदो मे परमार्थतः । खेदस्त्वेष शुभोदर्को विहारक्रमसंभवः ॥ ११८ ॥
नामतो मुनिचन्द्रोऽहं गुरुगच्छेन संयुतः । पुराचलं विहारेण *साधूनां नैकतः स्थितिः* ॥ ११९ ॥
सार्थभ्रष्टोऽन्यदारण्ये दिङ्मोहीतस्ततो भ्रमन् । इहागां क्षुत्तृषाक्रान्तो मूर्च्छितश्चापतं भुवि ॥ १२० ॥

ततः परं यद्भवद्भिः कृतं तेनाप्तचेतनः । भूयोऽभूवं महाभाग धर्मलाभोऽस्तु तेऽनघ ॥ १२१ ॥
यथा क्षणान्नष्टसंज्ञोऽभूवं सर्वं तथा भवे । ईदृगेव <u>*ततो धर्मः करणीयः शुभैषिणा*</u> ॥ १२२ ॥
इत्युदित्वा तदुचितं गृहिधर्मं जिनोदितम् । सम्यक्त्वमूलं तस्याख्यन्मुनिचन्द्रो मुनीश्वरः ॥ १२३ ॥
धनवत्या समं सोऽथ मुनिचन्द्रमुनेः पुरः । गृहस्थधर्मं सम्यक्त्वप्रधानं प्रत्यपद्यत ॥ १२४ ॥
गृहे च नीत्वा तेनर्षिः पानान्नैः प्रत्यलाभि सः । तत्रैव धर्मशिक्षार्थं कंचित्कालं च वासितः ॥ १२५ ॥
धनं मुनिरनुज्ञाप्य स्वगच्छेनामिलत्पुनः । सम्यक्छ्रावकधर्मौ चाभूतां धनवतीधनौ ॥ १२६ ॥
तौ पुरापि मिथः प्रीतिभाजौ धनवतीधनौ । एकधर्मरतत्वाच्च विशेषेण बभूवतुः ॥ १२७ ॥
पित्रान्तकाले स्वे राज्येऽभिषिक्तोऽथ स्वयं धनः । समं श्रावकधर्मेणापालयद्विधिवन्महीम् ॥ १२८ ॥
तस्यान्यदोद्यानपाल आख्यादुद्यानगह्वरे । आयातपूर्व्या[1]यातोऽस्ति वसुन्धरमहामुनिः ॥ १२९ ॥
गत्वा ववंदे सद्यस्तं धनवत्यन्वितो धनः । देशनां चाश्रृणोत्तस्माद्भवांभोधिमहातरीम् ॥ १३० ॥
भवोद्विग्नो धनो राज्ये सुतं धनवतीभवम् । जयन्तं नाम पुण्येऽह्नि न्यधत्त तदनन्तरम् ॥ १३१ ॥
वसुन्धराद्धनो दीक्षां धनवत्या सहाददे । धनभ्राता धनदत्तो धनदेवश्च पृष्ठतः ॥ १३२ ॥
धनर्षिर्गुरुपादान्ते तपस्तेपे सुदुस्तपम् । गीतार्थः सन् गुरुणा चाचार्यके स्थापितः क्रमात् ॥ १३३ ॥

पूर्वभवचरिते प्रथमो धनभवः ।

---

१ यः पूर्वमायातः स आयातपूर्वी ।

पूर्वभवचरिते
प्रथमो
धनभवः ।

प्रतिबोध्य बहून्राज्ञो दीक्षया चानुगृह्य सः । धनवत्या सहादत्त पर्यन्तेऽनशनं सुधीः ॥ १३४ ॥
मासान्ते तौ विपद्योभौ कल्पे सौधर्मनामनि । शक्रसामानिकौ देवावजायेतां महर्द्धिकौ ॥ १३५ ॥
धनबन्धू धनदेवधनदत्तौ तथापरे । अखंडितव्रता मृत्वा सौधर्मे स्वर्गिणोऽभवन् ॥ १३६ ॥
इतोऽत्र भरते वैताढ्योत्तरश्रेणिभूषण । सूरतेजःपुरे सूर इति खेचरचक्र्यभूत् ॥ १३७ ॥
तस्य विद्युद् घनस्येव विद्युन्मत्यभिधानतः । अतिमात्रं प्रेमपात्रं बभूव सहचारिणी ॥ १३८ ॥
आयुः प्रपूर्य सौधर्माद्धनजीवश्च्युतोऽथ सः । विद्युन्मत्याः सूरपत्न्या उदरे समवातरत् ॥ १३९ ॥
पूर्णे च समयेऽसूत देवी विद्युन्मती सुतम् । शुभलक्षणसंपूर्णं पूर्णेन्दुमिव पूर्णिमा ॥ १४० ॥
पुण्येऽहनि ददौ चित्रगतिरित्यभिधां पिता । तस्य सूनोरनूनेनोत्सवेनानन्ददायिना ॥ १४१ ॥
वर्धमानः क्रमेणोपाचार्यं स सकलाः कलाः । जग्राह यौवनं चाप पुष्पचाप[1] इवापरः ॥ १४२ ॥
इतश्चात्रैव वैताढ्ये दक्षिणश्रेणिवर्तिनि । अनंगसिंहो राजाभून्नगरे शिवमन्दिरे ॥ १४३ ॥
पत्नी शशिमुखी तस्य नामतोऽभूच्छशिप्रभा । च्युत्वा धनवतीजीवस्तस्याः कुक्षाववातरत् ॥ १४४ ॥
समये सुषुवे पुत्रीं पवित्रांगीं शशिप्रभा । जाता बहूनां पुत्राणां पश्चादत्यन्तवल्लभा ॥ १४५ ॥
तस्या रत्नवतीत्याख्यां पिता चक्रे शुभेऽहनि । सजलस्थानवल्लीव क्रमेण ववृधे च सा ॥ १४६ ॥

१ कामदेवः ।

अचिरेणापि जग्राह सा कलाः स्त्रीजनोचिताः । यौवनं चासदत्पुण्यममूर्त्तं देहमंडनम् ॥ १४७ ॥
अस्या योग्यो वरः कः स्यादिति पित्रान्यदा स्वयम् । पृष्टो नैमित्तिकः किंचिच्चिन्तयित्वाब्रवीदिति ॥१४८॥
योऽसिरत्नं तवाच्छेत्ता[1] यस्योपरि भविष्यति । सिद्धायतनवंदारोः[2] पुष्पवृष्टिः सुरैः कृता ॥ १४९ ॥
नरलोकशिरोरत्नं स ते रत्नवतीमिमाम् । परिणेता दुहितरमनुरुपसमागमात् ॥ १५० ॥
॥ युग्मम् ॥
ममापि खड्गरत्नं य आच्छेत्ता सोऽद्भुतैकभूः[3] । जामाता स्यादिति प्रीतो व्यसृजज्ज्ञानिनं नृपः ॥ १५१ ॥
इतश्चात्रैव भरते पुरे चक्रपुराभिधे । सुग्रीवनामा राजाभूदनुद्ग्रीवो[4] गुणैरपि ॥ १५२ ॥
तस्य पत्न्यां यशस्वत्यां सुमित्रस्तनयोऽभवत् । पद्मनामा तु भद्रायामग्रजावरजौ क्रमात् ॥ १५३ ॥
सुमित्रस्तत्र गंभीरो विनयी नयवत्सलः । कृतज्ञोऽर्हच्छासनस्थः पद्मस्त्वपरथाभवत् ॥ १५४ ॥
अस्मिञ्जीवति मत्सूनो राज्यं नैव भवेदिति । अभद्रधीर्ददौ[5] भद्रा सुमित्रायोत्कटं विषम् ॥ १५५ ॥
विषेण मूर्छितस्तेन सुमित्रो न्यपतद्भुवि । विषवेगाः प्रससृवुर्लहर्य इव वारिधेः ॥ १५६ ॥
आगात्तत्र च सुग्रीवः संभ्रमात् सह मंत्रिभिः । अकारयन्मंत्रतंत्रैश्चोपचारमनेकशः ॥ १५७ ॥
विषवेगोपशांतिस्तु तस्याभून्न मनागपि । भद्रा ददौ विषमिति प्रवादश्चोत्थितः पुरे ॥ १५८ ॥





---

१ आहर्ता । २ सिद्धायतनानि वन्दमानस्य । ३ अद्भुतानामद्वितीयं स्थानम् । ४ अनुद्धतः । ५. दुष्टमतिः ।

नंष्ट्वा च क्वाप्यगाद्भद्रा स्वदोषपरिशंकिता । राजाप्यकार्षीत् पुत्रार्थे जिनार्चां शान्तिकादि च ॥ १५९ ॥
स्मारं स्मारं सुतगुणान् व्यलपच्च निरन्तरम् । सामन्ता मंत्रिणोऽन्येऽपि निरुपायास्तथैव च ॥ १६० ॥
अत्रान्तरे चित्रगतिः क्रीडया विचरन् दिवि । विमानेनागतस्तत्रापश्यच्छोकातुरं पुरम् ॥ १६१ ॥
विषव्यतिकरं तं च ज्ञात्वोत्तीर्य विमानतः । सोऽभ्यर्षिचत्तं कुमारं जलैर्विद्याभिमंत्रितैः ॥ १६२ ॥
किमेतदिति पृच्छंश्च कुमारः स्फारितेक्षणः । उत्तस्थौ स्वस्थहृदयो *मंत्रशक्तेर्हि नावधिः* ॥ १६३ ॥
राजाख्यात्ते विषं मात्रा वैरिण्या भद्रया ददे । शमितं चामुना वत्स सद्योऽकारणबन्धुना ॥ १६४ ॥
कृतांजलिः सुमित्रोऽपि प्रोचे चित्रगतिं प्रति । परोपकारबुद्ध्यैव मया ज्ञातं कुलं हि वः ॥ १६५ ॥
तथाप्यनुगृहाण त्वं स्वकुलाख्यानतोऽद्य माम् । *महतामन्वयं श्रोतुं कस्य नोत्कंठते मनः* ॥ १६६ ॥
अथ चित्रगतेः पारिपार्श्वकः सचिवात्मजः । सर्वं शशंस वंशादि सर्वेषां श्रुतिशर्मदम्[१] ॥ १६७ ॥
हृष्टोऽवोचत्सुमित्रस्तं विषदेन[२] विषेण च । ममोपकृतमेवाद्य त्वया योगः कुतोऽन्यथा ॥ १६८ ॥
नादा जीवितमात्रं मे किं त्वहं रक्षितोऽस्मि च । प्रत्याख्याननमस्कारहीनमृत्यूत्थदुर्गतेः[३] ॥ १६९ ॥
किं प्रत्युपकरोम्येष तवातुल्योपकारिणः । प्रावृषेण्यांबुदस्येव जीवलोकं कृपानिधे ॥ १७० ॥
इत्युक्त्वा स्थितवन्तं तं सुमित्रं मित्रतां गतम् । आपप्रच्छे चित्रगतिर्गन्तुं निजपुरं प्रति ॥ १७१ ॥

पूर्वभवचरिते
तृतीयः
चित्रगति-
विद्याधरभवः ।

१ कर्णयोः सुखदम् । २ विषदात्रा मात्रेत्यर्थः । ३ प्रत्याख्याननमस्काराभ्यां हीनेन—रहितेन मृत्युना उत्था—प्रादुर्भूता दुर्गतिस्तस्मात् ।

सुमित्रोऽप्यब्रवीद्भ्रातः सुयशा नाम केवली । अत्रासन्नप्रदेशेषु विहरन्नस्ति संप्रति ॥ १७२ ॥
क्रमेण तमिहायातं वन्दित्वा गन्तुमर्हसि । तदागमनकालं तदत्रैव परिपालय ॥ १७३ ॥
आमेत्युक्त्वा चित्रगतिः क्रीडंस्तेन समं सुखम् । युग्मजात इवानैषीत् कियतोऽपि हि वासरान् ॥ १७४ ॥
उभौ जग्मतुरन्येद्युरुद्यानं तत्र चाययौ । सुयशाः केवलिमुनिः कल्पद्रुरिव जंगमः ॥ १७५ ॥
स्वर्णाब्जस्थं वृतं देवैश्चिरेप्सितसमागमम् । तौ तं प्रदक्षिणीकृत्य वन्दित्वा च निषेदतुः ॥ १७६ ॥
श्रुत्वा सुग्रीवराजोऽपि मुनिमेत्याभ्यवन्दत । चकार देशनां सोऽपि मोह[1]निद्रादिवामुखम् ॥ १७७ ॥
देशनान्ते चित्रगतिर्मुनिं नत्वेदमब्रवीत् । साध्वहं बोधितो धर्मं भगवद्भिः कृपापरैः ॥ १७८ ॥
कुलक्रमागतमपि श्रावकत्वमियच्चिरम् । पुरो निधिमिवाभाग्यो नाज्ञासिषमहं प्रभो ॥ १७९ ॥
एषोऽतुल्योपकारी हि सुमित्रो येन मे प्रभो । ईदृग्धर्मोपदेष्टारो युष्मत्पादाः प्रदर्शिता ॥ १८० ॥
इत्युदित्वा तस्य मुनेः पुरश्चित्रगतिः सुधीः । गृहिधर्मं प्रत्यपादि सम्यक् सम्यक्त्वपूर्वकम् ॥ १८१ ॥
मुनिं प्रणम्य सुग्रीवः पप्रच्छ भगवन् क्व सा । महात्मनोऽस्य मत्सूनोर्विषं दत्वा ययाविति ॥ १८२ ॥
मुनिः शशंस सा नंष्ट्वा गतारण्ये [2]मलिम्लुचैः । भूषणादिकमाच्छिद्य पल्लीभर्तुः समर्पिता ॥ १८३ ॥
पल्लीशेन वणिक्पार्श्वे विक्रीता सा ततोऽपि हि । प्रणश्य यान्ती महता परि[3]प्लुष्टा दवाग्निना ॥ १८४ ॥





१ मोहनिद्रानाशे प्रातःकालसमानाम् । २ चौरैः । ३ दग्धा ।

रौद्रध्यानवती मृत्वा प्रथमे नरके ययौ । ततश्चोद्धृत्य चंडालगृहिणी सा भविष्यति ॥ १८५ ॥
जाते गर्भे सपत्न्या च गले कर्त्तिकया हता । तृतीयं नरकं गत्वा तिर्यग्योनौ गमिष्यति ॥ १८६ ॥
इत्याद्यनन्तसंसारदुःखं सानुभविष्यति । सम्यग्दृष्टेर्भवत्सूनोर्विषदानजपाप्मना ॥ १८७ ॥
राजोचे भगवन् यस्य कृते सा कृतवत्यदः । सोऽत्र तिष्ठति तत्पुत्रः सैका तु नरकं गता ॥ १८८ ॥
धिग्धिक् तदेष संसारो रागद्वेषादिदारुणः । आदास्येऽहं परिव्रज्यां तत्परित्यागकारणम् ॥ १८९ ॥
अथ प्रणम्य राजानं सुमित्र इदमभ्यधात् । धिग्धिङ्मां मातुरीदृक्षकर्मबन्धनिबन्धनम् ॥ १९० ॥
स्वामिंस्तदनुजानीहि प्रव्रजिष्यामि संप्रति । *को व[1]स्तुमिच्छेदीदृक्षे संसारेऽत्यन्तदारुणे* ॥ १९१ ॥
इति ब्रुवाणं तनयं प्रतिषिध्याज्ञया नृपः । राज्ये निवेशयामास स्वयं तु व्रतमाददे ॥ १९२ ॥
समं केवलिना तेन सुग्रीवर्षिर्ययौ ततः । सहैव चित्रगतिना सुमित्रस्तु निजं पुरम् ॥ १९३ ॥
भद्रापुत्राय पद्माय ग्रामान् सोऽदत्त कत्यपि । दुर्मतिस्तैस्त्वसंतुष्टो निःसृत्यागात्स कुत्रचित् ॥ १९४ ॥
कथंचिदपि चापृच्छ्य सुमित्रं नृपमन्यदा । पित्रोरुत्कंठितोऽगच्छत् पुरे चित्रगतिर्निजे ॥ १९५ ॥
देवपूजागुरूपास्तितपःस्वाध्यायसंयमैः । स सदा व्यापृतः पित्रोरभूदत्यंतशर्मणे ॥ १९६ ॥
इतः सुमित्रभगिनीं कलिंगनृपगेहिनीम् । जह्रे रत्नवतीभ्राता कमलोऽनंगसिंहजः ॥ १९७ ॥
भगिनीहरणेनाथ सुमित्रं शोकबाधितम् । अज्ञासीत् खेचरमुखात्तदा चित्रगतिः सुहृत् ॥ १९८ ॥

---

१ पर्यन्तनाशिद्रव्यम् ।

अन्वेष्य जामिमानेष्याम्यचिरादिति खेचरैः । तमाश्वास्य चित्रगतिरुत्तस्थे स्वसृशुद्धये ॥ १९९ ॥
कमलेन हृता सेति प्रवृत्तिमुपलभ्य सः । ययौ सर्वाभिसारेण नगरे शिवमंदिरे ॥ २०० ॥
कमलं तत्र कमलखंडं द्विप इव क्षणात् । लीलयोन्मूलयामास शूरः सूरनृपात्मजः ॥ २०१ ॥
क्रुद्धः सुतपराभूत्यानंगसिंहोऽथ सिंहवत् । सिंहनादं विदधानो दधावे सह सेनया ॥ २०२ ॥
विद्याबलात् सैन्यबलाद्दोर्बलाच्च तयोश्चिरम् । महान् रणः प्रववृते दारुणो द्युसदामपि ॥ २०३ ॥
अनंगो दुर्जयं ज्ञात्वा रिपुं जेतुमनाश्च तम् । देवतादत्तमस्मार्षीत् खड्गरत्नं क्रमागतम् ॥ २०४ ॥
ज्वालाशतदुरालोकं द्विषल्लोकान्तकोपमम् । कृपाणरत्नं तत्पाणावापपात क्षणादपि ॥ २०५ ॥
कृपाणपाणिः स प्रोचे रे रेऽपसर बालक । पुरतस्तिष्ठतश्छेत्स्ये शिरस्ते बिसकांडवत् ॥ २०६ ॥
ऊचे चित्रगतिश्चित्रमन्यादृगिव वीक्ष्यसे । बलेन लोहखंडस्य धिक् त्वां स्वबलगर्वितम् ॥ २०७ ॥
इत्युक्त्वा विद्यया ध्वान्तं विचक्रे तत्र सर्वतः । पुरःस्थमप्यपश्यन्तो द्विषोऽस्थुर्लिखिता इव ॥ २०८ ॥
अथाच्छिदच्चित्रगतिस्तं खड्गं तत्करादद्रुतम् । द्राक् सुमित्रस्य भगिनीं जग्राह च जगाम च ॥ २०९ ॥
क्षणान्तरेण चानंगो जातालोको विलोकयन् । पाणौ कृपाणं नापश्यत्पुरस्तान्न च तं द्विषम् ॥ २१० ॥
क्षणं विषादं स प्राप स्मृत्वा च ज्ञानिनो वचः । मत्खड्गहर्ता जामाता भावीति मुमुदे च सः ॥ २११ ॥



१ भगिनीम् । २ देवानामपि । ३ शत्रुजनानां यमसदृशम् ।

कथं स ज्ञास्यते यद्वा सिद्धायतनवन्दने । ज्ञेयः कुसुमवृष्ट्येति विमृशन् स्वगृहं ययौ ॥ २१२ ॥
अखंडशीलां तां जामिं सुमित्रपृथिवीपतेः । नीत्वा समर्पयामास कृती चित्रगतिः स्वयम् ॥ २१३ ॥
पुरापि हि भवोद्विग्नः सुमित्र स्वविवेकतः । जातः स्वस्रपहारादिवैधुर्यान्नितरामभूत् ॥ २१४ ॥
राज्यं न्यस्य सुते गत्वा सुयशोमुनिसन्निधौ । सुमित्रराट् चित्रगतेः समक्षं व्रतमाददे ॥ २१५ ॥
पुरे चित्रगतिः स्वेऽगात् सुमित्रस्त्वन्तिके गुरोः । किंचिदूनानि पूर्वाणि नवाधीते स्म बुद्धिमान् ॥ २१६ ॥
गुर्वनुज्ञां गृहीत्वैकः सुमित्रो विहरन् गतः । मगधेषु बहिर्ग्रामात् कायोत्सर्गेण तस्थिवान् ॥ २१७ ॥
वैमात्रेयो[1] भ्रमन् पद्मस्तत्रायातो ददर्श तम् । सर्वजीवहितं ध्यानस्थितं गिरिमिव स्थिरम् ॥ २१८ ॥
आकर्णाकृष्टबाणेन हृदि पद्मो जघान तम् । स्वमातुर्मिलनायेव नरकाभिमुखः कुधीः ॥ २१९ ॥
धर्मभ्रंशो ममानेन न कृतो निघ्नतापि हि । कर्मच्छेदसखित्वेन प्रत्युतैष हितावहः ॥ २२० ॥
अस्मिन्मया चापकृतं राज्यं दत्तं न यत्तदा । तत्क्षाम्यत्वेष मे सर्वे क्षाम्यंत्वन्येऽपि जन्तवः ॥ २२१ ॥
एवं ध्यायन् कृतप्रत्याख्यानः स्मृतनमस्कृतिः । मृत्वा सुमित्रोऽभूद्ब्रह्मलोके सामानिकः सुरः ॥ २२२ ॥
प्रणश्य गच्छन् पद्मोऽपि दष्टः कृष्णाहिना निशि । विपद्य नारको जज्ञे सप्तम्यां नरकावनौ ॥ २२३ ॥
सुमित्रमृत्युना शोकं कृत्वा चित्रगतिश्चिरम् । जगाम सिद्धायतने यात्रां कर्तुं महामतिः ॥ २२४ ॥

१ अपरमातुः पुत्रः ।

अमिलंस्तत्र यात्रायां बहवः खेचरेश्वराः । रत्नवत्या समं पुत्र्यानंगसिंहोऽपि चाययौ ॥ २२५ ॥
चक्रे चित्रगतिश्चित्रां तत्रार्चां शाश्वतार्हताम् । रोमाञ्चितांगः स्तोत्रं च गिरा भक्तिविचित्रया ॥ २२६ ॥
ज्ञात्वा चावधिना तत्र सुमित्रः सुर आययौ । तस्योपरि च पुष्पाणि ववर्ष चामरैः सह ॥ २२७ ॥
हृष्टाश्च तुष्टुवुश्चित्रगतिं सर्वेऽपि खेचराः । अनंगसिंहोऽप्यज्ञासीत्तमेव दुहितुर्वरम् ॥ २२८ ॥
सुमित्रदेवः प्रत्यक्षीभूय हर्षेण भूयसा । किं मां प्रत्यभिजानासीत्यूचे चित्रगतिं तदा ॥ २२९ ॥
त्वं महर्द्धिः सुर इति चित्रगत्युदिते सुरः । सुमित्ररुपं चक्रे स स्वोपलक्षणहेतवे ॥ २३० ॥
तं चित्रगतिरालिंग्य जगादेति मया ह्ययम् । धर्मः प्राप्तस्त्वत्प्रसादादनवद्यो महामते ॥ २३१ ॥
सुमित्रोऽप्यब्रवीदेवमियमृद्धिर्मया पि हि । आसेदे त्वत्प्रसादेन तदा जीवितदानतः ॥ २३२ ॥
प्रत्याख्याननमस्कारविहीनोऽहं तदा मृतः । नाभविष्यं मनुष्योऽपि प्राणयिष्यो न चेद्धि माम् ॥ २३३ ॥
तयोः कृतज्ञयोरेवं मिथः सुकृतशंसिनोः । श्रीसूरचक्रिप्रमुखा जहृषुः खेचरेश्वराः ॥ २३४ ॥
तत्र चित्रगतिं रुपचरित्राभ्यामनुत्तरम्[1] । प्रेक्षमाणा रत्नवती विविधे मन्मथेषुभिः ॥ २३५ ॥
स्वपुत्रीं विधुरां प्रेक्ष्यानंगसिंहो व्यचिंतयत् । ज्ञानिनः संवदत्येतत्तत्पूर्वं कथितं वचः ॥ २३६ ॥
ममासिरत्नं जह्रेऽसौ पुष्पवृष्टिरिहाभवत् । इहाभवन्मत्सुताया अनुरागश्च तत्क्षणात् ॥ २३७ ॥

पूर्वभवचरिते
तृतीयः
चित्रगति–
विद्याधरभवः ।

---

१ नास्त्युत्तरः श्रेष्ठो यस्मात्तम् ।

रत्नवत्याश्चानुरुपो वरोऽयं ज्ञानिनोदितः । श्लाघ्योऽस्यमूभ्यां दुहितृजामातृभ्यां जगत्यपि ॥ २३८ ॥
देवस्थानेऽत्र संबंधादिकं वक्तुं न युज्यते । चिन्तयित्वेति सपरीवारः स स्वगृहं ययौ ॥ २३९ ॥
सुमित्रदेवं सत्कृत्य व्यसृजत् खेचरानपि । ततश्चित्रगतिः पित्रा समं निजगृहं ययौ ॥ २४० ॥
प्रहितोऽनंगसिंहेन मंत्र्येकः सूरचक्रिणम् । प्रणम्य व्याजहारैवमव्याजविनयक्रमः ॥ २४१ ॥
स्वामिंश्चित्रगतिस्तेऽसौ कुमारो मारसंनिभः । *अतुल्यरुपलावण्यः कस्य चित्रीयते न हि* ॥ २४२ ॥
पुत्री चानंगसिंहस्य रत्नं रत्नवती प्रभो । रत्नेन चित्रगतिना युज्यतां भवदाज्ञया ॥ २४३ ॥
द्वयोरपि त्वमीशोऽसि विवाहाय तदेतयोः । अनंगसिंहं मन्यस्व नृसिंह विसृजाद्य माम् ॥ २४४ ॥
सूरोऽप्युचितयोगेच्छुः प्रत्यपद्यत तद्वचः । तयोर्विवाहं चाकार्षीन्महोत्सवपुरःसरम् ॥ २४५ ॥
तया समं चित्रगतिर्भेजे वैषयिकं सुखम् । अर्हत्पूजादिकं धर्मं चकार च तया सह ॥ २४६ ॥
धनदेवधनदत्तजीवौ च्युत्वा बभूवतुः । मनोगतिचपलगत्याख्यौ तस्यानुजावुभौ ॥ २४७ ॥
ताभ्यां च रत्नवत्या च समं नंदीश्वरादिषु । चक्रे चित्रगतिर्यात्रामतिमात्रां सुरेन्द्रवत् ॥ २४८ ॥
अर्हतामन्तिके धर्मं शुश्राव च समाहितः कलत्रभ्रातृसहितः साधुशुश्रूषणोद्यतः ॥ २४९ ॥
तमन्यदा न्यधाद्राज्ये सूरचक्री स्वयं पुनः । उपाददे परिव्रज्यां प्रपेदे च परं पदम् ॥ २५० ॥
स साधितानेकविद्यः सूरचक्रीव नूतनः । शशास खेचरपतीन् पत्तीकुर्वन्ननेकशः ॥ २५१ ॥

अन्यदा तस्य सामंतो मणिचूडो व्यपद्यत । शशिशूरावयुध्येतां राज्यार्थे तत्सुतावथ ॥ २५२ ॥
तयोर्विभज्य तद्राज्यं चक्री चित्रगतिर्ददौ । पथि[1] च स्थापयामास धर्मवाग्भिः सुयुक्तिभिः ॥ २५३ ॥
तौ तथाप्यन्यदा युध्वा विपेदाते वनेभवत्[2] । श्रुत्वा चित्रगतिस्तच्च दध्याविति महामतिः ॥ २५४ ॥
विनश्वर्याः श्रियोऽर्थेऽमी धिग्जना मन्दबुद्धयः । युध्यन्तेऽथ विपद्यन्ते निपतंति च दुर्गतौ ॥ २५५ ॥
श्रिये यथोत्सहन्तेऽमी निरपेक्षा वपुष्यपि । तथोत्सहेरन्मोक्षाय चेत्किं न्यूनं तदा भवेत् ॥ २५६ ॥
विमृश्यैवं भवोद्विग्नः सुतं रत्नवतीभवम् । ज्येष्ठं पुरंदरं नाम राज्ये चित्रगतिर्न्यधात् ॥ २५७ ॥
रत्नवत्या कनिष्ठाभ्यां ताभ्यां च स समाददे । व्रतं दमधराचार्यपार्श्वे चित्रगतिस्ततः ॥ २५८ ॥
चिरं तप्त्वा विधायान्ते पादपोपगमं च सः । विपद्य कल्पे माहेन्द्रे सुरोऽभूत्परमर्द्धिकः ॥ २५९ ॥
रत्नवत्यपि तत्रैव कनिष्ठौ तौ च बान्धवौ । संजज्ञिरे सुरवराः प्रीतिभाजः परस्परम् ॥ २६० ॥

पूर्वभवचरिते चित्रगतेर्दीक्षा, स्वर्गगमनं च ।

इतश्च प्रत्यग्विदेहे विजये पद्मनामनि । अस्ति सिंहपुरं नाम पुरं सुरपुरोपमम् ॥ २६१ ॥
तत्रासीज्जगदानंदी हरिणंदीति भूपतिः । मन्दीकृतान्यतेजस्कोऽधिपतिस्तेजसामिव ॥ २६२ ॥
बभूव महिषी[3] तस्य नामतः प्रियदर्शना । दर्शनेनापि पीयूषस्पन्दिनी कौमुदीव या ॥ २६३ ॥
जीवश्चित्रगतेः सोऽथ च्युत्वा माहेन्द्रकल्पतः । कुक्षाववातरत्तस्या महास्वप्नोपसूचितः ॥ २६४ ॥



१ सन्मार्गे । २ वनहस्तिवत् । ३ पट्टराज्ञी ।

पूर्णे च काले सुषुवे सा देवी प्रियदर्शना । पांडुकोर्वीव कल्पद्रुं तनयं प्रियदर्शिनम् ॥ २६५ ॥
अपराजित इत्याख्यां तस्य चक्रे महीपतिः । धात्रीभिर्लाल्यमानश्च स क्रमेण व्यवर्धत ॥ २६६ ॥
क्रमात्कलाः स जग्राह यौवनं प्राप च क्रमात् । मूर्त्त्या मीनध्वजः[1] पुण्यलावण्यजलवारिधिः ॥ २६७ ॥
सह पांशुक्रीडितश्च सहाध्यायी च वल्लभः । अभूद्विमलबोधाख्यस्तस्यामात्यसुतः सुहृद् ॥ २६८ ॥
तावन्यदा हयारुढौ क्रीडया जग्मतुर्बहिः । हृत्वाश्वाभ्यां च निन्याते महारण्ये दवीयसि[2] ॥ २६९ ॥
तत्राश्वयोः श्रान्तयोस्तौ वृक्षमूलेऽवतेरतुः । ऊचे विमलबोधं च राजपुत्रोऽपराजितः ॥ २७० ॥
दिष्ट्याश्वाभ्यामपहृतावावामाभ्यां कुतोऽन्यथा । अनेकाश्चर्यपूर्णेयं द्रष्टव्या स्याद्वसुंधरा ॥ २७१ ॥
गन्तुमापृच्छ्यमानौ हि पितरौ विरहासहौ । विसृजेतां न तौ जातु जातं संप्रति साध्विदम् ॥ २७२ ॥
आवयोरश्वहृतयोः पित्रोर्दुःखमभूदिदम् । तेनैव विहरिष्यावो विसोढुं[3] पतितं हि तत् ॥ २७३ ॥
एवमस्त्वित्यभाषिष्ट यावत्स सचिवात्मजः । तावन्ना[4] तत्र कोऽप्यागाद्रक्ष रक्षेत्युदीरयन् ॥ २७४ ॥
प्रवेपमानसर्वांगमस्थिरीभूतलोचनम् । मा भैषीरिति तं प्रोचे कुमारः शरणागतम् ॥ २७५ ॥
कुमारं मंत्रिसूः स्माह न विमृश्यैवमभ्यधाः । अन्यायकारी यद्येष तदा स्यान्न हि शोभनम् ॥ २७६ ॥
ऊचेऽपराजितोऽप्युच्चैः क्षत्रधर्मो ह्यसौ सदा । अन्यायी यदि वा न्यायी त्रातव्यः शरणागतः ॥ २७७ ॥

१ कामः । २ अतिदूरे । ३ विसोढुमिति पाठान्तरम् । ४ पुरुषः ।

एवं कुमारे वदति हत हतेति वादिनः । एयुरारक्षपुरुषा [1]आकृष्टनिशितासयः ॥ २७८ ॥
अपयातं युवां पान्थौ मुषिताशेषपत्तनम् । हनिष्यामोऽमुमित्यूचुरारक्षा दूरतोऽपि ते ॥ २७९ ॥
स्मित्वा स्माह कुमारोऽपि शरणं मामुपागतः । शक्रेणापि न शक्योऽसौ हन्तुमन्यैस्तु का कथा ॥ २८० ॥
क्रुद्धाः प्रजह्रुरारक्षा यावत्तावदधावत । आकृष्टासिः कुमारस्तान्निघ्नन् द्वीपी मृगानिव ॥ २८१ ॥
नंष्ट्वा कोसलराजायाचख्युः स्वस्वामिने च ते । राजापि सैन्यं स प्रैषीद्[2]वधैषी चौररक्षिणः ॥ २८२ ॥
तदप्यनीकं तरसा पराजिग्येऽपराजितः । आययौ च स्वयं राजा वृतः सादिनिषादिभिः ॥ २८३ ॥
तस्करं मंत्रिपुत्राय समर्प्याथापराजितः । द्रढयित्वा परिकरमभ्यमित्रोऽभवद्युधि ॥ २८४ ॥
एकस्य दन्तिनो दन्ते पादं न्यस्य स सिंहवत् । आरुह्य कुंभमवधीत् स्कन्धारुढं निषादिनम् ॥ २८५ ॥
तमेवारुह्य करिणं युयुधे चापराजितः । उपलक्ष्य नृपायैकेनाचख्ये मंत्रिणाथ सः ॥ २८६ ॥
निषिध्य स्वाज्ञया युद्धात् सैनिकान् कौसलेश्वरः । तमूचे मद्वयस्यस्य सुतोऽसि हरिणंदिनः ॥ २८७ ॥
साधु मन्मित्रपुत्रोऽसि विक्रमेणामुना खलु । *विना सिंहकिशोरेण को ह्यलं हंत दन्तिने* ॥ २८८ ॥
स्वगृहात्स्वगृहं दिष्ट्या त्वमायासीर्महाभुजः । इत्युक्त्वा परिरेभे स गजस्थस्तं गजस्थितम् ॥ २८९ ॥
[3]लज्जाविनमदास्याब्जं राजा [4]स्वेभेऽधिरोह्य तम् । निजे निनाय सदने स्वपुत्रमिव वत्सलः ॥ २९० ॥

१ आकृष्य निशिता तीक्ष्णा असयः खड्गाः यैस्ते । २ वधमिच्छतीति वधेच्छुरित्यर्थः । ३ लज्जया विशेषेण नमत् आस्याब्जं मुखकमलं यस्य सः । ४ स्वहस्तिनि ।

विसृज्य तस्करं मंत्रिपुत्रोऽप्यन्वपराजितम् । आययौ तस्थतुश्चोभौ सुखं कोसलवेश्मनि ॥ २९१ ॥
कन्यां कनकमालाख्यां स्वां कोसलमहीपतिः । जातानन्दो हरिणन्दिनन्दनायान्यदा ददौ ॥ २९२ ॥
दिनानि कत्यपि स्थित्वा मा भूद्विघ्नो गतेरिति । अनाख्यायान्यदा रात्रौ समित्रोऽपि स निर्ययौ ॥ २९३ ॥
व्रजंश्च कालिकादेव्यायतनस्याविदूरतः । हा हा निःपुरुषोर्वीति शुश्राव रुदितं निशि ॥ २९४ ॥
काप्येषा रोदिति स्त्रीति निश्चित्य स कृपानिधिः । अनुशब्दं ययौ वीरः शब्दापातीव सायकः ॥ २९५ ॥
ज्वलितज्वलनाभ्यर्णे स्त्रियमेकां निषादिनीम् । आकृष्टतीक्ष्णनिर्स्त्रिंशं[1] पुरुषं च ददर्श सः ॥ २९६ ॥
विद्याधराधमादस्मात् पातु मां कोऽपि यः पुमान् । इति भूयोऽपि चक्रंद सौनिकान्तच्छगीव[2] सा ॥ २९७ ॥
आचिक्षेप कुमारस्तमुत्तिष्ठस्व रणाय रे । अबलायां किमेतत्ते पुरुषाधम पौरुषम् ॥ २९८ ॥
[3]त्वय्यप्यस्यामि चेदं मे पौरुषं न त्विति ब्रुवन् । आकृष्टासिरढौकिष्ट समराय स खेचरः ॥ २९९ ॥
वंचयमानावन्योऽन्यघातांस्तौ कुशलावुभौ । खड्गाखड्गि चिरं कृत्वाऽयुध्येतां दोर्युधोद्धतौ ॥ ३०० ॥
दोर्युद्धेऽप्यपराजय्यं मन्यमानोऽपराजितम् । बबन्ध नागपाशेन स विद्याधरकुंजरः ॥ ३०१ ॥
कुमारस्त्रोटयामास तं पाशमपराजितः । [4]व्यालद्विप इवालानरज्जुं कोपेन भूयसा ॥ ३०२ ॥
विद्याप्रभावतो विद्याधरः स विविधायुधैः । प्रजहार कुमाराय क्रुद्धोऽसुरकुमारवत् ॥ ३०३ ॥

१ निर्स्त्रिंशः खड्गः । २ मांसक्रयविक्रयोपजीविनो व्याधस्यान्तिके छगीवाजेव । ३ त्वय्यपि मे पौरुषं किं नास्यामीति काकुः । ४ दुष्टगजः ।

पूर्वपुण्यप्रभावाच्च देहसामर्थ्यतोऽपि च । कुमारे प्राभवंस्तस्य प्रहारा न मनागपि ॥ ३०४ ॥
अत्रान्तरे च मार्त्तण्डो[1] ययावुदयमूर्धनि । मूर्ध्नि चाताडयद्राजपुत्रः खड्गेन खेचरम् ॥ ३०५ ॥
पपात मूर्छितः पृथ्व्यां तेन घातेन खेचरः । कुमारस्पर्द्धयेव स्त्रीं तां जघान स्मरः शरैः ॥ ३०६ ॥
भूयः प्रापय्य चैतन्यमुपचारैर्नभश्चरम् । ऊचे कुमारो युध्यस्व सहोऽसि[2] यदि संप्रति ॥ ३०७ ॥
विद्याधरोऽप्यभाषिष्ट सुष्ठ्वहं निर्जितस्त्वया । रक्षितः स्त्रीवधात्साधु नरकाच्चापि तद्भवात् ॥ ३०८ ॥
मम वस्त्रांचलग्रन्थौ विद्येते मणिमूलिके । मणेस्तस्यांभसा घृष्टवा मूलिकां देहि मद्व्रणे ॥ ३०९ ॥
तथा चक्रे कुमारेण सज्जांगोऽभूच्च खेचरः । कुमारपृष्टश्चाचख्यावेवं व्यतिकरं[3] निजम् ॥ ३१० ॥
रथनूपुरनाथस्य विद्याधरपतेरियम् । दुहितामृतसेनस्य रत्नमालेति नामतः ॥ ३११ ॥
वरोऽस्या ज्ञानिनाचख्ये हरिणंदिनृपात्मजः । युवापराजितो नाम गुणरत्नैकसागरः ॥ ३१२ ॥
तत्रैषाप्यनुरक्ताभून्नान्यस्मिन्नकरोन्मनः । मया च वीक्षितान्येद्युर्विवाहाय च याचिता ॥ ३१३ ॥
एषाप्युवाच मत्पाणिं गृह्णीयादपराजितः । दहेद्वा दहनो मेऽङ्गं नापरा काप्यतो गतिः ॥ ३१४ ॥
इत्यस्या वचसाकुप्यमहं श्रीषेणनन्दनः । सूरकान्ताभिधानोऽस्याः पाणिग्रहकृताग्रहः ॥ ३१५ ॥
निर्गत्य नगराद्विद्या दुःसाध्या अप्यसाधयम् । भूयोऽपि विविधोपायैरमूमर्थितवानहम् ॥ ३१६ ॥

पूर्वभवचरिते
पञ्चमो-
ऽपराजितभवः ।



---

१ सूर्यः । २ समर्थोऽसिः । ३ वृत्तान्तम् ।

नैषा केनाप्युपायेन मामियेष यदा तदा । हृत्वानीता मयाप्यत्र *कामांधाः किं न कुर्वते* ॥ ३१७ ॥
अग्निरंगे लगत्वस्याः पूर्यतां स प्रतिश्रवः[1] । इत्यमूं खंडयित्वाहमग्नौ प्रक्षेप्तुमुद्यतः ॥ ३१८ ॥
मत्तस्त्वया रक्षितेयं रक्षितोऽहं च दुर्गतः । द्वयोरप्युपकर्तासि शंस कोऽसि महाभुज ॥ ३१९ ॥
आख्यच्च मंत्रिसूस्तस्मै कुमारस्य कुलादिकम् । मुमुदे रत्नमालापि सद्योऽभीष्टसमागमात् ॥ ३२० ॥
पितरौ रत्नमालायाः पृष्ठतश्च प्रधाविनौ । कीर्तिमत्यमृतसेनौ तदानीं तत्र चेयतुः ॥ ३२१ ॥
पृष्टश्चाख्यन्मंत्रिपुत्रो यथावृत्तं तयोरपि । त्राताभूत्परिणेतैवेत्यमोदेतामुभावपि ॥ ३२२ ॥
ताभ्यां दत्तां रत्नमालामुपयेमेऽपराजितः । तयोरेव गिरा दत्तं सूरकान्ताय चाभयम् ॥ ३२३ ॥
कुमारे निःस्पृहे सूरकान्तस्ते मणिमूलिके । आर्पयन्मंत्रिपुत्रस्य गुटिकाश्चान्यवेषदाः ॥ ३२४ ॥
आनेतव्या स्वपुत्रीयं निजस्थाने गतस्य मे । इत्युदीर्यामृतसेनं प्राचालीदपराजितः ॥ ३२५ ॥
समं पुत्र्यामृतसेनः सूरकान्तश्च खेचरः । स्वं स्वं प्रययतुः स्थानं स्मरन्तावपराजितम् ॥ ३२६ ॥
कुमारोऽप्यग्रतो गच्छन्नटव्यां विधुरस्तृषा । उपाविशच्चूततले मंत्रिपुत्रोऽम्भसे[2] त्वगात् ॥ ३२७ ॥
दूरे गत्वा गृहीत्वांभो यावदागादमात्यसूः । तस्मिंश्चूततले तावन्नापश्यदपराजितम् ॥ ३२८ ॥
दध्यौ च नेदं तत्स्थानं भ्रान्त्यान्यत्र किमागमम् । किं वा कुमारोऽतितृषा स्वयमप्यंभसे ययौ ॥ ३२९ ॥

१ प्रतिज्ञा । २ जलमानेतुं ।

विमृश्येति कुमारस्यान्वेषणाय प्रतिद्रुमम् । बभ्रामानीक्षमाणस्तं मूर्छितश्चापतद्भुवि ॥ ३३० ॥
लब्धसंज्ञः समुत्थाय सोऽरोदीत्करुणस्वरम् । कुमार दर्शयात्मानं किं खेदयसि मां मुधा ॥ ३३१ ॥
नापकर्तुं प्रहर्तुं वा त्वामलं कोऽपि मानवः । न तवादर्शने हेतुरमंगलमयः सखे ॥ ३३२ ॥
एवं विलप्य बहुधा तं गवेषयितुं पुनः । ग्रामादिषु परिभ्राम्यन् सोऽगान्नन्दिपुरं पुरम् ॥ ३३३ ॥
मंत्रिसूर्बहिरुद्याने यावदस्थाच्च दुर्मनाः । उभौ विद्याधरौ तावत्तमुपेत्यैवमूचतुः ॥ ३३४ ॥
विद्याधरेन्द्रो भुवनभानुर्नाम्ना महावने । आस्ते विकृत्य प्रासादं परमर्द्धिर्महाबलः ॥ ३३५ ॥
तस्य च सूः कमलिनीकुमुदिन्यावुभे सुते । तयोश्च ज्ञानिनाख्यातो वरः प्रियसुहृत्स ते ॥ ३३६ ॥
तस्यानयनहेतोश्च स्वामिनावां नियोजितौ । वने तस्मिन्नागताभ्यामावाभ्यां वीक्षितौ युवाम् ॥ ३३७ ॥
त्वं जलानयनायागाः कुमारं चापराजितम् । हृत्वानयाव भुवनभानोः स्वस्वामिनोऽन्तिके ॥ ३३८ ॥
तमभ्युदस्थाद्भुवनभानुर्भानुमिवोदितम् । संभ्रमाच्चासयामास रत्नभद्रासनोत्तमे ॥ ३३९ ॥
सत्ययापि गुणस्तुत्या ह्रेपयन्नपराजितम् । पुत्र्योस्तयोर्विवाहार्थे ययाचे खेचरेश्वरः ॥ ३४० ॥
कुमारस्त्वद्वियोगार्तो न प्रत्युत्तरमप्यदात् । मौनी मुनिरिवास्थाच्च त्वामेव परिचिन्तयन् ॥ ३४१ ॥
ततश्च स्वामिनादिष्टौ त्वामानेतुमितस्ततः । विमार्गन्ताविहायातौ दिष्ट्या दृष्टोऽसि संप्रति ॥ ३४२ ॥
तदुत्तिष्ठ महाभाग गन्तुं तत्र चल द्रुतम् । कुमारस्य कुमारीभ्यां विवाहस्त्वयि तिष्ठते ॥ ३४३ ॥

इत्युक्त्या मुदितस्ताभ्यां सह मंत्रिसुतो ययौ । सद्योऽभ्यर्णे कुमारस्य प्रमोद इव मूर्तिमान् ॥ ३४४ ॥
उपयेमे कुमार्यौ ते कुमारोऽपि शुभेऽहनि । कालं कंचिदपि स्थित्वा निर्जगाम च पूर्ववत् ॥ ३४५ ॥
श्रीमन्दिरे प्रापतुश्च पुरे तत्र च तस्थतुः । सूरकान्तदत्तमणिपूर्यमाणेप्सितौ सदा ॥ ३४६ ॥
तस्मिन्पुरेऽन्यदोत्तस्थावतुलस्तुमुलध्वनिः । अदृश्यन्त भ्रमन्तश्च सन्नद्धोदायुधा भटाः ॥ ३४७ ॥
किमेतदिति पृष्टश्च राजपुत्रेण मंत्रिसूः । ज्ञात्वा लोकाच्छशंसैवमत्र राजास्ति सुप्रभः ॥ ३४८ ॥
स प्रविश्यैकेन पुंसा हतश्छुरिकया च्छलात् । राज्ञो राज्यधरश्चास्य पुत्रादिर्नास्ति कोऽपि हि ॥ ३४९ ॥
आत्मरक्षी भवन्नद्य तेनायमखिले पुरे । भ्राम्यति व्याकुलो लोकस्तस्यायं तुमुलो महान् ॥ ३५० ॥
दुःक्षत्रियेण केनापि धिगयं घातितो द्विषा । इत्युक्त्वा करुणाम्लानमुखोऽस्थादपराजितः ॥ ३५१ ॥



आरोहति प्रहारे तु राज्ञः संरोहणैरपि । प्रधानगणिकाकामलताख्यद्राजमंत्रिणाम् ॥ ३५२ ॥
वैदेशिकः पुमानात्मद्वितीयोऽत्रास्ति पत्तने । उदारो धार्मिकः सत्यो मूर्त्या कश्चिदिवामरः ॥ ३५३ ॥
सर्वसंपद्यमानार्थो निर्व्यापारोऽप्यसौ यतः । महाप्रभावस्तदिह संभाव्यं किंचिदौषधम् ॥ ३५४ ॥
निन्युश्च मंत्रिणोऽभ्यर्थ्य कुमारमुपपार्थिवम् । राजा तद्दर्शनेनापि सुस्थंमन्यो[1] बभूव सः ॥ ३५५ ॥
कृपावान्राजपुत्रः प्रागपि घातं विलोक्य तु । कृपाभागधिकं मित्रादाददे मणिमूलिके ॥ ३५६ ॥

१ आत्मानं सुस्थं मन्यते इति ।

मणिप्रक्षालनजलं स भूपतिमपाययत् । मूलिकां तज्जलैर्घृष्ट्वा नृपघाते न्यधत्त च ॥ ३५७ ॥
सज्जांगो भूपतिश्चाभूद्राजपुत्रमुवाच च । कुतोऽकारणबन्धुस्त्वमिहायासीः कृपानिधे ॥ ३५८ ॥
शशंस मंत्रिसूः सर्वं राजा भूयोऽप्यभाषत । पुत्रोऽयं मद्वयस्यस्य भूपतेर्हरिणंदिनः ॥ ३५९ ॥
अहो प्रमादो नाबोधं यद्भ्रातुः पुत्रमप्यमुम् । यद्वा प्रमादस्य फलं प्रहारोऽप्येष मेऽभवत् ॥ ३६० ॥
इत्युक्त्वा कन्यकां रंभां रुपाद्रंभामिवापराम् । उपरोध्य ददौ तस्मै गुणक्रीतो नरेश्वरः ॥ ३६१ ॥
रममाणस्तया कालं कंचिदप्यतिवाह्य सः । पूर्ववन्निर्ययौ राजपुत्रो मंत्रिसुतान्वितः ॥ ३६२ ॥
पुरे कुंडपुरेऽगाच्च तत्रोद्याने महामुनिम् । दिव्यस्वर्णांबुजासीनं स केवलिनमैक्षत ॥ ३६३ ॥
तं त्रिः प्रदक्षिणीकृत्य नमस्कृत्य निषद्य च । शुश्राव देशनां तस्माच्छ्रुत्योः पीयूषवर्षिणीम् ॥ ३६४ ॥
देशनान्ते तु तं नत्वा पप्रच्छेत्यपराजितः । किं भव्योऽहमुताभव्य आचख्यौ चेति केवली ॥ ३६५ ॥
भव्योऽसि भविता चार्हन् द्वाविंशः पंचमे भवे । त्वन्मित्रं गणभृच्चायं जंबूद्वीपस्य भारते ॥ ३६६ ॥
श्रुत्वेति मुमुदाते तौ सेवमानौ च तं मुनिम् । धर्मस्थौ तस्थतुः सुस्थौ तत्र कत्यपि वासरान् ॥ ३६७ ॥
गते विहर्तुमन्यत्र मुनौ तत्र तु तावपि । स्थाने स्थाने च चैत्यानि वन्दमानौ विचेरतुः ॥ ३६८ ॥
इतश्चासीज्जनानन्दे जितशत्रुर्नृपः पुरे । तस्यासीन्महिषी नाम्ना धारिणी शीलधारिणी ॥ ३६९ ॥
स्वर्गाच्च्युत्वा रत्नवती तस्याः कुक्षाववातरत् । पूर्णे च काले सासूत नाम्ना प्रीतिमतीं सुताम् ॥ ३७० ॥

ववृधे सा क्रमेणोपाददे च सकलाः कलाः । आसादयामास चोच्चैर्यौवनं स्मरजीवनम् ॥ ३७१ ॥
तस्याश्चातिकलाज्ञाया विज्ञोऽप्यज्ञः पुरोऽभवत् । दृष्टिर्न तस्याः कुत्रापि तदरंस्त[1] मनागपि ॥ ३७२ ॥
पितापि दध्यौ यद्येतां विदग्धां[2] येन केनचित् । वरेणोद्वाहयिष्यामि प्राणांस्त्यक्ष्यत्यसौ तदा ॥ ३७३ ॥
ध्यात्वैवं तां रहोऽपृच्छत् पुत्रि कस्ते वरो मतः । साप्यूचे स वरो मेऽस्तु यो विजेता कलासु माम् ॥ ३७४ ॥
तत्प्रत्यपादि राजापि सा प्रतिज्ञा च पप्रथे । राजानो राजपुत्राश्च कलाभ्यासं भृशं व्यधुः ॥ ३७५ ॥
जितशत्रुर्नृपोऽन्येद्युर्बहिर्मंचानकारयत् । राज्ञश्च राजपुत्रांश्चाजूहवच्च स्वयंवरे ॥ ३७६ ॥
भूचराः खेचराश्चेयुः कुमारैः सह भूभुजः । स्वनन्दनवियोगार्तं विनैकं हरिणन्दिनम् ॥ ३७७ ॥
निषेदुस्ते च मंचेषु विमानेष्विव नाकिनः । इतश्च पर्यटन् दैवात्तत्रागादपराजितः ॥ ३७८ ॥
सोऽवोचद्विमलबोधं समये स्मः समागताः । कलाविचारं तज्ज्ञानां द्रक्ष्यामस्तां च कन्यकाम् ॥ ३७९ ॥
मा नः परिचितोऽज्ञासीदिति तेन सहैव सः । गुटिकायाः प्रयोगेण प्राकृतं[3] रुपमादधे ॥ ३८० ॥
तावुभौ जग्मतुस्तत्र स्वयंवरणमंडपे । क्रीडया विकृताकारधारिणौ त्रिदशाविव ॥ ३८१ ॥
अनर्घ्यनेपथ्यधरा[4] धरामिव गतामरी । चामराभ्यां वीज्यमाना सखीदासीजनावृता ॥ ३८२ ॥
आत्मरक्षाप्रतीहारोत्सार्यमाणपुरोजना । देवी लक्ष्मीरपरेव तत्रागात् प्रीतिमत्यथ ॥ ३८३ ॥ युग्मम् ॥

पूर्वभवचरिते पञ्चमोऽपराजितभवः ।

---

१ अरमत–रक्ता बभूव । २ चतुराम् । ३ सर्वसाधारणम् । ४ अमूल्यवेषधरा ।

ऊचे च मालतीनामांगुल्या निर्दिशति सखी । भूचराः खेचराश्चामी गुणिमन्या इहाययुः ॥ ३८४ ॥
असौ कदंबदेशस्य राजा भुवनविश्रुतः । वीरो भुवनचंद्राख्यः पूर्वदिग्मुखमंडनम् ॥ ३८५ ॥
प्रकृत्या दक्षिणश्चायं दक्षिणाशाविशेषकः । नामतः समरकेतुर्मीनकेतुर्वपुःश्रिया ॥ ३८६ ॥
उत्तराशाकुबेरोऽयं कुबेर इति नामतः । वैरिनारीजनाश्रान्तः स्फीतकीर्तिलतावनः ॥ ३८७ ॥
अयं सोमप्रभः कीर्त्या जितसोमप्रभो नृपः । अन्येऽपि धवलशूरभीमाद्या पार्थिवा अमी ॥ ३८८ ॥
अयं च खेचराधीशो मणिचूडो महाभुजः । रत्नचूडस्त्वसावेष महाबाहुर्मणिप्रभः ॥ ३८९ ॥
एते च सुमनःसोमसूराद्याः खेचरेश्वराः । तदीक्षस्व परीक्षस्व सर्वेऽप्येते कलाविदः ॥ ३९० ॥
तयेत्युक्ता प्रीतिमती यं यमैक्षिष्ट चक्षुषा । तयादिष्ट इवानंगस्तं तं बाणैरताडयत् ॥ ३९१ ॥
मधुमत्तान्यपुष्टास्त्रीस्वरमालंब्य साकरोत् । विचारं पूर्वपक्षस्था वाग्देवीव विवादिनी ॥ ३९२ ॥
निहतप्रतिभाः सर्वे भूचराः खेचरा अपि । गले गृहीता इव ते नाशकन् दातुमुत्तरम् ॥ ३९३ ॥
स्त्रीसंबन्धात् पक्षमस्याश्चक्रे वाग्देव्यतो वयम् । अनया निर्जिता नूनं पुरा केनाप्यनिर्जिताः ॥ ३९४ ॥
इत्यादि विविधं प्रोचुर्विलक्षास्ते परस्परम् । राजानो राजपुत्राश्च त्रपावनमदाननाः ॥ ३९५ ॥
दध्यौ च जितशत्रुः किं सर्वायासादिमां विधिः । विधाय खिन्न एतस्या नानुरुपं पतिं व्यधात् ॥ ३९६ ॥

१ विशेषकः तिलकः । २ वसन्त उन्मत्तायाऽन्यपुष्टास्त्री कोकिला तस्याः स्वरम् । * आशा–दिक्

इयन्त एव राजानो मत्पुत्र्या एषु वोचितः[1] । नरो न कोऽपि हीनोऽन्यो भावी चेत्का गतिस्तदा ॥ ३९७ ॥
तन्मंत्र्यूचे च भावज्ञो विषादेन कृतं प्रभो । प्रकृष्टेभ्यः प्रकृष्टाः *स्युर्बहुरत्ना हि भूरियम्* ॥ ३९८ ॥
राजा वा राजपुत्रो वा परो वा य इमां जयेत् । स एव हि वरोऽमुष्या घोषणा कार्यतामियम् ॥ ३९९ ॥
साधु साध्विति जल्पंश्च तथैवाकारयन्नृपः । आकर्ण्य घोषणां तां च दध्यावित्यपराजितः ॥ ४०० ॥
स्त्रिया सह विवादे स्यान्नोत्कर्षो विजयेऽपि हि । पुंस्पक्षो[2] विजितः सर्वोऽप्यविवादे भवेत्पुनः ॥ ४०१ ॥
तदुत्कर्षोऽस्तु मा वास्तु जेतव्या सर्वथाप्यसौ । विमृश्येति कुमारो द्राक् प्रीतिमत्याः पुरोऽभवत् ॥ ४०२ ॥
अभ्रच्छन्नमिवादित्यं दुर्वेषमपि वीक्ष्य तम् । प्राग्जन्मस्नेहसंबंधात् प्रीतिं प्रीतिमती दधौ ॥ ४०३ ॥
पूर्वपक्षं प्रीतिमती प्राग्जग्राह तथैव हि । तां द्राग्निरुत्तरीकृत्य पराजिग्येऽपराजितः ॥ ४०४ ॥
स्वयंवरस्रजं सद्यः सा चिक्षेपापराजिते । चुकुपुश्च नृपास्तस्मै भूचराः खेचराश्च ते ॥ ४०५ ॥
क एष वाचा वातूलस्तूलवल्लाघवास्पदम् । इमां कार्पटिको[3]ऽस्मासु सत्सूद्वोढेति भाषिणः ॥ ४०६ ॥
नृपाः संवर्मयामासुः समं सादिनिषादिभिः । उदस्तशस्त्राः संग्रामं संरंभादारभन्त च ॥ ४०७ ॥
कुमारोऽपि समुत्पत्य हत्वा कंचिन्निषादिनम् । तद्गजस्थोऽपि युयुधे तदस्त्रैः शारिवर्तिभिः[4] ॥ ४०८ ॥
क्षणाच्च रथिनं हत्वा प्राहरत्तद्रथस्थितः । क्षणाद्भुमौ क्षणाद्भूयोऽपीभस्थः स युधं व्यधात् ॥ ४०९ ॥

---

१ सृतम् । २ पुंसां पुरुषाणां पक्षः समूहः । ३ दीनः । ४ शारिर्गजकवचं तत्र वर्तिभिः ।

पूर्वभवचरिते
पञ्चमो-
ऽपराजितभवः ।

एकोऽप्यनेकधा भूत इवाशनिरिवास्फुरत् । अभांक्षीद्विद्विषत्सैन्यमुन्मन्युरपराजितः ॥ ४१० ॥
स्त्रियापि प्राग्जिताः शास्त्रैः शस्त्रैकाकिनाधुना । इति ह्रीणा नृपा योद्धुं संभूयापि डुढौकिरे ॥ ४११ ॥
अथ सोमप्रभस्येभमारुरोहापराजितः । तं चोपालक्षयत् सोमो लक्षणैस्तिलकेन च ॥ ४१२ ॥
भुजोपपीडं तं सोमः परिरेभे महाभुजम् । दिष्ट्या ज्ञातोऽसि जामेयामेयवीर्येत्युवाच च ॥ ४१३ ॥
आख्यच्च राज्ञां सर्वेषां ते सर्वे व्यरमन् रणात् । तैरेव स्वजनीभूतैरध्यास्युद्वाहमंडपः ॥ ४१४ ॥
ततोऽपराजितप्रीतिमत्योरन्योऽन्यरक्तयोः । चक्रे विवाहं पुण्येऽह्नि भूभुजा जितशत्रुणा ॥ ४१५ ॥
चक्रे नैसर्गिकं रुपं मनोज्ञमपराजितः । विक्रमेण च रुपेण तस्यारंजज्जनोऽखिलः ॥ ४१६ ॥
सत्कृत्य व्यसृजत् सर्वान् जितशत्रुर्महीपतीन् । रममाणः प्रीतिमत्या तत्रास्थाच्चापराजितः ॥ ४१७ ॥
जितशत्रुनृपामात्यः कन्यां रुपवतीं निजाम् । ददौ विमलबोधाय सोऽपि रेमे तया सह ॥ ४१८ ॥
अन्येद्युराययौ तत्र दूतः श्रीहरिणन्दिनः । ददृशे च कुमारेण परिरेभे च संभ्रमात् ॥ ४१९ ॥
कुशलं तातपादानामंबायाश्चेति तेन सः । पृष्टो दूतो जगादैवमश्रुपूर्णविलोचनः ॥ ४२० ॥
शरीरधारणामात्रं कुशलं केवलं तयोः । त्वत्प्रवासदिनादेव तौ ह्यनुद्वानलोचनौ ॥ ४२१ ॥
श्रुत्वा श्रुत्वा जनश्रुत्या त्वच्चरित्रं नवं नवम् । प्रमोदेते क्षणं तौ त्वद्वियोगेन च मूर्छतः ॥ ४२२ ॥

१ अधिककोपवान् । २ भगिनीपुत्र । * लज्जिताः ।

श्रुत्वा वृत्तांतमेतं ते सम्यग्ज्ञातुमहं प्रभो । प्रेषितोऽद्यापि पितरौ न खेदयितुमर्हसि ॥ ४२३ ॥
कुमारोऽप्यश्रुपूर्णाक्षः सगद्गदमभाषत । ईदृग्दुःखप्रदं पित्रोर्धिग्धिग्मामधमं सुतम् ॥ ४२४ ॥
जितशत्रुमथापृच्छ्य प्राचालीदपराजितः । आगाच्च भुवनभानुः सुताद्वययुतस्तदा ॥ ४२५ ॥
अन्याश्च तेन पूर्वोढास्तत्रानिन्युः स्वनन्दनाः । राजानः सूरकान्तोऽपि तत्रागादभयार्जितः ॥ ४२६ ॥
प्रीतिमत्या तथान्याभिः पत्नीभिरपराजितः । भूचरैः खेचरैश्चापि राजभिः परिवारितः ॥ ४२७ ॥
रोदसी छादयन् सैन्यैर्भूचरैः खेचरैरपि । स्तोकैरपि दिनैरुत्कः[1] प्राप सिंहपुरं पुरम् ॥ ४२८ ॥
॥ युग्मम् ॥
हरिणंदी तमभ्येत्य लुठन्तमवनीतले । परिरभ्यांकमारोप्य मुर्ध्न्यचुंबन्मुहुर्मुहुः ॥ ४२९ ॥
मातापि प्रणमंतं तं बाष्पायितविलोचना । पृष्ठे पस्पर्श पाणिभ्यां चुचुंब शिरसस्तले ॥ ४३० ॥
पादान् श्वशुरयोर्नेमुः प्रीतिमत्यादयोऽपि ताः । स्नुषा[2] विमलबोधेन नामग्राहं[3] प्रदर्शिताः ॥ ४३१ ॥
भूचरान् खेचरांश्चाथ विससर्जापराजितः । पित्रोर्नेत्रोत्सवं कुर्वन् चास्थात् क्रीडन् यथासुखम् ॥ ४३२ ॥
तौ मनोगतिचपलगती माहेन्द्रतश्च्युतौ । अभूतामनुजौ तस्य सूरः सोमश्च नामतः ॥ ४३३ ॥
अथान्यदा हरिणंदी राज्यं न्यस्यापराजिते । प्रवव्राज तपस्तप्त्वा प्रपेदे च परं पदम् ॥ ४३४ ॥

---

१ उत्सुकः । २ पुत्रवध्वः । ३ नाम गृहीत्वा ।

अपराजितराजस्य महिषी प्रीतिमत्यभूत् । मंत्री विमलबोधश्च तौ बन्धू मंडलेश्वरौ ॥ ४३५ ॥
पुराप्याक्रान्तभूपालः पृथ्वीं सुखमपालयत् । भोगांश्चाभुक्त निर्विघ्नमपराजितभूपतिः ॥ ४३६ ॥
चैत्यानि च विचित्राणि रथयात्राश्च लक्षशः । कुर्वाणोऽगमयत्कालं स पुमर्थै[1]रवंचितः ॥ ४३७ ॥
स गतोऽन्येद्युरुद्याने ददर्शैकं महर्द्धिकम् । मूर्त्यानंगमिवानंगदेवं सार्थपतेः सुतम् ॥ ४३८ ॥
तमावृतं स[2]वयोभिर्दिव्यनेपथ्यधारिभिः । क्रीडन्तं रमणीयाभिः रमणीभिश्च भूरिशः ॥ ४३९ ॥
ददानमर्थिनामर्थं स्तूयमानं च बंदिभिः । गीतासक्तं प्रेक्ष्य राजापृच्छत्कोऽसाविति स्वकान् ॥ ४४० ॥
असौ समुद्रपालस्य सार्थवाहस्य नंदनः । महेभ्योऽनंगदेवाख्य इत्याख्यान् पार्थिवाय ते ॥ ४४१ ॥
धन्योऽस्मि यस्य वणिजोऽपीत्युदारा महर्द्धयः । एवं प्रशंसन्वेश्मागात् पुनरप्यपराजितः ॥ ४४२ ॥
द्वितीयेऽह्नि बहिर्गच्छन्सोऽपश्यन्मृतकं व्रजन् । नृभिश्चतुर्भिरुत्क्षिप्तं रसद्विरसडिंडिमम् ॥ ४४३ ॥
अन्वीयमानं रामाभिरा*घ्नानाभिरुरःस्थलम् । मुक्तकेशं रुदन्तीभिर्मूर्च्छन्तीभिः पदे पदे ॥ ४४४ ॥
॥ युग्मम् ॥
कोऽयं मृत इति राज्ञा पृष्टेऽशंसंश्च सेवकाः । स एवानंगदेवोऽयं द्राग्विसूचिकया मृतः ॥ ४४५ ॥
अहो असारः संसारो धिग्धिग्विश्व[3]स्तध्रुग्विधिः । हा प्रमादः प्राणभाजां मोहनिद्रांधचेतसाम् ॥ ४४६ ॥

१ पुरुषार्थैः । २ मित्रैः । ३ विश्वस्तेभ्यो द्रुह्यतीति विश्वस्तध्रुक् । * प्रहरन्तीभिः

एवं महान्तं संवेगं धारयन्नपराजितः । जगाम स्वगृहं खिन्नस्तस्थौ चाहानि कत्यपि ॥ ४४७ ॥
यः प्राक् कुंडपुरे दृष्टः केवली तत्र सोऽन्यदा । आगात्तस्योपकाराय योग्यं ज्ञानेन तं विदन् ॥ ४४८ ॥
श्रुत्वा धर्मं च तत्पार्श्वे पुत्रं प्रीतिमतीभवम् । पद्मं निधाय राज्ये स्वे प्राव्राजीदपराजितः ॥ ४४९ ॥
सा च प्रिया प्रीतिमती सूरः सोमश्च बान्धवौ । मंत्री विमलबोधश्च सर्वेऽनुप्राव्रजंस्तदा ॥ ४५० ॥
ते सर्वेऽपि तपस्तप्त्वा मृत्वा कल्पेऽयुरारणे । इन्द्रसामानिकाः प्रीतिभाजोऽभूवन् परस्परम् ॥ ४५१ ॥
इतश्च जंबूद्वीपेऽस्मिन् वर्षे च भरते पुरम् । इहास्ति हास्तिनपुरं कुरुमंडलमंडनम् ॥ ४५२ ॥
श्रीषेणस्तत्र राजाभूद्र[1]जनीजानिसन्निभः । श्रीरिव श्रीमती नाम्ना महिषी तस्य चाभवत् ॥ ४५३ ॥
शं[2]खावदातं पूर्णेन्दुं सा विशन्तं मुखांबुजे । स्वप्नेऽपश्यन्निशाशेषे पत्ये चाख्यद्दिवामुखे ॥ ४५४ ॥
नृपो निर्णीतवांस्तज्ज्ञैः स्वप्नेनानेन चन्द्रवत् । ध्वस्ताशेषद्विषद्ध्वांतो देव्याः सूनुर्भविष्यति ॥ ४५५ ॥
इतोऽपराजितश्च्युत्वा तस्याः कुक्षाववातरत् । काले च सासूत सुतं पवित्रं सर्वलक्षणैः ॥ ४५६ ॥
पिता तस्याकरोच्छंख इत्याख्यां पूर्वजाख्यया । धात्रीभिः पंचभिः सोऽथ लाल्यमानो व्यवर्धत ॥ ४५७ ॥
साक्षिमात्रीकृत्य गुरुं लीलया चाददे कलाः । प्रतिजन्म समभ्यस्तास्तस्य सन्निहिता हि ताः ॥ ४५८ ॥
मतिप्रभो नाम गुणनिधिः श्रीषेणमंत्रिणः । सुतोऽभूद्विमलबोधजीवः प्रच्युत आरणात् ॥ ४५९ ॥

अपराजितस्य दीक्षा, स्वर्ग–गमनम्, सप्तमः शंखभवश्च ।

१ रजनीजानिश्चंद्रस्तत्संनिभः । २ शंखवदुज्ज्वलम् ।

सहपांशुक्रीडितश्च सहाध्यायी च सोऽभवत् । स्निग्धः शंखकुमारस्य मन्मथस्येव माधवः ॥ ४६० ॥
स तेन सुहृदा सार्धं राजपुत्रैस्तथापरैः । नानाविधाभिः क्रीडाभिः क्रीडन् यौवनमासदत् ॥ ४६१ ॥
अथ श्रीषेणमन्येद्युरुच्चैः पूत्कारकारिणः । एत्य विज्ञापयामासुर्दूराज्जानपदा जनाः ॥ ४६२ ॥
अस्ति त्वद्देशसीमायामत्यंतविषमोन्नतः । विशालश्रृंगोऽद्रिश्चन्द्र[1]शिशिरासरितांकितः ॥ ४६३ ॥
तत्रास्ति दुर्गे समरकेतुः पल्लीपतिः स्थितः । अस्माँल्लुंटति निःशंकस्तस्मात्त्रायस्व नः प्रभो ॥ ४६४ ॥
तद्वधाय प्रतिष्ठासू[×] राजा भंभामवीवदत् । नत्वा शंखकुमारस्तं सप्रश्रयम्[+]उवाच च ॥ ४६५ ॥
क एष स्वयमाक्षेपस्तत्र पल्लीशमात्रके । नेभः प्रहन्यान्मशके शशके च हरिः क्वचित् ॥ ४६६ ॥
त्वदाज्ञयाहं तं बद्ध्वा तातानेष्ये समादिश । स्वयं प्रयाणाद्विरम त्रपाकरमिदं हि वः ॥ ४६७ ॥
राज्ञापि तद्वचः श्रुत्वा तदैव सह सेनया । विसृष्टः शंखकुमारस्तां पल्लीं निकषा ययौ ॥ ४६८ ॥
श्रुत्वा कुमारमायान्तं दुर्गं शून्यं विमुच्य सः । पल्लीशो गह्वरेऽन्यत्र प्राविशन्मायिनां वरः ॥ ४६९ ॥
[2]कुशाग्रीयमतिः शंखकुमारो दुर्गपत्तने । एकं प्रवेशयामास सामन्तं सारसैनिकम् ॥ ४७० ॥
स्वयं निकुंजे चैकस्मिन्निलीयास्थात्ससैनिकः । पल्लीपतिस्तु तं दुर्गं रुरोध च्छलकृत्सदा ॥ ४७१ ॥
क्व भोः कुमार यासीति यावत्तत्र जगर्ज सः । तावत्कुमारस्तं सैन्यैरवेष्टयदनेकशः ॥ ४७२ ॥

१ चंद्रसमाना शिशिरा नाम नदी तयांकितः । २ कुशाग्रबुद्धिः । × गन्तुं इच्छुः । + विनयेन सहितम् यथा स्यात् तथा ।

इतश्च दुर्गवप्रस्थै राजसैन्यैरघाति सः । इतः कुमारसैन्यैश्च पल्लीनाथोऽन्तरा स्थितः ॥ ४७३ ॥
कंठे कुठारं स क्षिप्त्वा कुमारं शरणं ययौ । ऊचे च मायामंत्राणां प्रतिकर्ता त्वमेव मे ॥ ४७४ ॥
स्वामिन् दासीभविष्यामि सिद्धो भूत इवैष ते । सर्वं मम गृहाणेदं [1]प्रसत्त्यानुगृहाण माम् ॥ ४७५ ॥
ततः कुमारस्तेनात्तं [2]लोप्त्रं यद्यस्य तस्य तत् । सर्वं समार्पयत्तस्माद्दंडं च स्वयमग्रहीत् ॥ ४७६ ॥
पल्लीपतिं तमादाय कुमारोऽपि न्यवर्तत । पथि सायमवात्सीच्च स्कंधावारं निवेश्य सः ॥ ४७७ ॥
सोऽथार्धरात्रे तल्पस्थः शुश्राव करुणस्वरम् । ययौ [3]चासिसखा तस्य स्वरस्यैवानुसारतः ॥ ४७८ ॥
ददर्श चाग्रे रुदतीं महिलामर्ध[4]वार्द्धकाम् । ऊचे च मृदु मा रोदीर्ब्रूहि दुःखस्य कारणम् ॥ ४७९ ॥
तस्य मूर्त्या च वाचा च लब्धाश्वासा जगाद सा । अस्त्यंगदेशे चंपायां जितारिर्नाम भूपतिः ॥ ४८० ॥
तस्य कीर्तिमतीपत्न्यां पश्चाद्[5]बह्वात्मजन्मनाम् । जाता यशोमती नाम सुतास्ति स्त्रीशिरोमणिः ॥ ४८१ ॥
स्वानुरुपं वरं तस्या अपश्यंत्या मनागपि । अरोचकिन्या नो रेमे दृष्टिः कुत्रापि पूरुषे ॥ ४८२ ॥
कदाप्यगात्कर्णपथं शंखः श्रीषेणनंदनः । तस्याश्चक्रे हृदि पदं [6]युगपन्मन्मथोऽपि च ॥ ४८३ ॥
मां शंख एवोद्वोढेति प्रत्यज्ञासीद्यशोमती । स्थानेऽनुरक्तेयमिति मुमुदे चापि तत्पिता ॥ ४८४ ॥
यावत्तदर्थे श्रीषेणांतिके प्रैषीन्नरान्नृपः । तावद्ययाचे तां विद्याधरेन्द्रो मणिशेखरः ॥ ४८५ ॥

---

१ प्रसादेन । २ चौर्येणानीतं धनं लोप्त्रम् ३ खड्गसहायः । ४ अर्द्धजरतीम् । ५ बहूनां पुत्राणां पश्चात् ६ युगपत् कामः अपि स्थानं चक्रे ।

नेच्छत्येषा विना शंखमित्यूचे तं जितारिराट् । ततोऽन्येद्युरहार्षीत्तां स विद्याधरपांसनः[1] ॥ ४८६ ॥
अहं तु धात्रिका तस्यास्तद्दोर्लग्ना समागता । इहोज्जिता तेन दुष्टखेचरेण बलादपि ॥ ४८७ ॥
संसारसारभूतां तां बालां कुत्रापि सोऽनयत् । तेनाहं विलपाम्येवं जीविष्यति कथं हि सा ॥ ४८८ ॥
धीराभवानयाम्येष तां कुमारीं विजित्य तम् । इत्युक्त्वान्वेष्टुमारेभे कुमारोऽटन्महाटवीम् ॥ ४८९ ॥
अत्रांतरे च चंडांशुरारुरोहोदयाचलम् । विशालश्रृंगमचलं कुमारोऽप्याससाद सः ॥ ४९० ॥
एकस्मिन् गह्वरे तस्य तां सोऽपश्यद्यशोमतीम् । विवाहायार्थयन्तं च खेचरं ब्रुवतीमिति ॥ ४९१ ॥
शंखोज्ज्वलगुणः शंखो भर्ता मे नापरः पुनः । अप्रार्थितप्रार्थक रे संखेदयसि किं मुधा ॥ ४९२ ॥
ताभ्यां दृष्टः कुमारोऽपि हृष्टश्चोवाच खेचरः । कालाकृष्टोऽयमायातस्त्वत्प्रियो मद्वशं जडे ॥ ४९३ ॥
अमुं त्वदाशया सार्धं हत्वा बाले बलादपि । एष त्वां परिणेष्यामि नेष्यामि च निजौकसि ॥ ४९४ ॥
इत्युक्तवन्तं तं शंखोऽप्युवाचोत्तिष्ठ पाप रे । परनारीहर हराम्येष खड्गेन ते शिरः ॥ ४९५ ॥
उद्यतासी ततश्चोभौ युयुधाते महाभुजौ । वल्गन्तौ चारुचारीभिः कंपयन्ताविवाचलम् ॥ ४९६ ॥
कुमारं दोर्बलाज्जेतुं नाशकत्स यदा तदा । तप्तायोगोलमुख्यास्त्रैर्युयुधे विद्यया कृतैः ॥ ४९७ ॥
पुण्योत्कर्षात् कुमारस्य कानिचित् प्राभवन्न हि । कुमारः खंडयामास खड्गेनास्त्राणि कानिचित् ॥ ४९८ ॥

---

१ विद्याधराधमः ।

ततः खिन्नान्निषण्णाच्च खेचराद्धनुराच्छिदत् । कुमारस्तच्छरेणैव तं विव्याध च वक्षसि ॥ ४९९ ॥
मूर्च्छितः सोऽपतत् पृथ्व्यां छिन्नमूल इव द्रुमः । शंखो वातादिना सज्जीकृत्याह्वत युधे* पुनः ॥ ५०० ॥
उवाच खेचरेंद्रस्तमनिर्जितवरो ह्यहम् । निर्जितोऽस्मि त्वया दोष्मन्न सामान्योऽसि सर्वथा ॥ ५०१ ॥
इयं यथा त्वया वीर गुणक्रीता यशोमती । तथा पराक्रमक्रीतोऽस्म्यपराधं सहस्व मे ॥ ५०२ ॥
कुमारोऽप्यब्रवीत्ते दोर्वीर्येण विनयेन च । रंजितोऽस्मि महाभाग ब्रूहि किं करवाणि ते ॥ ५०३ ॥
सोऽप्यूचे चेत्प्रसन्नोऽसि वैताढ्ये तर्हि गम्यताम् । सिद्धायतनयात्रा ते मम च स्यादनुग्रहः ॥ ५०४ ॥
शंखोऽनुमेने तद्वाचं मुमुदे च यशोमती । एवंविधो मया वव्रे वर इत्युत्थसन्मनाः[1] ॥ ५०५ ॥
खेचराश्च तदाभ्येयुर्मणिशेखरपत्तयः । ज्ञातोदन्ता[2] नमश्चक्रुः कुमारमुपकारिणम् ॥ ५०६ ॥
प्रेष्य द्वौ खेचरौ सैन्ये स्ववृत्तान्तमजिज्ञपत् । कुमारः प्राहिणोच्चाशु तत्सैन्यं हस्तिनापुरे ॥ ५०७ ॥
तां च धात्रीं यशोमत्यास्तत्रानाय्य नभश्चरैः । धात्रीयशोमतीयुक्तः शंखो वैताढ्यमभ्यगात् ॥ ५०८ ॥
तत्र सिद्धायतनेषु ववन्दे शाश्वतार्हतः । चक्रे च विविधाः पूजा यशोमत्या सहैव सः ॥ ५०९ ॥
निन्ये च कनकपुरे कुमारं मणिशेखरः । देवतामिव चानर्चोपवेश्य निजवेश्मनि ॥ ५१० ॥
वैताढ्यवासिनः सर्वेऽप्याश्चर्यमिव चागतम् । एत्य शंखयशोमत्यौ भूयो भूयो व्यलोकयन् ॥ ५११ ॥

---

१ उत्थमुत्पन्नं सन्मनो यस्याः सा । २ ज्ञातवृत्तांताः । * युद्धाय ।

द्विषज्जयादिमूल्येन प्रीतास्तत्रापरेऽपि हि । खेचराः पत्तयोऽभूवन् कुमारस्य महर्द्धयः ॥ ५१२ ॥
तेऽदुर्निजनिजाः पुत्रीस्तस्मै स प्रत्यवोचत । परिणेष्याम्यमूरेतां परिणीय यशोमतीम् ॥ ५१३ ॥
मणिशेखरमुख्यास्ते गृहीत्वा स्वस्वकन्यकाः । शंखं सह यशोमत्या चंपायां निन्यिरे तदा ॥ ५१४ ॥
जितारिर्ज्ञातवृत्तान्तो वरं पुत्र्या सहागतम् । समावृतं खेचरेन्द्रैरभ्यगान्मुदितो भृशम् ॥ ५१५ ॥
संभ्रमाच्छंखमाश्लिष्य पुर्यां प्रावेशयन्नृपः । पुत्र्या चोद्वाहयामास महोत्सवपुरःसरम् ॥ ५१६ ॥
विद्याधरसुतास्ताश्च तदा शंख उपायत[1] । श्रीवासुपूज्यचैत्यानां यात्रां चक्रे च भक्तितः ॥ ५१७ ॥
विसृज्य खेचरान् स्थित्वा तत्र चाहानि[2] कत्यपि । यशोमत्यादिपत्नीभिः शंखोऽगाद्धस्तिनापुरे ॥ ५१८ ॥
च्युत्वारणात् सूरसोमावभूतामथ तस्य तु । यशोधरगुणधरावनुजौ पूर्वजन्मवत् ॥ ५१९ ॥
श्रीषेणराजाप्यन्येद्युर्दत्वा शंखाय मेदिनीम् । गुणधरगणधरपादान्ते व्रतमाददे ॥ ५२० ॥
श्रीषेणः पालयामास दुस्तपं स यथा तपः । वसुंधरां तथा शंखः शंखोज्वलयशाश्चिरम् ॥ ५२१ ॥
उत्पन्नकेवलोऽन्येद्युः श्रीश्रीषेणो महामुनिः । विहरन्नाययौ तत्र सुरसान्निध्यशोभितः ॥ ५२२ ॥
उपेत्य शंखभूपालस्तं ववन्देऽतिभक्तितः । संसारांभोधिनौदेश्यां[3] देशनां च ततोऽश्रृणोत् ॥ ५२३ ॥
देशनान्तेऽवदच्छंखो वेद्मि त्वच्छासनादहम् । भवे न कोऽपि कस्यापि संबंधी किं तु केवलः ॥ ५२४ ॥

१ परिणीतवान् । २ दिनानि । ३ संसारसमुद्रे नाविकासमानाम् ।

तथाप्यस्यां यशोमत्यां ममत्वं मेऽधिकं कुतः । प्रसीदाख्याहि सर्वज्ञानभिज्ञमनुशाधि माम् ॥ ५२५ ॥
केवल्याख्यद्धनभवे पत्नी ते धनवत्यसौ । सौधर्मे च सुहृच्चित्रगते रत्नवती प्रिया ॥ ५२६ ॥
माहेन्द्रे च सुहृद्भार्या त्वपराजितजन्मनि । इयं प्रीतिमती कल्पे त्वारणे ते सुहृत्सुरः ॥ ५२७ ॥
सप्तमेऽस्मिन् भवे भार्या भूयस्तेऽभूद्यशोमती । तेनास्यां स्नेहसंबन्धो भवान्तरभवस्तव ॥ ५२८ ॥
इतोऽपराजिते गत्वा च्युत्वा वर्षेऽत्र भारते । द्वाविंशस्तीर्थनाथस्त्वं नेमिनाथो भविष्यसि ॥ ५२९ ॥
इयं राजीमती नाम त्वयानूढानुरागिणी । त्वत्पार्श्वात्तपरिव्रज्यां व्रजिष्यति परं पदम् ॥ ५३० ॥
यशोधरगुणधरौ भ्रातरौ प्राग्भवेषु ते । मंत्री मतिप्रभश्चैते सेत्स्यंत्याप्य गणेशताम् ॥ ५३१ ॥
पुंडरीकं सुतं राज्ये न्यस्य शंखोऽग्रहीद्व्रतम् । तत्पार्श्वे सह बन्धुभ्यां यशोमत्याथ मंत्रिणा ॥ ५३२ ॥
गीतार्थोऽभूत्क्रमाच्छंखस्तपस्तेपे च दुस्तपम् । अर्हद्भक्त्यादिभिः स्थानैस्तीर्थकृत्कर्म चार्जयत् ॥ ५३३ ॥

पादपोपगमनं स विधायान्तेऽपराजितमगान्मुनिशंखः ।
तेऽपि तेन विधिनैव यशोमत्यादयोऽयुरपराजितमेव ॥ ५३४ ॥

❖ ❖ ❖

**इत्याचार्यश्रीहेमचन्द्रविरचिते त्रिषष्टिशलाकापुरुषचरित्रे महाकाव्येऽष्टमे पर्वणि श्रीअरिष्टनेमिपूर्वभववर्णनो नाम प्रथमः सर्गः ।**

१ प्राप्य । २ गणधरत्वम् । * अपरिणीता + सिद्धाः भविष्यन्ति ।



शंखस्य दीक्षा, तीर्थकृन्नाम–कर्मार्जनम् स्वर्गगमनं च ।

# द्वितीयः सर्गः ।

यदुवंशोत्पत्तिः ।

इतश्च भरतेऽत्रास्ति मथुरेति वरा पुरी । नद्या यमुनया नील[1]संव्यानेनेव शोभिता ॥ १ ॥
तस्यां पुर्यां हरिवंश्याद्वसुपुत्रादबृहद्ध्वजात् । गतेषु भूयःसु नृपेष्वभून्नाम्ना यदुर्नृपः ॥ २ ॥
यदोरथाभवत्सूनुः शूरः [2]शूरसमद्युतिः । शूरस्यापि सुतौ शौरिसुवीरौ वीरकुंजरौ ॥ ३ ॥
शौरिं राज्ये यौवराज्ये सुवीरं न्यस्य शूरराट् । जातसंसारवैराग्यः परिव्रज्यामुपाददे ॥ ४ ॥
शौरिस्तु मथुराराज्यं सुवीरायानुजन्मने । दत्वा कुशार्तदेशेऽगात्तत्र शौर्यपुरं न्यधात् ॥ ५ ॥
सूनवोऽन्धकवृष्ण्याद्या जज्ञिरे शौरिभूभुजः । सुवीरस्य पुनर्भोजवृष्ण्याद्या अमितौजसः ॥ ६ ॥
सुवीरो मथुराराज्यं दत्वा भोजकवृष्णये । पुरं सिंधुषु सौवीरं निधायास्थान्महाभुजः ॥ ७ ॥
निधायान्धकवृष्णिं स्वे राज्ये शौरिर्महाभुजः । सुप्रतिष्ठमुनेः पार्श्वे प्रव्रज्य प्रययौ शिवम् ॥ ८ ॥

१ श्यामवस्त्रेण । २ सूर्यसमकांतिः ।

भोजवृष्णेर्मथुरायां राज्यं पालयतः सतः । उग्रसेनोऽभवत्सूनुरुदग्रभुजविक्रमः ॥ ९ ॥
जज्ञिरेऽन्धकवृष्णेश्च सुभद्रायां दशात्मजाः । समुद्रविजयोऽक्षोभ्यः स्तिमितः सागरोऽपि च ॥ १० ॥
हिमवानचलश्चैव धरणः पूरणस्तथा । अभिचंद्रो वसुदेवो दशार्हाख्या दशापि ते ॥ ११ ॥ ॥ युग्मम् ॥
तेषामभूतामनुजे कुंती मद्री च नामतः । पांडवेऽदात् पिता कुंतीं दमघोषाय चापराम् ॥ १२ ॥
अन्येद्युरंधकवृष्णिरवधिज्ञानिनं मुनिम् । सुप्रतिष्ठं प्रणम्यैवमपृच्छद्रचितांजलिः ॥ १३ ॥
स्वामिन्सूनुर्मे दशमो वसुदेवोऽभिधानतः । अत्यंतरुपसौभाग्यः कलावान् विक्रमी च किम् ॥ १४ ॥
आख्यच्च सुप्रतिष्ठर्षिरासीन्मगधमंडले । नंदिग्रामे द्विजो रोरस्तस्य भार्या च सोमिला ॥ १५ ॥

वसुदेवस्य पूर्वभवचरिते नंदिषेणभवः ।

नंदिषेणस्तयोः सूनुर्बालस्यापि हि तस्य तु । पितरौ तौ विपेदाते मंदभाग्यशिरोमणेः ॥ १६ ॥
तुंदिलो[1] दंतुरश्चुल्लश्[2]चतुरस्रशिरास्तथा । कुरुपोऽन्येषु चांगेषु सोऽत्याजि स्वजनैरपि ॥ १७ ॥
जीवन्मूल्येनापरेद्युर्जगृहे मातुलेन सः । मातुलस्य तु तस्यासन्नुद्वाह्याः सप्त कन्यकाः ॥ १८ ॥
एकां दास्यामि ते कन्यामित्यूचे मातुलश्च तम् । तद्वेश्मकर्म तल्लोभादशेषं च चकार सः ॥ १९ ॥
तत्राद्या यौवना कन्या तज्ज्ञात्वोवाच मां यदि । प्रदास्यति पितामुष्मै तन्मरिष्यामि निश्चितम् ॥ २० ॥
शुश्राव नंदिषेणस्तद्विषण्णो मातुलेन तु । ऊचे सुतां द्वितीयां ते दास्ये मा खेदमुद्वह ॥ २१ ॥

१ बृहदुदरवान् । २ कुनेत्रः ।

श्रुत्वा द्वितीयपुत्र्यापि तद्वच्चक्रे [१]प्रतिश्रवः । अन्यपुत्रीभिरप्येवं प्रतिषिद्धः क्रमेण सः ॥ २२ ॥
ततस्तं मातुलोऽवोचत् पुत्रीमन्यस्य कस्यचित् । याचित्वा ते प्रदास्यामि वत्स मा भूस्त्वमाकुलः ॥ २३ ॥
नंदिषेणस्ततो दध्यौ निजा नेप्संति माममूः । ईप्सिष्यंति कथं त्वन्यकन्या मां रुपदूषितम् ॥ २४ ॥
इति निःसृत्य वैराग्याद्ययौ रत्नपुरे पुरे । दंपतीन् क्रीडतस्तत्र निरीक्ष्य स्वं निनिंद सः ॥ २५ ॥
मुमूर्षुः सोऽथ वैराग्याद्ययावुपवनान्तरे । सुस्थितं नाम तत्रर्षिं ददर्श प्रणनाम च ॥ २६ ॥
ज्ञात्वा ज्ञानेन तद्भावं स साधुस्तमवोचत । मा मृत्युसाहसं कार्षीर*धर्मस्य फलं ह्यदः* ॥ २७ ॥
कार्यः सुखार्थिना धर्म आत्मघातात्सुखं न हि । स तु प्रव्रज्यया धर्मः सुखहेतुर्भवे भवे ॥ २८ ॥
श्रुत्वैवं च प्रतिबुद्धस्तत्पादांतेऽग्रहीद्व्रतम् । गीतार्थश्चाभिजग्राह वैयावृत्यं स साधुषु ॥ २९ ॥
बालग्लानादिसाधूनां वैयावृत्त्यकरं च तम् । [२]अनिर्विण्णं सभामध्ये प्रशशंस पुरंदरः ॥ ३० ॥
अश्रद्धच्छक्रवचो ग्लानसाधुवपुर्धरः । सुरो रत्नपुराभ्यर्णारण्ये कोऽपि समाययौ ॥ ३१ ॥
द्वितीयसाधुवेषं च कृत्वा तद्वसतिं ययौ । कवले पारणायत्ते नंदिषेणं जगाद च ॥ ३२ ॥
वैयावृत्त्यं प्रतिज्ञाय कथं भो भोक्ष्यसेऽधुना । यद्बहिः क्षुत्तृषाक्रान्तो मुनिरस्त्यतिसारकी ॥ ३३ ॥
मुक्त्वान्नं पानमन्वेष्टुं नंदिषेणोऽथ निर्ययौ । अनेषणीयं तच्छक्त्या देवः कर्तुं प्रचक्रमे ॥ ३४ ॥

वसुदेवस्य पूर्वभवचरिते नंदिषेणभवः ।

---

१ प्रतिज्ञा । २ निर्वेदरहितम् ।

मुनेर्लब्धिमतस्तस्य प्रभावात्तद्विजृंभितम् । न प्राभवत्ततः प्राप शुद्धं पानं स कुत्रचित् ॥ ३५ ॥
जगाम नंदिषेणश्च ग्लानर्षेस्तस्य संनिधौ । स तेन मायामुनिना चुक्रुशे परुषाक्षरम् ॥ ३६ ॥
अहमीदृगवस्थोऽस्मि त्वं तु भोजनलंपटः । न शीघ्रमागास्तद्धिक् ते वैयावृत्त्यप्रतिश्रवम् ॥ ३७ ॥
नंदिषेणोऽप्यवोचत्तं सहस्वागं[1] इदं मम । सज्जं त्वां विदधाम्येष इदं पानं तवोचितम् ॥ ३८ ॥
पाययित्वा स तं पानमुत्तिष्ठेति जगाद च । ग्लानोऽप्युवाच धिग्मुंड किं मां नाक्षममीक्षसे ॥ ३९ ॥
अथ मायामुनिं स्कंधमारोप्य प्रचलंस्ततः । आचुक्रुशे नंदिषेणः स तेनैवं पदे पदे ॥ ४० ॥
अरे शीघ्रं व्रजन् किं मां दुनोष्यांदोलनैर्भृशम् । शनैः शनैर्गच्छ सत्यं वैयावृत्यं करोषि चेत् ॥ ४१ ॥

वसुदेवस्य
पूर्वभवचरिते
नंदिषेणभवः ।

इत्युक्तोऽतिशनैः सोऽगात्तस्योपरि च सोऽमरः । वर्चश्चक्रे[2]ऽब्रवीच्चैवं वेगभंगं करोषि किम् ॥ ४२ ॥
अयं महर्षिरुल्लाघः[3] कथं स्यादिति चिन्तयन् । नाजीगणत्तद्वचांसि नंदिषेणः कटून्यपि ॥ ४३ ॥
वर्चोऽपहृत्याथ मुनौ पुष्पवृष्टिं व्यधान्मुदा । त्रिस्तं प्रदक्षिणीकृत्य दिव्यरुपोऽनमच्च सः ॥ ४४ ॥
तां प्रशंसां शक्रकृतां तस्मै देवः शशंस सः । क्षमयित्वा तुभ्यमहं किं ददामीत्युवाच च ॥ ४५ ॥
ऊचे मुनिर्मया लब्धो धर्मः परमदुर्लभः । सारं नातः परं किंचिदिह त्वत्तो यदर्थये ॥ ४६ ॥
इत्युक्तो द्यां ययौ देवः स्वाश्रयं मुनिरप्यगात् । पृष्टश्च साधुभिः सर्वमनुत्सिक्तः[4] शशंस सः ॥ ४७ ॥



१ अपराधम् । २ विष्ठम् । ३ रोगरहितः । ४ गर्वरहितः ।

द्वादशाब्दसहस्राणि तपस्तेपे स दुस्तपम् । विहितानशनश्रांते निजं दौर्भाग्यमस्मरत् ॥ ४८ ॥
तपसानेन भूयासं रमणीजनवल्लभः । एवं निदानं कृत्वा स महाशुक्रे सुरोऽभवत् ॥ ४९ ॥
ततश्च्युत्वा नंदिषेणस्तव सूनुरभूदसौ । वसुदेवस्तन्निदानाद्रमणीनां मनोहरः ॥ ५० ॥
ततो राज्येऽन्धकवृष्णिः समुद्रविजयं न्यधात् । स्वयं तु सुप्रतिष्ठांते प्रव्रज्य प्रययौ शिवम् ॥ ५१ ॥
प्राव्राजीद्भोजवृष्णिश्च मथुरायां ततोऽभवत् । उग्रसेनो नृपस्तस्य महिषी धारिणी पुनः ॥ ५२ ॥
उग्रसेनोऽन्यदा गच्छत् बहिः कमपि तापसम् । स्थितं क्वापि रहोदेशेऽद्राक्षीन्मासोपवासिनम् ॥ ५३ ॥
तस्य चैषोऽभिग्रहोऽभून्मासोपवासपारणम् । करिष्याम्येकवेश्मात्तभिक्षया नान्यथा पुनः ॥ ५४ ॥
मासे मासे पारणं स कृत्वैकगृहभिक्षया । रहःप्रदेशं तमगान्न पुनः सदनान्तरे ॥ ५५ ॥
पारणायोग्रसेनस्तं निमंत्र्य प्रययौ गृहम् । अन्वागात्तापसः सोऽपि विस्मृतश्च महीपतेः ॥ ५६ ॥
अभुक्त एव स मुनिर्निजमेवाश्रमं ययौ । तथैव मासक्षमणं भूयोपि प्रत्यपद्यत ॥ ५७ ॥
कथंचित्तत्र चायातो राजापश्यत् पुनश्च तम् । स्मृत्वा निमंत्रणं तच्च क्षमयामास चाटुभिः ॥ ५८ ॥
पुनर्निमंत्रयामास विसस्मार पुनस्तथा । आगत्याभुक्त एव स्वं स्थानं स पुनरभ्यगात् ॥ ५९ ॥
स्मृत्वा भूयोऽपि तं राजा क्षमयामास पूर्ववत् । न्यमंत्रयत भूयोऽपि चुकोपाथ स तापसः ॥ ६० ॥



कंसस्य
पूर्वभवः ।



१ बालान् ।

तपसानेन भूयासं वधायास्य भवान्तरे । एवं कृत्वा निदानं सोऽनशनेन व्यपद्यत ॥ ६१ ॥
सोऽथोग्रसेनभार्याया धारिण्या उदरेऽभवत् । तस्याश्च दोहदो जज्ञे पत्युः पलल[1]भक्षणे ॥ ६२ ॥
दिने दिने क्षीयमाणा [2]लज्जमाना च धारिणी । कथंचित्कथयामास तं पत्येऽधमदोहदम् ॥ ६३ ॥
राज्ञो ध्वान्तस्थितस्याथोदरे न्यस्य शशामिषम् । छित्वा छित्वा प्रपश्यन्त्या देव्यास्तन्मंत्रिणो ददुः ॥ ६४ ॥
सा पूर्णदोहदा मूलप्रकृतिं पुनरागता । ऊचे किं जीवितव्येन किं गर्भेण विना पतिम् ॥ ६५ ॥
मर्तुकामां मंत्रिणस्तामूचुर्यत्प्राप्तजीवितम् । स्वामिनं दर्शयिष्यामः सप्तरात्रेण ते पुनः ॥ ६६ ॥
इत्थं स्वस्थीकृतायाश्च तस्या अहनि सप्तमे । तेऽदर्शयन्नुग्रसेनं सा चक्रे च महोत्सवम् ॥ ६७ ॥
पौषकृष्णचतुर्दश्यां भद्रायां [3]मूलगे विधौ । शर्वर्यां सुषुवे सूनुं सोग्रसेनमहिष्यथ ॥ ६८ ॥
दोहदेनापि सा गर्भाद्भीता तं जातमात्रकम् । चिक्षेप कांस्यपेटायां कारितायां पुरापि हि ॥ ६९ ॥
राजस्वनामांकमुद्राद्वययुक्तां सपत्रिकाम् । सा दास्याक्षेपयद्रत्नपूर्णां तां यमुनाजले ॥ ७० ॥
सूनुर्जातो मृतश्चेति राज्ञ राज्ञी शशंस च । नद्या निन्ये च मंजूषा द्वारे शौर्यपुरस्य सा ॥ ७१ ॥
प्रातः शौचार्थमायातः सुभद्रो रसवाणिजः । ददर्श कांस्यपेटां तां चकर्ष च बहिर्जलात् ॥ ७२ ॥
पत्रिकारत्नमुद्राभिः सहितं तं च बालकम् । बालेन्दुमिव तन्मध्ये स ददर्श सविस्मयम् ॥ ७३ ॥

कंसजन्म, कुदोहदभीतया मात्रा तस्य त्यागश्च ।

१ मांसभक्षणे । २ त्रपावती । ३ मूलनक्षत्रस्थिते चन्द्रे ।

पेटादिना सहादाय बालं नीत्वा च वेश्मनि । पुत्रत्वेनार्पयदिन्दोः स्वपत्न्या मुदितो वणिक् ॥ ७४ ॥
कंस इत्यभिधां तस्य चक्रतुस्तौ तु दंपती । वर्धयामासतुस्तं च मधुक्षीरघृतादिभिः ॥ ७५ ॥
स वर्धमानः कलहशीलो डिंभान[1]कुट्टयत् । एयुश्च लोकोपालंभा वणिजोः प्रत्यहं तयोः ॥ ७६ ॥
ततस्ताभ्यां दशवर्षः सेवकत्वेन सोऽर्पितः । वसुदेवकुमारस्य सोऽभूत्तस्याप्यतिप्रियः ॥ ७७ ॥
सोऽपठद्वसुदेवेन सहैव सकलाः कलाः । सममेव च चिक्रीड सममाप च यौवनम् ॥ ७८ ॥
वसुदेवकुमारश्च कंसश्च सहवर्तिनौ । एकराशिगतौ सौम्य[2]भोमाविव विरेजतुः ॥ ७९ ॥
इतः शुक्तिमतीपुर्यां नवमो वसुनंदनः । नंष्ट्वा नागपुरे योऽगात्तत्पुत्रोऽभूद्बृहद्रथः ॥ ८० ॥
पुरे राजगृहे सोऽगात्तत्र तत्संततावभूत् । जयद्रथो[3] नाम नृपो जरासंघोऽस्य चात्मजः ॥ ८१ ॥
प्रतिविष्णुः प्रचंडाज्ञस्त्रिखंडभरतेश्वरः । स दूतेनैवमादिक्षत् समुद्रविजयं नृपम् ॥ ८२ ॥
वैताढ्यपर्वताभ्यर्णे पुरे सिंहपुरे नृपम् । दुःसहं सिंहवत् सिंहरथं बद्ध्वा समानय ॥ ८३ ॥
तदानेतुश्च दास्यामि स्वां जीवयशसं सुताम् । अभीप्सितं किंचिदेकं पुरं च प्रवरर्द्धिकम् ॥ ८४ ॥
समुद्रविजयं नत्वा वसुदेवोप्ययाचत । तत्कर्तुं दुष्करमपि जरासंघस्य शासनम् ॥ ८५ ॥
समुद्रविजयोऽप्यूचे न युद्धावसरस्तव । [4]कुमार सुकुमारस्य तदलं यांचयानया ॥ ८६ ॥

१ बालान् । २ बुधमंगलग्रहौ । ३ बृहद्रथ इति प्रत्यंतरे पाठः । ४ संबोधनम् ।



वसुदेव-
कंसयो-
र्मिलनम् ।

भूयोऽपि वसुदेवेन निर्बंधाद्याचितो नृपः । बह्वीभिः सह सेनाभिः कथंचिद्विससर्ज तम् ॥ ८७ ॥
द्रुतं च वसुदेवोऽगादभ्यागात्सोऽपि संमुखः । राजा सिंहरथो युद्धं द्वयोश्च ववृते महत् ॥ ८८ ॥
व्यद्रावयत्सिंहरथो वसुदेवस्य तां चमूम् । वसुदेवः स्वयं योद्धुं डुढौके कंससारथिः ॥ ८९ ॥
युयुधाते ततश्चोभौ विविधैरायुधैश्चिरम् । सुरासुराविवामर्षादन्योऽन्यं जयकांक्षिणौ ॥ ९० ॥
हित्वाथ कंसः सारथ्यं परिघेण महीयसा । दृढं सिंहरथरथं मंक्ष्वभांक्षीन्महाभुजः ॥ ९१ ॥
कंसं हंतुं सिंहरथश्चकर्षासिं ज्वलन् क्रुधा । त्सरुदेशे[1] क्षुरप्रेण वसुदेवश्चकर्त च ॥ ९२ ॥
छागं वृक इवोत्क्षिप्य बद्ध्वा सिंहरथं ततः । वसुदेवरथेऽक्षैप्सीत् कंसश्छलबलोत्कटः ॥ ९३ ॥
भग्ने सिंहरथानीके वार्ष्णेयोऽपि ततो जयी । आदाय तं सिंहरथं क्रमेण स्वपुरं ययौ ॥ ९४ ॥
वसुदेवं रहस्यूचे समुद्रविजयो नृपः । यज्ज्ञानी क्रोष्टुकिनामाचख्यौ मम हितं ह्यदः ॥ ९५ ॥
जरासंधस्य कन्येयं नाम्ना जीवयशा इति । अलक्षणा पतिपितृकुलक्षयकरी खलु ॥ ९६ ॥
जरासंधः सिंहरथानयने पारितोषिके । तां ते दास्यति तत्त्यागोपायः कोऽपि विभाव्यताम् ॥ ९७ ॥
प्रत्यूचे वसुदेवोऽपि कंसः सिंहरथं रणे । बद्ध्वानैषीत्ततस्तस्मै देया जीवयशाः खलु ॥ ९८ ॥
राजाप्यूचे वणिक्पुत्र इति तां न स लिप्सते । विक्रमात्क्षत्रिय इव परमेष विभाव्यते ॥ ९९ ॥

अष्टमं पर्व द्वितीयः सर्गः श्रीअरिष्ट-नेमिजिन-चरितम् ।

वसुदेव-कंसयो-र्मिलनम् ।

---

१ त्सरुः खड्गमुष्टिस्तस्य देशो हस्तस्य मणिबंधप्रदेशो मुष्टिर्वा तस्मिन् ।

धर्मं[1] दत्वांतरे राज्ञा पृष्टोऽथ रसवाणिजः । कंसस्य श्रृण्वतोऽप्याख्यात् कंसवृत्तांतमादितः ॥ १०० ॥
ते उग्रसेनधारिण्या मुद्रिके पत्रिकामपि । समुद्रोऽथार्पयद्राज्ञे पत्रिकां सोऽप्यवाचयत् ॥ १०१ ॥
उग्रसेनसधर्मिण्या धारिण्या दोहदादपि । भीतया स्वपतिं त्रातुं त्यक्तः प्राणप्रियः सुतः ॥ १०२ ॥
नाममुद्रासमेतोऽसौ सर्वाभरणभूषितः । क्षिप्त्वान्तः कांस्यमंजूषं यमुनायां प्रवाहितः ॥ १०३ ॥
वाचयित्वेति राज्ञोचे यादवोऽयं महाभुजः । औग्रसेनिरि[2]तरथा वीर्यं स्यात्कथमीदृशम् ॥ १०४ ॥
कंसेन सह राजाथ जरासंधार्धचक्रिणे । गत्वार्पयत्सिंहरथमथाख्यत् कंसविक्रमम् ॥ १०५ ॥
कंसायादाज्जरासंधः स्वां जीवयशसं सुताम् । पुरीं च मथुरां तेन पितृरोषेण याचिताम् ॥ १०६ ॥
जरासंधार्पितबलो मथुरायामुपेत्य च । कंसो नृशंसः पितरं बद्ध्वा चिक्षेप पंजरे ॥ १०७ ॥
उग्रसेनस्य चाभूवन्नतिमुक्तादयः सुताः । अतिमुक्तः पितृदुःखात् प्रव्रज्यामाददे तदा ॥ १०८ ॥
आनाय्य शौर्यनगरात्सुभद्रं रसवाणिजम् । कृतज्ञमानी सच्चक्रे कंसः स्वर्णादिदानतः ॥ १०९ ॥
अन्यदा धारिणी तूचे कंसं स्वपतिमुक्तये । कथंचिदपि तद्वाचा पितरं व्यमुचन्न सः ॥ ११० ॥
मयायं कांस्यपेटायां क्षिप्त्वा नद्यां प्रवाहितः । नोग्रसेनो विवेदेदं निरागाः[3] सर्वथा ह्यसौ ॥ १११ ॥
सापराधाहमेवेह मोच्यतामेष मे पतिः । इत्यन्वहं कंसमान्यान् गृहेष्वेत्य जगाद सा ॥ ११२ ॥ ॥ युग्मम् ॥

कंसेन राज्यगृहणं, स्वपितरं पंजरे क्षेपणं च ।



---

१ अंतरे मध्ये धर्मं दत्वा धर्मस्य शपथं दत्वेत्यर्थः । २ उग्रसेनस्यापत्यमौग्रसेनिः कंसः । ३ निरपराधी ।

तेषामपि गिरा कंस उग्रसेनं मुचोच न । पूर्वजन्मनिदानं हि नान्यथा जातु जायते ॥ ११३ ॥
जरासंधेन सत्कृत्य विसृष्टः स्वपुरं ययौ । राजा समुद्रविजयोऽप्यन्वितो भ्रातृभिर्निजैः ॥ ११४ ॥
वसुदेवं शौर्यपुरे भ्रमन्तं सर्वदान्वयुः । मंत्राकृष्टा इव भृशं पौर्यः सौभाग्यमोहिताः ॥ ११५ ॥
स्त्रैणकार्मणसौभाग्यः क्रीडयेतस्ततो भ्रमन् । निनाय कालं कमपि समुद्रविजयानुजः ॥ ११६ ॥
अन्येद्युरेत्य राजानं रहस्यूचे महाजनः । वसुदेवस्य रूपेणामर्यादः स्त्रीजनोऽभवत् ॥ ११७ ॥
वसुदेवं यैकदापि पश्येत्सा विवशैव हि । भूयो भूयः संचरन्तं याः पश्यंति कथं तु ताः ॥ ११८ ॥
ईप्सितं वः करिष्यामीत्युक्त्वा तान् व्यसृजन्नृपः । वसुदेवाय नाख्येयमित्यूचे व[1]ः परिच्छदम् ॥ ११९ ॥
अपरेद्युर्वसुदेवं नमस्कर्तुमुपागतम् । निजोत्संगं समारोप्य समुद्रविजयोऽवदत् ॥ १२० ॥
क्रीडापर्यटनेनापि कृशीभूतोऽसि तद्दिवा । बहिर्न गम्यं भवता स्थेयं मद्गृह एव हि ॥ १२१ ॥
कला गृहाणाभिनवाः प्रागधीताश्च संस्मर । भविष्यति विनोदस्ते वत्स गोष्ठ्या कलाविदाम् ॥ १२२ ॥
आमेत्युक्त्वा वसुदेवो विनीतोऽस्थात्तथैव हि । विनोदैर्गीतनृत्याद्यैर्दिवसानतिवाहयन् ॥ १२३ ॥
तत्रापतंतीं सोऽन्येद्युः कुब्जिकां गन्धधारिणीम् । पप्रच्छायं कस्य कृते गन्धः साप्येवमब्रवीत् ॥ १२४ ॥
गन्धद्रव्यं कुमारेदं शिवादेव्याधुना स्वयम् । श्रीमत्समुद्रविजयनिमित्तं प्रेषितं खलु ॥ १२५ ॥

वसुदेवरुपेण पौरस्त्रीषु कार्मणम् ।

---

१ वो युष्माकं युष्माभिरित्यर्थः वसुदेवाय न कथनीयमिति परिच्छदमूचे इत्यन्वयः ।

वसुदेवस्य
विदेश–
गमनम् ।

ममाप्युपकरोत्येतदिति जल्पन् जहार तत् । गन्धद्रव्यं वसुदेवकुमारो नर्मलीलया ॥१२६॥
सरोषा साप्युवाचैवं चरितेनामुनैव हि । नियंत्रितस्तिष्ठसीह तेनाप्यूचे कथं न्विति ॥१२७॥
सा चख्यौ भीतभीता च पौरवृत्तांतमादितः । रहस्यं खलु नारीणां हृदये न चिरं स्थिरम् ॥१२८॥
पौरीभ्यः स्वं रोचयितुं वसुदेवो भ्रमत्यसौ । एवं मां मन्यते राजा कृतं वासेन मेऽत्र तत् ॥१२९॥
एवं विचिन्त्य तां दासीं विसृज्य च दिनात्यये । कृत्वा गुटिकया वेषांतरं स निरगात्पुरात् ॥१३०॥
बहिर्गत्वाकरोच्चित्यां स्मशानासन्नदारुभिः । अनाथं मृतकं कंचिज्ज्वालयामास तत्र च ॥१३१॥
गुरुणां क्षमणार्थं तु स्तंभे चैकत्र पत्रकम् । लिखित्वा निजहस्तेन वसुदेवो व्यलंबयत् ॥१३२॥
दोषत्वेनाभ्यधीयंत गुरूणा यद्गुणा जनैः । इति जीवन्मृतंमन्यो वसुदेवोऽनलेऽविशत् ॥१३३॥
ततः सन्तमसंतं वा दोषं मे स्ववितर्कितः । सर्वे सहध्वं गुरवः पौरलोकाश्च मूलतः ॥१३४॥
इति कृत्वा वसुदेवं विप्रवेषमवर्त्मना । भ्रांत्वा सन्मार्गगं दृष्ट्वा रथस्था काचिदंगना ॥१३५॥
पितृवेश्म व्रजंत्यंबामूचे श्रान्तममुं द्विजम् । आरोपय रथे सापि तत्कृत्वा ग्राममासदत् ॥१३६॥
॥युग्मम्॥
तत्र च स्नातभुक्तः स सायं यक्षगृहं गतः । वसुदेवः प्रविष्टोऽग्निमिति विज्ञाय यादवाः ॥१३७॥

वसुदेवस्य विद्याधर-कन्यया विवाहः ।

क्रंदन्तः सपरीवाराः प्रेतकार्याणि चक्रिरे । श्रुत्वेति वार्तां निश्चितो विजयखेटेऽगात्पुरे ॥ १३८ ॥
सुग्रीवस्तत्र राजाभूत्तस्य चोभे कलाविदौ । श्यामाविजयसेनाख्ये कन्ये अतिमनोरमे ॥ १३९ ॥
पर्यणैषीद्वसुदेवः कलाजयपणेन[1] ते । रममाणः समं ताभ्यां तत्र चास्थाद्यथासुखम् ॥ १४० ॥
पत्न्यां विजयसेनायामक्रूरो नाम नंदनः । तत्राभूद्वसुदेवस्य वसुदेव इवापरः ॥ १४१ ॥
ततोऽपि प्रस्थितः प्रापदतिघोरां महाटवीम् । जलार्थी तत्र वार्ष्णेयो जलावर्तं ययौ सरः ॥ १४२ ॥
दधावे तत्र कोऽपीभो विंध्याद्रिरिव जंगमः । खेदयित्वा कुमारस्तमारुरोह मृगेन्द्रवत् ॥ १४३ ॥
गजारूढं च तं दृष्ट्वाऽर्चिमालिपवनंजयौ । खेचरौ कुंजरावर्तोद्याने नीत्वा व्यमुंचताम् ॥ १४४ ॥
तत्र विद्याधराधीशोऽशनिवेगः स्वकन्यकाम् । श्यामां नाम ददौ तस्मै रेमे च स तया सह ॥ १४५ ॥
वीणावाद्येन वार्ष्णेयस्तस्यास्तुष्टो ददौ वरम् । अवियोगस्त्वया मे स्तादित्ययाचत सापि हि ॥ १४६ ॥
किंकारणो[2] वरोऽसावित्युदिते तेन साब्रवीत् । वैताढ्ये किन्नरगीते पुरेऽर्चिमाल्यभून्नृपः ॥ १४७ ॥
तस्याभूज्ज्वलनवेगोशनिवेगश्च नन्दनौ । विन्यस्य ज्वलनं राज्येऽर्चिमाली व्रतमाददे ॥ १४८ ॥
ज्वलनस्य विमलायां सूनुरंगारकोऽभवत् । अहं त्वशनिवेगस्य दुहिता सुप्रभाभवाः ॥ १४९ ॥
ज्वलनोऽप्यशनिवेगं राज्ये न्यस्य दिवं ययौ । विद्याबलात्तं निर्वास्य राज्यमंगारकोऽग्रहीत् ॥ १५० ॥

---

१ कलानां जय एव पणः प्रतिज्ञा तेन । २ किं कारणं यस्य सः ।

वसुदेवस्य
विद्याधर-
कन्यया
विवाहः ।

मत्पिताष्टापदेऽथागात्तत्रैकं चारणं मुनिम् । पप्रच्छांगिरसं नाम राज्यं भावि किं न वा ॥ १५१ ॥
मुनिराख्यत्त्वद्दुहितृश्यामाभर्तृप्रभावतः । राज्यं ते भावि स ज्ञेयो जलावर्तेभनिर्जयात्[1] ॥ १५२ ॥
मुनिवाक्प्रत्ययात्तस्थौ निवेश्यात्र पुरं पिता । प्रैषीद्द्वौ खेचरौ तत्र जलावर्ते सदैव हि ॥ १५३ ॥
जित्वारूढो गजं ताभ्यां प्रेक्ष्यानीतस्त्वमत्र च । मत्पित्राशनिवेगेन मया चोद्वाहितः प्रभो ॥ १५४ ॥
पुरा च धरणेन्द्रेण नागेन्द्रेण महात्मना । विद्याधरैश्च संभूय समयो[2]ऽयं प्रतिष्ठितः ॥ १५५ ॥
अर्हच्चैत्यसमासन्नं सस्त्रीकं साधुपार्श्वगम् । यो हनिष्यति सद्विद्योऽप्यविद्यः स भविष्यति ॥ १५६ ॥
इत्यस्मात् कारणात् स्वामिन्नवियोगो वृतो मया । मा वः[3] एकाकिनः पापोंऽगारकः स वधीदिति ॥ १५७ ॥
प्रतिपद्येति तद्वाचं दशमोऽन्धकवृष्णिसूः । तया सह कलाभ्यासविनोदैः कालमत्यगात् ॥ १५८ ॥
तया सहान्यदा सुप्तं तं जह्रेंऽगारको निशि । प्रबुद्धो वसुदेवोऽपि को मां हर्तेत्यचिंतयत् ॥ १५९ ॥
अंगारकं स प्रेक्षिष्ट श्यामाननसमाननम् । श्यामां च तिष्ठ तिष्ठेति जल्पन्तीमसिधारिणीम् ॥ १६० ॥
तामंगारो द्विधाकार्षीद्वसुदेवश्च पीडितः । द्वे श्यामे अभितोऽङ्गारं युद्ध्यमाने ददर्श च ॥ १६१ ॥
इयं मायेति निश्चित्य वसुदेवोऽथ मुष्टिना । जघानांगारकमूर्ध्नि पविने[4]वाचलं हरिः ॥ १६२ ॥
प्रहारार्तेन वार्ष्णेयस्तेन मुक्तो नभस्तलात् । पपात पुर्याश्चंपाया बहिः सरसि विस्तृते ॥ १६३ ॥

१ जलावर्तस्य सरसो गजस्तस्य यो जेता स ते दुहितृभर्तेत्यर्थः । २ निर्णयः । ३ वो युष्मानिति मान्यार्थे बहुवचनम् । ४ वज्रेण ।

वसुदेवस्य श्रेष्ठीपुत्र्या गन्धर्वसेनया विवाहः ।

तत्सरो हंसवत्तीर्त्वा तत्तीरोपवनस्थितम् । वसुदेवो वासुपूज्यायतनं प्राविशत् सुधीः ॥ १६४ ॥
श्रीवासुपूज्यं वंदित्वा निशाशेषमतीत्य च । ययौ स चंपामेकेन मिलितेन द्विजन्मना[1] ॥ १६५ ॥
वीणापाणींस्तत्र यूनः स्थाने स्थाने निरीक्ष्य सः । द्विजं पप्रच्छ तद्धेतुं द्विजोऽप्येवमभाषत ॥ १६६ ॥
श्रेष्ठीह चारुदत्तोऽस्ति तस्य रूपवती सुता । नाम्ना गंधर्वसेनेति कलानामेकमास्पदम् ॥ १६७ ॥
गान्धर्वे यो विजेता मे स भर्तेति प्रतिश्रवः । तस्यास्तेनैष सर्वोऽपि [2]गान्धर्वनिरतो जनः ॥ १६८ ॥
मासे मासे च सुग्रीवयशोग्रीवाभिधानयोः । गान्धर्वाचार्ययोरग्रेऽ[3]नुयोगोऽत्र प्रवर्तते ॥ १६९ ॥
प्रकृष्टं तत्र सुग्रीवं विप्रवेषेण वृष्णिसूः । गत्वोवाच स्कन्दिलोऽहं विप्रो गौतमगोत्रजः ॥ १७० ॥
अहं गन्धर्वसेनार्थी गान्धर्वं तव सन्निधौ । अध्येष्ये प्रतिपद्यस्व शिष्यं मां दूरदेशिनम् ॥ १७१ ॥
तं मूर्ख इति सुग्रीवोऽनादरेण समीपगम् । चकार मन्दधीर्धूलिच्छन्नरत्नमिवाविदन् ॥ १७२ ॥
वार्ष्णेयो हासयँल्लोकान् ग्राम्योक्त्या स्वं च गोपयन् । गान्र्वाध्ययनव्याजात्तस्थौ सुग्रीवसनिधौ ॥ १७३ ॥
सुग्रीवभार्यया वाददिने शौरेः समर्पितम् । वासोयुग्मं सुतस्येव स्नेहाद्विशदशोभनम् ॥ १७४ ॥
प्राक्श्यामादत्तनेपथ्यं तच्च वासोद्वयं नवम् । पर्यधत्त वसुदेवो जनयन् जनकौतुकम् ॥ १७५ ॥
एहि मन्येऽद्य गन्धर्वसेनां जेष्यसि विद्यया । अतिगान्धर्वविज्ञोऽसीत्यहस्यत स नागरैः ॥ १७६ ॥

१ ब्राह्मणेन । २ संगीततत्परः । ३ प्रयोगोऽभिनय इति यावत् ।

तन्नर्मभिः प्रीयमाणः स ययौ तत्र पर्षदि । सोपहासैर्नरैरूच्चासनमध्यास्यते स्म सः ॥ १७७ ॥
गन्धर्वसेना तत्रागाद्भूचरीव द्युसद्वधूः[1] । सा गन्धर्वविदोऽजैषीद्बहून् स्वपरदेशिनः ॥ १७८ ॥
स्वस्य वादक्षणे प्राप्ते समुद्रविजयानुजः । आविश्चक्रे निजं रूपं कामरूपं सुरोपमम् ॥ १७९ ॥
गन्धर्वसेना तद्रूपं प्रेक्ष्य चुक्षोभ तत्क्षणात् । जनो विसिष्मिये सर्वः कोऽसाविति वितर्कयन् ॥ १८० ॥
लोकैर्या या याऽर्पिता वीणा तां तां सोऽदूषयत्सुधीः । गन्धर्वसेना स्वां वीणां ततस्तस्यार्पयत् स्वयम् ॥ १८१ ॥
सज्जयित्वा च तां वीणां स ऊचे सुभ्रु किं मया । अनया वीणया गेयं साप्येवं प्रत्यवोचत ॥ १८२ ॥
मुनेर्विष्णुकुमारस्य [2]पद्मचक्र्यग्रजन्मनः । त्रिविक्रमाभिसंबद्धं गीतं गीतज्ञ वादय ॥ १८३ ॥
तथा जगौ च वार्ष्णेयः पुंवेषेव सरस्वती । यथा जिगाय गंधर्वसेना पार्षद्यसंयुताम् ॥ १८४ ॥
चारुदत्तस्ततः श्रेष्ठी व्यसृजद्वादिनोऽखिलान् । स्वगृहे वसुदेवं च गौरवेणानयत् स्वयम् ॥ १८५ ॥
विवाहकाले श्रेष्ठ्यूचे गोत्रमुद्दिश्य वत्स किम् । स्वकन्यासंप्रदानं ते करोमि ब्रूहि सुन्दर ॥ १८६ ॥
स्मित्वोचे वसुदेवोऽपि वद यत्ते मतं कुलम् । श्रेष्ठ्यप्यूचे वणिक्पुत्रीत्यदस्ते स्मितकारणम् ॥ १८७ ॥
समये कथयिष्यामि पुत्र्या वृत्तान्तमादितः । इत्युक्त्वाकारयच्छ्रेष्ठी विवाहं वरकन्ययोः ॥ १८८ ॥
तौ सुग्रीवयशोग्रीवौ स्वे श्यामाविजयाह्वये । कन्यके वसुदेवाय ददतुर्गुणरंजितौ ॥ १८९ ॥

वसुदेवस्य गन्धर्वसेनया विवाहः ।

१ देवांगना । २ महापद्मचक्रिज्येष्ठबंधोः ।

गन्धर्वसेनाया वृत्तान्तः ।

अपरेद्युर्वसुदेवं चारुदत्तोऽब्रवीदिति । श्रृणु गन्धर्वसेनायाः सर्वमद्य कुलादिकम् ॥ १९० ॥
इहैव पुर्यां श्रेष्ठ्यासीद्भानुर्नाम महाधनः । तस्य भार्या सुभद्रेति तावपुत्रत्वदुःखितौ ॥ १९१ ॥
सुतजन्मान्यदा पृष्टस्तकाभ्यां[1] चारणो मुनिः । भावीत्याख्याय स ययौ क्रमात्त्वहं सुतोऽभवम् ॥ १९२ ॥
मित्रैः सहैकदा क्रीडन्नपश्यं सिन्धुरोधसि[2] । आकाशगामिनः कस्याप्यंघ्रिन्यासं मनोहरम् ॥ १९३ ॥
स्त्रीपदैः सप्रिय इति ज्ञातोऽसावग्रतोऽपि च । रंभागृहं पुष्पतल्पं फलकासी[3] च दृष्टवान् ॥ १९४ ॥
तत्रादूरे लोहकीलैः खेचरं कीलितं द्रुणा[4] । अद्राक्षं तदसेः कोशे चौषधीवलयत्रयम् ॥ १९५ ॥
स तु तास्वेकयौषध्या स्वबुद्ध्या मोचितो मया । संरोहितोऽ[5]न्यया कारि चेतनस्तु तृतीयया ॥ १९६ ॥
स मामवोचद्वैताढ्ये नगरे शिवमंदिरे । महेन्द्रविक्रमनृपात्मजोऽमितगतिर्ह्यहम् ॥ १९७ ॥
सुहृदा धूमशिखेन गौरमुंडेन चान्वितः । अहं क्रीडन्नेकदागां ह्रीमंतं वरपर्वतम् ॥ १९८ ॥
हिरण्यरोम्णस्तत्राहं स्वमातुलतपस्विनः । कुमारीं दृष्टवान् रम्यां नामतः सुकुमालिकाम् ॥ १९९ ॥
गतः स्मरार्त्तः स्वं स्थानं मित्राज्ज्ञात्वा च मां तथा । पित्रा सद्यः समानाय्य तयाहं परिणायितः ॥ २०० ॥
रममाणस्तया सार्धमहमस्थामथान्यदा । अभिलाषी धूमशिखस्तस्यां ज्ञातो मयेंगितैः[6] ॥ २०१ ॥
तथाप्यहं तेन सह व्यहार्षमिह चागतः । प्रमत्तः कीलितस्तेन हृता च सुकुमालिका ॥ २०२ ॥

१ ताभ्याम् । २ सिंधुतटे । ३ फलैः कासते फलकासी । ४ वृक्षेण सह । ५ व्रणरहितः । ६ चेष्टितैः ।

भवता मोचितश्चास्मि ब्रूहि किं करवाण्यतः । तवाकारणमित्रस्य येन स्यामनृणः सखे ॥ २०३ ॥
अहं त्वद्दर्शनेनापि कृतकृत्योऽस्मि सुंदर । एवं मया भाषितोऽथ सोऽगादुत्पत्य खेचरः ॥ २०४ ॥
अहं च गतवान् वेश्म मित्रैः क्रीडन् यथासुखम् । क्रमाच्च यौवनं प्राप्तः पित्रोर्नेत्रोत्सवं ददत् ॥ २०५ ॥
सर्वार्थमातुलसुतां नाम्ना मित्रवतीमहम् । ततः पित्रोर्निर्देशेन शुभेऽह्नि परिणीतवान् ॥ २०६ ॥
कलासक्तश्च तस्यां नाभूवं भोगपरायणः । तथा दृष्ट्वा पितृभ्यां च मुग्धोऽसाविति तर्कितः ॥ २०७ ॥
ललितायां ततो गोष्ठ्यामहं वैदग्ध्यहेतवे । क्षिप्तः पितृभ्यां व्यचरं स्वैरं चोपवनादिषु ॥ २०८ ॥
कलिंगसेनादुहितुः सदने विलसन्नहम् । वसंतसेनावेश्याया द्वादशाब्दानि तस्थिवान् ॥ २०९ ॥

गन्धर्वसेनाया वृत्तान्तः ।

व्ययितास्तत्र चाज्ञानात् षोडश स्वर्णकोटयः । कलिंगसेनया निःस्व[1] इति निर्वासितोऽस्मि च ॥ २१० ॥
मृत्युं ज्ञात्वा ततः पित्रोर्दुःस्थो धैर्यं प्रपद्य च । वाणिज्यार्थं स्वभार्याया भूषणानि गृहीतवान् ॥ २११ ॥
मातुलेन सहान्येद्युश्चलितो भूषणैश्च तैः । उशीरवर्तिनगरे कर्पासं क्रीतवानहम् ॥ २१२ ॥
ताम्रलिप्त्यां गच्छतो मे स कर्पासो दवाग्निना । दग्धो निर्भाग्य इति च मातुलेनाहमुज्जितः ॥ २१३ ॥
अश्वारूढस्ततश्चैकोऽप्यचलं पश्चिमां प्रति । विपन्नः सोऽपि चाश्वो मे पादचारी ततोऽभवम् ॥ २१४ ॥
[2]द्राघीयसाऽध्वना क्लांतः क्षुत्पि[3]पासाकरालितः । अगां प्रियंगुनगरं वणिग्जनसमाकुलम् ॥ २१५ ॥

१ निर्धनः । २ अतिदीर्घेण । ३ करालितः पीडितः ।

गन्धर्वसेनाया
वृत्तान्तः ।

दृष्टः सुरेन्द्रदत्तेन पितृमित्रेण तत्र च । पुत्रवद्वस्त्रभोज्याद्यैः सत्कृतोऽस्थां यथासुखम् ॥ २१६ ॥
वृद्ध्यादाय द्रव्यलक्षं वार्यमाणोऽपि तेन च । धनायोपात्तभांडोऽहं यानेनाविशमंबुधिम् ॥ २१७ ॥
प्राप्याथ यमुनाद्वीपमंतद्वीपपुरादिषु । कुर्वन् गतागतं स्वर्णकोटीरष्टाहमार्जयम् ॥ २१८ ॥
ततः स्वदेशाभिमुखं चलितोऽहं जलाध्वना । स्फुटितं यानपात्रं च फलकं चैकमासदम् ॥ २१९ ॥
सप्तभिर्वासरैस्तेन तीर्णवानहमंबुधिम् । उदंबरावतीवेलं नाम तीरमुपागमम् ॥ २२० ॥
तत्र राजपुरं नाम कथमप्याप्तवान् पुरम् । बहिस्तस्याश्रमपदे गतोऽस्म्युद्दामपादपे ॥ २२१ ॥
त्रिदंडिनं दिनकरप्रभ इत्यभिधानतः । तत्राद्राक्षं परिव्राजं तस्याख्यं स्वकुलादिकम् ॥ २२२ ॥
तेन चास्म्युपचरितः पुत्रवत्प्रीतचेतसा । अन्येद्युर्भणितश्चाहं धनार्थीव विभाव्यसे ॥ २२३ ॥
तदेहि वत्स गच्छावः पर्वतं तत्र ते रसम् । दास्यामि येन कनककोटयः स्युर्यथारुचि ॥ २२४ ॥
एवं चोक्तस्तेन समं चलितोऽहं प्रमोदभाक् । [1]अनेकसाधकां प्राप्तोऽस्म्यपरेह्नि महाटवीम् ॥ २२५ ॥
गच्छन्तौ तस्य शैलस्य नितंबेऽथ महाबिलम् । बहुयंत्रशिलाकीर्णं गतौ यममुखोपमम् ॥ २२६ ॥
मंत्रेणोद्घाटयामास तद्द्वारं स त्रिदंडिकः । प्रविष्टौ दुर्गपातालाभिधानं तन्महाबिलम् ॥ २२७ ॥
भ्रांत्वा तत्र बहु प्राप्तौ कूपं रसनिकेतनम् । चतुर्हस्तप्रविस्तारं नरकद्वारदारुणम् ॥ २२८ ॥

---

१ अनेके साधका यस्यां ताम् ।

कूपान्तः [1]प्रविशादत्स्वाला[2]बुना रसमित्यहम् । उक्तस्तद्धृतरज्ज्वाथ कूपे मंचिकयाविशम् ॥ २२९ ॥
चतुःपुरुषपर्यन्ते मेखलापरिवारितः । दृष्टो मया रसस्तत्र निषिद्धश्चास्मि केनचित् ॥ २३० ॥
अवोचमहमप्येवं चारुदत्तोऽस्मि वाणिजः । प्रवेशितो भगवता रसार्थं किं निषेधसि ॥ २३१ ॥
सोऽप्यवोचद्वणिगस्मि धनकांक्षी त्रिदंडिना । तेन क्षिप्तो रसकूपे बलये पशुमांसवत् ॥ २३२ ॥
सोऽगात्पापोऽ[3]परकायो भक्षितश्च रसेन मे । मा विशस्तदिहालाबुन्यहं क्षेप्स्यामि ते रसम् ॥ २३३ ॥
ततो मयार्पितालाबु पूरयित्वा रसेन सः । अबध्नान्मंचिकाधस्ताद्रज्जुं चाहमकंपयम् ॥ २३४ ॥
रज्जुं चकर्ष भगवांस्तटासन्नं गतं स माम् । अयाचद्रसपात्रं तन्न चोत्तारयति स्म माम् ॥ २३५ ॥
तं च लुब्धं द्रोहिणं च ज्ञात्वा कूपेऽक्षिपं रसम् । समंचिकं सोऽक्षिपन्मां तत्र वेद्यामथापतम् ॥ २३६ ॥
स चाकारणबन्धुर्मां वणिगूचे विषीद मा । रसान्तर्न गतोऽसि त्वं साधु वेदौ स्थितोऽसि च ॥ २३७ ॥
यदा तदात्रैति गोधा तत्पुच्छमवलंब्य भोः । गन्तव्यं भवता द्वारे प्रतीक्षस्व तदागमम् ॥ २३८ ॥
कालं कियंतमप्यस्थां नमस्कारं गणन्मुहुः । स्वस्थस्तद्वचसा चाहं पुमान् सोऽपि व्यपद्यत ॥ २३९ ॥
अन्यदा शब्दमश्रौषं भीषणं चकितस्त्वहम् । स्मृत्वा च तद्वचोऽवेदं सा गोधा याति निश्चितम् ॥ २४० ॥
सागात्पातुं रसं तस्या वलिताया महौजसः । उभाभ्यामपि हस्ताभ्यां लांगूले लग्नवानहम् ॥ २४१ ॥

१ प्रविश–आदत्स्व । २ अलाबुना तुंबिकया रसमात्स्व गृहाण । ३ मम अधः शरीरम् ।



गन्धर्वसेनाया वृत्तान्तः ।

गन्धर्वसेनाया वृत्तान्तः ।

गोपाल इव गोपुच्छलग्नो नद्यास्ततोऽवटात्[1] । तत्पुच्छलग्नो निरगां तत्पुच्छं चामुचं बहिः ॥ २४२ ॥
मूर्छितश्चापतं भूमौ लब्धसंज्ञोऽथ पर्यटन् । प्राप्तोऽस्म्यरण्यं महिषेणारूढश्च शिलामहम् ॥ २४३ ॥
ताडयंस्तुंगशृंगेणं तां शिलां महिषोऽथ सः । गृहीतो वाहसेनाशु[2] कीनाशस्येव[3] बाहुना ॥ २४४ ॥
तयोर्युद्धव्यग्रयोश्चाहं[4] समुत्तीर्य पलायितः । वेगेन गतवान् ग्राममटवीप्रांतवर्तिनम् ॥ २४५ ॥
तत्र मातुलमित्रेण रूद्रदत्तेन वीक्षितः । पालितश्चाथ भूयोऽपि पुनर्नव इवाभवम् ॥ २४६ ॥
गृहीत्वा लक्षकप्रायं भांडं तुच्छमहं ततः । अचालिषं तेन सह स्वर्णभूमिं प्रति द्रुतम् ॥ २४७ ॥
इषुवेगवतीं नाम पथि चोत्तीर्य निम्नगाम् । गिरिकूटे गतावावां ततो वेत्रवने क्रमात् ॥ २४८ ॥
प्राप्तौ टंकणदेशं च गृहीत्वा द्वौ च मेषकौ । तदारूढावजपथं[5] क्रांतवन्तौ ततः परम् ॥ २४९ ॥
ततो रूद्रोऽवदन्नातो विषयः[6] पादचारिणाम् । हत्वाजौ कुर्वहे भस्त्रे अन्तर्लोमे बहिःपले[7] ॥ २५० ॥
प्रविशावस्तयोरन्तरिह भारंडपक्षिभिः । मांसभ्रमाद्गृहीतौ तैर्यास्यावः स्वर्णमेदिनीम् ॥ २५१ ॥
अवोचमहमप्यावामुत्तीर्णौ दुर्गमां भुवम् । यकाभ्यां तावजावेतौ कथं हन्वः स्वबंधुवत् ॥ २५२ ॥
न तावत्तावकावेतौ कथं मां त्वं निषेधसि । इत्युक्त्वा सोऽवधीदादौ क्रुद्धो निजमजं द्रुतम् ॥ २५३ ॥
मामपश्यद्द्वितीयोऽजो दीर्घकातरया दृशा । तं चावोचमहं त्रातुं त्वां नेशोऽस्मि करोमि किम् ॥ २५४ ॥

१ कूपात् । २ अजगरेण । ३ यमस्य । ४ युधि व्यग्रयोः । ५ अजेन गम्यते यस्मिन्मार्गे सोऽजपथस्तम् । ६ देशः । ७ बहिर्मांसं ययोस्ते ।

तथापि तेऽस्तु शरणं जैनो धर्मो महाफलः । स एव विधुरे बंधुः पिता माता प्रभुश्च सः ॥ २५५ ॥
ततो मत्कथितं धर्मं शिरसा प्रतिपन्नवान् । मया दत्तं नमस्कारं सोऽश्रौषीच्च समाहितः ॥ २५६ ॥
हतश्च रुद्रदत्तेन देवभूयं जगाम सः । अंतस्तद्भस्त्रयोरावां प्रविष्टौ च क्षुरीधरौ ॥ २५७ ॥
भारंडाभ्यामुद्धृतौ च द्वयोश्चैकामिषेच्छया । आयुध्यमानयोर्मार्गे पतितोऽहं सरोवरे ॥ २५८ ॥
भस्त्रां क्षुरिकया दीर्त्वा तीर्त्वा च निरगामहम् । गच्छन्नग्रेऽटवीमध्येऽद्राक्षमेकं महागिरिम् ॥ २५९ ॥
तत्रारुढेन दृष्टश्च कायोत्सर्गस्थितो मुनिः । वंदितश्च मया धर्मलाभं दत्वेत्युवाच सः ॥ २६० ॥
कथं त्वं चारुदत्तेहाभ्यागादुर्गक्षितावहो । सुरविद्याधरखगानृते नान्यस्य यद्गतिः ॥ २६१ ॥
एषोऽमितगतिः सोहं यस्त्वया मोचितः पुरा । तदा ह्युत्पतितः प्रापं तमुपाष्टापदे[1] द्विषम् ॥ २६२ ॥
त्यक्त्वा मम प्रियां नंष्ट्वा सोऽगादष्टापदाचले । तां पतंतीं गृहीत्वाहं स्वस्थानमगमं पुनः ॥ २६३ ॥
राज्ये मां स्थापयित्वा च मत्पिता व्रतमात्तवान् । पार्श्वे चारणयतिनोर्हिरण्यस्वर्णकुंभयोः ॥ २६४ ॥
पत्न्यां मनोरमायां मेऽभवत् सिंहयशास्सुतः । वराहग्रीव इत्यन्यो मत्तुल्यबलविक्रमः ॥ २६५ ॥
पत्न्यां विजयसेनायां सर्वगांधर्वकोविदा । पुत्री गंधर्वसेनेति रुपशालिन्यजायत ॥ २६६ ॥
राज्यं च यौवराज्यं च दत्वा विद्याश्च पुत्रयोः । पितृगुर्वोस्तयोः पार्श्वेऽहमपि व्रतमात्तवान् ॥ २६७ ॥

गन्धर्वसेनाया वृत्तान्तः ।

१ अष्टापदस्य समीपे ।

गन्धर्वसेनाया
वृत्तान्तः ।

लवणांभोधिमध्यस्थो द्वीपोऽयं कुंभकंठकः । कर्कोटकश्च शैलोऽयं तप्ये यत्र स्थितस्तपः ॥ २६८ ॥
अत्र त्वं कथमायासीरिति तस्याभिपृच्छतः । क्रमादाख्यातवानात्मव्यसनं सर्वमप्यहम् ॥ २६९ ॥
अत्रांतरे च नभसा तत्तुल्यौ रूपसंपदा । विद्याधरवरौ तत्रेयतुस्तं च प्रणेमतुः ॥ २७० ॥
तत्सादृश्यान्मया ज्ञातौ तत्सुताविति तौ ततः । चारुदत्तं प्रणमंतमित्यूचे च महामुनिः ॥ २७१ ॥
तात तातेति जल्पन्तौ तौ मां नत्वा निषेदतुः । अत्रान्तरे च दिविषद्विमानं द्योरवातरत् ॥ २७२ ॥
ततोऽवतीर्य त्रिदशो महर्द्धिर्मां नमोऽकरोत् । ततः प्रदक्षिणीकृत्यं तं महर्षिमवंदत ॥ २७३ ॥
पृष्टस्ताभ्यां खेचराभ्यां तं वंदनविपर्ययम् । आख्यद्देवश्चारुदत्तो धर्माचार्यो ह्ययं मम ॥ २७४ ॥
तथाहि काशीपुर्यां द्वे परिव्राजौ बभूवतुः । सुभद्रासुलसे जामी[1] वेदवेदांगपारगे ॥ २७५ ॥
तदा च वादिनस्ताभ्यां बहवोऽपि पराजिताः । परिव्राट् याज्ञवल्क्यस्तु वादायान्येद्युराययौ ॥ २७६ ॥
जितः शुश्रुषको जेतुर्भवितेति प्रतिश्रवम् । विधाय तेन सुलसा जिता दासी कृता च सा ॥ २७७ ॥
याज्ञवल्क्यः सुलसया तया शुश्रूषमाणया । तरुण्या नवतारुण्यो जज्ञे कामवशंवदः ॥ २७८ ॥
पुर्या अदूरे निवसंस्तया चिक्रीड सोऽन्वहम् । अजायत सुतस्तस्यां याज्ञवल्क्यत्रिदंडिनः ॥ २७९ ॥
लोकोपहासभीतौ च पिप्पलस्य तले सुतम् । विहाय नंष्ट्वा सुलसायाज्ञवल्क्यौ प्रजग्मतुः ॥ २८० ॥

१ भगिन्यौ ।

तद्विज्ञाय सुभद्रागात्तं च जग्राह बालकम् । अदंतं पिप्पलफलं मुखे निपतितं स्वयम् ॥ २८१ ॥
पिप्पलाद इति नाम यथार्थं तस्य साऽकरोत् । यत्नादवर्धयत्तं च वेदाद्यं चाध्यजीगपत् ॥ २८२ ॥
महाप्राज्ञः सोऽतिविद्वान् वादिदर्पासहोऽभवत् । तद्वादहेतोः सुलसायाज्ञवल्क्यौ समेयतुः ॥ २८३ ॥
स द्वावप्यजयद्वादे ज्ञात्वा च पितरौ निजौ । त्वक्तोऽमुभ्यामहमिति क्रोधं परमुपाययौ ॥ २८४ ॥
सम्यक् प्रतिष्ठाप्य मातापितृमेधादिकान्मखान्[1] । पितृमेधे मातृमेधे चावधीत् पितरौ स तौ ॥ २८५ ॥
पिप्पलादस्य शिष्योऽहं वाग्बलिर्नामतस्तदा । पशुमेधादिकान् कृत्वा नरकं घोरमासदम् ॥ २८६ ॥
उद्धृत्य नरकाज्जातः पंचवारानहं पशुः । यज्ञे द्विजन्मभिः क्रूरैर्भूयो भूयो विनाशितः ॥ २८७ ॥
ततोऽजेष्टंकणे[2]ऽभूवं चारुदत्तेन चामुना । आख्यातधर्मो रूद्रेण हतः सौधर्ममाप्नुवम् ॥ २८८ ॥
धर्माचार्यो ममायं तच्चारुदत्तः कृपानिधिः । नमोऽकारि ततः पूर्वं न क्रमो लंघितो मया ॥ २८९ ॥
इत्युक्तौ तेन देवेन तावप्येवमवोचताम् । उपकारी तवेवास्मत्पितुरप्येष जीवदः ॥ २९० ॥
स देवो मामथावोचच्चारुदत्त वदानघ । किमैहलौकिकं ते प्रत्युपकारं करोम्यहम् ॥ २९१ ॥
समये त्वं समागच्छेरित्युक्तः स मयामरः । तिरोधात् खेचराभ्यां तु नीतोऽहं शिवमंदिरे ॥ २९२ ॥
ताभ्यां च तज्जनन्या च तत्रास्थां कृतगौरवः । तद्बंधुभिः खैचरैश्च पूज्यमानोऽधिकाधिकम् ॥ २९३ ॥

१ यज्ञान् । २ अजः– टंकणं ।



गन्धर्वसेनाया वृत्तान्तः ।

गन्धर्वसेनाया वृत्तान्तः ।

इमां गंधर्वसेनां तौ निजजामिं प्रदर्श्य मे । आख्यातां प्रव्रजंस्तातस्तदावामेवमादिशत् ॥ २९४ ॥
आख्यातं ज्ञानिनास्माकं यद्विजित्य कलास्वमूम् । युष्मज्जामिं वसुदेवकुमारः परिणेष्यति ॥ २९५ ॥
मद्बंधोश्चारुदत्तस्यार्पणीया भूचरस्य तत् । इमां यथा वसुदेवो भूचरः सुखमुद्वहेत् ॥ २९६ ॥
स्वपुत्रीं तद्गृहीत्वेमां गच्छेति तदुदीरिते । यावत्पर्यचलं तावत्सोऽपि देवः समाययौ ॥ २९७ ॥
सोऽमरः खेचरौ तौ च तद्गृह्याश्चान्यखेचराः । मामिहानैषुरक्षेपाद्व्योमयानेन लीलया ॥ २९८ ॥
स्वर्णमाणिक्यमुक्तानां कोटिकोटिः प्रदाय मे । ययौ स देवः स्वं स्थानं ते च विद्याधरोत्तमाः ॥ २९९ ॥
सर्वार्थमातुलं प्रातर्भार्यां मित्रवतीमपि । वसंतसेनां वेश्यां चापश्यमाबद्धवेणिकाम् ॥ ३०० ॥
इयं गंधर्वसेनाया उत्पत्तिर्वसुदेव ते । कथिताद्य वणिक्पुत्रीत्यवज्ञासीः स्म जातु मा ॥ ३०१ ॥
चारुदत्तादिति श्रुत्वा वृत्तान्तं वृष्णिनन्दनः । अधिकं मुदितो रेमे समं गन्धर्वसेनया ॥ ३०२ ॥
[1]चैत्रे स गच्छन्नुद्यानं रथारुढस्तया सह । मातंगवेषां मातंगावृतामैक्षिष्ट कन्यकाम् ॥ ३०३ ॥
गन्धर्वसेना तौ प्रेक्ष्य सविकारौ परस्परम् । उवाच सारथिं रथ्यांस्त्वरयेत्य[2]रुणेक्षणा ॥ ३०४ ॥
द्रुतं गत्वा चोपवने क्रीडित्वा च तया समम् । भूयोऽपि चंपानगरीं वसुदेवः समाययौ ॥ ३०५ ॥
तं मातंगगणादेत्य जरन्मातंगिका तदा । दत्वाशीरुपविश्यैवं वसुदेवमवोचत ॥ ३०६ ॥

१ वसन्तर्तौ । २ रक्तनेत्रा क्रोधेनेत्यर्थः ।

पुरा [1]स्वेषां विभज्यादात्स्वं राज्यमृषभध्वजः । तदा तु नमिविनमी नाभूतां तत्र दैवतः ॥ ३०७ ॥
राज्यार्थिनौ सिषेवाते व्रतस्थमपि तं प्रभुम् । धरणेन्द्रस्तयोश्चादाद्राज्यं श्रेण्योर्द्वयोः पृथक् ॥ ३०८ ॥
राज्यं सुतेभ्यः कालेन दत्वा तौ स्वामिसंनिधौ । प्रव्रज्य जग्मतुर्मोक्षं मुक्तौ द्रष्टुमिव प्रभुम् ॥ ३०९ ॥
नमिसूनुस्तु मातंगः परिव्रज्य दिवं ययौ । तद्वंशेऽस्ति प्रहसितो नामतः खेचरेश्वरः ॥ ३१० ॥
तस्य जायास्मि हिरण्यवती मम तु नन्दनः । सिंहदंष्ट्रो नीलयशास्तत्सुता प्रैक्षि या त्वया ॥ ३११ ॥
तमुद्वह त्वं कुमार [2]मारार्तां त्वन्निरीक्षणात् । क्षणः शुभो वर्ततेऽसौ विलंबं सहते न सा ॥ ३१२ ॥
ऊचे शौरिर्विचिन्त्याहं वक्ष्यामि पुनरापतेः । सावोचत्तत्र गामी त्वमहं [3]वेहेति वेत्ति कः ॥ ३१३ ॥
इत्युक्त्वा सा ययौ क्वापि ग्रीष्मे शौरिरथान्यदा । क्रीडित्वां[4]भसि सुष्वाप समं गन्धर्वसेनया ॥ ३१४ ॥
तं गृहीत्वा करे गाढमुत्तिष्ठेति वदन्मुहुः । तेन मुष्टया ताड्यमानो भूत एकोऽहरद्द्रुतम् ॥ ३१५ ॥
चितासमीपे नीतश्च सोऽपश्यज्ज्वलितानलम् । घोररुपां खेचरीं च तां हिरण्यवतीं पुरः ॥ ३१६ ॥
स्वागतं चन्द्रवदनेत्युक्तः प्रेतस्तयादरात् । तस्यै समर्प्य वार्ष्णेयं क्षणेनापि तिरोदधे ॥ ३१७ ॥
स्मित्वा वार्ष्णेयमूचे सा त्वयाचिंति कुमार किम् । चिंतयास्मदुपरोधादिदानीमपि सुन्दर ॥ ३१८ ॥
तदा पूर्वेक्षिता नीलयशाः सापि सखीवृता । तत्राजगाम श्रीदेवीवाप्सरः परिवारिता ॥ ३१९ ॥

१ स्व-इत्यस्य षष्ठी बहुवचनम् । २ कामपीडिताम् । ३ वा-इह-इति । ४ अंभसि जले क्रीडित्वेति संबन्धः ।



वसुदेवस्य
विद्याधरेश-
कन्यया
नीलयशसा
विवाहः ।

गृहाण स्वप्रियमिति पितामह्योदिता तया । वसुदेवमुपादाय व्योम्ना नीलयशा ययौ ॥ ३२० ॥
हिरण्यवत्यपि प्रातर्वसुदेवमभाषत । मेघप्रभवनाकीर्णो[1] ह्रीमानेष महागिरिः ॥ ३२१ ॥
चारणाधिष्ठिते चात्रांगारको ज्वलनात्मजः । भ्रष्टविद्यः खेचरेन्द्रो विद्या भूयोऽस्ति साधयन् ॥ ३२२ ॥
विद्याश्चिरेण सेत्स्यंति तस्य त्वद्दर्शनात्पुनः । आशु सिध्यंति तत्तस्योपकर्तुं गन्तुमर्हसि ॥ ३२३ ॥
अलमेतेन दृष्टेनेत्युक्ता सा वृष्णिसूनुना । वैताढ्याद्रावनैषीत्तं नगरे शिवमन्दिरे ॥ ३२४ ॥
सिंहदंष्ट्रनरेन्द्रेण नीत्वा स्वौकसि याचितः । तां नीलयशसं कन्यां दशार्हः परिणीतवान् ॥ ३२५ ॥
तदा च तुमुलं श्रुत्वा शौरिः पप्रच्छ कारणम् । द्वाःस्थोऽऽख्यदिह शकटमुखं नामास्ति पत्तनम् ॥ ३२६ ॥
तत्र राट्[2] नीलवान्नाम तस्य नीलवती प्रिया । तयोर्नीलांजना पुत्रीर्नीलनामा च नन्दनः ॥ ३२७ ॥
भ्रातुः स्वस्रा समं पूर्वं संकेत इति चाभवत् । सार्धं दुहित्रा पुत्रस्य कार्यः पाणिग्रहोत्सवः ॥ ३२८ ॥
नीलांजनायाः पुत्री त्वत्प्रिया नीलयशा इयम् । अभून्नीलकुमारस्य नीलकंठाभिधः सुतः ॥ ३२९ ॥
नीलः सुतार्थे संकेतदत्तामेतामयाचत । एतत्पित्रा पृष्ट आख्यन्मुनिरेवं बृहस्पति ॥ ३३० ॥
पिता भरतवर्षार्धभर्तुर्विष्णोर्यदूत्तमः । वसुदेवो वरोऽमुष्या भावी सौभाग्यमन्मथः ॥ ३३१ ॥
आनीतो विद्यया त्वं तद्राज्ञेमां परिणीतवान् । तदर्थे चागतो नीलो जितश्च तुमुलस्ततः ॥ ३३२ ॥

वसुदेवस्य विद्याधरेश-कन्यया नीलयशसा विवाहः ।

---

१ मेघप्रभनाम्ना वनेनाकीर्णः । २ राजा ।

श्रुत्वेति मुदितः शौरिस्तया क्रीडन् ददर्श च । विद्यौषधीभ्यो ह्रीमंतं यातः शरदि खेचरान् ॥ ३३३ ॥
विद्यादाने तव शिष्यो भवामीत्यवदत् स ताम् । आमेत्युक्त्वा तमादाय ह्रीमत्यद्रौ ययौ च सा ॥ ३३४ ॥
तत्र शौरिं रंतुकामं ज्ञात्वा सा कदलीगृहम् । विकृत्य रमयामासापश्यच्चैकं कलापिनम् ॥ ३३५ ॥
अहो पूर्णकलापोऽयं कलापीति सविस्मया । स्वयमेव तमानेतुं दधावे मदिरेक्षणा ॥ ३३६ ॥
गतामुपमयूरं च मयूरव्यंसकः[1] स तु । स्वं समारोप्य तां जह्रे व्योम्नि ताक्ष्र्यवदुत्पतन्[2] ॥ ३३७ ॥
शौरिस्तमनुधावंश्च घोषे[3]ऽगाद्गोपिकार्चितः । तत्रोषित्वा निशां प्रातः प्राचालीद्दक्षिणां प्रति ॥ ३३८ ॥
सोऽगादिगरितटग्रामं तत्र वेदध्वनिं गुरुम् । श्रुत्वा पप्रच्छ कमपि द्विजं तत्पाठकारणम् ॥ ३३९ ॥
ऊचे द्विजो दशग्रीवसमये नारदर्षये । दिवाकरः खेचरोऽदात् स्वसुतां रुपशालिनीम् ॥ ३४० ॥
तद्वश्योऽस्ति सुरदेवो ग्रामेऽत्र ग्रामणीर्द्विजः । तस्य पत्न्यां क्षत्रियायां सोमश्रीर्वेदवित्सुता ॥ ३४१ ॥
पित्रा पृष्टस्तद्वरार्थे करालो ज्ञान्यभाषत । एतां वेदे यो विजेता स एनां परिणेष्यति ॥ ३४२ ॥
तां विजेतुमयं लोको वेदाभ्यासपरोऽनिशम् । वेदोपाध्याय इह च ब्रह्मदत्तोऽस्ति नामतः ॥ ३४३ ॥
वेदाचार्यं तमित्यूचे विप्रीभूयाथ यादवः । गौतमः स्कंदिलो[4] विप्रोऽध्येष्ये वेदांस्त्वदंतिके ॥ ३४४ ॥
अनुज्ञातस्ततस्तेनापठद्वेदांस्तदग्रतः । वेदे सोमश्रियं जित्वा पर्यणैषीच्च यादवः ॥ ३४५ ॥

वसुदेवस्य द्विजपुत्री सोमश्रिया विवाहः ।



१ धूर्तमयूरः । २ गरुडवत् । ३ व्रजे । ४ स्कंदिलनामा ।

इन्द्र–
जालिकेन
वसुदेवस्य
हरणं
वसुदेवेन
नराद–
दमनं च ।

विलसन् स तया तत्र ययावुद्यानमन्यदा । तत्रेन्द्रशर्मनामानमद्राक्षीच्चेन्द्रजालिकम् ॥ ३४६ ॥
तस्याश्चर्यकरीं विद्यां दृष्ट्वा शौरिरयाचत । सोऽप्युवाच गृहाणेमां विद्यां मानसमोहिनीम् ॥ ३४७ ॥
विद्येयं सायमारब्धा सिध्यत्यभ्युदये रवेः । परं बहूपसर्गेति सखा कोऽपि विधीयताम् ॥ ३४८ ॥
न मे सखा विदेशस्यास्तीत्युक्तस्तेन सोऽवदत् । भ्रातः सखास्मि ते भ्रातुर्जाया च वनमालिका ॥ ३४९ ॥
इत्युक्तश्चाग्रहीद्विद्यां शौरिस्तां विधिवज्जपन् । मायाविना शिबिकयापजह्रे चेन्द्रशर्मणा ॥ ३५० ॥
विमृशन्नुपसर्गं तं शौरिर्विद्यां जजाप च । प्रातर्ज्ञात्वा च तां मायां शिबिकाया अवातरत् ॥ ३५१ ॥
धावत्सु चेन्द्रशर्मादिष्वतिगच्छन्स यादवः । दिनशेषे प्राप तृणशोषकं संनिवेशनम् ॥ ३५२ ॥
तत्र चायतने सुप्तो नरादे[1]नैत्य च द्रुतम् । उत्थापितो वसुदेवः प्रजघ्ने मुष्टिभिर्भृशम् ॥ ३५३ ॥
बाहूबाहवि कृत्वा च पुरुषादं चिराय तम् । शौरिः संयमयामास पोतनक्रीतमेषवत् ॥ ३५४ ॥
भूमावास्फाल्य रजक[2] इव क्षौमं[3] शिलातले । अवधीत्पुरुषादं तं प्रातर्लोकोऽप्युदैक्षत ॥ ३५५ ॥
लोकः प्रीतो रथे शौरिमारोप्यान्तर्निवेशनम् । वाद्यमानेन तूर्येण वर्यं वरमिवानयत् ॥ ३५६ ॥
पंच कन्याशतान्यस्मै लोकस्तूर्णमढौकयत् । तन्निषिध्याब्रवीच्छौरिर्नरादः को न्वसाविति ॥ ३५७ ॥
तत्रैकः कश्चिदाचख्यौ श्रीकांचनपुरे पुरे । कलिंगेष्वभवद्राजा जितशत्रुर्महाभुजः ॥ ३५८ ॥

---

१ नरानत्तीति नरादो राक्षसस्तेन । २ भाषायां 'धोबी' । ३ कौशेयवस्त्रम् ।

सोदासस्तस्य पुत्रोऽयं प्रकृत्या मांसलोलुपः । राजा स तु निजे देशे प्राणिनामभयं ददौ ॥ ३५९ ॥
दिने दिने चैकबर्हिमांसं तेन सुतेन तु । याचितः प्रतिपेदे सोऽनभीष्टमपि भूपतिः ॥ ३६० ॥
प्रत्यहं बर्हिणं वंशगिरेः सूदाः समानयन् । पाकाय तु हतोऽन्येद्युर्मार्जारेण हृतोऽथ सः ॥ ३६१ ॥
ततस्तदा मृतार्भस्य[1] पक्त्वा तस्मै पलं[2] ददुः । अद्यातिस्वादु किं मांसमित्यपृच्छच्च सोऽपि तान् ॥ ३६२ ॥
यथातथे तदाख्याते सोदासोऽप्येवमादिशत् । दिने दिने शिखिस्थाने संस्कार्योऽतः परं नरः ॥ ३६३ ॥
इत्युदित्वा स्वयं डिंभान्नित्यं लोके जहार सः । ज्ञातश्च भूभुजा कोपात्स्वदेशान्निरवास्यत ॥ ३६४ ॥
पितृभीतः सोऽत्र दुर्गे निवसन् प्रत्यहं नरान् । विनिघ्नन् पंचषान्[3] पापः साधु साधु हतस्त्वया ॥ ३६५ ॥

नरा–
दोत्पत्तिः ।

इत्युक्तस्तैर्मुदा शौरिस्ताः कन्याः परिणीतवान् । उषित्वा च निशां सोऽगादचलग्राममुत्तमम् ॥ ३६६ ॥
तत्र मित्रश्रियं सार्थवाहपुत्रीमुपायत[4] । यादवो ज्ञानिना तस्या वरत्वेनोदितः पुरा ॥ ३६७ ॥
वेदसामपुरं गच्छन् स तया वनमालया । एह्येहि देवरेत्युक्त्वा निन्ये निजनिकेतने ॥ ३६८ ॥
तया च वसुदेवोऽयमित्याख्याते च तत्पिता । पृष्ट्वा स्वागतमित्याख्यदत्रास्ति कपिलो नृपः ॥ ३६९ ॥
कपिला नाम कन्यास्य त्वं तस्या ज्ञानिना वरः । तिष्ठन् गिरितटग्रामे महात्मन् कथितः पुरा ॥ ३७० ॥
स्फलिंगवहनं नाम सोऽश्वं प्रदमयिष्यति । तवोपलक्षणोपायस्तेनैष ज्ञानिनोदितः ॥ ३७१ ॥



---

१ मृतबालस्य । २ मांसम् । ३ पंच वा षड् वा पंचषास्तान् । ४ परिणीतवान् । * कलापी

त्वामानेतुं प्रैषि राज्ञा मज्जामातेन्द्रजालिकः । इन्द्रशर्मान्तरा तु त्वं गत इत्याख्यदत्र सः ॥ ३७२ ॥
दिष्ट्यासीर्दमयाश्वमित्युक्तस्तेन स वृष्णिसूः । तं राज्ञोऽश्वमदमयत् कपिलामुदुवाह च ॥ ३७३ ॥
प्रतीक्षितस्तेन राज्ञा श्यालेनांशुमतापि च । सोऽजीजनत् कपिलायां कपिलं नाम नन्दनम् ॥ ३७४ ॥
हस्तिबन्धे गतोऽन्येद्युर्बद्ध्वारोहत् स हस्तिनम् । तं वियत्युत्पतंतं जघानैकेन मुष्टिना ॥ ३७५ ॥
सरस्तीरे पतन्नीलकंठाख्यश्च स खेचरः । बभूव यो नीलयशोविवाहेऽप्याययौ युधि ॥ ३७६ ॥
ततो भ्राम्यन् ययौ शौरिः पुरे सालगुहाह्वये । भाग्यसेनं नृपं तत्र धनुर्वेदमशिक्षयत् ॥ ३७७ ॥
योद्धुं च भाग्यसेनेन मेघसेनं तदग्रजम् । तत्रायातं वसुदेवः पराजिग्ये महाभुजः ॥ ३७८ ॥
भाग्यसेननृपः पद्मोपमां पद्मावतीं सुताम् । मेघसेनस्त्वश्वसेनां वार्ष्णेयाय ददौ तदा ॥ ३७९ ॥
पद्मावत्यश्वसेनाभ्यां रंत्वा तत्र चिराय सः । जगाम भद्दिलपुरे नगरे वृष्णिनन्दनः ॥ ३८० ॥
तत्रापुत्रविपन्नस्य पुंद्रराजस्य कन्यकाम् । पुंद्रां नृरुपामोषध्या राज्यं पांतीं ददर्श सः ॥ ३८१ ॥
वार्ष्णेयः स्त्रीति तां ज्ञात्वा सानुरागामुपायत । पुंद्रो नाम सुतस्तस्यां जज्ञे राजा च सोऽभवत् ॥ ३८२ ॥
खेचरोऽङ्गारकस्तत्र रात्रौ हंसापदेशतः[1] । हृत्वा चिक्षेप गंगायां समुद्रविजयानुजम् ॥ ३८३ ॥
प्रातः शौरिर्ददर्शेलावर्धनं नामतः पुरम् । तत्राट्टे सार्थवाहस्योपाविशत्तदनुज्ञया ॥ ३८४ ॥

वसुदेवस्य राजपुत्रीभि विवाहः ।

१ हंसव्याजेन ।

तत्प्रभावात्तस्य लाभो हेमलक्षमजायत । सोऽपि ज्ञात्वा तत्प्रभावं गौरवादाललाप तम् ॥ ३८५ ॥
तं स्वर्णरथमारोप्य सार्थवाहोऽनयद्गृहे । अथ रत्नवतीं कन्यां तेन स्वां पर्यणाययत् ॥ ३८६ ॥
जाते शक्रमहे[1]ऽन्येद्युः श्वशुरेण सहैव सः । दिव्यं स्यंदनमारुढो महापुरपुरे ययौ ॥ ३८७ ॥
बहिः पुराच्च प्रासादान्नूतनान् प्रेक्ष्य यादवः । पप्रच्छ श्वशुरं किं नु द्वितीयं किमिदं पुरम् ॥ ३८८ ॥
सार्थवाहोऽवदत् सोमदत्तोऽत्रास्ति महीपतिः । मुखश्रिया[2]तिसोमश्रीः सोमश्रीस्तस्य कन्यका ॥ ३८९ ॥
तस्याः स्वयंवरकृते प्रासादाः कारिता इमे । आहूताश्च नृपा भूयो विसृष्टास्तदपाटवात्[3] ॥ ३९० ॥
श्रुत्वेति यादवो गत्वा शक्रस्तंभं नमोऽकरोत् । तं नत्वा राजशुद्धांतो[4]ऽप्यचलत् पूर्वमागतः ॥ ३९१ ॥
तदा चालान[5]मुन्मूल्य तत्रागाद्भुपतेर्द्विपः । रथाद्राजकुमारीं च पातयामास भूतले ॥ ३९२ ॥
दीनामशरणां शौरिस्तां प्रेक्ष्य शरणार्थिनीम् । स्थित्वाग्रेऽतर्जयदिभं प्रतिकार[6] इव स्वयम् ॥ ३९३ ॥
तां त्यक्त्वा यादवायेभो दधावे क्रोधदुर्धरः । खेदयामास तमिभं यादवोऽपि महाबलः ॥ ३९४ ॥
मोहितेभो यादवस्तामादायैकत्र वेश्मनि । नीत्वा साश्वासयामासोत्तरीयपवनादिना ॥ ३९५ ॥
धात्रीभिः सा गृहे निन्ये शौरिस्तु श्वशुरान्वितः । कुबेरसार्थवाहेन गौरवान्निजवेश्मनि ॥ ३९६ ॥

वसुदेवस्य सार्थवाह–कन्यया विवाहः ।

१ इन्द्रमहोत्सवे । २ मुखलक्ष्म्याऽतिक्रांता चंद्रश्रीर्यया सा । ३ तेषां नृपाणामपाटवात् अनैपुण्यात् । ४ राज्ञोऽन्तःपुरस्त्रियः ।
५ गजबंधनस्थानम् । ६ प्रतिकर्ता ।

तत्र शौरिः स्नातभुक्तो[1]ऽस्थाद्यावत्तावदागता । जयाशीःपूर्वकं राजप्रतीहारीदमब्रवीत् ॥ ३९७ ।
भूपतेः सोमदत्तस्य सोमश्रीवरकन्यका । स्वयंवरे वरस्तस्याः किल स्यादित्यभूत्पुरा ॥ ३९८ ॥
परं सर्वाणयतिनोऽभ्यागतान् केवलोत्सवे । पश्यंत्यास्त्रिदशांस्तस्या जातिस्मृतिरजायत ॥ ३९९ ॥
ततः प्रभृत्यसौ मौनमालंब्यास्थान्मृगेक्षणा । मया रहसि चान्येद्युः पृष्टा सत्येवमब्रवीत् ॥ ४०० ॥
आसीद्देवो महाशुक्रे भोगस्तेन मया सह । अतिवल्लभया भुक्ताः सुचिरं तत्र जन्मनि ॥ ४०१ ॥
मयैव सह सोऽन्येद्युर्यात्रां नंदीश्वरादिषु । कृत्वार्हज्जन्मोत्सवं च स्वस्थानाय न्यवर्तत ॥ ४०२ ॥
यावच्च ब्रह्मलोकेऽगात्तावदच्योष्ट सोऽमरः । शोकार्ता तं च मार्गंती भरतेऽत्र कुरुष्वगाम् ॥ ४०३ ॥
केवलज्ञानिनौ तत्र दृष्ट्वापृच्छं दिवच्युतः । क्व मे पतिः समुत्पन्नस्ततस्तावेवमूचतुः ॥ ४०४ ॥
हरिवंशे तव पतिः प्रादुर्भूतो नृपालये । त्वमपि प्रच्युता स्वर्गाद्राज्ञः पुत्री भविष्यसि ॥ ४०५ ॥
यदा शक्रमहे च त्वां कुंजरान्मोचयिष्यति । स तदानीं पुनरपि पतिस्तव भविष्यति ॥ ४०६ ॥
तौ वंदित्वा भक्तिपूर्वं स्वस्थानमगमं तदा । क्रमाच्च्युत्वाहमुत्पन्ना सोमदत्तस्य कन्यका ॥ ४०७ ॥
सर्वाणकेवले देवान् दृष्ट्वा जातिस्मृतिं गता । एतदज्ञासिषं तस्मात् कृतं मौनमिदं मया ॥ ४०८ ॥
एतत्तस्या वचः सर्वं मया राज्ञे निवेदितम् । राज्ञा विसृष्टाश्च नृपाः स्वयंवरसमागताः ॥ ४०९ ॥

वसुदेवस्य नृपपुत्र्या सोमश्रिया विवाहः ।



---

१ पूर्वं स्नातः पश्चाद् भुक्तः इति स्नातभुक्तः ।

प्रत्यय[1]श्चाभवत्तस्या मोचितायास्त्वया द्विपात् । त्वामानेतुं प्रेषितास्मि त[2]देह्युद्वह वीर ताम् ॥४१० ॥
तया सह ततो गत्वा वसुदेवो नृपौकसि । सोमश्रियमुपायंस्त रेमे तत्र तया सह ॥४११ ॥
शौरिः सुप्तोत्थितोऽन्येद्युर्नापश्यत्तां मृगेक्षणाम् । करुणं च रुदंस्तस्थौ शून्यचित्तो दिनत्रयम् ॥४१२ ॥
स्थितामुपवनेऽद्राक्षीद्वार्ष्णेयस्तामुवाच च । केनागसेयच्चिरं त्वं नष्टासि वद मानिनि ॥४१३ ॥
साप्यूचे त्वत्कृतेऽकारि विशिष्टो नियमो मया । मौनव्रते स्थिता चास्मि प्राणनाथ दिनत्रयम् ॥४१४ ॥
अर्चित्वा देवतां चैतां भूयः पाणिग्रहं कुरु । अयं हि विधि[3]रत्रेति शौरिश्चक्रे च तत्तथा ॥४१५ ॥
देव्याः शेषेति मदिरां यादवः पायितस्तया । भेजेतरां रतिसुखं कांदर्पिक इवामरः ॥४१६ ॥
सुप्तो निशि तया सार्धं निद्राच्छेदे स तां पुनः । अन्यरुपामुदैक्षिष्ट सुभ्रु कासीत्युवाच च ॥४१७ ॥
साप्यूचे दक्षिणश्रेण्यां सुवर्णाभाभिधे पुरे । चित्रांगः नाम राजाभूत्तस्यांगारवती प्रिया ॥४१८ ॥
तयोर्मानसवेगः सूः कन्या वेगवती त्वहम् । चित्रांगः परिवव्राज राज्ये विन्यस्य तं सुतम् ॥४१९ ॥
मद्भ्रात्रा तेन ते भार्या स्वामिञ्जह्रे गतह्रिया । रतये चाटुभिश्चित्रैर्भणिता मन्मुखेन सा ॥४२० ॥
महासती तु ते पत्नी प्रत्यपद्यत तन्न हि । अमंस्त मां सखीत्वेन त्वामानेतुं च सादिशत् ॥४२१ ॥
आयाता त्वामहं दृष्ट्वा स्मरार्ताकार्षमीदृशम् । ममासि कुलकन्यायाः पतिरुद्वाहपूर्वकः ॥४२२ ॥

वसुदेवस्य नृपपुत्र्या सोमश्रिया विवाहः ।

१ प्रतीतिः । २ ऐहि आगच्छ । ३ अथ मम नियमेऽयं भूयः पाणिग्रह रुपोविधिरस्ति ।

प्रातर्वेगवतीं दृष्ट्वा लोकः सर्वो विसिष्मिये । सोमश्रीहरणं लोके साचख्यौ पत्यनुज्ञया ॥ ४२३ ॥
रतश्रान्तस्तया सुप्तो वसुदेवोऽन्यदा निशि । जह्रे मानसवेगेन वेगादतिगरुत्मना ॥ ४२४ ॥
ज्ञात्वा च वसुदेवेन जघ्ने मुष्ट्या स खेचरः । प्रहारार्तश्च तं सद्योऽमुंचद्भागीरथीजले ॥ ४२५ ॥
विद्यां साधयतश्चंडवेगस्य व्योमचारिणः । तत्रस्थस्यापतत् स्कंधे स विद्यासिद्धिकारणम् ॥ ४२६ ॥
विद्या सिद्धा त्वत्प्रभावान्महात्मन् किं ददामि ते । तेनेत्युक्तो वृष्णिपुत्रोऽमार्गद्विद्यां [1]खगामिनीम् ॥४२७॥
तां विद्यां खेचरः सोऽदाद्द्वारे कनखलस्य च । समारेभे साधयितुं वसुदेवः समाहितः ॥ ४२८ ॥
ततो गते चंडवेगे विद्युद्वेगनृपात्मजा । खेचरी मदनवेगा तत्रायाता ददर्श तम् ॥ ४२९ ॥
हृत्वा स्मरार्ता सा शौरिं नीत्वा वैताढ्यपर्वते । उद्याने पुष्पशयने [2]पुष्पचापमिवामुचत् ॥ ४३० ॥
नगरेऽमृतधाराख्ये स्वयं तु प्रविवेश सा । प्रातः शौरिं नमोऽकार्षुरेत्य तद्भ्रातरस्त्रयः ॥ ४३१ ॥
आद्यो दधिमुखस्तेषु दंडवेगो द्वितीयकः । तृतीयश्चंडवेगो यस्तस्य विद्याप्रदोऽभवत् ॥ ४३२ ॥
नीत्वा शौरिं पुरे ते तु तया मदनवेगया । विधिनोद्वाहयामासुः सुखं रेमे तया च सः ॥ ४३३ ॥
तोषयित्वा तयान्येद्युः शौरिर्मदनवेगया । याचितः प्रददौ तस्यै वरं भुजभृतां वरः ॥ ४३४ ॥
शौरिं दधिमुखोऽन्येद्युर्नमस्कृत्यैवमब्रवीत् । दिवस्तिलकनाम्न्यस्ति पुरे त्रिशिखरो नृपः ॥ ४३५ ॥



वसुदेवस्य विद्याधरेश-पुत्र्या मदनवेगया विवाहः ।

सूर्पकस्य सुतस्यार्थे मत्पितुः कन्यकामिमाम् । सोऽयाचिष्ट न चादत्त विद्युद्वेगस्तु मत्पिता ॥ ४३६ ॥
पित्रा पुत्रीवरं पृष्टश्चारणर्षिरदोऽवदत् । हरिवंश्यो वसुदेवो भावी त्वद्दुहितुर्वरः ॥ ४३७ ॥
चंडवेगस्य गंगायां विद्याः साधयतः स तु । स्कंधे पतिष्यति निशि विद्याः सेत्स्यंति तत्क्षणात् ॥ ४३८ ॥
श्रुत्वेति मत्पिता नादात्तस्मै पुत्रीं विशेषतः । बद्ध्वा च बलिना नीतो राज्ञा त्रिशिखरेण सः ॥ ४३९ ॥
पत्न्या मदनवेगायाः स्वयं दत्तं वरं स्मरन् । श्वशुरं मोचयेदानीं मां [1]श्वशुर्यं च मानय ॥ ४४० ॥
नमिर्वंशादिकंदो नः पुलस्त्यस्तस्य नंदनः । तद्वंशे मेघनादोऽभूदरिंजयपुरेश्वरः ॥ ४४१ ॥
सुभूमचक्री जामाता तस्मै श्रेणिद्वयश्रियम् । ददावस्त्राणि दिव्यानि ब्राह्माग्नेयादिकानि च ॥ ४४२ ॥
तस्य वंशेऽभवद्राजा रावणोऽथ बिभीषणः । बिभीषणस्यान्वयेऽभूद्विद्युद्वेगः पिता मम ॥ ४४३ ॥
तान्यस्त्राणि क्रमायातान्यादत्स्व[2] सफलानि ते । महाभाग्यस्य भावीनि निर्भाग्याणां मुधा पुनः ॥ ४४४ ॥
इत्युक्त्वा तेन दत्तानि जग्राहास्त्राणि वृष्णिभूः । असाधयच्च विधिना पुण्यैः किं न हि सिध्यति ॥ ४४५ ॥
श्रुत्वा मदनवेगां च प्रदत्तां भूचराय ताम् । क्रोधाध्मातस्त्रिशिखरः स्वयं योद्धुमुपाययौ ॥ ४४६ ॥
मायामयं स्वर्णतुंडं स्यंदनं खेचरार्पितम् । आरुढो युयुधे शौरिर्वृतो दधिमुखादिभिः ॥ ४४७ ॥
ऐन्द्रेणास्त्रेण वार्ष्णेयस्त्रिशिखरशिरोऽच्छिदत् । अमोचयच्च श्वशुरं दिवस्तिलकमेत्य तम् ॥ ४४८ ॥

१ श्वशुरसंबंधिनम् । २ गृहाण ।



मदनवेगा–
वृत्तान्तः ।

जरासंध-
पुरुषैर्वसु-
देवग्रहणम् ।

एत्य च श्वशुरपुरे शौरेर्विलसतः सतः । पत्न्यां मदनवेगायामनाधृष्टिः सुतोऽभवत् ॥ ४४९ ॥
सिद्धायतनयात्रां सोऽन्येद्युश्चक्रे सखेचरः । खेचरीभिर्वीक्ष्यमाणः सरागाभिर्मुहुर्मुहुः ॥ ४५० ॥
यात्रायाश्चाययौ शौरिरेहि वेगवतीति च । व्याहार्षीन्मदनवेगां तल्पं[1] सापि ययौ क्रुधा ॥ ४५१ ॥
तदा त्रिशिखरपत्न्या सूर्पणख्या तदालयम् । निर्दह्य मदनवेगारुपयाहारि वृष्णिसूः ॥ ४५२ ॥
तया जिघांसया व्योम्नो मुक्तो राजगृहांतिके । तृणपुंजस्योपरिष्टात् पपात च यदूद्वहः[2] ॥ ४५३ ॥
गीयमाने जरासंधे ज्ञात्वा राजगृहं पुरम् । गतः शौरिः स्वर्णकोटिं जित्वाक्षैरर्थिनां ददौ ॥ ४५४ ॥
बद्ध्वारक्षैर्नृपगृहं ततः शौरिरनीयत । विनापराधं किं बद्धोऽस्मीत्यपृच्छच्च तान् भटान् ॥ ४५५ ॥
तेऽप्यूचुर्ज्ञानिनाख्यातं जरासंधस्य यः प्रगे[3] । कोटिं जित्वार्थिनां दाता तत्सूनुर्वधकस्तव । ४५६ ॥
सोऽसि राजाज्ञया तेन निरागस्कोऽपि मार्यसे । इत्युक्त्वा वसुदेवं ते मध्येभस्त्रं[4] प्रचिक्षिपुः ॥ ४५७ ॥
अपवादभयाच्छन्नं ते वार्ष्णेयं जिघांसवः । अद्रेरलोठयन् वेगवत्या धात्र्यग्रहीच्च तम् ॥ ४५८ ॥
नीयमानस्तया शौरिर्दध्यावित्यहमप्यहो । मन्ये गृहीतो भारुंडैश्चारुदत्त इवांबरे ॥ ४५९ ॥
मुक्तश्च पर्वतेऽपश्यद्वेगवत्याः पदद्वयम् । उपलक्ष्य च भस्त्राया निर्ययौ यदुपुंगवः ॥ ४६० ॥
नाथ नाथेति रुदंतीं सुदंतीमालिलिंग ताम् । त्वया कथमहं प्राप्त इत्यपृच्छच्च यादवः ॥ ४६१ ॥

---

१ शय्याम् २ यदुकुलश्रेष्ठः ३ प्रभाते । ४ भस्त्राया मध्ये मध्येभस्त्रम् ।

अश्रुण्युन्मृज्य सावोचच्छयनोत्थितया मया । तदा तल्पे न दृष्टोऽसि स्वामिन् भाग्यविपर्ययात् ॥४६२ ॥
सममंतःपुरस्त्रीभी रुदत्याः करुणं मम । प्रज्ञप्त्या विद्ययाख्यातं हरणं पतनं च ते ॥४६३ ॥
ततः परमजानाना व्यमृशं यत्पतिर्मम । पार्श्वे कस्याप्यृषेर्विद्यामाचष्टे तत्प्रभावतः ॥४६४ ॥
ततश्च त्वद्वियोगार्ता स्थिता कालं कमप्यहम् । त्वामन्वेष्टुं जगद्भ्रांता स्वामिन् भूपत्यनुज्ञया ॥४६५ ॥
दृष्टोऽसि सिद्धायतने समं मदनवेगया । तच्चैत्याच्च पुरे प्राप्तं त्वामनुप्रापमाश्वहम् ॥४६६ ॥
तत्र चान्तर्हिताश्रौषं मन्नामोदीरितं त्वया । चिरं विरहजं क्लेशं चामुचं स्नेहतस्तव ॥४६७ ॥
क्रुधा मदनवेगा द्राक् प्रविवेशांतरालयम् । कृतं प्रदीपनं चाथ सूर्पणख्यौषधीबलात् ॥४६८ ॥



हृतश्च मदनवेगारुपया त्वं तया ततः । तयोह्यमानं त्वां धर्तुमन्वधावमहं द्रुतम् ॥४६९ ॥
कल्पितमानसवेगारुपाधस्तात् स्थिता तया । अहं दृष्टा तर्जिता च विद्यौषधिसमर्थया ॥४७० ॥
तस्याश्च नष्टा चैत्याय यांती मुनिमलंघयम् । मम विद्यास्ततो भ्रष्टा धात्री च मिलिता तदा ॥४७१ ॥
चिंतयंती क्व मे भर्तेत्यहं धात्रीं न्ययोजयम् । तया भ्रमंत्या दृष्टस्त्वं निपतन् पर्वताग्रतः ॥४७२ ॥
गृहीतश्च तया वेगात्त्वं भस्त्रांतःस्थितः प्रभो । ह्रीमत्तीर्थे पंचनदे समानीय व्यमुच्यथाः ॥४७३ ॥
इति श्रुत्वा सह तया तत्रास्थात्तापसाश्रमे । कन्यां ददर्श चान्येद्युर्नद्यां पाशनियंत्रिताम् ॥४७४ ॥
भणितो वेगवत्या च स स्वयं च कृपापरः । कन्यकां तां नागपाशबंधाच्छौरिरमोचयत् ॥४७५ ॥

मूर्छितोत्थापिता सा च शौरिणा जलसेकतः । ततः प्रदक्षिणीकृत्य वसुदेवमवोचत् ॥ ४७६ ॥
सिद्धा विद्यास्त्वत्प्रभावान्ममाद्या शृणु चापरम् । वैताढ्याद्रावस्ति पुरं नाम्ना गगनवल्लभम् ॥ ४७७ ॥
विद्युद्दंष्ट्रो नमिवंश्यो राजाभूत्तत्र सोऽन्यदा । प्रत्यग्विदेहे प्रतिमास्थितं मुनिमुदैक्षत ॥ ४७८ ॥
भोः कोऽप्ययमुत्पातस्तन्नीत्वैनं वरुणाचले । हतेत्युक्त्वाताडयत्तं विद्युद्दंष्ट्रो नभश्चरैः ॥ ४७९ ॥
शुक्लध्यानजुषस्तस्य मुनेर्जज्ञे च केवलम् । केवलिमहिमार्थं च धरणेन्द्रः समाययौ ॥ ४८० ॥
तस्यर्षेः [1]प्रत्यनीकांस्तान् विलोक्य धरणः क्रुधा । भ्रष्टविद्यांश्चकाराशु दीनास्ते चैवमूचिरे ॥ ४८१ ॥
कोऽप्येष इति नो विद्मो विद्युद्दंष्ट्रेण केवलम् । उत्पातोऽसाविति प्रेर्य कर्मेदं कारिता मुनौ ॥ ४८२ ॥
धरणेन्द्रोऽप्युवाचास्य केवलोत्सवहेतवे । अहमागामरे पापा अज्ञानां वः करोमि किम् ॥ ४८३ ॥
भूयः क्लेशेन विद्या वः सेत्स्यंति परमार्हताम् । साधूनां तच्छ्रितानां च द्विषं मोक्ष्यंति ताः क्षणात् ॥ ४८४ ॥
रोहिण्याद्या महाविद्या विद्युद्दंष्ट्रस्य दुर्मतेः । न सेत्स्यंत्यस्य संताने पुरुषस्य स्त्रिया अपि ॥ ४८५ ॥
अथ सेत्स्यंति ताः साधोर्महापुंसश्च दर्शनात् । इत्युदित्वा धरणेन्द्रो ययौ निजनिकेतनम् ॥ ४८६ ॥
इह विद्याः साधयंती कन्या तद्वंशसंभवा । विष्णुना पुंडरीकेणोढा केतुमती पुरा ॥ ४८७ ॥
सिद्धविद्या त्वत्प्रभावात्तद्वंश्याहं च कन्यका । बालचंद्रेति चंद्रास्य मामुद्वह वशंवदाम् ॥ ४८८ ॥

वेगवती–
वृत्तान्तः ।



१ प्रतिपक्षान् ।

किं विद्यासिद्धिहेतोस्ते यच्छामीति तयोदितः । वेगवत्यै देहि विद्यामित्यूचे वृष्णिनंदनः ॥ ४८९ ॥
सा गृहीत्वा वेगवतीं ययौ गगनवल्लभे । जगाम वसुदेवस्तु तापसाश्रममेव तम् ॥ ४९० ॥
सद्य आत्तव्रतौ भूपौ निन्दंतो निजपौरुषम् । तत्रायातौ प्रेक्ष्य शौरिः पप्रच्छोद्वेगकारणम् ॥ ४९१ ॥
तावूचतुश्च श्रावस्त्यामस्ति राजा महाभुजः । एणीपुत्र[1]ः पवित्रात्मा चरित्रैरतिनिर्मलैः ॥ ४९२ ॥
पुत्र्याः प्रियंगुसुंदर्याः स्वयंवरकृते नृपाः । तेनाहूता न चैकोऽपि तद्दुहित्रा वृतो वरः ॥ ४९३ ॥
ततः संग्राम आरंभि क्रुद्धैः संभूय पार्थिवैः । एकेनापि हि तत्पित्रा जिताः सर्वेऽपि विद्रुताः ॥ ४९४ ॥
गिरिषु प्राविशन् केऽपि केऽप्यरण्येऽप्सु[2] केऽपि च । आवां तु तापसौ भूतौ धिग्नौ[3] क्लीबौ वृथाभुजौ ॥४९५ ॥
श्रुत्वेत्यबोधयत्तौ च जैनधर्मं यदूद्वहः । ततः प्राव्रजतां शौरिः श्रावस्त्यां तु स्वयं ययौ ॥ ४९६ ॥
तत्रोद्याने देवगृहं त्रिद्वारं प्रेक्षते स्म सः । दुःप्रवेशं मुखद्वारे दत्तद्वात्रिंशदर्गले ॥ ४९७ ॥
पार्श्वद्वारा प्रविष्टः स प्रतिमास्तत्र चैक्षत । एकस्यर्षेर्गृहिणश्च त्रिपदो महिषस्य च ॥ ४९८ ॥
किमेतदिति तेनैकः पृष्टो विप्रोऽब्रवीदिति । जितशत्रुनृपोऽत्रासीत्तस्य सूनुर्मृगध्वजः ॥ ४९९ ॥
श्रेष्ठी च कामदेवोऽभूत्स्वगोष्ठे सोऽन्यदा ययौ । जगदे दंडकाख्येन गोपालेन निजेन च ॥ ५०० ॥
अस्या महिष्यास्तनयाः पंच पूर्वं मया हताः । अयं षष्ठस्तनयो जातो भद्रतराकृतिः ॥ ५०१ ॥

एणीपुत्र-
वृत्तान्तः ।

१ मृगीपुत्रः । २ जलेषु । ३ आवयोः ।

जातमात्रोऽपि मत्पादौ नमति स्म चलेक्षणः । भयाद्वेपथुमांस्तेन त्रातोऽयं कृपया मया ॥ ५०२ ॥
त्वमप्यस्याभयं देहि कोऽपि जातिस्मरो ह्ययम् । इत्युक्तो महिषं श्रेष्ठी श्रावस्त्यां कृपयानयत् ॥ ५०३ ॥
राजा तस्याभयं तेन याचितः श्रेष्ठिना ददौ । श्रावस्त्यां निर्भयमसौ सर्वत्रापि भ्रमत्विति ॥ ५०४ ॥
मृगध्वजकुमारेणांघ्रिरेकस्तस्य चिच्छिदे । स तु निर्वासितो राज्ञा प्रव्रज्यां प्रत्यपद्यत ॥ ५०५ ॥
व्यापादि महिषः सोऽष्टादशे च दिवसे ततः । मृगध्वजस्य द्वाविंशे दिने जज्ञे तु केवलम् ॥ ५०६ ॥
देवासुरनृपामात्यास्तामागत्य ववंदिरे । जितशत्रुर्नृपस्तूचे किं वैरं महिषेण वः ॥ ५०७ ॥
शशंस केवली पूर्वमश्वग्रीवोऽर्धचक्र्यभूत् । तस्यामात्यो हरिश्मश्रुः कौलो[1] धर्मं निनिंद सः ॥ ५०८ ॥
राजा समर्थयामास सदा धर्मं स आस्तिकः । एवं विरोधो ववृधे तयोर्नृपतिमंत्रिणोः ॥ ५०९ ॥

एणीपुत्र-
वृत्तान्तः ।

तौ त्रिपृष्टाचलाभ्यां च हतौ सप्तममीयतुः । नरकं तत उद्धृतौ भ्रेमतुर्बहुधा भवम् ॥ ५१० ॥
अश्वग्रीवस्ततः सोऽहमभूवं तव नंदनः । हरिश्मश्रुर्महिषोऽभूत्तद्वैराच्च हतो मया ॥ ५११ ॥
मृत्वाभवल्लोहिताक्षाभिधोऽयमसुराग्रणीः । वंदितुं मां समायातो भवनाटकमीदृशम् ॥ ५१२ ॥
तं नत्वर्षिं लोहिताक्षस्तस्यर्षेः श्रेष्ठिनोऽपि च । त्रिपदो महिषस्यापि रत्नमूर्तीरिहाकरोत् ॥ ५१३ ॥
श्रेष्ठिनः कामदेवस्य वंशे तस्यास्ति संप्रति । कामदत्त इति श्रेष्ठी तस्य बंधुमती सुता ॥ ५१४ ॥



१ तांत्रिकमतज्ञाता ।

श्रेष्ठिना तद्वरार्थे च पृष्टो ज्ञान्याख्यदत्र यः । उद्घाटयेन्मुखद्वारं स भावी त्वत्सुतावरः ॥ ५१५ ॥
वसुदेवस्तदाकर्ण्य तद्द्वारमुदघाटयत् । श्रेष्ठी तत्रैत्य तां कन्यां ददौ तस्मै तदैव हि ॥ ५१६ ॥
तं द्रष्टुं कौतुकाद्राजपुत्री पित्रा सहागता । प्रियंगुसुंदरी दृष्ट्वा चानंगार्ता[1]भवत् क्षणात् ॥ ५१७ ॥
द्वाःस्थः प्रियंगुसुंदर्यास्तां दशां वृष्णिजन्मने । एणीपुत्रचरित्रं चाकीर्तयद्रचितांजलिः ॥ ५१८ ॥
गृहे प्रियंगुसुंदर्या अवश्यं प्रातरापतेः । इत्युक्त्वा ययौ द्वाःस्थ शौरिस्त्वैक्षिष्ट नाटकम् ॥ ५१९ ॥
तत्राश्रोषीन्नमिपुत्रो वासवः खेचरोऽभवत् । तद्वंश्या वासवाश्चान्ये पुरुहूतश्च तद्भवः ॥ ५२० ॥
पर्यटन् द्विपमारुढः पुरुहूतोऽन्यदैक्षत । अहल्यां गौतमभार्यां रमयामास चाश्रमे ॥ ५२१ ॥
तदा तस्याप[2]विद्यस्य पुंलिंगं गौतमोऽच्छिदत् । तच्छ्रुत्वा यादवो भीतो नागात् प्रियंगुसुंदरीम् ॥ ५२२ ॥
बंधुमत्या समं शौरिः सुप्तो निद्रात्यये च सः । निशि देवीं ददर्शैकां कासाविति विचिंतयन् ॥ ५२३ ॥
किं चिंतयसि वत्सेति जल्पंती सापि देवता । पाणौ गृहीत्वानैषीत्तमशोकवनिकांतरे ॥ ५२४ ॥
इत्यूचे चात्र भरते श्रीचंदनपुरे पुरे । अमोघरेता भूपोऽभूत्तस्य चारुमती प्रिया ॥ ५२५ ॥
चारुचंद्रः सुतो वेश्यानंगसेनेति नामतः । तस्याः कामपताकेति पुत्री चासीत् सुलोचना ॥ ५२६ ॥
राज्ञो यज्ञेऽथ तस्यैयुस्तापसास्तेषु कौशिकः । तृणबिंदुश्चोपाध्यायौ फलान्यार्पयतामुभौ ॥ ५२७ ॥

एणीपुत्र–वृत्तान्तः ।

---

१ कामपीडिता । २ अपगता विद्या यस्य तस्य

एणीपुत्र-
वृत्तान्तः ।

कुतः फलानीदृशानि पृष्टौ राज्ञोचतुश्च तौ । हरिवंशोत्पत्त्यानीतकल्पद्रोरादितः कथाम् ॥ ५२८ ॥
छुर्या तदा च नृत्यंती जह्रे कामपताकिका । चारुचंद्रकुमारस्य कौशिकर्षेश्च मानसम् ॥ ५२९ ॥
यज्ञे वृत्ते कुमारस्तामात्मसादकरोद्द्रुतम् । स तापसः कौशिकस्तु पार्थिवात्तामयाचत ॥ ५३० ॥
ऊचे राजा कुमारेण गृहीता श्राविका त्वसौ । प्रतिपन्ने सति पत्यौ न द्वितीयं पतिं भजेत् ॥ ५३१ ॥
एवं च राज्ञा प्रतिषिद्धः संक्रुद्धः कौशिकोऽशपत् । रमयिष्यसि चेन्नारीं तत्तदैव मरिष्यसि ॥ ५३२ ॥
राजाथ चारुचंद्राय दत्वा राज्यं स्वसूनवे । प्रपेदे तापसीभूय वनवासं महामतिः ॥ ५३३ ॥
अज्ञातगर्भा तद्राज्ञी वनं तेन समं ययौ । कालेन प्रकटं गर्भं पत्युश्शंकाच्छिदेऽवदत् ॥ ५३४ ॥
तया च सुषुवेऽन्येद्युर्ऋषिदत्तेति कन्यका । क्रमेण श्राविका साभूच्चारणश्रमणांतिके ॥ ५३५ ॥
सा प्राप यौवनं तस्या मातृधात्र्योऽम्रियंत च । तत्रान्येद्युर्मृगव्येनायायौ[1] राजा शिलायुधः ॥ ५३६ ॥
तद्दर्शनात् कामवशस्तदातिथ्यं प्रपद्य च । नीत्वैकांतेऽरमयत्तां नानाभंग्या[2]शिलायुधः ॥ ५३७ ॥
साप्यूचेऽहमृतुस्नाता गर्भः स्याच्चेत्कथंचन । आख्याहि कुलकन्यायास्तदा का नाम मे गतिः ॥ ५३८ ॥
सोऽप्युवाचाहमैक्ष्वाकः श्रावस्त्यां पुरि पार्थिवः । शिलायुधो नामधेयाच्छतायुधनृपात्मजः ॥ ५३९ ॥
यदि ते जायते पुत्रः श्रावस्त्यां स ममांतिके । त्वयानेयो मया कार्यः स एव नृपतिस्तदा ॥ ५४० ॥



---

१ मृगयया । २ विविधविलासरचनया ।

इत्युक्ते तद्बलान्येयुस्तामापृच्छ्य ययौ च सः । तत् सापि पितुराचख्यौ क्रमाच्च सुषुवे सुतम् ॥५४१ ॥
तेन प्रसवरोगेण ऋषिदत्ता व्यपद्यत । ज्वलनप्रभनागस्याग्रमहिषी बभूव च ॥ ५४२ ॥
तत्पिता मोघरेतास्तं पाणिनादाय दारकम् । रुरोद तापसः शोकादस्तोकं सोऽन्यलोकवत् ॥ ५४३ ॥
ज्वलनप्रभभार्या तु साहं ज्ञात्वावधेः स्वयम् । तत्रैत्य तं मृगीरुपा स्तन्येनावर्धयं सुतम् ॥ ५४४ ॥
एणीपुत्र इति नाम्ना विख्यातस्तेन सोऽभवत् । मृत्वाभूत्कौशिकोऽहिर्दृग्विषो मत्पितुराश्रमे ॥ ५४५ ॥
मत्तातं सोऽदशत् क्रूरो हृतं तस्य मया विषम् । बोधितः सोऽप्यहिर्मृत्वा बलो नाम सुरोऽभवत् ॥५४६ ॥
ऋषिदत्तावपुः कृत्वा श्रावस्त्यामेत्य भूपतेः । तस्यार्पयं सुतं तच्चासंस्मरन् सोऽग्रहीन्न हि ॥ ५४७ ॥
मुक्त्वा तस्यांतिके पुत्रं स्थित्वाकाशेऽहमभ्यधाम् । वने तदर्षिदत्ताख्या कन्याहं रमिता त्वया ॥ ५४८ ॥
त्वत्तः सुतोऽसौ जज्ञेऽस्मिन्–जायमाने मृता त्वहम् । देवत्वं प्रापवत्येणीभूय चैनमवर्धयम् ॥ ५४९ ॥
एणीपुत्रः सुतस्तेऽसावित्युक्ते तु शिलायुधः । राज्ये निधाय तं पुत्रं प्रव्रज्य त्रिदिवं ययौ ॥ ५५० ॥
एणीपुत्रेणापत्यार्थेऽष्टमभक्तेन तोषिता । अदां पुत्रीमहं जज्ञे चैषा प्रियंगुसुंदरी ॥ ५५१ ॥
अस्याः स्वयंवरे राज्ञानेनाहूता महीभुजः । न चैकोऽप्यनया वव्रे युद्धं चारंभि राजभिः ॥ ५५२ ॥
मत्सान्निध्याज्जिताः सर्वेऽप्येणीपुत्रेण भूभुजः । प्रियंगुसुंदरी सा तु त्वां दृष्ट्वाद्य वुवूर्षति[1] ॥ ५५३ ॥

एणीपुत्र–
वृत्तान्तः ।



[1] वरितुमिच्छति ।

त्वदर्थेऽष्टमभक्तेन तयास्म्याराधितानघ । मयादिष्टस्त्वामवोचद्वेत्रभृद्गंधरक्षितः ॥ ५५४ ॥
अज्ञानात्त्वमवज्ञासीरधुना तु ममाज्ञया । तेनाहूतः परिणयेरेणीपुत्रस्य तां सुताम् ॥ ५५५ ॥
याचस्व च वरं कंचिदित्युक्तो यादवोऽवदत् । मया स्मृता समागच्छेः प्रतिपेदे च सा तथा ॥ ५५६ ॥
शौरिं बंधुमतीगेहे मुक्त्वा देवी तिरोदधे । प्रातर्द्वाःस्थेन सहितः शौरिरायतने ययौ ॥ ५५७ ॥
प्रियंगुसुंदरीं तत्र पूर्वायातामुपायत । गांधर्वेण विवाहेन यादवः परया मुदा ॥ ५५८ ॥
देवीदत्तं वरं शौरिं स द्वाःस्थोऽष्टादशे दिने । राज्ञे व्यजिज्ञपद्राजाप्यानैषीत्तं स्ववेश्मनि ॥ ५५९ ॥
इतश्च वैताढ्यगिरौ पुरे गंधसमृद्धके । गंधारपिंगलो राजा तस्य कन्या प्रभावती ॥ ५६० ॥
सा भ्रमंती सुवर्णाभे नगरेऽगाद्ददर्श च । सोमश्रियं सखीत्वेन सपदि प्रत्यपादि च । ॥ ५६१ ॥
तस्याश्च पतिविरहं ज्ञात्वोवाच प्रभावती । मा ताम्य सखि भर्तारमानयामि तवाधुना ॥ ५६२ ॥
ऊचे निःश्वस्य सोमश्री वेगवत्यानयद्यथा । आनेष्यसि तथैव त्वं नाथं मे रुपमन्मथम् ॥ ५६३ ॥
न ह्यहं वेगवत्यस्मीत्युदित्वा च प्रभावती । श्रावस्त्यामेत्य वार्ष्णेयं गृहीत्वा तत्र चानयत् ॥ ५६४ ॥
कृतान्यरुपस्तत्रास्थाच्छौरिः सोमश्रिया समम् । ज्ञातो मानसवेगेन बद्धश्चान्येद्युरेत्य सः ॥ ५६५ ॥
जाते कलकले शौरिर्मोचितो वृद्धखेचरैः । तेन मानसवेगेन विवादश्च प्रचक्रमे ॥ ५६६ ॥
वैजयंत्यां ततः पुर्यां बलसिंहनृपांतिके । तौ वादेऽधिष्ठितौ तत्र ते चैयुः सूर्पकादयः ॥ ५६७ ॥



वसुदेवस्य एणीपुत्र–सुतया प्रियङ्गु–सुन्दर्या विवाहः ।

ऊचे मानसवेगः प्राक् सोमश्रीर्मम कल्पिता । अनेन हि च्छलादूढा मददत्ता[1] च मत्स्वसा ॥ ५६८ ॥
उवाच शौरिः सोमश्रीर्मयोढा पितृकल्पिता । तां जह्रेऽसौ वेगवत्याः सर्वं वेत्ति जनोऽपि तत् ॥ ५६९ ॥
एवं मानसवेगस्तु जितो युद्धार्थमुत्थितः । नीलकंठोऽङ्गारकश्च सूर्पकाद्याश्च खेचराः ॥ ५७० ॥
ददौ वेगवतीमाताऽङ्गारवत्यथ शौरये । दिव्यं धनुर्निषंगौ च प्रज्ञप्तीं तु प्रभावती ॥ ५७१ ॥
विद्यादिव्यास्त्रपुष्टौजा बिडौजा इव यादवः । एकोऽपि खेचरान् सर्वानजैषील्लीलयैव तान् ॥ ५७२ ॥
बद्ध्वा मानसवेगं चाक्षिपत् सोमश्रियः पुरः । श्वश्र्वा अंगारवत्याश्च गिरा शौरिर्मुमोच तम् ॥ ५७३ ॥
वृतो मानसवेगाद्यैर्भृत्यीभूतैः स खेचरैः । सोमश्रीयुग्विमानस्थो महापुरपुरं ययौ ॥ ५७४ ॥
तत्र सोमश्रिया सार्धं विललास यदूद्वहः । अन्येद्युः सूर्पकेणाश्वीभूय जह्रे स मायिना ॥ ५७५ ॥
ज्ञात्वा च मुष्टिना शौरिस्ताडयामास सूर्पकम् । सूर्पकेण ततो मुक्तः सोऽपतज्जाह्नवीजले ॥ ५७६ ॥
स उत्तीर्य गंगायाः प्रययौ तापसाश्रमम् । तत्रैक्षिष्ट स्त्रियं चैकां कंठन्यस्तास्थिमालिकाम् ॥ ५७७ ॥
पृष्टाश्च तापसा आख्यज्जितशत्रुनृपप्रिया । जरासंधस्य पुत्रीयं नंदिषेणेति नामतः ॥ ५७८ ॥
वशीकृता परिव्राजेके[2]नैषा स च भूभुजा । हतस्तदस्थीन्यद्यापि धत्तेऽसौ दृढकर्मणा ॥ ५७९ ॥
ततो मंत्रबलाच्छौरिस्तां चक्रे गतकार्मणाम् । जितशत्रुर्ददौ तस्मै जामिं केतुमतीं निजाम् ॥ ५८० ॥

अष्टमं पर्व
द्वितीयः
सर्गः
श्रीअरिष्ट-
नेमिजिन-
चरितम् ।

वसुदेवस्य
प्रज्ञप्त्यादि-
विद्याप्तिः ।

---

१ मयाऽदत्ता । २ तृतीयैकवचनम् ।

एत्य डिंभो जरासंधद्वाःस्थस्तं नृपमब्रवीत् । नंदिषेणाप्राणदाता प्रेष्यतामुपकार्ययम् ॥ ५८१ ॥
राज्ञापि युक्तमित्युक्ते सह तेनैव वेत्रिणा । रथारुढो ययौ शौरिर्मगधेश्वरपत्तनम् ॥ ५८२ ॥
बद्धस्तत्र स आरक्षैरपृच्छद्बंधकारणम् । तेऽप्याचख्युर्जरासंधस्याख्यातं ज्ञानिना ह्यदः ॥ ५८३ ॥
नंदिषेणां दुहितरं यस्ते सज्जीकरिष्यति । हंता ते तत्सुतोऽवश्यं ज्ञातश्चासीति हन्यसे ॥ ५८४ ॥
इत्युक्त्वा यादवं वध्यस्थाने पशुमिवानयन् । असज्जन् मुष्टिकाद्याश्च ते दशार्हं निर्बर्हितुम्[1] ॥ ५८५ ॥
तदा गंधसमृद्धेशोऽपृच्छत्गंधारपिंगलः । प्रभावत्या वरं विद्यां वसुदेवं च सावदत् ॥ ५८६ ॥
तेन प्रैषि तमानेतुं तत्र धात्री भगीरथी । सा निन्ये तेभ्य आच्छिद्य शौरिं गंधसमृद्धके ॥ ५८७ ॥
पर्यणैषीत्तत्र शौरिः पितृदत्तां प्रभावतीम् । रममाणस्तया सार्धं चावतस्थे यथासुखम् ॥ ५८८ ॥
विद्याधरस्त्रीरपराश्च शौरिर्गत्वोपयेमे च सुकोशलां च ।
सुकोशलायाः सदने स्थितश्च प्रत्यूहहीनं[2] विषयानभुंक्त ॥ ५८९ ॥

* * *

**इत्याचार्यश्रीहेमचंद्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्येऽष्टमपर्वणि श्यामादिसुकोशलांतकन्यापरिणयनो नाम द्वितीयः सर्गः ।**

अष्टमं पर्व
द्वितीयः
सर्गः
श्रीअरिष्ट–
नेमिजिन–
चरितम् ।

वसुदेवस्य
वधाद्र–
क्षणम्,
राजपुत्री–
प्रभावत्यो–
पयमनं च ।



---

१ मारयितुम् । २ निर्विघ्नम् ।

# तृतीयः सर्गः ।

इतश्चात्रैव भरते विद्याधरपुरोपमम् । पेढालपुरमित्यस्ति सर्वाद्भुतनिधानभूः ॥ १ ॥
यत्रोत्फुल्लगृहोद्यानानिलो भवति शर्मणे । वस्त्राधिवासनागंधकारी यूनामहर्निशम् ॥ २ ॥
यत्रौकोरत्नबद्धोर्वीसंक्रांतोडुषु[1] बालिकाः । क्षिपंति पाणीन् यामिन्यां दंततांडंकशंकया[2] ॥ ३ ॥
यद्गृहेषूत्पताकेषु दृश्यंते निधिशालिषु । चलत्पताकिकाच्छायारक्षा विषधरा इव ॥ ४ ॥
यत्र वासी जनः सर्वः सर्वतः समरज्यत । दृढेन जिनधर्मेण नीलीरागेण वस्त्रवत् ॥ ५ ॥
तत्र राजा हरिश्चंद्रश्चंद्रवन्निर्मलो गुणैः । बभूवाद्भुतया ऋद्ध्या बिडौजस इवानुजः ॥ ६ ॥
सुस्थानस्येंद्रियजये[3] नयविक्रमशालिनः । तस्य भ्रुवल्लरीदास्यमनिशं शिश्रियुः श्रियः ॥ ७ ॥
तस्य श्रियामपाराणां स्पर्धयेव यशांस्यपि । अपारीभूय भुवने व्यजृंभंत निरर्गलम् ॥ ८ ॥
तस्यामलयशोराशेर्नामधेयमगीयत । सुरखेचरनारीभिर्वेताढ्याधित्यकास्वपि ॥ ९ ॥
तस्याग्रमहिषी प्राणवल्लभा रुपशालिनी । अभूल्लक्ष्मीवती नाम लक्ष्मीर्लक्ष्मीपतेरिव ॥ १० ॥

१ उडूनि नक्षत्राणि । २ दंतताडंकं कर्णभूषणम् । ३ स्थितस्य ।

शीलेन लज्जया प्रेम्णा दाक्ष्येण विनयेन च । बभूव सा पतिमनःकुमुदानंदचंद्रिका ॥ ११ ॥
आलपंती प्रणयिनः[१] प्रीतिकोमलया गिरा । सा सुधासारणिमिवादधे तत्कर्णरंध्रयोः ॥ १२ ॥
सा कलाभिः पल्लविता पुष्पिता ह्र्यादिभिर्गुणैः । पतिभक्त्या च फलिता बभौ वल्लीव जंगमा ॥ १३ ॥
कालेन गच्छता लक्ष्मीवत्या प्रसुषुवे सुता । सूतिकागृहमांगल्यदीपिकेव स्वरोचिषा ॥ १४ ॥
सर्वलक्षणया जातमात्रयापि तया तदा । श्रियेव गृहमेयुष्या पितरौ तावहृष्यताम् ॥ १५ ॥
पूर्वजन्मपतिस्तस्या धनदोऽभ्येत्य तत्क्षणम् । तत्रातनिष्ट कनकवृष्टिं प्राक्स्नेहमोहितः ॥ १६ ॥
तया कनकवृष्ट्या च हृष्टो लक्ष्मीवतीपतिः । तस्याः सुतायाः कनकवतीति विदधेऽभिधाम् ॥ १७ ॥
अंकादंकं संचरन्ती सा धात्रीणां स्तनंधयी । क्रमाद्बभूव हंसीव पादचंक्रमणक्षमा ॥ १८ ॥
तां पद्भ्यामुपसर्पन्तीं दृष्ट्वा प्रक्रांततालिकाः । उल्लापनैर्[२]नवनवैर्गायन्ति स्मोपमातरः[३] ॥ १९ ॥
शनैः शनैस्तां जल्पंतीं लल्लमन्मनया[४] गिरा । मुहुरालापयन् धात्र्यः शारिकामिव कौतुकात् ॥ २० ॥
आबद्धकुन्तला लोलकुंडला क्वाणिनूपुरा[५] । सा रत्नकंदुकै रेमे रमेवापरमूर्तिभाक् ॥ २१ ॥
कृत्रिमैः पुंत्रकैर्[६]नित्यं रममाणा ववर्ष सा । हर्षप्रकर्षमुद्दामं मातुरुन्निद्रचक्षुषः[७] ॥ २२ ॥

---

१ पत्युः भर्त्रा सहेत्यर्थः । २ आह्वानैः । ३ धात्र्यः । ४ अस्फुटया "तोतडी" इति भाषायां । ५ क्वाणः शब्दस्तद्वन्नूपुरं यस्याः सा शब्दितनूपुरेत्यर्थः । ६ पांचालिकैः । ७ प्रफुल्लनेत्रायाः ।

नल-
दमयंती
चरिते
तयोरुत्तर-
भवः ।

उज्झंती मौग्ध्यमधुरां क्रमेण क्षीरकंठताम् । कलाकलापग्रहणयोग्या कनकवत्यभूत् ॥ २३ ॥
शुभेऽह्नि कनकवतीं कलाग्रहणहेतवे । उचितस्य कलाचार्यस्यार्पयामास भूपतिः ॥ २४ ॥
अष्टादशापि हि लिपीर्लिपिस्रष्ट्रीव साबुधत् । शब्दपारायणं चक्रे कंठस्थं निजनामवत् ॥ २५ ॥
तर्काभ्यासादलमभूत् [१]पत्रदाने गुरोरपि । छंदोऽलंकारशास्त्राब्धिपारदृश्वर्यजायत ॥ २६ ॥
षड्भाषानुगया वाचा काव्यकौशलमाप च । अचित्रीयत चित्रेषु [२]पुस्तकर्मण्यगल्भत ॥ २७ ॥
क्रियाकारकगुप्तज्ञा वेदित्री च [३]प्रहेलिकाः । सकलद्यूतदक्षा च सारथ्यकुशलाप्यभूत् ॥ २८ ॥
[४]संवाहकत्वकल्पाभूज्जज्ञे [५]रसवतीं कलाम् । प्राप मायेन्द्रजालादिप्रादुर्भावननैपुणम् ॥ २९ ॥
आचार्यकमिव प्राप तूर्यत्रितयदर्शने । सा कापि हि कला नास्ति सम्यग् यां न विवेद सा ॥ ३० ॥
॥ षड्भिः कुलकम् ॥
सा प्रपेदेऽनवद्यांगी लावण्यजलनिम्नगा । कलाकलापसफलीकरणं [६]मध्यमं वयः ॥ ३१ ॥
तद्दृष्ट्वा पितरौ तस्या वरान्वेषणतत्परौ । अपश्यन्तौ वरं योग्यमारेभाते स्वयंवरम् ॥ ३२ ॥
अपरेद्युः स्वसदने सुखासीना मृगेक्षणा । अकस्मादागतं राजहंसमेकं ददर्श सा ॥ ३३ ॥

---

१ प्रशंसापत्रदाने । २ पुस्तं धातुकाष्ठादीनां वस्तूनां निर्माणं तत्कर्मणि । ३ समस्याः । ४ संवाहकोऽङ्गमर्दकस्तत्कर्मणि दक्षा ।
५ रंधनक्रियाम् । ६ यौवनं ।

नल–
दमयंती
चरिते
तयोरुत्तर–
भवः ।

अशोकपल्लवाताम्रचंचूचरणलोचनम् । पांडिम्ना[1] नवडिंडिर[2]पिंडैरिव विनिर्मितम् ॥ ३४ ॥
स्वर्णघर्घरिकामालभारिग्रीवं कलस्वनम् । नृत्यंतमिव यानेन[3] तं दृष्ट्वा सेत्यचिंतयत् ॥ ३५ ॥
॥ युग्मम् ॥
कस्याप्यनल्पपुण्यस्य विनोदास्पदमेष हि । स्वामिस्वीकारबाह्यं हि पक्षिणां भूषणं कुतः ॥ ३६ ॥
स्वामिनो यस्य कस्यापि भवत्वेष सितच्छदः । विनोदायास्तु मे बाढं ममेहोत्कंठते मनः ॥ ३७ ॥
गवाक्षलीनमथ तं सा हंसं हंसगामिनी । मांगल्यचामरमिव श्रियः स्वयमुपाददे ॥ ३८ ॥
पद्माक्षा पाणिपद्मेन सुखस्पर्शेन सा शनैः । मरालं लालयामास तं क्रीडापुंडरीकवत् ॥ ३९ ॥
शिरीषसुकुमारेण पाणिनामार्जयच्च सा । तस्यामलं पिच्छकोशं केशपाशं शिशोरिव ॥ ४० ॥
सखीं कनकवत्यूचे दारुपंजरमानय । यथा तत्र क्षिपाम्येनं नैकत्र स्थायिनः खगाः ॥ ४१ ॥
दारुपंजरमानेतुं सा यावत्प्राचलत् सखी । स हंसो वक्तुमारेभे तावन्मानुषभाषया ॥ ४२ ॥
राजपुत्रि विविक्तासि[4] मा मा मां पंजरे निधाः । तुभ्यं निवेदयिष्यामि प्रियं किंचिद्विमुंच माम् ॥ ४३ ॥
हंसं मानुषवाचा तं वदंतं प्रेक्ष्य विस्मिता । सा गौरवाददोऽवादीत् प्रियातिथिमिवागतम् ॥ ४४ ॥
प्रत्युतासि प्रसादार्हो हे हंस कथय प्रियम् । शर्करातोऽपि मधुरा वार्ताधर्कथिता सती ॥ ४५ ॥

---

१ श्वैत्येन शुक्लत्वेनेति यावत् । २ नवो यो डिंडिरः समुद्रफेनस्तस्य पिंडैः समूहैः । ३ गमनेन । ४ विवेकवतीव ।

दमयंती-जीवकनक-वत्या वसुदेवे-ऽनुरागः ।

हंसोऽप्याख्यत् कोशलायां नगर्यां खेचरेशितुः । कोशलस्यामरीकल्पा दुहितास्ति सुकोशला ॥ ४६ ॥
सुकोशलापतिश्चास्ति युवा सौन्दर्यसारभूः । तं दृष्ट्वा भज्यते रेखा सर्वेषां रुपशालिनाम् ॥ ४७ ॥
सुकोशलापतिर्लोकोत्तररुपः स सुंदरि । तद्रूपसदृशं रुपं ह्यादर्शे यदि नान्यतः ॥ ४८ ॥
यथा हि स युवा रुपसंपदा नृशिरोमणिः । नारीशिरोमणिस्तद्वत्त्वमप्यसि मनस्विनि ॥ ४९ ॥
युवयो रुपदृष्टाहं युवयोः संगमेच्छया । त्वां तस्य सम्यगाख्यायाख्यातवानस्मि तं तव ॥ ५० ॥
स्वयंवरं च ते श्रुत्वा तथा तस्यासि वर्णिता । तव स्वयंवरे भद्रे स यथा स्वयमेष्यति ॥ ५१ ॥
स्वयंवरे बहूनां च मध्ये त्वमुपलक्षयेः । नक्षत्रनाथं[1] नक्षत्रेष्विवानल्पेन तेजसा ॥ ५२ ॥
तन्मुंच मां स्वस्ति तुभ्यमपवादो धृते मयि । विधिभट्टारक[2] इव पत्यर्थं प्रयते तव ॥ ५३ ॥
न सामान्यः पुमानेष क्रीडया हंसरुपभृत् । पतिः संपत्स्यतेऽनेन दध्यौ कनकवत्यदः ॥ ५४ ॥
तं मुमोच च सा हस्तात् स उत्पत्य विहायसा । तदुत्संगे चित्रपटमपातयदुवाच च ॥ ५५ ॥
इहास्ति लिखितो भद्रे स युवा यादृगीक्षितः । दृष्ट्वा लेख्यगतममुं जानीथास्तमिहागतम् ॥ ५६ ॥
प्रीता कनकवत्यूचे कृतांजलिपुटा च तम् । कोऽसि त्वं कथयित्वा स्वं मनागनुगृहाण माम् ॥ ५७ ॥
स खेचरो हंसचरश्चलत्कांचनकुंडलः । दिव्यांगरागनेपथ्यस्तथ्यवागिदमभ्यधात् ॥ ५८ ॥

१ चंद्रम् । २ विधिरेव भट्टारको देवः ।

दमयंती–
जीवकनक–
वत्या
वसुदेवे–
ऽनुरागः ।

अहं चंद्रातपो नाम खेचरोऽस्मि वरानने । भाविनस्त्वत्पतेरस्य पादशुश्रुषणोद्यतः ॥ ५९ ॥
विद्याप्रभावादन्यच्च निरघे[1] कथयामि ते । त्वामेष्यत्यन्यदूत्येन स्वयंवरदिने च सः ॥ ६० ॥
इत्युक्तवंतं दत्ताशीः खेचरं विससर्ज सा । दध्यौ च संवदति मे दिष्ट्या यद्दैवतं वचः ॥ ६१ ॥
तयाथ चित्रस्थपतिर्दर्शनातृप्तया पटः । भूयो भूयोऽक्षिवच्चक्रे मीलनोन्मीलनास्पदम् ॥ ६२ ॥
क्षणं मूर्ध्नि क्षणं कंठे क्षणं हृदि च सा पटम् । दध्रे विरहतापार्ता बाला कदलीकांडवत् ॥ ६३ ॥
चंद्रातपोऽपि तत्कालं तयोः संगमकौतुकी । ययौ विद्याधरपुरे विद्याधरविभूषिते ॥ ६४ ॥
विद्याशक्त्या महीयस्या स नभस्वानिवास्खलन् । वसुदेवाश्रितं वासभवनं प्राविशन्निशि ॥ ६५ ॥
हंसरोमतूलिकांके तल्पे धौतोत्तरच्छदे । सकलत्रं वसुदेवं शयानं च ददर्श सः ॥ ६६ ॥
विद्याधरीभुजलतोच्छीर्षकं सुखशायिनम् । पादसंवाहनेनोपाक्रंस्त शौरिं स सेवितुम् ॥ ६७ ॥
शौरी रतक्लमोत्पन्ननिद्रासुखभरोऽपि हि । क्षणादथ जजागार सुत्थाना[2] हि नरोत्तमाः ॥ ६८ ॥
आकस्मिकं निशीथेऽपि तं तदोद्वीक्ष्य यादवः । न बिभाय न चुकोप प्रत्युतैवं परामृशत्[3] ॥ ६९ ॥
पुमानेष विरुद्धो मे न हि तावदुपासनात् । शरणार्थी भवेद्यद्वा यद्वा मत्कार्यचिंतकः ॥ ७० ॥
यद्यालपाम्यमुं पादसेवकं मृदुवागपि । सुखसुप्ता रतक्लांत्या तदा देव्यपि जागृयात् ॥ ७१ ॥

---

१ पापरहिते । २ सुखेनोत्थानं येषां ते । ३ व्यचिंतयत् ।

न चोपेक्षितुमर्हामि सेवापरममुं जनम् । उपेक्षकस्यापि हि मे न निद्रास्मिन्निह स्थिते ॥ ७२ ॥
तदुत्थाय प्रयत्नेन देवीमप्रतिबोधयन् । पर्यंकात् परतो भूत्वा वार्तयाम्यमुमादतम् ॥ ७३ ॥
[1]अनांदोलितपर्यंकस्तनुलाघवनाटनात् । दशार्हस्तल्पमुज्झित्वा निषसाद ततोऽन्यतः ॥ ७४ ॥
चंद्रातपोऽपि सर्वांगरत्नाभरणभूषितः । दशार्हं दशमं भक्त्या प्राणमत् पत्तिलेशवत् ॥ ७५ ॥
य आख्यत् कनकवतीं सोऽयं चंद्रातपाभिधः । विद्याधर इति शौरिरुपलक्षयति स्म तम् ॥ ७६ ॥
दर्शार्हः प्रतिपत्त्यर्हं तं परिष्वज्य खेचरम् । पृच्छति स्म स्वागतिकं स्वयमागमकारणम् ॥ ७७ ॥
ततश्चंद्रातपश्चंद्रातपशीतलया गिरा । प्रौढ्या प्रज्ञावतां धुर्यो वक्तुमेवं प्रचक्रमे ॥ ७८ ॥
तादृशीं कनकवतीं तवाख्याय यदूद्वह । त्वामप्याख्यातवानस्मि तस्यै सद्भूतवर्णनात् ॥ ७९ ॥
विद्याबलाच्च त्वां नाथ पटे लिखितवानहम् । तं पटं चार्पयं तस्यै तन्मुखांभोजभास्करम् ॥ ८० ॥
दृष्ट्वा पटस्थं त्वां राकामृगांकमिव सं[2]मदात् । तस्या ववर्षतुर्वारि लोचने चंद्रकांतवत् ॥ ८१ ॥
साधात्तदैव त्वन्मूर्तिसनाथं तं पटं हृदि । दातुं विरहसंतापसंविभागमिव त्वयि ॥ ८२ ॥
सा यंत्रशालभंजीव वर्षन्नेत्रा कृतांजलिः । मामिति प्रार्थितवती गौरवोत्तारितांचला ॥ ८३ ॥
मोपेक्षिष्ठा वराकीं मां नाप्तो मे त्वदृतेऽपरः । उपानयेस्तं पुरुषं सर्वथा मत्स्वयंवरे ॥ ८४ ॥

वसुदेवाय कनकवत्यनुरागख्यापनम् ।



---

१ अनांदोलितोऽचालितः पर्यंको येन सः । २ हर्षात् ।

नाथाद्य कृष्णदशमीदिवसस्तदनंतरम् । भावी सितायां पंचम्यां पूर्वाह्णे तत्स्वयंवरः ॥ ८५ ॥
स्वयंवरोत्सवे तत्र प्रयातुं यूयमर्हथ । त्वत्संगमाशाजीवातुरनुग्राह्यैव सा त्वया ॥ ८६ ॥[1]
वसुदेवोऽप्यथावादीच्चंद्रातप दिनोदये । आपृच्छ्य स्वजनानेवं करिष्ये मुदमुद्वहेः ॥ ८७ ॥
तिष्ठेस्त्वं प्रमदवने मया सह यियासया । स्वप्रयत्नफलं हंत पश्येस्तस्याः स्वयंवरे ॥ ८८ ॥
एवमुक्ते तिरोऽधत्त स विद्याधरदारकः । वसुदेवस्तु सुष्वाप तल्पेऽनल्पप्रमोदभाक् ॥ ८९ ॥
स्वजनान् प्रातरापृच्छ्यानुज्ञाप्य प्रेयसीजनम् । वसुदेवो ययौ प्रातः पेढालपुरपत्तनम् ॥ ९० ॥
तत्र राजा हरिश्चंद्रः समागत्य यदूद्वहम् । अवासयदुपवने लक्ष्मीरमणनामनि ॥ ९१ ॥

कनकवती–
स्वयंवरः ।

अशोकपल्लवाताम्रे पाटलामोदशालिनि । केतकीकुसुमस्मेरे सप्तच्छदसुगंधिनि ॥ ९२ ॥
कृष्णेक्षुनागरंगाढ्ये[2] कुंदकुड्मलदंतुरे । तत्रोद्याने विशश्राम शौरिर्दृष्टिं विनोदयन् ॥ ९३ ॥ ॥ युग्मम् ॥
ततश्च कनकवतीपिता स्वविभवोचिताम् । अर्हणा[3]मर्हणीय[4]स्य व्यधादानकदुंदुभेः ॥ ९४ ॥
पूर्वनिष्पादितेषूच्चैः प्रासादेषु गृहेषु च । तत्रोद्याने स्थितः शौरिरैतिह्य[5]मश्रृणोदिदम् ॥ ९५ ॥
पुरा समवसरणं श्रीनमिस्वामिनोऽभवत् । इहोद्याने सेव्यमानं सुरासुरनरेश्वरैः ॥ ९६ ॥
इहामरीभिः सहिता रासकेनार्हत पुरः । लक्ष्मी रेमे तदाद्येतल्लक्ष्मीरमणमित्यभूत् ॥ ९७ ॥



---

१ तव संगमस्याशा एव जीवातुः जीवनौषधं यस्याः सा । २ नारंगी वृक्ष ३ पूजां । ४ पूज्यस्य । ५ इतिहासम् ।

तत्र चायतनेऽप्युच्चैः प्रतिमाः श्रीमदर्हताम् ।दिव्योपहारैरानर्च ववंदे च यदूद्वहः ॥ ९८ ॥
तदा च विष्वग्रत्लाढ्यं सुमेरुरिव जंगमम् । उत्पल्लवं द्रुममिव पताकालक्षलक्षितम् ॥ ९९ ॥
अनेककरिमकरतुरगाकरमब्धिवत् । आदित्यमंडलरुचामाचामकमिवार्चिषा ॥ १०० ॥
समेघनादं व्योमेव बंदिकोलाहलाकुलम् । मांगल्यतूर्यनिर्घोषतर्जितांबुदगर्जितम् ॥ १०१ ॥
उत्कंधरीकृताशेषविद्याधरमवातरत् । विमानमेकमद्राक्षीत्तत्र शौरिरनाकुलः ॥ १०२ ॥
॥ चतुर्भिः कलापकम् ॥
पप्रच्छ चैकमग्रस्थं वसुदेवो दिवौकसम् । विमानं शक्रसध्रीव कस्येदं नाकिनो वद ॥ १०३ ॥
सोऽब्रवीद्धनदस्येदं तदारुढः स चाधुना । उत्तरत्यत्र भूलोके कारणेन गरीयसा ॥ १०४ ॥
पूजयित्वार्हत्प्रतिमाश्चैत्येऽस्मिन् प्रयतिष्यते । अचिरात्कनकवतीस्वयंवरदिदृक्षया ॥ १०५ ॥
तदा चाचिंतयच्छौरिर्धन्या कनकवत्यहो । देवा अप्युपतिष्ठंते प्रारब्धे यत्स्वयंवरे ॥ १०६ ॥
अथावतीर्य धनदः प्रतिमाः श्रीमदर्हताम् । आनर्च च ववंदे च संगीतं चाप्यचीकरत् ॥ १०७ ॥
अहो महात्मा देवोऽयं पुण्यभाक् परमार्हतः । अहो प्रभावनापात्रं शासनं श्रीमदर्हताम् ॥ १०८ ॥
अहो धन्योऽस्मि यस्यैतदद्भुतं दृष्टिगोचरम् । सुचिरं चिंतयामास शौरिरेवं समाहितः ॥ १०९ ॥



कनकवती–
स्वयंवरः ।

तत्र वैश्रवण[1]ः पूजां समाप्य श्रीमदर्हताम् । यथारुचि प्रचलितो ददर्शानकदुंदुभिम् ॥ ११० ॥
अचिंतयच्च काप्यस्य पुंसो लोकोत्तराकृतिः । अमराणामसुराणां खेचराणां च नास्ति या ॥ १११ ॥
धनदोऽनुपमश्रीकमाकृत्या प्रेक्ष्य यादवम् । अंगुलीसंज्ञयाह्वास्त विमानस्थः ससंभ्रमम् ॥ ११२ ॥
अहं मनुष्यो देवोऽयं महर्द्धिः परमार्हतः । इत्यगाद्वसुदेवस्तमभीरुः कौतुकीति च ॥ ११३ ॥
धनदोऽपि ततः स्वार्थसतृष्णो वृष्णिनंदनम् । प्रियालापादिसत्कारपात्रीचक्रे वयस्यवत् ॥ ११४ ॥
प्रकृत्यापि विनीतात्मा सत्कृतश्चेति वृष्णिसूः । कृतांजलिस्तं प्रावोचदाज्ञापय करोमि किम् ॥ ११५ ॥
अथावदद्वैश्रवणः श्रोत्रशर्मदया गिरा । साधयानन्यसाध्यं मे दूत्यमेकं महाशय ॥ ११६ ॥
अस्मिन् पुरे हरिश्चंद्रनरेंद्रस्य कुमारिका । सुता कनकवत्यस्ति तामिदं वद मद्गिरा ॥ ११७ ॥
शक्रस्य देवराजस्योत्तरदिक्पतिरिच्छति । त्वां वैश्रवण उद्वोढुं मानुष्यप्यमरी भव ॥ ११८ ॥
मम चामोघया वाचा समीरण इवास्खलन् । प्रदेशं कनकवत्या भूषितं त्वमवाप्स्यसि ॥ ११९ ॥
तत्र च गत्वा स्वावासे दिव्यालंकरणादिकम् । मुक्त्वा प्रैष्यो[2]चितं शौरिर्मलिनं वेषमाददे ॥ १२० ॥
यांतं मलिनवेषं तु यादवं धनदोऽवदत् । किमुदारं वेषमौज्जीः सर्वत्राडंबरोऽर्हति ॥ १२१ ॥
शौरिः प्रोवाच वेषेण मलिनेनोज्ज्वलेन वा । किं नाम कार्यं दूत्ये हि[3] मंडनं वाग्ममास्ति सा ॥ १२२ ॥



कनकवती–
स्वयंवरः ।



१ कुबेरः । २ दूतयोग्यम् । ३ हि यस्मात्कारणान्मंडनं वागेवास्ति सा वाग्ममास्तीत्यन्वयः ।

स्वस्ति तुभ्यं प्रयाहीति धनदेनोदितः पुनः । निःशंकं वसुदेवोऽगाद्धरिश्चंद्रगृहांगणम् ॥ १२३ ॥
हस्त्यश्वरथयोधादिनिरुद्धद्वारमप्यथ । वसुदेवोऽविशद्वेश्म हरिश्चंद्रमहीपतेः ॥ १२४ ॥
अदृश्यमानः केनापि ततश्चाप्रस्खलद्गतिः । योगीवांजनसिद्धोऽगादग्रतो वृष्णिनंदनः ॥ १२५ ॥
रुद्धं बद्धपरिकरैः सौविदैर्वेत्रपाणिभिः । प्राविशत् प्रथमं कक्षांतरं शौरिर्नृपौकसः ॥ १२६ ॥
इंद्रनीलमयोर्वीकं चलत्कांतितरंगितम् । सांभोवापी[1]भ्रमकरं शौरिस्तत्क्षणमैक्षत ॥ १२७ ॥
दिव्याभरणधात्रीणां स्त्रीणामप्सरसामिव । सुरुपाणां सवयसां तत्र वृंदं ददर्श च ॥ १२८ ॥
स्वर्णस्तंभं मणिमयपांचालीकं चलद्ध्वजम् । कक्षान्तरमथाविक्षद्वैतीयीकं यदूद्वहः ॥ १२९ ॥



ज्योत्स्नासहोदरक्षीरतरंगेऽथ तृतीयके । कक्षांतरेऽविशत् क्षीरोदधाविव सुरद्विपः ॥ १३० ॥
स्त्रीजनं तत्र सोऽपश्यद्दिव्याभरणभूषितम् । असंमातं सुरपुरेऽप्सरोजनसमागतम् ॥ १३१ ॥
तुर्यं कक्षांतरं प्राप्तोऽपश्यच्च जलकुट्टिमम् । तरंगतरलं हंसकुरर[2]ादिसमाकुलम् ॥ १३२ ॥
तत्रात्मानं प्रपश्यतीर्विनाप्यादर्शमंगनाः । श्रृंगारकर्म कुर्वाणाः प्रेक्षांचक्रे यदूद्वहः ॥ १३३ ॥
अश्रौषीत्सारिकाकीर[3]ोदीर्यमाणं च मंगलम् । चेटीजनं च प्रैक्षिष्ट गीतनृत्यसमाकुलम् ॥ १३४ ॥
कक्षांतरं पंचमं च ययौ शौरिर्ददर्श च । मनोरमं मारकतं कुट्टिमं स्वर्गृहोपमम् ॥ १३५ ॥



१ सजलवाप्या भ्रमकरम् । २ कुररः पक्षिविशेषो भाषायां “टीटोडी” इति प्रसिद्धम् । ३ शुकः ।

मुक्ताविद्रुमदामौघांश्चामरांश्चावलंबितान् । संक्रांतांस्तत्र सोऽपश्यन्मायाकारकृतानिव ॥ १३६ ॥
सुवेषरुपा रत्नालंकारभांडभृतोऽभितः । शालभंजीरिव स्तंभलग्नाश्चेटीर्ददर्श च ॥ १३७ ॥
प्राप्तः कक्षातरं षष्ठं सोऽद्राक्षीत्पद्मकुट्टिमम् । दिव्यं सरोवरमिव सर्वतः पद्ममंडितम् ॥ १३८ ॥
दिव्यांगरागपूर्णानि मणिपात्राणि चाग्रतः । अपश्यत्तत्र वार्ष्णेयो दैवतान्यंशुकानि च ॥ १३९ ॥
[1]कृमिरागांशुकभृतां सुदृशां तत्र वृष्णिसूः । मूर्तानामिव संध्यानां वृंदं दृग्विषयं व्यधात् ॥ १४० ॥
कक्षांतरे सप्तमे च शौरिः कुट्टिममैक्षत । [2]लोहिताक्षमयस्तंभं कर्केतनमणीमयम् ॥ १४१ ॥
तत्रापश्यत् कल्पवृक्षान् कुसुमाभरणानि च । पानीयपूर्णकलश[3]करकाणां च धोरणीः ॥ १४२ ॥
कलाविदः सर्वदेशभाषादक्षाः सुलोचनाः । कुंडलालीढगंडाश्च सोऽद्राक्षीद्वेत्रधारिणीः ॥ १४३ ॥
सोऽचिंतयच्च कस्यापि नावकाशोऽत्र वेश्मनि । एताभिर्वेत्रधारीभिर्नीरंध्रं परिवारिते ॥ १४४ ॥
एवं चिंतयतः शौरेर्लीलाकनकपद्मभृत् । [4]पक्षद्वाराध्वना दिव्यवेषैका दास्युपाययौ ॥ १४५ ॥
अप्रच्छन् वेत्रधारिण्यस्तास्तामेवं ससंभ्रमाः । स्वामिनी कनकवती क्व तिष्ठति करोति किम् ॥ १४६ ॥
साप्याख्यत् प्रमदवनप्रासादे दिव्यवेषभृत् । देवताकृतसांनिध्या स्वामिन्येकैव तिष्ठति ॥ १४७ ॥
वसुदेवोऽपि तच्छ्रुत्वा तां ज्ञात्वा तत्र तस्थुषीम् । पक्षद्वाराध्वना दासी कथितेन विनिर्ययौ ॥ १४८ ॥



१ कृमिरागो भाषायां "कीरमजरंगः" २ रक्तमणिमयस्तंभम् । ३ करकं कमंडलूः । ४ पक्षद्वारा पार्श्वद्वारेण । * पुरतः ।

प्राप्तश्च प्रमदवने प्रासादं सप्तभूमिकम् । तुंगं प्राकारमद्राक्षीत्तं शनैरारुरोह च ॥ १४९ ॥
दिव्यालंकारनेपथ्यधरां कल्पलतामिव । सर्वर्तुपुष्पाभरणां साक्षादिव वनश्रियम् ॥ १५० ॥
आजन्म[1]सृष्टिसर्वस्वमिव रुपश्रिया विधेः । भद्रासनस्थितामेकामपि सानुचरामिव ॥ १५१ ॥
पट्टालिखितपुंरूपं पश्यंतीं तन्मयीमिव । अद्राक्षीत् कनकवतीमुपसर्पन् यदूद्वहः ॥ १५२ ॥
॥ त्रिभिर्विशेषकम् ॥

कनकवती–
स्वयंवरः ।

दशार्हं कनकवती पट्टरुपमिवापरम् । दृष्ट्वेष्टागमनज्ञाना[2]द्व्यकसत् प्रातरब्जवत् ॥ १५३ ॥
सा दृष्टवा यादवं चित्रं चित्रं दृष्ट्वा च यादवम् । ददर्श श्रांतमश्रांतनेत्रा हर्षोच्छ्वसत्तनुः ॥ १५४ ॥
दशार्हमर्चमाना सा नेत्रैरिंदीवरै*रिव । भद्रासनाद्द्रागुदस्थात् कृतांजलिरुवाच च ॥ १५५ ॥
त्वमाकृष्टोऽसि मे पुण्यैस्तव दास्यस्मि सुंदर । इत्युक्त्वा वसुदेवस्य सा नंतुमुपचक्रमे ॥ १५६ ॥
दशार्हः प्रणमंतीं तां प्रतिषिध्यैवमब्रवीत् । भृत्योऽस्मि मा प्रणंसीस्तवं स्वामिन्यसि महाशये ॥ १५७ ॥
यो हि स्यादनुरुपस्ते तं प्रणंतुं त्वमर्हसि । अविज्ञातकुले भृत्ये मा मय्यनुचितं कृथाः ॥ १५८ ॥
सोवाच सर्व ज्ञातं ते त्वमेवासि पतिर्मम । यस्त्वं देवतयाख्यातो ध्यातश्चित्रगतश्च यः ॥ १५९ ॥
वसुदेवोऽवदद्भद्रे नाहमस्मि पतिस्तव । यस्ते दे[3]वतया ख्यातः पतिस्तस्यास्मि किंकर ॥ १६० ॥

१ जन्मत आरभ्य कृता या सृष्टिस्तस्याः सर्वस्वम् । २ कस गतौ ह्यस्तनीरुपम् । ३ पूर्वश्लोके "देवेन कथितः" इत्यर्थः कनकवत्या प्रदर्शितः अत्र तु तद्वचनस्यैव देवत्वेन प्रसिद्धः" इत्यर्थो वसुदेवेन कृत इति तात्पर्यान्न विरोधः । * नीलकमलैः ।

श्रूयतां च स ते भर्ता शक्रस्योत्तरदिक्पतिः । स्वःस्त्रीमुखाब्जभसलो[1] धनदो विश्वविश्रुतः ॥ १६१ ॥
तस्यास्मि किंकरो दूतो याचेऽहं त्वां तदाज्ञया । भवाग्रमहिषी तस्य सेव्यमानामरीजनैः ॥ १६२ ॥
साब्रवीद्धनदनामग्राहं कृतनमस्कृतिः । शक्रसामानिकः क्वायं क्वाहं मानुषकीटिका ॥ १६३ ॥
दूत्यं यन्मय्यनुचितं क्रीडामात्रं हि तस्य तत् । मानुषीणां सुरैर्जातु भूतपूर्वो न संगमः ॥ १६४ ॥
वसुदेवोऽवदद्भद्रे देवतादेशमन्यथा । कुर्वाणा दवदंतीव त्वमनर्थमवाप्स्यसि ॥ १६५ ॥
ऊचे कनकवत्येवं धनदेत्यक्षरैः श्रुतैः । मम प्राग्जन्मसंबंधात्कुतोऽप्युत्कंठते मनः ॥ १६६ ॥
दुर्गन्धस्य शरीरस्यौदारिकस्य सुधौदनाः[2] । नेशते गंधमपि हि सोढुमित्यर्हतां वचः ॥ १६७ ॥

कनकवती–
स्वयंवरः ।

तद्दूत्यच्छद्मना च्छन्नस्त्वमेव हि पतिर्मम । गत्वा चाख्याहि मद्वाचं देवस्योत्तरदिक्पतेः ॥ १६८ ॥
त्वद्दर्शनेऽपि नार्हामि मानुषीमात्रमस्म्यहम् । पूज्योऽसि प्रतिमां कृत्वा सप्तधातुतनोर्मम ॥ १६९ ॥
अदृश्यमानः केनापि ततश्च यदुपुंगवः । पथा यथागतेनैव ययौ धनदसंनिधौ ॥ १७० ॥
यावदाख्यातुमारेभे तं वृत्तांतं यदूद्वहः । तावत् प्रोवाच धनदः सर्वं विदितमेव मे ॥ १७१ ॥
पुरः सामानिकानां च धनदः प्रशशंस तम् । महापुंसोऽस्य काप्येषा निर्विकारचरित्रता ॥ १७२ ॥
इति प्रशंसन् धनदो नाम्ना सुरपतिप्रियम्[3] । देवदूष्यांशुकयुगं दिव्यगंधाधिवासितम् ॥ १७३ ॥



१ भसलः सूर्यः । २ अमृतभोजना देवा इति यावत् । ३ एतदादीनि नामानि सार्थकान्येव ।

कनकवती–
स्वयंवरः ।

सूरप्रभं शिरोरत्नं दकगर्भे[1] च कुंडले । हारं शशिमयूखं च केयूरे ललितप्रभे ॥ १७४ ॥
नक्षत्रमालिकां चार्धशारदामभिधानतः । सुदर्शनौ च कटकौ विचित्रमणिमंडितौ ॥ १७५ ॥
विचित्ररत्नं च कटिसूत्रकं स्मरदारुणम् । दैवतानि च माल्यानि दैवतं च विलेपनम् ॥ १७६ ॥
तदैव वसुदेवाय प्रददौ परितोषभाक् । तदंगलग्नं कृत्वा च सोऽप्यभूद्धनदोपमः ॥ १७७ ॥
वसुदेवं तथा दृष्ट्वा धनदेनापि सत्कृतम् । श्यालादयः सहायाताः सर्वे मुमुदिरेतराम् ॥ १७८ ॥
हरिश्चंद्रोऽपि हि तदा तत्रागत्य सकौतुकः । प्रणम्य धनदं बद्धांजलिरेवं व्यजिज्ञपत् ॥ १७९ ॥
भवद्भिर्भारतं वर्षमद्य दैवान्वगृह्यत । स्वयंवरदिदृक्षूणां यद्युष्माकमिहागमः ॥ १८० ॥
इत्युक्त्वा सज्जयामास स स्वयंवरमंडपम् । मंचांश्च कारयामास विविधासनबंधुरान् ॥ १८१ ॥
विमानच्छायया पृथ्व्याः संतापमपसारयन् । उद्दंडपुंडरीका*लिदर्शितेन्दुपरंपरः ॥ १८२ ॥
वीज्यमानः सुरवधूपाणिपल्लवलालितैः । विद्युदुत्क्षिप्तकरणनर्तकैरिव चामरैः ॥ १८३ ॥
[2]वालिखिल्यैरिव रविस्स्तूयमानश्च बंदिभिः । ततः स्वयंवरं द्रष्टुं प्रचचालोत्तरापतिः ॥ १८४ ॥
॥ त्रिभिर्विशेषकम् ॥
श्वेतदिव्यांशुकोल्लोचं ज्योत्स्नालिप्तमिवांबरम् । स्मरसज्जीकृतधनुःसंनिभाबद्धतोरणम् ॥ १८५ ॥

१ जलगर्भे । २ वालिखिल्याऋषयस्तैः । * छत्रम् ।

कनकवती-स्वयंवरः ।

रत्नादर्शांकितं विष्वगनेकार्कैरिवाश्रितम् । रत्नमय्याष्टमंगल्या शोभितद्वारभूमिकम् ॥ १८६ ॥
खे वलाकाभ्रमकरैः शोभितं शुभ्रकेतुभिः । नानारत्नमयोर्वीकं सुधर्माया इवानुजम् ॥ १८७ ॥
वराणां दृग्विनोदाय प्रक्रांतप्रेक्षणीयकम् । प्रविवेशोत्तराधीशस्तं स्वयंवरमंडपम् ॥ १८८ ॥
॥ चतुर्भिः कलापकम् ॥

तत्रैकस्मिन्नुच्चमंचे धनदो हंसवाहनः । स्वस्थे सिंहासने स्वःस्त्रीजनावृत उपाविशत् ॥ १८९ ॥
अदूरे धनदस्याथ तस्यैव युवराडिव । वसुदेवो निषसाद प्रसादसुभगाननः ॥ १९० ॥
क्रमेणान्येऽपि मंचेषु राजानः परमर्द्धयः । विद्याधराश्च न्यषदन् स्पर्धमाना इव श्रिया ॥ १९१ ॥
धनदो निजनामांकामर्जुनस्वर्णनिर्मिताम् । ऊर्मिकामार्पयच्छौरेः स न्यधात् कनिष्ठांगुलौ ॥ १९२ ॥
ऊर्मिकायाः प्रभावेण तदैव यदुनंदनम् । कुबेरमूर्तिमद्राक्षीत्तत्रस्थः सकलो जनः ॥ १९३ ॥
अहो कुबेरो भगवान्मूर्तिद्वयभृदागतः । प्रघोषाद्वैतमित्युच्चैः स्वयंवरसदामभूत् ॥ १९४ ॥
सदशश्वेतवसना ज्योत्स्नाक्तेव[1] विभावरी । मुक्ताताडंक[+]रुचिरा सद्वींदुरिव[2] मेरुभूः ॥ १९५ ॥
अलक्तरसरक्तोष्ठी पक्वबिंबेव बिंबिका[3] । हारभूषितवक्षोजाद्रिभूरिव सनिर्झरा ॥ १९६ ॥
बिभ्रती स्मरदोलाभं पाणिभ्यां पुष्पदाम च । तदा कनकवत्यागात्तत्र हंसीव मंथरम् ॥ १९७ ॥
॥ त्रिभिर्विशेषकम् ॥

---

१ ज्योत्स्नासहिता । २ इन्दुद्वयसहिता । ३ बिंबलता । * इन्द्रसभायाः । + तालपत्राकारम् कर्णाभूषणम् । • जतु । भाषायाम् 'लाख'

तया च तत्रागतया स स्वयंवरमंडपः । मंगल्यया दीपिकया गृहगर्भ इवाबभौ ॥ १९८ ॥
दृशा संभावयामास वुवूर्षूनखिलांश्च सा । कैरवाणीन्दुलेखेव भासा शौंडीर्यसारया ॥ १९९ ॥
चित्रदृष्टं वसुदेवं दूत्यदृष्टं च तत्र तम् । अपश्यंती विषादात्मा मम्लौ सायमिवाब्जिनी ॥ २०० ॥
सपांशुक्रीडिकाहस्तन्यस्तभाराथ सा चिरम् । निःस्पंदा शालभंजीव तस्थावस्वास्थ्यमीयुषी ॥ २०१ ॥
तस्यां कमप्यवृण्वत्यां राजानः स्वं व्यलोकयन् । किं रुपवेषचेष्टादिदोषोऽस्मास्विति शंकया ॥ २०२ ॥
सख्यूचे कनकवतीं किमद्यापि विलंबसे । स्वयंवरस्रक् कस्यापि न्यस्यतां कंठकंदले ॥ २०३ ॥

कनकवती–
स्वयंवरः ।

हरिश्चंद्रसुतोवाच रुच्यो हि व्रियते वरः । यश्च मे रोचते मंदभाग्या पश्यामि तं न हि ॥ २०४ ॥
दध्यौ च क उपायो मे का गतिश्च भविष्यति । इष्टं वरं न पश्यामि भव रे हृदय द्विधा ॥ २०५ ॥
इत्थं चिंतातुरा प्रेक्ष्य धनदं प्रणिपत्य च । सा दीना रुदती बद्धांजलिरेवं व्यजिज्ञपत् ॥ २०६ ॥
देव प्राग्जन्मपत्नीति [1]नर्मेत्थं मा कृथा मयि । मया वुवूर्षितो भर्ता त्वया चक्रे तिरोहितः ॥ २०७ ॥
स्मित्वोचे धनदः शौरिं महाभाग मयार्पिताम् । मुद्रां कुबेरकांताख्यामिमां हस्तादपाकुरु ॥ २०८ ॥
शौरिस्तामूर्मिकां हस्तादुत्तार्य धनदाज्ञया । स्वमूर्तिभागभूद्भूयो नाट्याभिनयपात्रवत् ॥ २०९ ॥
सा दशार्हं स्वमूर्तिस्थमुपलक्ष्य [2]वलक्षदृक् । बहिर्भूतप्रमोदेव बभूव पुलकांकिता ॥ २१० ॥

१ हास्यम् । २ श्वेतदृष्टिः । * सामर्थ्यम् ।

उपसृत्य च तत्कंठे रणज्झणितनूपुरा । स्वयंवरस्रजं न्यास्थन्निजां भुजलतामिव ॥ २११ ॥
दिवि दुंदुभयो नेदुस्तदा च धनदाज्ञया । मंगल्यकं चोन्मनसोऽप्सरसः सरसं जगुः ॥ २१२ ॥
अहो धन्यो हरिश्चंद्रो वव्रे यस्य सुता वरम् । जगत्प्रधानमित्युच्चैर्विषूची[1] वागभूत्तदा ॥ २१३ ॥
देवता धनदादिष्टा वसुधारां निरंतराम् । सद्यो ववृषुराचारलाजानिव कुलांगनाः ॥ २१४ ॥
वसुदेवस्य कनकवत्याश्चोपयमोत्सवः[2] । तदा बभूव तन्वानो हर्षस्यैकातपत्रताम् ॥ २१५ ॥
अथ विज्ञापयामास श्रीदं नत्वा यदूद्वहः । किमायाता यूयमत्रेत्यस्मि ज्ञातुं कुतूहली ॥ २१६ ॥
श्रीदः प्रोचे सहर्षस्तं शौरिमाबद्धकंकणम् । कुमार श्रूयतामत्र ममागमनकारणम् ॥ २१७ ॥

कनकवत्या वसुदेवस्य वरणम् ।

अस्यैव जंबूद्वीपस्य क्षेत्रे भरतनामनि । संगरं नाम नगरमस्त्यष्टापदसंनिधौ ॥ २१८ ॥
तत्राभूनम्मणो* राजा तस्य वीरमती प्रिया । सभार्यः सोऽन्यदाचालीत् पापर्द्धर्यै[3] नगराद्बहिः ॥ २१९ ॥
सार्थेन सममायातमेकं मलमलीमसम्+ । क्षमाश्रमणमद्राक्षीद्रक्षःक्षुद्राशयोऽथ[4] सः ॥ २२० ॥
असावशकुनं मेऽभून्मृगयोत्सवविघ्नकृत् । इति सोऽधारयत् साधुं सार्थाद्यूथादिव द्विपम् ॥ २२१ ॥
भूयो राजकुले गत्वा सकलत्रोऽपि भूपतिः । सोऽस्थाद्द्वादश घटिकास्तमृषिं विप्रलापयन् ॥ २२२ ॥
ताभ्यां जातानुकंपाभ्यां दंपतिभ्यां ततो मुनिः । अपृच्छि कुत आयासीः क्व वा गच्छसि कथ्यताम् ॥ २२३ ॥

---

१ सूचका । २ विवाहोत्सवः । ३ मृगयायै । ४ राक्षसवद्दुष्टाशयः । * लोके 'ममरा' + मलेन मलिनम् ।

मुनिर्बभाषे चलितो रोहीतकपुरादहम् । अष्टापदार्हद्बिंबबानि सार्थेन सह वंदितुम् ॥ २२४ ॥
भवद्भ्यां च महामानौ[1] सार्थादस्मि वियोजितः । नाष्टापदमगां धर्मकर्म बह्वंतरायकम् ॥ २२५ ॥
दंपती लघुकर्मत्वाद्वार्तयंतौ तु तं मुनिम् । तौ विसस्मरतुः कोपं दुःस्वप्नमिव मंक्ष्वपि ॥ २२६ ॥
तावार्द्रहृदयौ ज्ञात्वा परोपकृतिधीमुनिः । तयोराख्यज्जीवदयाप्रधानं धर्ममार्हतम् ॥ २२७ ॥
अविद्धकर्णौ तौ धर्माक्षरै[2]राजन्म दंपती । किंचिद्धर्माभिमुखतां ततः प्रभृति जग्मतुः ॥ २२८ ॥
प्रत्यलाभयतां भक्त्या भक्तपानादिना च तम् । प्रियातिथिमिवाभ्यर्णमवातिष्ठयतां च तौ ॥ २२९ ॥
किं तु राजसं[3]भावेन विनिवार्यापरं जनम् । चक्रतुस्तौ स्वयमेव तस्यर्षेः प्रतिलाभनम् ॥ २३० ॥
धर्मज्ञानौषधं दत्वा कर्मरोगार्तयोस्तयोः । मुनिः सोऽष्टापदं प्राप ताभ्यामनुमतश्चिरात् ॥ २३१ ॥
तौ चिरं व्रतिसंसर्गात् प्रपद्य श्रावकव्रतम् । पालयामासतुर्यत्नाद्द्रविणं कृपणाविव ॥ २३२ ॥
वीरमत्यन्यदा धर्मस्थिरीकरणहेतवे । निन्ये शासनदेव्याष्टापदे धर्मजुषां न किम् ॥ २३३ ॥
आर्हतीः प्रतिमास्तत्र पूज्यमानाः सुरासुरैः । दृष्ट्वा सा प्रापदानंदं मुक्तेवात्रापि जन्मनि ॥ २३४ ॥
चतुर्विंशतिमप्यर्हद्बिंबबान्यष्टापदाचले । वंदित्वा पुनरप्यागात् स्वपुरं खेचरीव सा ॥ २३५ ॥
जिनं जिनं प्रत्यकार्षीत्सा चाचाम्लानि विंशतिम् । तीर्थावलोकनाद्धर्मे दधाना स्थेयसीं[4] धियम् ॥ २३६ ॥

---

१ हे महामानौ । २ धर्मज्ञानाक्षरैरविद्धौ कर्णौ ययोस्तौ । ३ रजोगुणत्वेन । ४ स्थिरतराम् ।

नलदमयंती
पूर्वभव-
चरिते धन्य
धूसरीभवः ।

उपरिन्यस्तरत्नानि सुवर्णतिलकानि सा । चतुर्विंशतिमर्हद्भ्यः कारयामास भक्तिभाक् ॥ २३७ ॥
अन्येद्युः सपरीवारा गत्वाष्टापदमूर्द्धनि । सा स्नात्रपूर्वमानर्च चतुर्विंशतिमर्हताम् ॥ २३८ ॥
तासामर्हत्प्रतिमानां ललाटेषु न्यधत्त च । श्री[1]वल्लेः कुसुमानीव हैमानि तिलकानि सा ॥ २३९ ॥
चारणश्रमणादीनां तीर्थे तस्मिन्नुपेयुषाम् । दत्वा दानं यथार्हं सा तपस्तदुदपादयत् ॥ २४० ॥
ततश्च कृतकृत्येव प्रनृत्यंतीव चेतसा । सा धीमती वीरमती पुनरागात् स्वपत्तनम् ॥ २४१ ॥
पृथक्छरीरौ तावेकमनसाविव दंपती । धर्मकर्मोद्यतौ कालं कियंतमपि निन्यतुः ॥ २४२ ॥
समाधिमरणं प्राप्य पूर्णकाले विवेकिनौ । देवलोके तावभूतां देवो देवी च दंपती ॥ २४३ ॥
च्युत्वा मम्मणजीवोऽथ जंबूद्वीपेऽत्र भारते । बहलीनाम्नि विषये नगरे पोतनाह्वये ॥ २४४ ॥
धम्मिलासस्याभी*रस्य रेणुकोदरसंभवः । धन्यो नामाभवत् पुत्रः पात्रं पुण्यस्य भूयसः ॥ २४५ ॥
॥ युग्मम् ॥
स तु वीरमतीजीवः प्रच्युत्य त्रिदशालयात् । धूसरी नामधेयेन धन्यस्यैव गृहिण्यभूत् ॥ २४६ ॥
महिषीश्चारयामास धन्योऽरण्येऽनुवासरम् । महिषीचारणं ह्याद्यमाभीराणां कुलव्रतम् ॥ २४७ ॥
[2]दुर्दशैर्दर्शयन् [3]दर्शयामिनीरिव +दुर्दिनैः । यंत्रधारागृहीभूतं व्योम प्रोद्दामवृष्टिभिः ॥ २४८ ॥

१ श्रीर्लक्ष्मीरेव वल्लिस्तस्याः । २ दुष्टा दशा येषां तैरिव । ३ आमावास्यारात्रीः । * गोपालस्य । + मेघयुक्तदिनैः ।

निनदद्दर्दुरातोद्य इवोद्यद्दर्दुरारवैः । कुर्वन्नुर्वीं च हरितैः केशपाशवतीमिव ॥ २४९ ॥
वृष्टिसृष्टोरुसेवालपिच्छलीभूतभूतलः । संचरत्पांथचरणचीत्कार्याजानुकर्दमः ॥ २५० ॥
कुर्वन् द्यां विद्युदावर्तैरुलूकावर्तिनीमिव । वर्षारात्रः प्रववृतेऽन्यदा वैरी प्रवासिनाम् ॥ २५१ ॥
॥ चतुर्भिः कलापकम् ॥
महिषीः पंकसंपर्कहर्षकेंकारकारिणीः । धन्यश्चारयितुमगात् प्रवर्षत्यपि वारिदे ॥ २५२ ॥
बिभ्राणः छत्रकं मूर्ध्नि महद्वारिनिवारणम् । पर्याटीदटवीं धन्योऽनुव्रजन्महिषीव्रजम् ॥ २५३ ॥
तस्थिवांसं प्रतिमया पादेनैकेन निश्चलम् । उपवासकृशं वृष्टिसहमारण्यकेभवत् ॥ २५४ ॥
शीतार्त्या कंपमानांगं वातांदोलितवृक्षवत् । क्षमाश्रमणमद्राक्षीदेकं धन्यः परिभ्रमन् ॥ २५५ ॥
॥ युग्मम् ॥
तथा परीषहसहं तं दृष्टवा मुनिपुंगवम् । जातानुकंपः स्वं छत्रं स तन्मूर्धन्यधारयत् ॥ २५६ ॥
धृतातपत्रो धन्येनानन्यसामान्यभक्तितः । प्रभ्रष्टवृष्टिकष्टोऽभूदृषिः स वसताविव ॥ २५७ ॥
मद्यपानाद्दुर्मदीव वृष्टेर्न व्यरमद्घनः । न तु निर्विविदे धन्यस्तथापि च्छत्रधारणात् ॥ २५८ ॥
क्रमयोगेन वृष्टेश्च विरराम घनाघनः । यावद्वृष्टिकृतध्यानाभिग्रहाच्च महामुनिः ॥ २५९ ॥

नलदमयंती पूर्वभव-चरिते धन्य धूसरीभवः ।

---

१ शब्दं कुर्वद्दर्दुरं नामातोद्यं यस्मिन्सः । २ भेकशब्दैः । ३ पिच्छलीभूतं पंकिलीभूतम् । ४ उल्कापातवर्तिनीम् । ५ अरण्यगजवत् ।

नलदमयंती
पूर्वभव–
चरिते
धन्यधूसर्योः
सम्यक्त्वाप्तिः ।

तत्कालं महिषीपालस्तं प्रणम्य मुनीश्वरम् । पादसंवाहनापूर्वमित्युवाच कृतांजलिः ॥ २६० ॥
महर्षे विषमः कालः पंकेनातंकदा[1] मही । तदद्य कुत आयासीरायासमविदन्निव ॥ २६१ ॥
महर्षिरपि तस्याख्यत् पांडुदेशादिहागमम् । यास्यामि लंकानगरीं गुरुपादपवित्रिताम् ॥ २६२ ॥
गच्छतश्चाब्दकालोऽयमंतरायोऽन्तराभवत् । धाराधरोऽखंडधारं वर्षितुं च प्रचक्रमे ॥ २६३ ॥
वर्षत्यब्दे च गमनं महर्षीणां न युज्यते । वृष्ट्यंताभिग्रहं कृत्वा ततोऽत्रैव स्थितोऽस्म्यहम् ॥ २६४ ॥
विरतायामद्य वृष्टौ महात्मन् सप्तमेऽहनि । संपूर्णाभिग्रहो यामि वसतौ क्वापि संप्रति ॥ २६५ ॥
धन्योऽप्युवाच हर्षेण महर्षे महिषं मम । प्राप्ययानमिवारोह पंकदुःसंचरा हि भूः ॥ २६६ ॥
स मुनिः स्माह जीवेषु नारोहंति महर्षयः । परपीडाकरं कर्म ह्याचरंति न जातु ते ॥ २६७ ॥
पादचंक्रमणा एव महर्षय इति ब्रुवन् । स मुनिस्तेन सहितः प्रययावुपपत्तनम् ॥ २६८ ॥
महर्षिं स्माह महिषीपालो नत्वा कृतांजलिः । दोह्म्यहं महिषीर्यावत्तावदत्र प्रतीक्ष्यताम् ॥ २६९ ॥
इत्युक्त्वा स्वगृहं गत्वा दुग्ध्वा च महिषीर्द्रुतम् । आदायैकं दुग्धकुंभमभ्यगात्तं महामुनिम् ॥ २७० ॥
धन्योऽतिधन्यमात्मानं मन्यमानः प्रमोदभाक् । तं मुनिं कारयामास पारणं पुण्यकारणम् ॥ २७१ ॥
वर्षारात्रमतिक्रम्य पोतने स तपोधनः । जगाम रुचितं स्थानमीर्याशुद्ध्युचितेऽध्वनि ॥ २७२ ॥

१ दुःखदा ।

धन्योऽपि सह धूसर्या सुचिरं श्रावकव्रतम् । अपालयद्दृषल्लेखास्थिरं[1] सम्यक्त्वमुद्वहन् ॥ २७३ ॥
तौ धन्यौ धूसरीधन्यौ काले जगृहतुर्व्रतम् । पालयित्वा च सप्ताब्दीं विपेदाते समाहितौ ॥ २७४ ॥
पात्रे पीयूषदानेनार्जितपुण्यावुभौ[2] च तौ । जातौ हैमवते युग्मधर्मौ लेश्याविशेषतः ॥ २७५ ॥
अनार्तरौद्रध्यानौ तावपि मृत्वोदपद्यताम् ।[3] क्षीरडिंडीरनामानौ देवौ दांपत्यशालिनौ ॥ २७६ ॥
देवश्च्युत्वेह भरते विषये कोशलामिधे । नगर्यां कोशलाख्यायामिक्ष्वाकुकुलजन्मनः ॥ २७७ ॥
निषधस्यावनिपतेः सुंदरोदरसंभवः । नलो नामाभवत् पुत्रः कूबरस्तस्य चानुजः ॥ २७८ ॥
॥ युग्मम् ॥

नलजन्म ।

इतश्चास्ति विदर्भेषु नगरं कुंडिनाह्वयम् । तत्र चाभून्नृपो भीमरथो भीमपराक्रमः ॥ २७९ ॥
तस्याभूत् पुष्पदंतीति जाया मायाविवर्जिता । तर्जितस्वर्वधूरुपा परया रुपसंपदा ॥ २८० ॥
अर्थधर्माविरोधेन काममप्यनुपालयन् । निर्विघ्नं बुभुजे भोगांस्तया सह महीपतिः ॥ २८१ ॥
एकदा क्षीरडिंडीरा प्रच्युत्य त्रिदशालयात् । तस्याः कुक्षाववातारीत् सुतात्वेन शुभे क्षणे ॥ २८२ ॥
तदा च सुखसुप्ता सा शयनीये मनोरमे । निशावसाने सुस्वप्नं दृष्ट्वा राज्ञे व्यजिज्ञपत् ॥ २८३ ॥
स्वामिञ्जानाम्यहं सुप्ता श्वेतहस्ती तवौकसि । दवाग्निप्रेरितोऽविक्षत् साक्षादिव यशश्चयः ॥ २८४ ॥



१ पाषाणरेखावत् स्थिरम् । २ दुग्धदानेन । ३ क्षीरडिंडिरश्च क्षीरडिंडीरा च क्षीरडिंडीरावित्येकशेषः ।

दवदंती-
(दमयंती)
जन्म ।

राजापि व्याजहारैवं सर्वशास्त्राब्धिपारगः । कोऽपि पुण्याधिको गर्भः संभूतोऽद्य तवोदरे ॥ २८५ ॥
यावदेवं वार्तयंतौ राजा राज्ञी च तस्थतुः । तावदागात् स शुभ्रेभो भ्रमुप्रिय[1] इव च्युतः ॥ २८६ ॥
नृपं सकलत्रमपि निजस्कंधे स सिंधुरः । क्षणादारोपयामास तत्पुण्यप्रेरितो हि सः ॥ २८७ ॥
पुष्पदामक्षेपपूर्वं पूज्यमानः स नागरैः । भ्रांत्वा पुरे पुनः सौधमेत्य तावुदतारयत् ॥ २८८ ॥
स्वयं चालीयतालाने स सिंधुरधुरंधरः । ववृषुश्चाथ पुष्पाणि रत्नानि च दिवौकसः ॥ २८९ ॥
सुगंधिभिर्यक्षपंकैः सर्वांगमनुलिप्य तम् । अर्चित्वा चोत्तमैः पुष्पै राजा नीराजनां[*] व्यधात् ॥ २९० ॥
पूर्णकाले व्यतीपातादिदोषादूषितेऽह्न्यथ । कादंबिनीव[2] तडितं राज्ञी कन्यामजीजनत् ॥ २९१ ॥
सब्रह्मचारी तरणेस्तस्याश्च[3] तिलकोऽलिके[4] । सहजोऽभून्महापुंसः श्रीवत्स इव वक्षसि ॥ २९२ ॥
सा स्वयं भास्वती तेन तिलकेन विशेषतः । उपरि न्यस्तरत्नेनोर्मिका हैमीव दिद्युते ॥ २९३ ॥
तज्जन्मनः प्रभावेण भीमो निःसीमविक्रमः । बभूव भूभुजां मूर्ध्ना धार्यमाणोऽग्रशासनः ॥ २९४ ॥
तस्यामुदरवर्तिन्यां राज्ञी स्वप्ने यदैक्षत । दवाग्निभीतमायांतं दंतींद्रमिति निर्ममे ॥ २९५ ॥
संपूर्णे मासि दुहितुस्तस्याः कुंडिनभूपतिः । दववदंतीत्यभिधानं[5] निधानं हर्षसंपदः ॥ २९६ ॥
॥ युग्मम् ॥

---

१ ऐरावतः । २ कादंबिनी मेघमाला । ३ सूर्यस्य । ४ भाले । ५ दमयंतीतिनाम्ना प्रसिद्धा । * लोके 'आरती'

सुगंधिमुखनिश्वासभ्रमद्भ्रमरधोरणिः । दिने दिने वर्धमाना साभवद्रिंखणक्षमा[1] ॥ २९७ ॥
अपि मातृसपत्नीनां सा सौम्यमुखपंकजा । करात्करं संचचार पुष्पात्पुष्पमिवालिनी ॥ २९८ ॥
अंगुष्ठमध्यमास्फोटधृततालाः पदेपदे । तां धात्र्योऽरमयन् वक्त्रतिमिला[2]वाद्यवादनैः ॥ २९९ ॥
रणज्झणिति कुर्वद्भ्यां नूपुराभ्यां पुरस्कृता । क्रमेण कर्तुमारेभे पादचंक्रमणं च सा ॥ ३०० ॥
रेमे रमेव सा मूर्ता भूषयंती गृहांगणम् । तत्प्रभावाद्धि निधयः प्रत्यक्षाः क्ष्माभुजोऽभवन् ॥ ३०१ ॥
संप्राप्ते चाष्टमे वर्षे तां कन्यामार्पयन्नृपः । कलाचार्यस्य वर्यस्य कलाग्रहणहेतवे ॥ ३०२ ॥
साक्षिमात्रमुपाध्यायोऽभवत्तस्याः सुमेधसः । कलाः संचक्रमुस्तस्यां ह्यादर्शे प्रतिबिंबवत् ॥ ३०३ ॥
साभूदधीतिनी[3] कर्मप्रकृत्यादिषु धीमती । तस्याः पुरश्च स्याद्वादाक्षेपकः कोऽपि नाभवत् ॥ ३०४ ॥
कन्यां कलाकलापांबुराशेस्तां पारदृश्वरीम् । वागीश्वरीमिव पितुः पार्श्वे गुरुरथानयत् ॥ ३०५ ॥
सा गुरोराज्ञया सर्वं कलाकौशलमात्मनः । सम्यक् प्रदर्शयामास गुणारामैकसारणिः ॥ ३०६ ॥
तथा श्रुतार्थप्रावीण्यं प्रकट्यकृत सा पितुः । यथा सोऽप्यभवत्सम्यग्दर्शनाढ्यनिदर्शनम् ॥ ३०७ ॥
सहस्राधिकलक्षेण दीनाराणां नरेश्वरः । कलाचार्यं स्वदुहितुः पूजयित्वा विसृष्टवान् ॥ ३०८ ॥
दवदंत्याश्च पुण्यातिशयान्निर्वृतिदेवता[4] । साक्षाद्भूयार्हत्प्रतिमामर्पयामास कांचनीम् ॥ ३०९ ॥

दवदंत्या यौवनम् कामाग्रहणं च ।

१ चलनयोग्या । २ वक्त्रतिमिला नाम वाद्यं तस्य वादनैः । ३ अधीतमनयेति अधीतिनी । ४ शासनदेवता ।

देव्युवाच च हे वत्से प्रतिमा भाविनोऽर्हतः । एषा श्रीशांतिनाथस्य पूजनीया त्वयानिशम् ॥ ३१० ॥
इत्युक्त्वांतर्दधे देवी प्रतिमां दवदंत्यपि । निनायोत्फुल्लनयना वंदित्वा निजवेश्मनि ॥ ३११ ॥
रममाणा वयस्याभिः सुदंती दवदंत्यथ । यौवनं पावनं प्राप [1]प्रपां लावण्यवारिणः ॥ ३१२ ॥
राजा राज्ञी च तां दृष्ट्वा कन्यामन्यूनयौवनाम् । तद्विवाहोत्सवं द्रष्टुमभूतामुत्कमानसौ । ३१३ ॥
तस्यास्तत्तद्गुणगणानुरुपवरचिंतया । पितरावत्यदूयेतामंतः शल्यातुराविव ॥ ३१४ ॥
क्रमेण दवदंत्यष्टादशवर्षा बभूव च । न तूपलेभे भूपालस्तद्योग्यं प्रवरं वरम् ॥ ३१५ ॥
स्वयंवरोऽतिप्रौढानामनूढानां हि योषिताम् । युक्त इत्यादिशद्दूतान् राज्ञामाहूतये नृपः ॥ ३१६ ॥
राजानो राजपुत्राश्च युवानः परमर्द्धयः । आययुस्त्वरितं तत्र स्पर्धमाना मिथः श्रिया ॥ ३१७ ॥
दृश्यमानैः क[2]रटिभिरसंख्यैर्भूभुजां तदा । उप[*]त्यकेव विंध्याद्रेः कुंडिनो[+]पांतभूरभूत् ॥ ३१८ ॥
निषधोऽपि हि तत्रागान्नृपतिः कोशलेश्वरः । नलेन कूबरेणापि पुत्राभ्यां सहितस्तदा ॥ ३१९ ॥
सर्वेषां स्वागतं राज्ञामभियानपुरःसरम् । चकार कुंडिनाधीशोऽतिथीनामुचितं ह्यदः ॥ ३२० ॥
भीमोऽथ कारयामास स्वयंवरणमंडपम् । पालकस्य विमानस्यानुजन्मानमिवर्द्धिभिः ॥ ३२१ ॥
मंचांश्च मंडपस्यांतर्वि[3]मानाभानकारयत् । प्रत्येकं स्थापितस्वर्णसिंहासनमनोरमान् ॥ ३२२ ॥

शासन-
देवतया
दवदंत्यै
जिनप्रतिमा
ऽर्पणम् ।
नलदमयंती
पूर्वभव-
चरिते
धन्य
धूसरीभवः ।

१ जलदानस्थानम् 'परब' इति भाषायाम् । २ गजैः । ३ विमानसदृशान् । * भाषायाम् 'तलेटी' । + समीपस्थः ।

दवदंत्या
स्वयंवरः ।

राजानोऽथाययुस्तत्र स्पर्धमाना महर्द्धिभिः । दिव्यालंकारवसनाः शक्रसामानिका इव ॥ ३२३ ॥
सर्वे निषेदुर्मंचेषु विपंचितवपुः[1]श्रियः । नानाविधाभिश्चेष्टाभिः स्पष्टवैदग्ध्यबंधुराः ॥ ३२४ ॥
कृतोत्तरीयपर्यंकश्चलद्दलमनोरमम् । करेण लीलाकमलं लालयामास कश्चन ॥ ३२५ ॥
सुगंधिमल्लिकापुष्पाण्याजघ्रौ कोऽपि भृंगवत् । मन्मथस्य यशोराशिवर्णिकामिव निर्मलाम् ॥ ३२६ ॥
करेणोल्लालयामास कश्चित्कुसुमकंदुकम् । मृगांकमंडलं व्योम्नि स्रष्टुकाम इवापरम् ॥ ३२७ ॥
व्यलिखल्लीलया पाणी पाणिजाग्रैः[2] क्षणे क्षणे । कोऽपि स्वामांसुरीं[3] सांद्रसारंगमदपंकिलाम् ॥ ३२८ ॥
दीप्तांगुलीय[*]मणिना पाणिना दृढमुष्टिना । मुष्टिग्रस्त[4]दंतमुष्टिं छुरीं कश्चिदनीनृतत् ॥ ३२९ ॥
छेकः[5] केतकपत्राणि दारं दारमुदारधीः । जग्रंथ कोऽपि कमलं कमलाकमलोपमम्[6] ॥ ३३० ॥
कश्चिदामलकस्थूलमुक्ताफलविनिर्मितम् । कंठावलंबितं हारं मुहुः पस्पर्श पाणिना ॥ ३३१ ॥
देवतादेवतागारमिव तं वरमंडपम् । भूषयंती दवदंत्यथाययौ पितुराज्ञया ॥ ३३२ ॥
अलंकरणसंदोहैर्मुक्तामणिविनिर्मितैः । अलंकृतांगावयवामुत्फुल्लामिव मल्लिकाम् ॥ ३३३ ॥
प्रसरत्सारणीवारितरंगकुटिलालकाम् । बिभ्राणां तिलकं भाले युवराजं रवेरिव ॥ ३३४ ॥

१ विपंचिता विस्तारिता वपुःश्रीः शरीरशोभा यैस्ते । २ नखाग्रैः । ३ श्मश्रूम् । ४ मुष्टौ ग्रस्तो धारितो दंतमुष्टिर्दंतनिर्मितो मुर्ष्टियस्याच्छुर्यास्ताम् । ५ चतुरः । ६ लक्ष्मीकमलसदृशम् । * उर्मिका, भाषायाम् 'वींटी'

कज्जलश्यामलकचां नीरंध्रकुचमंडलाम् । वस्त्राणि रंभागर्भत्वक्सगर्भाणि च बिभ्रतीम् ॥ ३३५ ॥
स्वच्छश्रीचंदनरसविलिप्तामायतेक्षणाम् । दवदंतीं नृपाः प्रेक्ष्य चक्षुस्तत्रैव चिक्षिपुः ॥ ३३६ ॥
॥ चतुर्भिः कलापकम् ॥

दवदंत्या स्वयंवरः ।

अंतःपुरप्रतीहारी ततश्च नृपशासनात् । तस्याः शंसितुमारेभे नामग्राहं महीपतीन् ॥ ३३७ ॥
शिशुमारपुरायातो जितशत्रुनृपात्मजः । ऋतुपर्णनरेन्द्रोऽयं देवि संभाव्यतां दृशा ॥ ३३८ ॥
इक्ष्वाकुवंशतिलको गुणरत्ननिधानभूः । चंद्रभूश्चंद्रराजोऽयममुकं किं वुवूर्षसि ॥ ३३९ ॥
चंपेशो भोगवंशोऽयं सुबाहुर्धरणेन्द्रभूः । अमुं वृणीष्व जाह्नव्याः सेव्यसे [1]सीकरानिलैः ॥ ३४० ॥
राजा [2]रोहीतकेशोऽयं [3]पावनिश्चंद्रशेखरः । द्वात्रिंशद्ग्रामलक्षाधिपतिस्ते किमु रोचते ॥ ३४१ ॥
क्ष्मापतिः शशलक्ष्मायं जयकेशरिनंदनः । [4]श्रीनंदनसमो मूर्त्या किमाकर्षति ते मनः ॥ ३४२ ॥
जह्नुसूर्यज्ञदेवोऽयमादित्यकुलमंडनः । नृपतिर्भृगुकच्छेशो [5]महेच्छेऽमुं किमिच्छसि ॥ ३४३ ॥
भरतेशकुलोत्तंसो नृपोऽयं मानवर्धनः । विश्वप्रतीतं तदमुं पतिं वृणु पतिंवरे ॥ ३४४ ॥
कुसुमायुधपुत्रोयं नृपतिर्मुकुटेश्वरः । किमस्य रोहिणीवेन्दोः पत्नी भवितुमर्हसि ॥ ३४५ ॥

१ सीकरा जलकणास्तन्मिश्रवायुभिः । २ रोहीतकदेशस्य राजा । ३ पवनपुत्रः । ४ लक्ष्मीपुत्रसमः कामसम इत्यर्थः । ५ महतीच्छा यस्यास्तत्संबुद्धौ ।

कोशलानामधीशोऽयं निषधोऽरिनिषेधकृत् । ऋषभस्वामिकुलजो राजा संविदितोऽस्तु ते ॥ ३४६ ॥
अस्यैव तनयः सोऽयं नलो नाम महाबलः । तवास्त्वभिमतो यद्वा कूबरोऽयं नलानुजः ॥ ३४७ ॥
दवदंत्यपि तत्कालं नलस्य गलकंदले । स्वयंवरस्रजं न्यास्थल्लक्ष्मीरिव मुरद्विषः[1] ॥ ३४८ ॥
अहो सुष्ठु वृतं सुष्ठु वृतमित्यंबरे गिरः । खेचराणां प्रादुरासन् वृते सति तया नले ॥ ३४९ ॥
अथैकं खड्गमाकृष्य धूमकेतुमिवापरम् । कृष्णराजकुमारो द्रागुत्थाय नलमाक्षिपत्[2] ॥ ३५० ॥
स्वयंवरस्रक् क्षिप्तेयं दवदंत्या वृथैव ते । नह्येतां मयि सत्यन्यः कश्चिदुद्वोढुमीश्वरः ॥ ३५१ ॥
तन्मुंच भीमतनयां नो वा भव धृतायुधः । कृष्णराजमनिर्जित्य भविष्यसि कृती कथम् ॥ ३५२ ॥
स्मयमानो नलोऽवादीदरे क्षत्रियपांसन । दवदंत्या वृतो न त्वमिति किं दूयसे मुधा ॥ ३५३ ॥
वृतोऽस्मि दवदंत्याहं तदिमां परयोषितम् । इच्छस्यघम[3]नादृत्य तथापि न भवस्यरे ॥ ३५४ ॥
इति निस्त्रिंशमाकृष्य नर्तयामास पाणिना । नलोऽनल इवासह्यतेजाः क्रोधधुताधरः ॥ ३५५ ॥
नलस्य कृष्णराजस्य चानीकमुभयोरपि । सद्यः संवर्मयामास धृतमर्माविधायुधम्[4] ॥ ३५६ ॥
दध्यौ च दवदंत्येवं धिगहो मन्निबंधनः[5] । उपस्थितोऽयं प्रलयः क्षीणपुण्या किमस्म्यहम् ॥ ३५७ ॥
आर्हती यद्यहं तर्हि मातः शासनदेवते । नलोऽस्तु विजयी क्षेममस्तु चानीकयोर्द्वयोः ॥ ३५८ ॥

दवदंत्या
नलस्य
वरणम् ।

---

१ कृष्णस्य । २ तिरस्कृतवान् । ३ अघं पापम् । ४ धृतं मर्म विध्यतीति मर्माविधायुधं येन तत् । ५ अहं निबंधनं कारणं यस्य सः ।

इत्युक्त्वा वारिभृंगारमुपादाय तदंभसा । चिक्षेपानर्थशांत्यर्थं दवदंती छटात्रयम् ॥ ३५९ ॥
कृष्णराजोऽथ तद्वारिच्छटाच्छोटितमस्तकः । अंगार इव निर्वाणो निस्तेजास्तत्क्षणादभूत् ॥ ३६० ॥
तदा शासनदेव्याश्च प्रभावात् कृष्णभूपतेः । करात् पपात निस्त्रिंशः पक्वपत्रमिव द्रुमात् ॥ ३६१ ॥
हतप्रभावो दध्यौ च कृष्णोऽहिरिव निर्गरः[1] । न सामान्यो नलोऽमुष्मिन्न विमृश्य व्यभाषिषि ॥ ३६२ ॥
तदयं प्रणिपातार्ह इति कृष्णो विचिंतयन् । प्राणमन्नलपादानां प्रेषणायातदूतवत् ॥ ३६३ ॥
उवाच च विनीतः सन् ललाटघटितांजलिः । अविमृश्य कृतं स्वामिन् मूर्खस्यागः[2] सहस्व मे ॥ ३६४ ॥
नलोऽपि कृष्णं संभाव्य व्यसृजत् प्रणिपातिनम् । भीमोऽपि जामातृगुणैर्मेने पुण्यवतीं सुताम् ॥ ३६५ ॥

दवदंत्या नलस्य वरणम् ।

भीमः सत्कृत्य सत्कृत्य नृपानन्यान् विसृज्य च । नलस्य दवदंत्याश्च व्यधादुपयमोत्सवम् ॥ ३६६ ॥
नलस्य विवाहमहे वृत्ते स्वविभवोचितम् । हस्त्यश्वादि ददौ हस्तमोचने भीमभूपतिः ॥ ३६७ ॥
आबद्धकंकणौ गोत्रजरतीगीतमंगलौ[7] । गृहे चैत्यमवंदेतां तौ नवोढौ वधूवरौ ॥ ३६८ ॥
महेन महता भीमनिषधौ वसुधाधवौ । कारयामासतुरथ तयोः कंकणमोचनम् ॥ ३६९ ॥
ततश्च भीमो निषधं सपुत्रमपि भक्तिभाक् । सत्कृत्य व्यसृजत् किंचिदन्वगाच्च स्थितिर्ह्यसौ ॥ ३७० ॥
दवदंतीमनुपतिं यांतीमंबान्वशादिति । देहच्छायेव मा त्याक्षीर्व्यसनेऽपि पतिं सुते ॥ ३७१ ॥



---

१ निर्विषः । २ आगोऽपराधम् । ७ कुलमहत्तराभिः गीतम् मंगलम् ययोः तौ ।

कदंबोऽपि हि सन्नह्य ससैन्यो निर्ययौ बहिः । न सिंहः सहतेऽन्यं हि गुहाद्वारोपसर्पिणम् ॥ ४२२ ॥
मिथो युयुधिरे योधाः क्रोधारुणविलोचनाः । शराशरिकृतव्योममंडपाश्चंडतेजसः ॥ ४२३ ॥
नलः कदंबमूचे च मारितैः किमिभादिभिः । आवां युध्यावहे हंत द्वंद्वयुद्धेन वैरिणौ ॥ ४२४ ॥
ततो नलः कदंबश्च जंगमाविव पर्वतौ । युयुधाते द्वंद्वयुद्धैर्दोर्युधादिभिरुत्तमैः ॥ ४२५ ॥
नलात् कदंबो दर्पांधो यद्यद्युद्धमयाचत । पराभूतो विजयिना तत्र तत्र नलेन सः ॥ ४२६ ॥
क्षत्रवृत्तं मयातोलि नलेन तु महौजसा । मृत्युकोटीं प्रापितोऽस्मि तन्मा मृषि पतंगवत् ॥ ४२७ ॥
तस्मात् पलायनं कृत्वा व्रतमासादयाम्यहम् । पलायनमपि श्रेयो यस्योदर्को[1]ऽतिनिर्मलः ॥ ४२८ ॥
इति चेतसि संचिंत्य कदंबः प्रपलाय्य च । विरक्तो व्रतमादत्त तस्थौ प्रतिमया च सः ॥ ४२९ ॥
नलः कदंबं दृष्ट्वात्तव्रतमूचे जितोऽस्म्यहम् । क्षमां क्षमांतरासक्तो[2] मा त्याक्षीर्जितकास्यसि[3] ॥ ४३० ॥
महाव्रतधरो धीरः स कदंबमहामुनिः । नलस्य नोत्तरमदान्निरीहस्य हि किं नृपः ॥ ४३१ ॥
नलः कदंबं व्यावर्ण्य तत्सत्त्वेन शिरो धुनन् । तत्सूनुमेव तद्राज्ये जयशाक्तिं न्यवीविशत् ॥ ४३२ ॥
ततश्च नलराजस्य जिष्णोर्विष्णोरिवाखिलैः । भरतार्धपतित्वाभिषेकोऽकारि नरेश्वरैः ॥ ४३३ ॥
अथ कोशलनाथस्य कोशलामधिजग्मुषः । राजानो भक्तिकुशलाः सर्वे कौशलिकान्[4]यदुः ॥ ४३४ ॥

नलेन कदंबस्य पराजयः, कदंबस्य दीक्षा च ।

१ परिणामः । २ लोकांतरासक्तः परलोकासक्त इत्यर्थः । ३ जयेन शोभमानः । ४ उपहारान् ।

अपि खेचरनारीभिर्गीयमानबलो नलः । रममाणः समं भैम्या भूमिमन्वशिषच्चिरम् ॥ ४३५ ॥
कूबरः स्वकुलांगारो राज्यलुब्धो नलस्य तु । छलं गवेषयामास [१]सत्पात्रस्येव शाकिनी ॥ ४३६ ॥
द्यूतासक्तिर्नलस्याभूत् सदा न्यायवतोऽपि हि । चंद्रस्यापि कलंकोऽस्ति क्व रत्नमनुपद्रवम् ॥ ४३७ ॥
जयामि मेदिनीमेनामिति क्रूराशयो हृदि । कूबरो रमयामास सर्वदा [२]देवनैर्नलम् ॥ ४३८ ॥
रेमाते तौ बहुकालं देवनद्यूतलीलया । संचचार डमरुकग्रंथिवच्च द्वयोर्जयः ॥ ४३९ ॥
अन्यदानुगमचरबंधमोक्षक्षमोऽपि हि । नलो नालमभूज्जेतुं कूबरं दैवमोहितः ॥ ४४० ॥
अनुकूलो नलस्याक्षः कांक्ष्यमाणोऽपि नापतत् । [३]तच्छारीः कूबरः क्रूरो मुहुर्मुहुरमारयत् ॥ ४४१ ॥
ग्रामकर्वटखेटादि शनकैर्हारयन्नलः । हीयमानोऽभवल्लक्ष्म्या ग्रीष्मे सर इवांभसा ॥ ४४२ ॥
विषसादाखिलो लोको नले द्यूतममुंचति । कुबरस्तु जहर्षोचैः पूर्यमाणसमीहितः ॥ ४४३ ॥
नलानुरक्तो लोकश्च हा हा कर्तुं प्रचक्रमे । हाहाकारं तमाकर्ण्य तत्रागाद्दवदंत्यपि ॥ ४४४ ॥
उवाच वचनं नाथ [४]नाथामि त्वां प्रसीद मे । मुंच द्यूतं द्रोहकौ ते वैरिणाविव देवनौ ॥ ४४५ ॥
वेश्यागमनवद्द्यूतं क्रीडामात्रं मनीषिणः । सेवंते नाथ न त्वेवमंधंकरणमात्मनः ॥ ४४६ ॥
वरं राज्यं स्वयं देहि कुबरायानुजन्मने । श्रीरात्तास्मात्प्रसह्येति प्रवादं मात्मनः कृथाः ॥ ४४७ ॥

द्यूते कूबरेण नलस्य पराजयः ।

---

१ सत्पुरुषस्य । २ पाशैः । ३ शारिः भाषायां 'सोगठी' इति ख्यातनाम । ४ प्रार्थयामि ।

उपार्जिता युद्धशतैर्द्यूतोत्तीर्णा[1] मही तव । दुनोति देवात्यंतं मामश्रोतोगतसिक्थुवत् ॥ ४४८ ॥
तद्वाचं न हि शुश्राव ददर्शापि न तां नलः । अध्यारुढो मदावस्थां दशमीमिव[2] वारणः ॥ ४४९ ॥
पत्या भृशमवज्ञाता रुदंती दवदंत्यथ । कुलामात्यादिकानूचे नलं द्यूतान्निषेधत ॥ ४५० ॥
तेषामपि वचो नैव प्रबभूव मनागपि । नैषधेरौषधमिव सन्निपातवतो भृशम् ॥ ४५१ ॥
नलोऽनल स एवाभूद्द्यूते हारितभूरपि । ततः सार्धं दवदंत्याप्यंतःपुरमहारयत् ॥ ४५२ ॥
नलो हारितसर्वस्वस्ततश्चामुंचदंगतः । परिविव्रजिषुरिव सर्वमाभरणादिकम् ॥ ४५३ ॥
कूबरोऽथ नलं प्रोचे मेह स्थास्त्यज मद्भुवम् । पित्रा राज्यं तवादायि ममादायि तु देवनैः ॥ ४५४ ॥
न लक्ष्मीर्दोष्मतां दूरे मा द्राप्सीरिति तं ब्रुवन् । संव्यानमात्रोपात्तस्वः[3] प्रचचाल नलस्ततः ॥ ४५५ ॥
नलानुलग्नां भैमीं तु भीमवाक् कूबरोऽवदत् । द्यूते जितासि मा गास्त्वं मच्छुद्धांतमलंकुरु ॥ ४५६ ॥
अथामात्यादयः प्रोचुः कूबरं तु दुराशयम् । न स्पृशत्यन्यपुंछायामपि भैमी महासती । ४५७ ॥
अवरोधे निधा मेमां ज्येष्ठपत्नी हि मातृवत् । शिशवोऽपि पठंत्येवं ज्येष्ठो भ्राता पिता यथा ॥ ४५८ ॥
कुरुषे चेत्प्रसह्यैवं तदा भीमसुता सती । करिष्यते भस्मसात्त्वां सतीनां नास्ति दुष्करम् ॥ ४५९ ॥
अनर्थं मा प्रपद्येथाः कोपयित्वा सतीमिमाम् । भर्तारमनुच्छन्ती प्रत्युतोत्साह्यतामियम् ॥ ४६० ॥

द्यूते कूबरेण नलस्य पराजयः ।



---

१ द्यूतेनोत्तीर्णा गतेत्यर्थः । २ दशमीति गजस्य मदावस्थाविशेषः । ३ संव्यानमुत्तरीयं वस्त्रम् ।

ग्रामखेटादिदानेन पर्याप्तं ते नलं प्रति । तदर्पय सपाथेयं रथमेकं ससारथिम् ॥ ४६१ ॥
इत्युक्तो व्यसृजद्भैमीं नलेन सह कूबरः । अर्पयामास च रथं सपाथेयं ससारथिम् ॥ ४६२ ॥
नलोऽवदन्मया लक्ष्मीर्भरतार्धजयार्जिता । क्रीडया त्यज्यते येन तस्य मे का रथस्पृहा ॥ ४६३ ॥
नलं प्रधानपुरुषाः प्रोचिरे चिरसेवकाः । वयमप्यनुयामस्त्वां कूबरस्तु निषेधति ॥ ४६४ ॥
तवानुजस्त्वया दत्तराज्यस्त्याज्यश्च नैष नः । अस्मिन् वंशे हि यो राजा स सेव्यो नः क्रमो ह्यसौ ॥ ४६५ ॥
ततो नागंतुमर्हामस्त्वया सह महाभुज । भार्या मंत्री सखा पत्तिर्दवदंत्येव तेऽधुना ॥ ४६६ ॥
शिरिषसुकुमारांगीमंगीकृतसतीक्रमाम् । भीमजां पादचारेण कथं नेष्यसि वर्त्मनि ॥ ४६७ ॥

नलदवदंत्यो र्देशत्यागः ।

मार्गं तपनसंतापस्फुलिंगद्वालुकाकणम् । चुंबेदेषा कथं पादैः कमलोदरसोदरैः ॥ ४६८ ॥
तद्गृहाण रथं नाथ प्रसीदानुगृहाण नः । देव्या सममिहारोह क्षेमोऽध्वा स्वस्ति चास्तु वः ॥ ४६९ ॥
प्रधानुपुरुषैरेवं प्रार्थ्यमानो मुहुर्मुहुः । दवदंत्या सह नलो रथमारुह्य निर्ययौ ॥ ४७० ॥
एकवस्त्रां दवदंतीं दृष्ट्वा स्नानोद्यतामिव । नागर्यो रुरुदुर्बाष्पजलक्लेदितकंचुकाः ॥ ४७१ ॥
गच्छंश्च पुरमध्येन हस्तपंचशतोन्नतम् । ददर्शैकं नलः स्तंभं दिग्गजालानसन्निभम् ॥ ४७२ ॥
राज्यभ्रंशोद्भवं दुःखमविदन्निव कौतुकात् । तं नलो लीलयोद्दध्रे कदलीमिव वारणः ॥ ४७३ ॥

पुनरारोपयामास स्तंभं तत्रैव तं नलः । [1]उत्खातप्रतिरोपाख्यं शंसन्निव नृपव्रतम् ॥ ४७४ ॥
दृष्ट्वा च नागराः प्रोचुर्नलस्याहो महद्बलम् । व्यसनं बलिनोऽप्यस्य प्रमाणं नियतिः खलु ॥ ४७५ ॥
क्रीडतोऽस्य नगोद्याने कूबरेण समं पुरा । महर्षिराजगामैको ज्ञानरत्नमहानिधिः ॥ ४७६ ॥
स आख्यद्भाव्यसौ याम्यभरतार्धपतिर्नलः । पूर्वस्मिज्जन्मनि मुनेः क्षीरदानप्रभावतः ॥ ४७७ ॥
पुरीमध्ये महास्तंभं हस्तपंचशतोन्नतम् । चालयिष्यति योऽवश्यं भरतार्धपतिः स हि ॥ ४७८ ॥
द्वयं संवाद्यभूदेतद्भरतार्धपतिर्नलः । स्तंभश्च चालितोऽनेन दृष्टः स्वैरेव लोचनैः ॥ ४७९ ॥
नले जीवति न ह्यन्यः कोशलाया महीपतिः । भावीति यत्त्ववादीत्स विसंवादि बभूव तत् ॥ ४८० ॥
वाग् दृष्टप्रत्यया तस्य भवित्री नान्यथाथवा । किं ज्ञायते यदि पुनर्न नंदिष्यति कूबरः ॥ ४८१ ॥
कदाचित्स्याद्यदि पुनर्नल एवात्र भूपतिः । नलस्य पुण्यश्लोकस्य सर्वथा पुण्यमेधताम् ॥ ४८२ ॥
एवं लोकवचः श्रृण्वन् पुरीं तत्याज कोशलाम् । रुदंत्या दवदंत्या[2]स्रैः स्नाप्यमानरथो नलः ॥ ४८३ ॥
अभ्यधान्नैषधिः पत्नीं क्व यामो देवि संप्रति । न हि स्थानमनुद्दिश्य प्रवृत्तिश्चेतनावताम् ॥ ४८४ ॥
वैदर्भ्युवाच दर्भाग्रतीक्ष्णधीर्देव गम्यताम् । कुंडिने तत्र मे तातोऽतिथीभूयानुगृह्यताम् ॥ ४८५ ॥
तथैवाथ नलादिष्ट[3]सव्येष्टा प्रेरयन् हयान् । आशिश्राया[4]श्रयो भक्तेर्दिशं कुंडिनमंडिताम् ॥ ४८६ ॥

नलदवदंत्यो कुंडिनपुरं प्रति प्रयाणम् ।



---

१ आदावुत्खातः पश्चात्प्रतिरोपस्तन्नामकं राज्ञां व्रतम् । २ अस्रैरश्रुभिः । ३ सव्येष्टा सारथिः । ४ भक्तेराश्रयः स्थानं सारथिविशेषणम् ।

व्याघ्रबूत्कारघोराद्रिगुहामुरगदारुणाम् । दुःश्वापदशताकीर्णां संकीर्णां भिल्ललुब्धकैः ॥ ४८७ ॥
सिंहमारितवन्येभदंतदंतुरभूतलाम् । क्रीडास्थानं यमस्येव नलः प्रापदथाटवीम् ॥ ४८८ ॥
॥ युग्मम् ॥
आकर्णाकृष्टकोदंडान् प्रचंडानभिसर्पतः । यमदूतोपमान् भिल्लान् गच्छन्नग्रे ददर्श सः ॥ ४८९ ॥
भिल्लास्ते ननृतुः केऽपि पानगोष्ठिपरा इव । केऽपि चावादयन् श्रृंगमेकदंतद्विपोपमाः ॥ ४९० ॥
केचित् कलकलं चक्रू रंगादाविव नर्तकाः । केचिच्च ववृषुर्बाणान् धारासारानिवांबुदाः ॥ ४९१ ॥
करास्फोटं व्यधुः केऽपि मल्ला इव नियोधिनः । सर्वे संभूय रुरुधुर्नलं श्वान इव द्विपम् ॥ ४९२ ॥
॥ त्रिभिर्विशेषकम् ॥

नलस्य भील्लैः सह युद्धम् ।

द्रुतं रथादथोत्तीर्य कोशादाकृष्य नैषधिः । अनर्तयन्[१]मुष्टिरंगेऽसियष्टिं नर्तकीमिव ॥ ४९३ ॥
भीमजापि रथं मुक्त्वा बाहौ धृत्वावदन्नलम् । क एतेषु तवाक्षेपः सिंहस्य शशकेष्विव ॥ ४९४ ॥
व्यपार्यमाणश्चैतेषु पशुमात्रेषु नैषधेः । ह्रेष्यत्यसौ भरतार्धजयश्रीवासभूरसिः ॥ ४९५ ॥
इत्युक्त्वा भीमतनया हुंकारानमुचन्मुहुः मांत्रिकी मंडलस्थेव स्वसमीहितसिद्धये ॥ ४९६ ॥
मुच्यमानास्तु ते भैम्या हुंकारास्तत्प्रभावतः । विशंतो भिल्लकर्णेषु तीक्ष्णायःशुचितां ययुः ॥ ४९७ ॥



१ मुष्टिरेव रंगं नाट्यशाला तस्मिन् ।

भिल्लास्तु ते ययुः सर्वे कांदिशीका दिशो दिशम् । तौ तु तानभिधावन्तौ रथाद्दूरे बभूवतुः ॥ ४९८ ॥
इतश्च भिल्लैरपरैरपजह्रे तयो रथः । कुर्यात् पुरुषकारः किं दैवे वक्रत्वमीयुषि ॥ ४९९ ॥
तस्यामटव्यां भीमायां भैमीमादाय पाणिना । पाणिग्रहोत्सवं तस्याः स्मारयन्नभ्रमन्नलः ॥ ५०० ॥
वैदर्भी दर्भविद्धांघ्रिक्षरद्रुधिरबिंदुभिः । चकारारण्यवसुधामिन्द्रगोपां[1]कितामिव ॥ ५०१ ॥
पट्टबंधः पुरा मूर्धन्यभूद्भैम्यास्तदा पुनः । नलेन पादयोश्चक्रे दारं दारं स्वमंशुकम् ॥ ५०२ ॥
भीमजां वीजयामास श्रांतासीनां तरोस्तले । तालवृंतीकृतनिजपरिधानांचलो नलः ॥ ५०३ ॥
नलः पलाशैः पालाशैः पुटं कृत्वा द्रुतं पयः । तामपीप्यत् पंजरस्थां शारिकां[*]मिव तर्षिताम् ॥ ५०४ ॥
पप्रच्छ भीमजाप्येवं कियत्यद्याप्यटव्यसौ । इह द्विधेव भवितुं कंपते हृदयं मम ॥ ५०५ ॥
नलोऽप्याख्यदटव्येषा योजनानां शतं प्रिये । पंचैव योजनान्यस्या गतान्याश्रय धीरताम् ॥ ५०६ ॥
एवं वार्तयतोस्तस्मिन्नरण्ये गच्छतोस्तयोः । सूर्योऽस्तमाप कथयन्निव संपदनित्यताम् ॥ ५०७ ॥
अवचित्याथ निर्वृंतीकृ[2]त्य चाशोकपल्लवान् । दवदंत्याः कृते चक्रे नलस्तल्पमनल्पधीः ॥ ५०८ ॥
उवाच च प्रियां तल्पं शयित्वा त्वमलंकुरु । निद्रायाः समयं देहि दुःखविस्मृतिसख्यसौ ॥ ५०९ ॥
भैम्यभ्यधादितो देव पश्चिमायामदूरतः । अस्ति सं[3]वसथो मन्ये गवां हंभारवं शृणु ॥ ५१० ॥

नलदव-
दंत्योर्वने
वसनम् ।

१ इंद्रगोपः त्रींद्रियकीटविशेषः । २ वृंतरहितान् कृत्वा । ३ ग्रामः । * लोके 'मेना' ।

किंचिदग्रे परिक्रम्य तदिहावसथे वयम् । यामो यामवती तत्र सुखसुप्तैर्निर्गम्यताम् ॥ ५११ ॥
नलः प्रोवाच हे भीरु तापसानामिहाश्रमः । अशुभोदर्कसंपर्कास्ते च मिथ्यादृशः सदा ॥ ५१२ ॥
अपि तापससंगत्या सम्यक्त्वं हि विनश्यति । मनोरमं क्षीरमिवारनालेन[1] कृशोदरि ॥ ५१३ ॥
तदत्रैव सुखं शेष्व मा कृथास्तन्मुखं मनः । भवामि यामिकोऽहं ते सौविदल्ल इव स्वयम् ॥ ५१४ ॥
तत्र पल्लवतल्पे स्वं संव्यानार्धमथाक्षिपत् । तूलिकां प्रच्छदवतीं प्रेयस्याः स्मरयन्नलः ॥ ५१५ ॥
वंदित्वा देवमर्हंतं स्मृत्वा पंचनमस्कृतिम् । वैदर्भी तत्र चाशेत गांगे हंसीव रोधसि ॥ ५१६ ॥
निद्रामुद्रितनेत्रायां वैदर्भ्यां कोशलेश्वरः । चिंतां चक्रे महावर्तमिव व्यसनवारिधेः ॥ ५१७ ॥
श्वशुरः शरणं येषां नराणां ते नराधमाः । दवदंत्याः पितुर्गेहं तत्कथं यात्वसौ नलः ॥ ५१८ ॥
हृदयं वज्रसात्कृत्वा तत्त्यक्त्वा प्रेयसीमपि । गच्छामि स्वेच्छयान्यत्रात्मानमादाय रंकवत् ॥ ५१९ ॥
शीलप्रभावाद्भैम्याश्च न स्यात्कश्चिदुपद्रवः । शीलं सतीनां सर्वांगरक्षामंत्रो हि शाश्वतः ॥ ५२० ॥
इत्याकृष्य छुरीं राजा स्वसंव्यानार्धमच्छिदत् । भैम्या वस्त्रे स्वरुधिरेणाक्षराणि लिलेख च ॥ ५२१ ॥
विदर्भेष्वेष यात्यध्वा वटालंकृतया दिशा । कोशलेषु च तद्वामस्तयोरेकेन केनचित् ॥ ५२२ ॥
गच्छेः स्वच्छाशये वेश्म पितुर्वा श्वशुरस्य वा । अहं तु क्वापि न स्थातुमुत्सहे हे विवेकिनि ॥ ५२३ ॥ । युग्मम् ॥

नलेन कृतो दवदंती–त्यागः ।

1 आरनालः कांजिकस्तेन ।

अक्षराणि लिखित्वैवमशब्दं प्ररुदन्नलः । अग्रतो गंतुमारेभे चौरवन्निभृतक्रमः ॥ ५२४ ॥
प्रसुप्तां प्रेयसीं पश्यन्नलो वलितकंधरः । तावदग्रे ययौ यावददृश्यत्वमियाय सा ॥ ५२५ ॥
अचिंतयच्च तां बालामनाथां शयितां वने । क्षुत्क्षामो भक्षयेद्व्याघ्रः सिंहो वा यदि का गतिः ॥ ५२६ ॥
तद्दृष्टिविषयीकृत्य तां रक्षामि निशामहम् । प्रातः स्वरुचि यात्वेषा मया कथितयोः पथोः ॥ ५२७ ॥
तैरेव पादैर्वलितः पतितार्थः पुमानिव । दृष्ट्वा भूलुठितां जायां नलः पुनरचिंतयत् ॥ ५२८ ॥
दवदंत्येकवस्त्रेयमेका स्वपिति वर्त्मनि । अहो नलस्य शुद्धांतमसूर्यंपश्यमीदृशम् ॥ ५२९ ॥
अहो मत्कर्मदोषेण कुलीनेयं सुलोचना । प्रविवेश दशामेवं हताशः किं करोम्यहम् ॥ ५३० ॥

नलेन कृतो दवदंती-त्यागः ।

मयि सत्यपि पार्श्वस्थेऽप्युन्मत्तवदनाथवत् । भूमौ शेते वरारोहा[1] जीवत्यद्यापि ही[2] नलः ॥ ५३१ ॥
मयैकाकिन्यसौ मुक्ता प्रबुद्धा मुग्धलोचना । भोक्ष्यते जीवितेनापि स्पर्द्धयेव मया सह ॥ ५३२ ॥
भक्तां तदेनां वंचित्वा नान्यतो गंतुमुत्सहे । जीवितं मरणं वापि मम स्तादनया सह ॥ ५३३ ॥
अथवानेकदुःखानामरण्ये नरकोपमे । पात्रं नारकिक इव भवाम्येकोऽहमस्त्वसौ ॥ ५३४ ॥
मया तु वस्त्रे लिखितामाज्ञां कृत्वा मृगाक्ष्यसौ । स्वयं गत्वा कुशलिनी वत्स्यति स्वजनौकसि ॥ ५३५ ॥
इति निश्चित्य तां रात्रिमतिक्रम्य च नैषधिः । प्रबोधसमये पत्न्यास्तिरोधात्त्वरितक्रमम् ॥ ५३६ ॥



१ वरः श्रेष्ठ आरोहः शयनं यस्याः सा । २ 'ही' इति खेदे ।

उन्निद्रपंकजामोदिमृदुप्रत्यूषमारुते । निशाशेषे दवदंती स्वप्नमेवमुदैक्षत ॥ ५३७ ॥
यदहं फलिते फुल्ले पत्रले चूतपादपे । आरुह्य तत्फलान्यादं शृण्वंती भृंगनिःस्वनान् ॥ ५३८ ॥
अकस्माद्वनकरिणोदमूलि च स पादपः । पतिताहं च मेदिन्यां ततोंऽड इव पक्षिणः ॥ ५३९ ॥
भैमी प्रबुद्धा तत्कालमपश्यंती नलं पुरः । दिशोऽवलोकयामास मृगी यूथादिव च्युता ॥ ५४० ॥
अचिंतयच्चापति[1]तमत्या[2]हितमना[3]हतम् । अशरण्यामरण्ये मां प्रेयानपि मुमोच यत् ॥ ५४१ ॥
यद्वा मुखक्षालनाय प्राणेशो मे निशात्यये । गतो भविष्यति क्वापि वार्यानेतुं जलाशये ॥ ५४२ ॥
नीतो रमयितुं यद्वोपरुध्य नियतं नलः । कयाचिदपि खेचर्या तद्रूपालोकलुब्धया ॥ ५४३ ॥
क्रीडन् कलायां कस्यांचिज्जितो मन्ये तया च सः । कृतावस्थानपणतस्तस्थौ चाद्यापि नैति यत् ॥ ५४४ ॥
ते द्रुमाः पर्वतास्तेऽपि तदरण्यं च सा च भूः । एकमेव न पश्यामि नलं कमललोचनम् ॥ ५४५ ॥
एवं चिंताप्रपन्ना सा दर्शं दर्शं दिशोऽखिलाः । प्राणनाथमपश्यंती निजं स्वप्नं व्यचारयत् ॥ ५४६ ॥
सहकारो नलो राजा राज्यं पुष्पफलादिकम् । फलास्वादो राज्यसुखं भृंगाः परिजनो मम ॥ ५४७ ॥
सहकारतरुर्यश्चोन्मूलितो वनदंतिना । राज्यादुत्थाप्य दैवेन प्रावास्यत स मे पतिः ॥ ५४८ ॥
यच्चास्मि पतिता वृक्षात्तद्भ्रष्टास्मि नलादहम् । स्वप्नेनानेन नूनं मे नलो दुर्लभदर्शनः ॥ ५४९ ॥
॥ त्रिभिर्विशेषकम् ॥

नलेन कृतो
दवदंती-
त्यागः ।



---

१ अनिष्टम् कष्टमिति यावत् । २ प्राणभयोत्पादकम् । ३ कदापि न युक्तम् ।

स्वप्नार्थमिति निर्णीय सा दध्याविति धीमती । न राज्यं न पतिश्चेति द्वयमापतितं मम ॥ ५५० ॥
व्यलपन्मुक्तकंठं च सा तारं तारलोचना । दुर्दशापतितानां हि स्त्रीणां धैर्यगुणः कुतः ॥ ५५१ ॥
हा नाथ मां किमत्याक्षीः किं भाराय तवाभवम् । न ह्यात्मीया कंचुलिका जातु भाराय भोगिनः ॥ ५५२ ॥
नर्मणान्तरितोऽभूस्त्वं यद्वा वल्लीवने क्वचित् । तत्प्रकाशो भव चिरं न हि नर्मापि शर्मदम् ॥ ५५३ ॥
प्रार्थये वः प्रसीदंतु मह्यं हे वनदेवताः । प्राणेशं दर्शयत मे मार्गं वा तत्पवित्रितम् ॥ ५५४ ॥
द्विधा भव धरित्रि त्वं वालुंकमिव[1] पाकिमम्[2] । त्वद्दत्तविवरेणाहं प्रविश्याप्नोमि निर्वृतिम् ॥ ५५५ ॥
एवं भैमी विलपंती रुदंती नयनोदकैः । सारणीवारिभिरिव सिषेचारण्यपादपान् ॥ ५५६ ॥

दवदंत्या स्वपितृवेश्म प्रति गमनम् ।

जले स्थले वा छायायामातपे वा नलं विना । ज्वरार्ताया इव तस्या न निर्वृतिलवोऽप्यभूत् ॥ ५५७ ॥
भ्रमंत्यटव्यां संव्यानांचले दृष्ट्वाक्षराणि सा । वाचयामास हर्षेण विकसन्नयनांबुजा ॥ ५५८ ॥
दध्यौ च तन्मनःपूर्णसरोहंस्यस्मि खल्वहम् । कुतोऽन्यथैवमादेशप्रसादास्पदता मम ॥ ५५९ ॥
एतच्च पत्युरादेशं मन्ये गुरुवचोऽधिकम् । कुर्वंत्या मे तदादेशमिहलोकोऽतिनिर्मलः ॥ ५६० ॥
तद्व्रजामि पितुर्वेश्म सुखवासनिबंधनम् । पतिं विनापि तद्वेश्माभिभवायैव योषिताम् ॥ ५६१ ॥
पत्या सहापि हि मया पितृवेश्म यियासितम् । विशेषतोऽद्य तद्यामि पत्यादेशवशंवदा ॥ ५६२ ॥

१ वालंकं चिर्भटकं भाषायां 'चीभडुं' इति ख्यातस्य नाम । २ पक्वम् ।

दवदंती–
सतीत्व–
प्रभावः ।

इति न्यग्रोधमार्गेण भैमी गंतुं प्रचक्रमे । नलाक्षराणि पश्यंती पार्श्वे नलमिव स्थितम् ॥ ५६३ ॥
व्याघ्रा व्यात्ताननास्तस्याः खादनायोत्थिता अपि । समीपमागंतुमलमनलस्येव नाभवन् ॥ ५६४ ॥
गच्छंत्यास्त्वरितं तस्या वल्मीकमथनोत्थिताः । जांगुल्या इव मूर्ताया नाभ्यसर्पन्महोरगाः ॥ ५६५ ॥
स्वच्छायामपि भिंदंतो दंतैरन्येभशंकया । मत्ता अपि ययुर्दूरं तस्याः सिंह्या इव द्विपाः ॥ ५६६ ॥
प्राभूवन् पथि गच्छंत्यास्तस्या नान्येऽप्युपद्रवाः । सर्वत्र कुशलं तासां स्त्रीणां याः स्युः पतिव्रताः ॥ ५६७ ॥
सा पुलिंदपुरंध्रीवातिविशंस्थलकुंतला । सद्यः स्नातेव सर्वांगमपि स्वेदजलाविला ॥ ५६८ ॥
करीरबदरीप्रायकंटकिद्रुमघर्षणैः । [1]प्रक्षरद्रुधिरानिर्यन्निर्यासार्द्रेव सल्लकी ॥ ५६९ ॥
बिभ्रती मार्गसंक्रांतं रजस्त्वचमिवापरम् । त्वरितत्वरितं यांती दवत्रस्तेव हस्तिनी ॥ ५७० ॥
आवासितमुदैक्षिष्ट संकटं शकटादिभिः । मार्गे महर्द्धिकं सार्थं शिबिरं नृपतेरिव ॥ ५७१ ॥
॥ चतुर्भिः कलापकम् ॥
अचिंतयच्च सार्थश्चेत् कश्चिदप्यधिगम्यते । सोऽरण्याब्धितरं[2]डः स्यात्तदा मे पुण्यसंपदा ॥ ५७२ ॥
स्वस्थीभूय च सा तस्थौ यावत्तावच्च दस्यवः । परितो रुरुधुः सार्थं देवसेनामिवासुराः ॥ ५७३ ॥
तां चौरसेनामायांतीमीतिं चौरमयीमिव । दृष्ट्वा बिभ्युः सार्थलोकाः सुलभा धनिनां हि भीः ॥ ५७४ ॥

१ प्रक्षरद्रुधिरं यस्याः सा निर्यन् निर्गच्छन् यो निर्यासो रसस्तेनार्द्रा निर्यासो भाषायां "गुंद" इति ख्यातः । २. तरंडो नौः । ३ ईतिरुपद्रवः । भीलस्त्रीः । + स्कन्धादुत्पन्ना वनस्पतिः । • संकीर्णम् । भाषायां 'सांकडु'।

हं हो मा भैष्ट मा भैष्ट लोकाः सार्थनिवासिनः । इति तत्कुलदेवीवोवाच वाचं नलप्रिया ॥ ५७५ ॥
व्याजहार च सा चौरान् रे रे यात दुराशयाः । रक्ष्यमाणे मयामुष्मिन् सार्थेऽनर्थमवाप्स्यथ ॥ ५७६ ॥
एवं वदंतीमपि हि दवदंतीं मलिम्लुचाः । वातूलामिव भूतात्तामिव चाजीगणन्न हि ॥ ५७७ ॥
ततो मुमोच हुंकारांश्चौराहंकारदारणान् । कुंडिनाधीशदुहिता हितार्थं सार्थवासिनाम् ॥ ५७८ ॥
श्रुतैश्च तस्या हुंकारैर्बधरीकृतकाननैः । दस्यवस्ते पलायंत धनुर्नादैरिव द्विंका[1]ः ॥ ५७९ ॥
अस्मत्पुण्यैः समाकृष्टा काप्येषा देवता खलु । अस्मानरक्षच्चौरेभ्य इति सार्थजनोऽवदत् ॥ ५८० ॥
सार्थनाथोऽपि तां भक्त्या प्रणम्य जननीमिव । पप्रच्छ किमिहारण्ये परिभ्रमसि कासि वा ॥ ५८१ ॥
साश्रुदृग्बांधवायेव सार्थवाहाय भैम्यपि । अशंसदानल*द्यूतात् सर्वं वृत्तांतमात्मनः ॥ ५८२ ॥
उवाच सार्थवाहोऽपि महाबाहोर्महीपतेः । नलस्य पत्नीत्यपि मे पूज्यास्यद्यास्मि पुण्यभाक् ॥ ५८३ ॥
त्वयोपकारक्रीताः स्मस्तस्करेभ्यश्च रक्षणात् । तत्पुनीहि ममावासं स्तोकं यत्क्रियते त्वयि ॥ ५८४ ॥
एवमुक्त्वा सार्थवाहो नीत्वा पटगृहे निजे । भैमीं विश्रामयामास [2]राधयन् देवतामिव ॥ ५८५ ॥
वर्षानाटकनांद्याभां गर्जामुच्चैर्विपंचयन् । अखंडधारां विदधे वृष्टिं धाराधरस्तदा ॥ ५८६ ॥
स्थाने स्थाने परीवाहैः प्रवहद्भिर्निरंतरैः । ससारणिकमुद्यानमिवाभूदभितोऽपि भूः ॥ ५८७ ॥

दवदंती-
सतीत्व-
प्रभावः ।

---

१ काकाः । २ पूजयन् । * नलस्य द्यूतात् आरभ्य ।

अखातसरसां वारिपूर्णानां दर्दुरारवैः । नदद्दर्दुरकातोद्यामयीवोपांतभूरभूत् ॥ ५८८ ॥
बभूव सर्वतोऽरण्ये वाराहीदोहदप्रदः । पंकः पादेषु पांथानां मोचकप्रक्रियाकरः ॥ ५८९ ॥
त्रिरात्रमनवच्छिन्ना वृष्टिरासीत्तदोत्कटा । भैमी त्वस्थात् सुखं तत्र प्राप्तेव पितृवेश्मनि ॥ ५९० ॥
वर्षं वर्षं स्थिते मेघे दवदंती महासती । सार्थं हित्वा पुनरपि प्राग्वदेकाकिनी ययौ ॥ ५९१ ॥
नलप्रवासदिवसादपि भीमसुता सती । चतुर्थादितपोलीनात्यगान्मार्गं शनैः शनैः ॥ ५९२ ॥
उत्पिंगलकचं शैलमिव दीप्तदवानलम् । जिह्वाज्वालाकरालास्यं द्विजिह्वमिव दारुणम् ॥ ५९३ ॥
कर्तिकादारुणकरं तालदघ्नकृशक्रमम् । अमावास्यातमःश्यामं घटितं कज्जलैरिव ॥ ५९४ ॥
शार्दूलचर्मसंव्यानं भीषणेभ्योऽपि भीषणम् । रक्षोऽद्राक्षीदथैकं स पुत्रं पितृपतेरिव । ॥ ५९५ ॥
॥ त्रिभिर्विशेषकम् ॥

दवदंत्या राक्षसेण पतिसंगमज्ञानम् ।

बुभुक्षाक्षामकुक्षेर्मे चिराद्भक्ष्यमुपस्थितम् । मंक्षु त्वां भक्षयिष्यामीत्युवाच च स राक्षसः ॥ ५९६ ॥
भीताप्यथावदद्धैर्यमालंब्य नलगेहिनी । श्रुत्वा मदीयं वचनं यथारुचि त्वमाचरेः ॥ ५९७ ॥
जातस्य हि ध्रुवं मृत्युरकृतार्थस्य मृत्युभीः । आजन्म परमार्हत्याः कृतार्थायास्तु सा न मे ॥ ५९८ ॥
परस्त्रियं मा स्पृश मां स्पृशन्नपि न नंदसि । मामाक्रोशेन मूढात्मन्नेषास्मि विमृश क्षणम् ॥ ५९९ ॥



१ वराहस्त्री । २ अति–अगात् । ३ तालवृक्षप्रमाणौ कृशौ क्रमौ पादौ यस्य तम् । ४ यमस्येव । * उद्गता पीतकेशाः यस्य तम् । + सर्पः ।

इति धैर्येण वैदर्भ्या हृष्टः स रजनीचरः । उवाच भद्रे तुष्टोऽस्मि किं तवोपकरोम्यहम् ॥ ६०० ॥
साप्यूचे यदि तुष्टोऽसि देव[1]योने निशाचर । तर्हि पृच्छामि कथय कदा मे पतिसंगमः ॥ ६०१ ॥
विज्ञायावधिना तस्यै कथयामास राक्षसः । संपूर्णे द्वादशे वर्षे[2] प्रवासाद्यशस्विनि ॥ ६०२ ॥
पितृवेश्मस्थितायास्ते स्वयमेव समागतः । मिलिष्यति नलो राजा समाश्वसिहि संप्रति ॥ ६०३ ॥
॥ युग्मम् ॥
कल्याणि भणसि त्वं चेत्तदा त्वां तातवेश्मनि । नयाम्यर्धनिमेषेण यासीर्माऽऽयासमध्वनि ॥ ६०४ ॥
सा प्रोचे कृतकृत्यास्मि नलागमनशंसनात् । परपुंसा सह नाहं प्रयामि स्वस्ति ते व्रज ॥ ६०५ ॥
दर्शयित्वा निजं रुपं स ज्योतिर्मयमात्मनः । उत्पपातांबरतले तडित्पुंज इव क्षणात् ॥ ६०६ ॥
पत्युः प्रवासं विज्ञाय सापि द्वादश*हायनीम् । चकाराभिग्रहानेवं सतीत्वद्रुमपल्लवान् ॥ ६०७ ॥
रक्तवस्त्राणि तांबूलं भूषणानि विलेपनम् । विकृतीरपि नादास्ये न यावन्मिलितो नलः ॥ ६०८ ॥
गिरेरेकस्य च प्राप्य कंदरां [3]दरवर्जिता । भैमी प्रावृषमत्येतुं तत्रैवावस्थितिं व्यधात् ॥ ६०९ ॥
सा बिंबं शांतिनाथस्य स्वयं निर्माय मृन्मयम् । न्यवीविशद्गुहाकोणे मनसीवामले निजे ॥ ६१० ॥
स्वयंगलितपुष्पाणि स्वयमानीय भीमजा । त्रिसंध्यं पूजयामास तद्बिंबं षोडशार्हतः ॥ ६११ ॥

दवदंत्या राक्षसेण पतिसंगमज्ञानम् ।

१ हे देव । २ प्रवासदिनात् । ३ भयवर्जिता । * हायन–वर्ष ।

चतुर्थादितपःप्रांते पारणं परमार्हती । प्रासुकैर्बीजरहितैः कृतिन्यकृत[1] सा फलैः ॥ ६१२ ॥
सोऽपश्यन् सार्थवाहोऽपि सार्थमध्ये नलप्रियाम् । आगादनुपदं तस्याः क्षेममस्त्विति चिंतयन् ॥ ६१३ ॥
गुहायामागतस्तस्यां सार्थवाहो ददर्श च । दवदंतीमर्चयंतीमर्हद्बिंबं समाधिना ॥ ६१४ ॥
दृष्ट्वा क्षेमवतीं भैमीं सार्थवाहः प्रमोदभाक् । नत्वा चोपविशद्भूमौ विस्मयस्मेरलोचनः ॥ ६१५ ॥
भैमी समाप्यार्हत्पूजां स्वागतप्रश्नपूर्वकम् । सार्थेशं वार्तयामास सुधामधुरया गिरा ॥ ६१६ ॥
अदूरवासिनः केऽपि तापसास्तत्र सत्वरम् । आगुस्तच्छब्दमाकर्ण्योत्कर्णाश्चास्थुर्मृगा इव ॥ ६१७ ॥
धाराधरोऽम्बुधाराभिर्दुर्धराभिर्धराधरम् । ताडयन्नभितष्टंकै[2]रिवारेभे च वर्षितुम् ॥ ६१८ ॥
आहन्यमाना भल्लीभि[3]रिव धाराभिरंभसाम् । ते प्रोचिरे क्व गच्छामः क्व पयो वंच्यतामिदम् ॥ ६१९ ॥
दृष्टवा च तान् कांदिशिकान् श्वापदानिव तापसान् । उवाच भैमी मा भैष्ट मा भैष्टेति प्रकृष्टवाक् ॥ ६२० ॥
कृत्वा च परिधौ तेषां कुंडं कुंडिनराट्सुता । सतीधुरंधरा धीरं व्याजहारातिहारिवाक्[4] ॥ ६२१ ॥
सत्यस्मि यद्यहं यद्यार्हती ऋजुमना यदि । कुंडात्तदस्मादन्यत्र वर्षंतु स्तनयित्नवः[5] ॥ ६२२ ॥
तदैव भीमतनयासतीत्वस्य प्रभावतः । कुंडे धृतच्छत्र इव पयस्तत्रापतन्न हि ॥ ६२३ ॥
पर्वतः सर्वतोऽपि द्राग्धौतो नीरैरराजत । निर्मलः श्यामलवपुर्नदीस्नात इव द्विपः ॥ ६२४ ॥

दवदंत्या तापसानां रक्षणम् ।



---

१ कृतिनी–पंडीता । २ टंक–भाषायां 'टांकणु' । ३ भल्ली–भाषायां 'भालो' । ४ मनोहारीवाक् । ५ मेघाः ।

दवदंत्या
तापसादीनां
प्रतिबोधः ।

गह्वराणि गिरेस्तस्याभूवन् वर्षति वारिदे । परितो वारिपूर्णानि पूर्त्तानीवांबुदश्रियः ॥ ६२५ ॥
तद्दृष्ट्वाचिंतयन् सर्वे काप्येषा खलु देवता । मानव्या नेदृशं रुपं न च शक्तिरपीदृशी ॥ ६२६ ॥
सार्थवाहो वसंतस्तां पप्रच्छ स्वच्छधीरथ । भद्रे कथय को नाम देवोऽयं पूज्यते त्वया ॥ ६२७ ॥
भैम्यप्याख्यत् सार्थवाह देवोऽर्हन् परमेश्वरः । त्रैलोक्यनाथो भविनां प्रार्थनाकल्पपादपः ॥ ६२८ ॥
आराधयंत्यहममुमिह तिष्ठामि निर्भया । एतत्प्रभावात् प्रभवंत्यत्र व्याघ्रादयो न मे ॥ ६२९ ॥
अर्हत्स्वरुपमाख्याय वैदर्भी धर्ममार्हतम् । वसंतसार्थवाहायाहिंसादिकमचीकथत् ॥ ६३० ॥
तं च धर्मं तयाख्यातं वसंतः प्रत्यपद्यत । धर्मकामगवी दिष्ट्या दृष्टासीति मुदावदत् ॥ ६३१ ॥
हेयोपादेयविद्रूपतापसा अपि तद्गिरा । तद्धर्मं प्रत्यपद्यंतानुस्यूतमिव चेतसि ॥ ६३२ ॥
निजं तापसधर्मं तेऽनिंदंस्तद्धर्मवासिताः । अवाप्तक्षीरपाणाय कस्मै रोचेत कांजिका ॥ ६३३ ॥
वसंतसार्थवाहोऽपि तत्रैवावासयत् पुरम् । पुरंदरपुराकारं महेभ्यैर्यन्न मुच्यते ॥ ६३४ ॥
तापसानां पंचशती प्रबुद्धात्रेति कारणात् । तत्पुरं तापसपुरमिति सर्वत्र पप्रथे ॥ ६३५ ॥
स्वार्थज्ञः सार्थवाहो हि स स्वमर्थं कृतार्थयन् । चैत्यं श्रीशांतिनाथस्य पुरे तस्मिन्नकारयत् ॥ ६३६ ॥
स सार्थवाहस्ते सर्वे तापसाः स जनोऽखिलः । समयं गमयामासुरर्हद्धर्मपरायणाः ॥ ६३७ ॥

अन्यदा तु निशीथेऽद्रिशिखरे नलवल्लभा । ददर्शोद्योतमादित्यः स्फुलिंग इव यत्पुरः ॥ ६३८ ॥
उत्पततो निपततस्ततश्च पतगानिव । भैमी व्यलोकयद्देवासुरान् विद्याधरानपि ॥ ६३९ ॥
तेषां जयजयारावतुमुलेन प्रबोधिताः । अपश्यन् विस्मयोत्पश्या[1] वणिजस्तापसाश्च ते ॥ ६४० ॥
रोदस्योरंतरात्मानं दंडरुपं महागिरिम् । तमारुरोह वैदर्भी सवणिजस्तापसाश्च ते ॥ ६४१ ॥
तत्रोत्पन्नकेवलस्य सिंहकेसरिणो मुनेः । केवलिमहिमानं ते प्रारब्धं ददृशुः सुरैः ॥ ६४२ ॥
द्वादशावर्तपूर्वं ते वंदित्वा तं महामुनिम् । तत्पादमूले न्यषदन् द्रुममूल इवाध्वगाः ॥ ६४३ ॥
आगाद्यशोभद्रसूरिस्तदा तस्य मुनेर्गुरुः । तं च केवलिनं ज्ञात्वा वंदित्वा न्यषदत् पुरः ॥ ६४४ ॥
सिंहकेसर्यपि स्वामी करुणारससागरः । मर्माविधमधर्मस्य विदधे धर्मदेशनाम् ॥ ६४५ ॥
मानुष्यं दुर्लभं हंत प्राणिनां भ्रमतां भवे । तल्लब्ध्वा सफलं कार्यं स्वयमुप्त इव द्रुमः ॥ ६४६ ॥
मानुष्यकस्य च फलमाददीध्वं सुमेधसः । मुक्तिप्रदं जीवदयाप्रधानं धर्ममार्हतम् ॥ ६४७ ॥
श्रोतृश्रोत्रसुधासारं धर्ममाख्याय पावनम् । स महर्षिः कुलपतिं प्रोचे तत्संशयच्छिदे ॥ ६४८ ॥
दवदंत्या तवाख्यातो धर्मो यः स तथैव हि । अर्हद्धर्माध्वपथिकी भाषते नेयमन्यथा ॥ ६४९ ॥
महासतीयमाजन्मार्हती वो दृष्टप्रत्यया । तदा हि वर्षञ्जीमूतो रेखाकुंडे धृतोऽनया ॥ ६५० ॥



सिंहकेसरिणो मुनेः केवल–ज्ञानम् देशना च ।



१ विस्मयेनोर्ध्वं पश्यंति ते तथा ।

सतीत्वेनार्हतीत्वेन चामुष्या देवता अपि । सदा सान्निध्यकारिण्योऽरण्येऽप्यस्यास्ततः शिवम् ॥ ६५१ ॥
सार्थोऽस्य सार्थवाहस्य चौरेभ्यो रक्षितः पुरा । अस्या हुंकारमात्रेण प्रभावोऽतः परं हि कः ॥ ६५२ ॥
तदा च कश्चिदप्यागात्तत्र देवो महर्द्धिकः । स वंदित्वा केवलिनमूचे भैमीमभीमवाक् ॥ ६५३ ॥
भद्रे तपोवनेऽमुष्मिन् शिष्यः कुलपतेरहम् । अभूवं कर्परो नाम तपस्तेजोदुरासदः ॥ ६५४ ॥
पंचाग्निसाधकमपि ते तपोवनतापसाः । न मामपूजयन्नापि वचसाप्यभ्यनंदयन् ॥ ६५५ ॥
ततोऽहमभिमानेन तद्विहाय तपोवनम् । द्रुतमन्यत्र गतवानाविष्टः क्रोधरक्षसा ॥ ६५६ ॥
नीरंध्रतिमिरायां च यामिन्यां त्वरितं व्रजन् । पतितोऽद्रिकंदरायामहं वार्या[1]मिव द्विप ॥ ६५७ ॥
सर्वे दंता गिरिदंतास्फालितास्यस्य मे तदा । जीर्णशुक्तिपुटानीव व्यशीर्यंत सहस्रधा ॥ ६५८ ॥
सप्तरात्रं तथैवास्थां दंतपातव्यथातुरः । दुःस्वप्नस्येव मे वार्तामपि चक्रुर्न तापसाः ॥६५९ ॥
ततः स्थानान्मयि गते गृहादिव महोरगे । प्रत्युताभूत् सुखं तेषां तापसानां महत्तरम् ॥ ६६० ॥
तापसानां ततस्तेषामुपर्याविरभून्मम । प्रदीपनकवह्न्याभः क्रोधो दुःखानुबंधकः ॥ ६६१ ॥
जाज्वल्यमानः क्रोधेन दुर्मनाः प्राप्य पंचताम् । इहैव तापसारण्ये महाविषधरोऽभवम् ॥ ६६२ ॥
दशनायान्यदाहं तेऽधाविषं स्फारयन् फणान् । नमस्कारश्च पठितस्त्वया मद्गतिरोधकः ॥ ६६३ ॥

कर्परदेवस्य वृत्तान्तः ।

१ वारी हस्तिबंधनरज्जुस्तस्याम् ।

कर्परदेवस्य वृत्तान्तः ।

नमस्काराक्षरैः सद्यः पतितैः कर्णगोचरम् । धृतः संदंशकेनेव[1] नाभिगंतुमशक्नुवम् ॥ ६६४ ॥
पुनश्च दर्यामेकस्यां प्राविशं हतशक्तिकः । भेकादीनाहरञ्[2]जीवानजीवं तत्र च स्थितः ॥ ६६५ ॥
अन्यदा वर्षति घने तापसानां पुरस्त्वया । कथ्यमानमिमं धर्ममश्रौषं परमार्हति[3] ॥ ६६६ ॥
यो जीवहिंसां कुरुते स संसारे निरंतरम् । भ्रमन् दुःखान्यवाप्नोति मरुभूमाविवाध्वगाः ॥ ६६७ ॥
तच्छ्रुत्वाचिंतयं चाहं जीवहिंसापरः सदा । पापात्मा पन्नगोऽस्म्येष का गतिर्मे भविष्यति ॥ ६६८ ॥
मयैवमूहापोहाभ्यां ज्ञातं यत्तापसा इमे । क्व नामैते मया दृष्टा इति भूयोऽप्यचिंतयम् ॥ ६६९ ॥
तदा च जातिस्मरणमुत्पेदे मम निर्मलम् । अस्मार्षं ह्यः कृतं कार्यमिव पूर्वभवं ततः ॥ ६७० ॥
उत्कल्लोलसिरानीरमिव वैराग्यमक्षयम् । ममोदपद्यताकार्षमथानशनमात्मना ॥ ६७१ ॥
ततो विपद्य सौधर्मे कल्पेऽभूवमहं सुरः । <u>तपःक्लेशसहानां हि न मोक्षोऽपि दवीयसि</u> ॥ ६७२ ॥
सोऽहं विमाने कुसुमसमृद्धे कुसुमप्रभः । नाम्ना देवोऽस्मि भुंजानः स्वःसुखं[4] त्वत्प्रसादतः ॥ ६७३ ॥
यदि ते धर्मवचनं न स्यान्मे कर्णगोचरम् । तदा क्वैषा गतिर्मे स्यात् पापपंकमहाकिरेः[5] ॥ ६७४ ॥
विज्ञाय चावधिज्ञानाद्भद्रे त्वामुपकारिणीम् । द्रष्टुमत्रागमं धर्मपुत्रस्तेऽहमतः परम् ॥ ६७५ ॥
वैदर्भ्या ज्ञापयित्वा स्वं स गीर्वाणोऽथ तापसान् । उवाच श्लक्ष्णया वाचा बंधून् ग्रामागतानिव ॥ ६७६ ॥

१ संदंशकः सर्पग्रहणाय काष्टयंत्रम् । २ भक्षयन् । ३ संबोधनमेतत् ४ स्वर्गसुखम् । ५ पापकर्दममहासूकरस्य ।

भोस्तापसाः पूर्वभवे तत्कोपाचरणं मम । क्षमध्वं पालयत च प्रपन्नं श्रावकव्रतम् ॥ ६७७ ॥
इत्युक्त्वा तमहेः कायमाकृष्य गिरिकंदरात् । उल्लंब्य नंदिवृक्षे च प्रोवाच कुसुमप्रभः ॥ ६७८ ॥
यः कोऽपि कोपं कुरुते लोकाः कोपफलेन हि । स ईदृशो भवेत् सर्पः कर्परोऽहं यथा पुरा ॥ ६७९ ॥
अग्रेऽपि सम्यक्त्वधरस्तदा कुलपतिः स तु । भाग्योदयेन वैराग्यं परमं प्रत्यपद्यत ॥ ६८० ॥
अथ केवलिनं नत्वा तापसानामधीश्वरः । व्रतं ययाचे वैराग्यशाखिनः फलमुत्तमम् ॥ ६८१ ॥
केवल्यूचे यशोभद्रसूरिरेष तव व्रतम् । दास्यत्यसावेव गुरुर्ममाऽस्ति समताधनः ॥ ६८२ ॥
पुनर्विस्मयमापन्नोऽपृच्छत् कुलपतिर्मुनिम् । गृहीतवानसि कथं प्रवज्यां भगवन् वद ॥ ६८३ ॥
केवल्याख्यत् कौशलायां नगर्यां नलभूपतेः । अनुजः कुरुते राज्यं कूबरो वरवैभवः ॥ ६८४ ॥
सूनुस्तस्यास्म्यहं संगानगरीशो ममादित[1] । नृपतिः केशरी बंधुमतीं नाम निजात्मजाम् ॥ ६८५ ॥
पित्रादिष्टस्तत्र गत्वा पर्यणैषं च तामहम् । नवोढां च समादायाचालिषं स्वपुरं प्रति ॥ ६८६ ॥
मार्गे चागच्छतानेकशिष्यो[2] गुरुरयं मया । अदर्शि समवसृतः कल्याणमिव मूर्तिमत् ॥ ६८७ ॥
तत्र भक्त्या परमया वंदितोऽयं मुनिर्मया । कर्णामृतप्रपाधर्मदेशना चास्य शुश्रुवे ॥ ६८८ ॥
देशनांते मया पृष्टः कियदायुर्ममेत्यसौ । दत्तोपयोगश्चावोचत् पंचैव दिवसा इति ॥ ६८९ ॥

कर्परदेवस्य वृत्तान्तः ।

१ अदित दत्तवान् । २ तृतीयैकवचनम् ।

आसन्नं मरणं ज्ञात्वा ततोऽभैषमकंपिषि । महाभयं प्राणभयं सर्वेषामपि देहिनाम् ॥ ६९० ॥
सूरिमाँ स्माह मा भैषी वत्सादत्स्वानगारताम् । अप्येकाहपरिव्रज्यावश्यं स्वर्गापवर्गदा ॥ ६९१ ॥
ततः प्रव्रजितोऽमुष्मादस्यादेशादिहागमम् । शुक्लध्याने स्थितो घातिक्षयात् केवलमासदम् ॥ ६९२ ॥
इत्युक्त्वा रचयन्योगनिरोधं सिंहकेशरी । भवोपग्राहिकर्माणि हत्वागात् परमं पदम् ॥ ६९३ ॥
पुण्यक्षेत्रे सुरैर्नीत्वा तस्य केवलिनो वपुः । तत्कालमग्निसंस्कारपात्रीचक्रे शुभाशयैः ॥ ६९४ ॥
यथार्थनामा विमलमतिः कुलपतिस्तु सः । प्रव्रज्यां श्री यशोभद्रसूरिपादांतिकेऽग्रहीत् ॥ ६९५ ॥
दवदंत्यपि दांतात्मा तं महर्षिमभाषत । ममापि भगवन् देहि प्रव्रज्यां मुक्तिमातरम् ॥ ६९६ ॥
यशोभद्रोऽवदत्सूरिरद्यापि दवदंति ते । नलेन सह भोक्तव्या भोगा नार्हसि तद्व्रतम् ॥ ६९७ ॥
विभातायां विभावर्यां सूरिरुत्तीर्य पर्वतात् । पादैः पवित्रयामास तत्तापसपुरं पुरम् ॥ ६९८ ॥
तत्र चैत्यं नमस्कृत्य सोऽर्हद्धर्मोपदेशकः । सम्यक्त्वारोपणं चक्रे पौराणां करुणानिधिः ॥ ६९९ ॥
मलीमसांगवसना धर्मध्यानपरायणा । सप्ताब्दीं तत्र भैम्यस्थाद्भिक्षुणीव गुहागृहे ॥ ७०० ॥
पांथ एकोऽन्यदा तस्याः कथयामास यन्मया । दृष्टोऽमुकप्रदेशेऽद्य दवदंति पतिस्तव ॥ ७०१ ॥
दवदंत्यपि तत्कालं पीततद्वचनामृता । रोमांचोच्छ्वसदंगाभूदिदं प्रेम्णो हि लक्षणम् ॥ ७०२ ॥



दवदंत्या सप्तसंवत्सरं यावद् गुहायां वसनम् ।

दवदंत्या
चिखादिषु-
राक्षसी-
शमनम् ।

कोऽयमाप्यायति[1] मामिति भीमसुता सती । अधावतानु तच्छब्दं शब्दवेधीव मार्गणः[2] ॥७०३॥
भीमजाया गुहामध्याकर्षणप्रतिभूरिव । तां गुहाया स आकृष्य क्वचनापि तिरोदधे ॥७०४॥
सा ददर्श न तं पांथमत्यजत्तां गुहामपि । इत्यभूदुभयभ्रष्टा दैवं दुर्बलघाति हि ॥७०५॥
पतिता सा महारण्ये ययौ तस्थावुपाविशत् । व्यलुठद्व्यलपद्भूयो भूयोऽश्रांतं रुरोद च ॥७०६॥
किं करोमि क्व यामीति विमृशंती विमर्शवित् । तामेव गंतुमारेभे कंदरामादरेण सा ॥७०७॥
सा राक्षस्यैकया दृष्टा छागी वृक्येव वर्त्मनि । प्रसारितास्यगुहया खादिष्यामीति चौच्यत ॥७०८॥
भैम्यूचे यदि मे भर्ता नलो मनसि नापरः । तत्सतीत्वप्रभावेण हताशा भव राक्षसि ॥७०९॥
सर्वज्ञो भगवानष्टादशदोषविवर्जितः । यद्यर्हन्नेव देवो मे हताशा भव राक्षसि ॥७१०॥
अष्टादशब्रह्मरता विरताः करुणापराः । साधवो गुरवश्चेन्मे हताशा भव राक्षसि ॥७११॥
आजन्मापि मम स्वांते विलग्नो वज्रलेपवत् । अस्ति यद्यार्हतो धर्मो हताशा भव राक्षसि ॥७१२॥
तच्छ्रुत्वा राक्षसवधूरमुंचत्तच्चिखादिषाम्[3] । महर्द्धय इवामोघवचना हि पतिव्रताः ॥७१३॥
न सामान्येयमन्यूनप्रभावेति प्रणम्य ताम् । क्षणादपि तिरोधत्त स्वप्नायातेव राक्षसी ॥७१४॥
यांती चाग्रे जलाकारतरंगीभूतवालुकाम् । ददर्शाद्रिनदीमेकां निर्जलां नलवल्लभा ॥७१५॥

---

१ वर्धापयति आनंदयतीति यावत् । २ बाणः । ३ खादितुमिच्छा चिखादिषा ताम् ।

शून्योपवनकुल्यायामिव तस्यामनंभसि । उदन्यंती[1] दवदंती शुष्यत्तालुरदोऽवदत् ॥ ७१६ ॥
यदि मे मानसं सम्यग्दर्शनेनाधिवासितम् । तदत्रोद्वीचिवार्यस्तु गंगायामिव निर्मलम् ॥ ७१७ ॥
इत्युक्त्या पार्ष्णिघातेन भूतलं प्रजहार सा । सद्यो नद्यंबुयुक्ताभूदिंद्रजालनदीव सा ॥ ७१८ ॥
क्षीरोदधिसिरोद्भूतमिव स्वादु यथारुचि । करेणुकेव तद्भैमी पपौ क्षीरोज्वलं जलम् ॥ ७१९ ॥
ततोऽपि यांती वैदर्भी परिश्रममुपेयुषी । उपाविशद्वटस्याधो वटवासिवधूरिव[2] ॥ ७२० ॥
तां तथा स्थामथाद्राक्षुः पांथाः सार्थादुपागताः । ऊचुश्च कासि भद्रे त्वं देवीव प्रतिभासि नः ॥ ७२१ ॥
सोचे मर्त्यास्म्यहं सार्थभ्रष्टारण्ये वसामि च । यियासुस्तापसपुरं नियुग्ध्वं मां तदध्वनि ॥ ७२२ ॥
तेऽवोचन् याती यत्रास्तं रविस्तां दिशमाश्रयेः । तवाध्वानं दर्शयितुं नेश्महे वयमुत्सुकाः ॥ ७२३ ॥
वारि चादाय यास्यामः सार्थे स्वस्मिन्नितोऽस्ति सः । तत्रैषि चेन्नयामस्त्वां वसति क्वापि पत्तने ॥ ७२४ ॥
तं सार्थं तैः सहागाच्च तत्र तां करुणापरः । धनदेवः सार्थवाहोऽपृच्छत् का त्वं किमत्र च ॥ ७२५ ॥
भैम्यूचेऽस्मि वणिक्पुत्री समं भर्त्रा पितुर्गृहे । चलिता निशि सुप्तापि तेन त्यक्तास्मि वर्त्मनि ॥ ७२६ ॥
त्वदीयैः पुरुषैरत्रानीताहं सोदरैरिव । तन्मां नय महाभाग स्थाने वसति कुत्रचित् ॥ ७२७ ॥
सार्थेशोऽवददचलपुरे यास्याम्यहं पुरे । त्वमप्यागच्छ हे वत्से त्वां हि नेष्यामि पुष्पवत् ॥ ७२८ ॥

दवदंत्या सार्थेण सहाचलपुरं प्रतिगमनम् ।

१ उदकमिच्छंतीम् । २ वटवासी यक्षस्तस्य वधूरिव ।

दवदंत्या
जिनो–
पासना ।

इत्युक्त्वा सार्थवाहस्तां स्नेहलः स्वां सुतामिव । अधिरोप्योत्तमे याने गंतुं प्रास्थित सत्वरः ॥ ७२९ ॥
अथैकस्मिन्नद्रिकुंजे वारिझात्कारनिर्झरे । सार्थमावासयामास सार्थनाथशिरोमणिः ॥ ७३० ॥
वैदर्भी सुस्थिता तत्र सुखसुप्ताशृणोन्निशि । नमस्कारं पठ्यमानं केनचित्सार्थवर्तिना ॥ ७३१ ॥
उवाच सार्थवाहं सा नमस्कारं पठन्नसौ । साधर्मिको मे तदमुं दिदृक्षेऽहं त्वदाज्ञया ॥ ७३२ ॥
तस्याः पूरयितुं वांछां सार्थवाहः पितैव सः । तामादाय नमस्कारश्रावकस्याश्रयं ययौ ॥ ७३३ ॥
तं श्रावकं बंधुमिव कुर्वाणं चैत्यवंदनाम् । ददर्शाथ पटौकस्थं* भैमी शममिवांगिनम् ॥ ७३४ ॥
आचैत्यवंदनं भैमी तत्रास्थाच्च निषेदुषी । तं महाश्रावकमनुमोदमानाश्रुपूर्णदृक् ॥ ७३५ ॥
ददर्श वंद्यमानं च पटालिखितमार्हतम् । जीमूत+श्यामलं बिंबं ववंदे च नलप्रिया ॥ ७३६ ॥
चैत्यवंदनपर्यंते कृतस्वागतमंगलम् । भैमी पप्रच्छ तं भ्रातः कस्येदं बिंबमर्हतः ॥ ७३७ ॥
श्रावकः कथयामास धर्मशीले स्वसः शृणु । मल्लेरेकोनविंशस्यार्हतो बिंब भविष्यतः ॥ ७३८ ॥
भविष्यतोऽर्हतो बिंबं कारणात् पूजयाम्यहम् । तच्चाद्य शृणु कल्याणि मम कल्याणकारणम् ॥ ७३९ ॥
अब्धिकांचीशिरोरत्ने कांचीपुर्यामहं वणिक् । तत्रान्यदा धर्मगुप्तो ज्ञानवान् मुनिरराययौ ॥ ७४० ॥
सः मुनिः समवासार्षीदुद्याने रतिवल्लभे । तं वंदित्वा पर्यपृच्छं क्व तीर्थे निर्वृति[1]र्मम ॥ ७४१ ॥

१ मोक्षः । * वस्त्रेण निर्मितं गृहम् – लोके 'तंबू' । + मेघ ।

स आख्यन्मल्लिनाथस्यार्हतस्तीर्थे दिवच्युतः । प्रसन्नचंद्रो राजा त्वं मिथिलायां भविष्यसि ॥ ७४२ ॥
मल्लेरेकोनविंशस्यार्हतः संप्राप्य दर्शनम् । उत्पन्नकेवलज्ञानो निर्वाणं त्वमवाप्स्यसि ॥ ७४३ ॥
तदादि मल्लिनाथेऽहमुत्पन्नात्यंतभक्तिकः । पटे तद्बिंबमालेख्य धर्मज्ञे पूजयाम्यहम् ॥ ७४४ ॥
आख्यायेति स्ववृत्तांतं पप्रच्छ श्रावकोऽप्यदः । धर्मबंधोर्ममाख्याहि कासि त्वं पुण्यदर्शने ॥ ७४५ ॥
तस्मै श्रावकवर्याय धनदेवस्तयोदितम् । सर्वं पतिवियोगादि वृतमाख्यदुदश्रुदृक् ॥ ७४६ ॥
श्रावकोऽपि करन्यस्तहनुर्बाष्पायितेक्षणः । असंमात्रेव वैदर्भ्यां दुःखेनाधिष्ठितोऽवदत् ॥ ७४७ ॥
मा शोचीरीदृशं कर्मोदितं ते दुःखकारणम् । पिता ते सार्थवाहोऽयं भ्राताहं सुखमास्व तत् ॥ ७४८ ॥

दवदंत्या–
ऽचल–
पुराप्तिः ।

प्रभाते सार्थवाहोऽपि प्राप्याचलपुरं पुरम् । मुमोच तत्र वैदर्भीमन्यतोऽगात् स्वयं पुनः ॥ ७४९ ॥
तृषिता नगरद्वारवाप्यामाशु विवेश सा । लक्षिता जलहर्त्रीभिर्मूर्त्तेव जलदेवता ॥ ७५० ॥
वामोऽङ्घ्रिर्गोधया तस्या जग्रसे जलसीमनि । आयाति दुःखिनां दुःखं तत्सौहृदादिव ॥ ७५१ ॥
सापाठीन्त्रिर्नमस्कारं तत्प्रभावेण गोधया । मुक्तोऽङ्घ्रिरिंद्रजालिक्या गलांतर्धृतवस्त्विव ॥ ७५२ ॥
मुखाङ्घ्रिहस्तं प्रक्षाल्य पीत्वा तद्वारि हारि च । मंदं मंदं मरालीव सा वाप्या निर्ययौ बहिः ॥ ७५३ ॥
सा विषण्णा निषण्णा च शीलरत्नकरंडिका । वरंडिका[1] तटे वाप्याः पावयंती दृशा पुरम् ॥ ७५४ ॥



१ भीताः । * मुखस्याधोभागः, लोके 'हडपची' । • गुजरि 'घो' । + सुंदरम् ।

ऋतुपर्णनृपस्तत्राभूत् सुपर्ण[1] इवौजसा । चंद्रोज्ज्वलयशाश्चंद्रयशास्तस्य च गेहिनी ॥७५५॥
तत्र चंद्रयशोदास्यो वार्यानेतुं समाययुः । मस्तकन्यस्तकलशा मिथो नर्मपरायणाः ॥७५६॥
दास्यस्ता दुर्दशां प्राप्तामपिताममरीमिव । ददृशुः पंकमग्नापि पद्मिन्येव हि पद्मिनी ॥७५७॥
भैम्या रुपं प्रपश्यंत्यस्ताश्च वाप्यां सविस्मयाः । मंदं मंदं प्रविविशुर्मंदं मंदं च निर्ययुः ॥७५८॥
गत्वा च कथयामासुस्तां तथारुपशालिनीम् । स्वामिन्यै चंद्रयशसे संप्राप्तमिव शेवधिम्[2] ॥७५९॥
[3]ताश्च चंद्रयशाः प्रोचे समानयत तामिह । मत्पुत्र्याश्चंद्रवत्याः सा भगिनीव भविष्यति ॥७६०॥
वापीपरिसरे तस्मिन्नेव ता द्रुतमाययुः । नगराभिमुखां लक्ष्मीमिवाथ ददृशुश्च ताम् ॥७६१॥
ऊचुश्च नगरेऽमुष्मिन्नृतुपर्णस्य भूपतेः । राज्ञी चंद्रयशोनाम्नी त्वामाह्वयति गौरवात् ॥७६२॥
आज्ञापयति च त्वं हि पुत्री चंद्रवतीव मे । तदेहि भद्रे दुःखेभ्यः प्रकल्पय जलांजलिम् ॥७६३॥
तिष्ठंती शून्यचित्तेह छलमाप्य दुरात्मभिः । व्यंतरादिभिराविष्टा त्वमनर्थमवाप्स्यसि ॥७६४॥
एवं च चंद्रयशसो वचनेनार्द्रमानसा । दवदंत्यपि पुत्रीत्वस्नेहक्रीता ततोऽचलत् ॥७६५॥
स्वामिन्या धर्मपुत्री त्वमपि स्वामिन्यसीति सा । ताभिर्विनयवक्त्रीभिरनीयत नृपौकसि ॥७६६॥
चंद्रयशाः पुष्पदंत्या भैमीमातुः सहोदरा । मम मातृष्वसैवेति विवेद न तु भीमजा ॥७६७॥

दवदंत्या मातृस्वसुः गृहेऽज्ञात–वासः ।

१ गरुडः । २ शेर्धनादिमोहस्यावधिं कुबेरनिधिमिति यावत् । ३ द्वितीया बहुवचनम् । * वक्त्रम्–मुखम् ।

जामेयी दवदंती मेऽस्तीति चंद्रयशाः पुनः । विवेद बाल्यदृष्टां तु तामुपालक्षयन्न हि ॥ ७६८ ॥
पुत्रीप्रेम्णा तु तां दूरादपि राज्ञी ददर्श सा । प्रमाणमंतःकरणं खल्विष्टानिष्टनिर्णये ॥ ७६९ ॥
सस्वजे चंद्रयशसातिगाढं च नलप्रिया । तदंगसादं[1] श्रमजमपनेतुमिवादरात् ॥ ७७० ॥
वर्षंत्यश्रूणि वैदर्भी राज्याः पादाववंदत । तत्प्रीत्यवक्रयं[2] पादक्षालनेनेव तन्वती ॥ ७७१ ॥
पृष्टा च चंद्रयशसा कासि त्वमिति भीमजा । कथयामास तत्सर्वं सार्थवाहाय यत्पुरा ॥ ७७२ ॥
वैदर्भीमभ्यधाच्चंद्रयशाः कल्याणि मद्गृहे । यद्वच्चंद्रवती तद्वत्त्वमप्येधस्व शर्मभिः ॥ ७७३ ॥
देव्यन्यदा चंद्रयशाः प्रोचे चंद्रवतीं सुताम् । मज्जामेय्या[+] दवदंत्या सदृशीयं तव स्वसा ॥ ७७४ ॥
तस्याः संभाव्यते नैवंविधमागमनं क्वचित् । अस्माकमपि यः स्वामी नलः पत्नी हि तस्य सा ॥ ७७५ ॥
स चतुश्चत्वारिंशतियोजनानां शते च सा । कथमागमनं तस्या दुर्दशा चेदृशी कुतः ॥ ७७६ ॥
सा च चंद्रयशा देवी प्रत्यहं नगराद्बहिः । दीनानाथादिपात्रेभ्यो ददौ दानं यथारुचि ॥ ७७७ ॥
तामन्यदा च वैदर्भी दानमत्र ददाम्यहम् । आगच्छेन्मे यदि पुनः पतिर्याचकवेषभाक् ॥ ७७८ ॥
आयुक्ता चंद्रयशसा दवदंती तदाद्यपि । पत्याशया क्लेशसहा ददौ दानं यथास्थिति ॥ ७७९ ॥
दानार्थिनञ्च प्रत्येकं भैम्यपृच्छद्दिने दिने । ईदृग्रूपः पुमान् कोऽपि किं युष्माभिरदृश्यत ॥ ७८० ॥

दवदंत्या नलप्राप्त्यै दान-प्रारम्भः ।

१ तदंगक्षयम् जीर्णतामिति यावत् । २ तत्प्रीतेरवक्रयो मूल्यं तम् । * आलिङ्गनमकरोत् । * मम भगिनीपुत्र्या ।

दानशालास्थितान्येद्युश्चौरमेकं ददर्श सा । बद्ध्वारक्षैर्नीयमानं वाद्यमानाग्रडिंडिमम् ॥ ७८१ ॥
अपृच्छद्भीमतनयाप्यारक्षानमुना हि किम् । अपराद्धं वधप्राप्तिप्रक्रियास्य यदीदृशी ॥ ७८२ ॥
एष चंद्रवतीदेव्या जह्रे रत्नकरंडिकाम् । वध्योऽसौ कर्मणानेनेत्याख्यन्नारक्षपूरुषाः ॥ ७८३ ॥
चौरोऽपि नत्वा वैदर्भीमूचे दृष्टोस्मि ते दृशा । कथं प्राप्स्यामि मरणं शरणं भव देवि मे ॥ ७८४ ॥
आरक्षानागमय्योचे तं चौरं दवदंत्यपि । मा भैषीर्जीवितव्येन कुशलं ते न संशयः ॥ ७८५ ॥
इत्युक्त्वा भीमतनया सतीत्वश्रावणां व्यधात् । सत्यस्मि चेद्विशीर्यतां बंधनान्यभि*तोऽस्य तु ॥ ७८६ ॥
सतीत्वश्रावणामेवं कृत्वा भृंगा+रवारिणा । त्रिस्तमाच्छोटयच्चौरं द्राक् तद्बंधाश्च तुत्रुटुः ॥ ७८७ ॥
अथोत्थिते कलकले किमेतदिति चिंतयन् । ऋतुपर्णनृपस्तत्राजगाम सपरिच्छदः ॥ ७८८ ॥
सविस्मयो स्मेरनेत्रो नेत्रकैरवकौमुदीम् । दवदंतीं दंतकांतिधौताधरदलोऽवदत् ॥ ७८९ ॥
सर्वत्र राजधर्मोऽयं [1]मात्स्यन्यायनिषेधकः । यद्दुष्टनिग्रहः शिष्टपालनं च यशस्विनि ॥ ७९० ॥
राजा गृह्णन् करं पृथ्व्या रक्षेच्चौराद्युपद्रवम् । चौरादिनां हि पापेन लिप्येत स्वयमन्यथा ॥ ७९१ ॥
तत् पुत्रि न निगृह्णामि यद्यमुं रत्नतस्करम् । तत्परस्वापहाराय प्रयतेताभयो जनः ॥ ७९२ ॥
भैम्यूचे मयि पश्यंत्यां यदि मार्येत देहभृत् । श्राविकायाः कृपालुत्वं तदा मे तात कीदृशम् ॥ ७९३ ॥

दवदंत्या सतीत्व–प्रभावेण चौर–बन्धनानां त्रोटनम् ।

१ एको बलवान्मत्स्योऽन्यान्निर्बलान्मत्स्यान् भक्षयतीति मात्स्यन्याय : । * समन्तात् । + सुवर्णकलश ।

क्षम्यतामपराधोऽस्य शरणाश्रित एष मे । दुष्टरोग इवास्यार्तिः संक्रांता तात मय्यपि ॥ ७९४ ॥
ऋतुपर्णनरेन्द्रोऽथ तं मुमोच मलिम्लुचम् । महासत्या धर्मपुत्र्या एतस्या उपरोधतः ॥ ७९५ ॥
मुक्तमात्रः स चौरोऽपि त्वं मे मातेति भीमजाम् । प्रतिपेदे तिलकयन् भालं भूतलरेणुना ॥ ७९६ ॥
प्राणदानोपकारां तां दिवानिशमविस्मरन् । मुक्तः स तस्करो भैमीं नमश्चक्रे दिने दिने ॥ ७९७ ॥
तमन्यदा चौरवरं पप्रच्छ नलवल्लभा । कोऽसि त्वं कुत आयासीरपशंकं निवेदय ॥ ७९८ ॥
स आख्यत्तापसपुरे पुरे परमसंपदः । वसंतसार्थवाहस्य दासोऽहं पिंगलाह्वयः ॥ ७९९ ॥
व्यसनैरभिभूतेन वसंतस्यैव वेश्मनि । खनित्वा खात्रमग्राहि कोशसारं मया निशि ॥ ८०० ॥

चौर वृत्तान्तः ।

नष्टोऽहं लोप्त्रपाणिश्च प्राणत्राणपरायणः । लुंटाकैर्लुंटितो मार्गे कियत् क्षेमं दुरात्मनाम् ॥ ८०१ ॥
अत्रागत्याथ राजानमृतुपर्णमसेविषि । सेवां मनस्वी कः कुर्यात् कुर्याद्वा तर्हि भूपतेः ॥ ८०२ ॥
ततः संचरता राजहर्म्ये चाधर्मबुद्धिना । मया चंद्रवतीदेव्या दृष्टा रत्नकरंडिका ॥ ८०३ ॥
तद्दर्शनान्मनोऽचालीन्मम तद्धरणेच्छया । परस्त्रीदर्शनात् पारदारिकस्येव दुर्धियः ॥ ८०४ ॥
चिल्ली* हारमिवाहार्षमथ रत्नकरंडिकाम् । विधायाप्रपदीनं चोत्तरीयं निरगां ततः ॥ ८०५ ॥
ऋतुपर्णनरेन्द्रेण कैश्चिच्चौरेङ्गितैरहम् । लक्षितोऽस्त्यतिदक्षेण नालक्ष्यं दक्षताजुषाम् ॥ ८०६ ॥

१ चरणपृष्ठपर्यंतम् । * भाषायाम् 'समडी'

आरक्षैः पार्थिवादिष्टैर्बद्धोऽहं तत्क्षणादपि । वधार्थं नीयमानश्च त्वामद्राक्षं महासति ॥ ८०७ ॥
दूरादपि त्वां शरणं प्रपन्नस्तारमारटन् । मोचितोऽस्मि त्वया छाग इव वध्यत्वमागतः ॥ ८०८ ॥
अन्यच्च तापसपुराद्गतायां स्वामिनि त्वयि । विंध्याकृष्टो द्विप इव वसंतो भोजनं जहौ ॥ ८०९ ॥
बोधितश्च यशोभद्रसूरिणान्यजनेन च । उपोषितः सप्तरात्रं बुभुजे सोऽष्टमे दिने ॥ ८१० ॥
स वसंतोऽन्यदादाय महामूल्यमुपायनम् । जगाम कूबरनृपं द्रष्टुं श्रीदसमं[1] श्रिया ॥ ८११ ॥
उपायनेन तुष्टश्च तस्मै कूबरपार्थिवः । प्रददौ तापसपुरराज्यं छत्रादिलांछितम् ॥ ८१२ ॥
तं सामंतपदे कृत्वा तस्यादादभिधांतरम् । वसंतश्रीशेखर इत्यवनीशो नलानुजः ॥ ८१३ ॥
कूबरेण विसृष्टश्च भंभया वाद्यमानया । आगतस्तापसपुरे वसंतो राज्यमन्वशात् ॥ ८१४ ॥
भैम्यूचे वत्स दुःकर्म कृतं प्रव्रज्य निस्तर । प्रमाणं मातुरादेश इति चोवाच पिंगलः ॥ ८१५ ॥
तत्र चागादनगारद्वितीयं पर्यटत्तदा । प्रत्यलाभि च वैदर्भ्या दोषवर्जितभिक्षया ॥ ८१६ ॥
बभाषे तावृषी भैमी भगवंतावयं पुमान् । यदि योग्यस्तदेतस्य व्रतदानात् प्रसीदतम् ॥ ८१७ ॥
ताभ्यां योग्योऽयमित्युक्ते पिंगलोऽयाचत व्रतम् । ततो देवगृहे नीत्वा सद्यः प्राव्राजितश्च सः ॥ ८१८ ॥
विदर्भेशोऽन्यदाश्रौषीन्नलो यदनुजन्मना । द्यूते हारितराज्यश्रीः कूबरेण प्रवासितः ॥ ८१९ ॥
दवदंतीं गृहीत्वा च स विवेश महाटवीम् । न ज्ञायते गतः क्वापि किं जीवति मृतोऽथवा ॥ ८२० ॥

मातृस्वस्रा दवदंतीति ज्ञानम् ।

---

१ कूबेरसमं ।

पुष्पदंत्यपि तद्राज्ञो मुखाच्छ्रुत्वारुदद्भृशम् । नारीणामातुरत्वे हि न दूरे नयनोदकम् ॥ ८२१ ॥
ततश्च हरिमित्राख्यस्तदन्वेषणहेतवे । स्वाम्यादेशपटू राजबटू राज्ञा न्ययोज्यत ॥ ८२२ ॥
नलं च दवदंतीं च बटुः सर्वत्र शोधयन् । स ययावचलपुरेऽविक्षच्च नृपपर्षदि ॥ ८२३ ॥
पप्रच्छ तं चंद्रयशा निषण्णं नृपतेः पुरः । कच्चित् क्षेमं पुष्पदंत्यास्तदीयस्य जनस्य च ॥ ८२४ ॥
स आख्यत् कुशलं देव्याः पुष्पदंत्याः सदोदितम् । नलस्य दवदंत्याश्च कुशलं चिंत्यमीश्वरि[1] ॥ ८२५ ॥
उक्तश्च किं ब्रवीषीति देव्याः सोऽकथयद्बटुः । नलभैम्यौः कथां द्यूतादारभ्यात्यंतदुःश्रवाम् ॥ ८२६ ॥
ततश्च चंद्रयशसि रुदंत्यां प्ररुरोद च । हर्षवार्तास्वनध्यायी राजलोकस्तदाखिलः ॥ ८२७ ॥
सर्वं दुःखातुरं प्रेक्ष्य क्षामकुक्षिबुभुक्षया । बटुर्ययौ दानशालां भोज्यचिंतामणिर्हि सा ॥ ८२८ ॥
तत्रासीनो भोजनार्थं दानशालाधिकारिणीम् । दवदंतीं स्वामिपुत्रीमुपलक्षयति स्म सः ॥ ८२९ ॥
स ववंदे दवदंत्याः पादौ रोमांचमुद्वहन् । विस्मृतक्षुद्व्यथो हर्षादुत्फल्लाक्षो जगाद च ॥ ८३० ॥
देवि केयमवस्था ते निदाघ[2] इव वीरुधः[3] । दिष्ट्या दृष्टासि जीवंती सर्वेभ्यः स्वस्ति संप्रति ॥ ८३१ ॥
इत्युत्थाय द्रुतं चंद्रयशोदेवीमवर्धयत् । तवास्ति दानशालायां दवदंतीति संलपन् ॥ ८३२ ॥
तच्छ्रुत्वा दानशालायां गत्वा चंद्रयशा द्रुतम् । दवदंतीमालिलिंग मरालीव मृणालिनीम् ॥ ८३३ ॥
ऊचे च वत्से धिग्धिङ्मां यया नास्युपलक्षिता । सामुद्रिकैरद्वितीयैर्लक्षणैर्व्यञ्जितापि हि ॥ ८३४ ॥

मातृस्वस्रा दवदंतीति ज्ञानम् ।

---

१ विचारणीयम् – शंकितम् । २ ग्रीष्मर्तौ । ३ लतायाः ।

किमात्मगोपनं कृत्वा वंचितास्मि त्वयानघे । यद्येवं दुर्दशा दैवात् का ह्री मातृकुले निजे ॥८३५॥
हा वत्से किं त्वया मुक्तो नलो मुक्तासि तेन वा । नूनं मुक्तासि तेन त्वं त्वं सती तं न मुंचसि ॥८३६॥
त्वयापि यदि हीयेत* दुर्दशापतितः पतिः । उदयेत तदा नूनं पश्चिमायां दिवाकरः ॥८३७॥
नलात्याक्षीः कथमिमां मत्पार्श्वे नामुचः कथम् । किं ते कुलोचितमिदं दयितां त्यजतः सतीम् ॥८३८॥
दुःखं गृह्णामि ते वत्से क्रियाः समवतारणम्[1] । आगः+ सहस्व मे यत्त्वं न मयास्युपलक्षिता ॥८३९॥
तमोऽहिगरुडः कृष्णनिशायामपि भास्करः । क्व वा स तिलको बाले तवालिक•सहोद्भवः ॥८४०॥
इति स्ववदनांभोजनिष्ठीवनरसेन सा । भैम्या अमार्जयद्भालं जिघ्रंती मूर्ध्नि तां मुहुः ॥८४१॥

मातृस्वस्रा दवदंतीति ज्ञानम् ।

रैपिंडोऽ[2]ग्न्युत्तीर्ण इव मेघमुक्त इवार्यमा । तत्कालं भालतिलको वैदर्भ्या दिद्युतेतराम् ॥८४२॥
ततश्चास्नपयच्चंद्रयशा देवी नलप्रियाम् । गंधोदकैः स्वपाणिभ्यां देवताप्रतिमामिव ॥८४३॥
वाससी धवले सूक्ष्मे ज्योत्स्नारसमये इव । भैमी चंद्रयशोदेव्यार्पिते परिदधे ततः ॥८४४॥
देवी चंद्रयशाः प्रीता पाणिनादाय भीमजाम् । प्रमोदवारिसरसी निषसाद नृपांतिके ॥८४५॥
तदा चास्तं ययौ सूर्योऽपूर्यताशेषमंबरम् । सूच्यभेदेन तमसा कज्जलेनेव भाजनम् ॥८४६॥
विवेश सांधतमसं तदा सदसि भूपतेः । भैमीतिलकतेजोभिः स्खलितं काष्ठकै[3]रिव ॥८४७॥

१ दुःखस्योत्तारणं क्रियाः विधेयः । २ सुवर्णपिंडः । ३ वेत्रधारिभिः । * त्यजेत । + अपराधम् । • भालम् ।

उवाच देवीं नृपतिर्नन्वि[1]यायास्तमर्यमा । नेह दीपो न वा वह्निरह्नीवोद्योत एष किम् ॥ ८४८ ॥
जन्मतः सहसंसिद्धं वैदर्भ्यास्तिलकं च तम् । राज्ञी प्रादर्शयद्राज्ञे ज्योतिर्जलमहाह्रदम् ॥ ८४९ ॥
प्यधात्तं तिलकं राजा कौतुकेन स्वपाणिना । अभूद्गिरिगुहाप्रायं तमसा मंक्षु तत्सदः ॥ ८५० ॥
अपसार्य पुनः पाणिं पप्रच्छातुच्छसंमदः । राजा पि[2]त्रीयितो भैमीं राज्यभ्रंशादिकां कथाम् ॥ ८५१ ॥
न्यग्मुखी कथयामास रुदंती दवदंत्यपि । नलकूबरयोर्द्यूतादारभ्य सकलां कथाम् ॥ ८५२ ॥
राजापि स्वोत्तरीयेण भैम्याः संमार्ज्य चक्षुषी । उवाच पुत्रि मा रोदीर्न कश्चिद्बलवान् विधेः ॥ ८५३ ॥

चौरस्य स्वर्ग-गमनम् ।

अत्रांतरे[3] दिवो देवः कश्चिदुत्तीर्य पर्षदि । तत्रागाद्भीमतनयामूचे च रचितांजलिः ॥ ८५४ ॥
दवदंति तवादेशाच्चौरः पिंगलको ह्यहम् । प्रव्रज्य तापसपुरे तदा हि विहरन्नगाम् ॥ ८५५ ॥
तत्र श्मशानमध्येऽस्थामहं प्रतिमया स्थिरः । चितानलोत्थितो दूरं प्रासरच्च दवानलः ॥ ८५६ ॥
तेनाहं दह्यमानोऽपि धर्मध्यानादविच्युतः । स्वयमाराधनां कृत्वा नमस्कारपरायणः ॥ ८५७ ॥
भूपृष्ठे पतितस्तत्र समिधीभू[*]तविग्रहः । विपद्य त्रिदशोऽभूवं नामधेयेन पिंगलः ॥ ८५८ ॥
॥ युग्मम् ॥
ततोऽज्ञासिषमव[4]धे रक्षितोऽस्मि त्वया वधात् । प्रव्रज्यां ग्राहितश्चास्मि तत्प्रभावात् सुरोऽभवम् ॥ ८५९ ॥

---

१ जगाम । २ पितेवाचरितः । ३ स्वर्गात् । ४ अवधिज्ञानात् । * दावानले इन्धनभूतम् शरीरम् यस्य सः ।

मां महापापिनं भद्रे यद्युपैक्षिष्यथास्तदा । अप्राप्तधर्मो मृत्वाहमयास्यं नरके ततः ॥ ८६० ॥
वैदर्भि त्वत्प्रसादेनासदं[1] द्युसदनश्रियम् । इति त्वां द्रष्टुमागच्छं विजयस्व महासति ॥ ८६१ ॥
इत्युक्त्वा च हिरण्यस्य सप्त कोटीः प्रवृष्य सः । सुरस्तिरोधादुत्पत्य विद्युत्पुंज इवांबरे ॥ ८६२ ॥
इति साक्षात्कृतफलं द्युसदा धर्ममार्हतम् । ऋतुपर्णनरेन्द्रोऽपि प्रपेदे विदुषां वरः ॥ ८६३ ॥
संप्राप्तावसरश्चोचे हरिमित्रस्तदा नृपम् । देवादिश चिराद्यातु दवदंती पितुर्गृहे ॥ ८६४ ॥
ततश्च चंद्रयशसाप्युक्तो राजैवमस्त्विति । विदर्भान् प्रति वैदर्भीमादिशत् सेनया सह ॥ ८६५ ॥
आगच्छंतीं दवदंतीं श्रुत्वा भीमनृपोऽभ्यगात् । कृष्टो बलीयसा प्रेम्णा दुर्धरेणेव वाजिना ॥ ८६६ ॥

दवदंत्या पितृ–मिलनम् ।

दृष्टमात्रेऽपि पितरि वैदर्भी पादचारिणी । स्मेरास्यपद्मा[2] धावित्वापतत्तत्पादपद्मयोः ॥ ८६७ ॥
पितुः पुत्र्याश्च सोत्कंठं चिरान्मिलितयोस्तयोः । पतद्भिर्नेत्रसलिलैर्भूरभूद्भूरिकर्दमा ॥ ८६८ ॥
ज्ञात्वा सह समायातां पुष्पदंतीं तदात्मजा । आलिंगति स्म सुदृढं यमुना जाह्नवीमिव[3] ॥ ८६९ ॥
लगित्वा तद्गलेऽरोदीन्मुक्तकंठं नलप्रिया । इष्टे दृष्टे नवमिव दुःखं भवति देहिनाम् ॥ ८७० ॥
प्रक्षाल्य च क्षणादूर्ध्वं मुखांभोजानि वारिणा । ते मिथो वार्तयामासुर्दुःखोद्गिरणपूर्वकम् ॥ ८७१ ॥
अंकमारोप्य वैदर्भीं पुष्पदंती जगाद च । दृष्टास्यायुष्मती दिष्ट्या भाग्यं जागर्ति नः खलु ॥ ८७२ ॥



---

१ प्राप्तं । २ उल्लसितं वदनकमलं यस्याः सा । ३ गङ्गामिव ।

सुखेनास्मद्गृहे कालं गमयंती चिरादपि । पतिं द्रक्ष्यसि जीवन् हि प्राणी भद्राणि पश्यति ॥ ८७३ ॥
हरिमित्राय तुष्टोऽदाद्ग्रामपंचशतीं नृपः । ऊचे च दास्ये राज्यार्धमपि तुभ्यं नलागमे ॥ ८७४ ॥
पुरे गत्वा नृपश्चक्रे दवदंत्यागमोत्सवम् । दिनानि सप्त देवार्चां गुर्वर्चां च विशेषतः ॥ ८७५ ॥
अष्टमेऽह्नि च वैदर्भीं विदर्भपतिरब्रवीत् । तथा करिष्यते शीघ्रं नलः संगंस्यते यथा ॥ ८७६ ॥
तदा च हित्वा वैदर्भीं नलोऽरण्ये परिभ्रमन् । अपश्यदेकतो धूमं वनकक्षात् समुत्थितम् ॥ ८७७ ॥
धूमस्तोमोऽञ्जनश्यामो व्यानशे स नभस्तलम् । अछिन्नपक्षः कोऽप्यद्रिः खे यातीति भ्रमप्रदः ॥ ८७८ ॥
धूमो निमेषमात्रेण ज्वालामालाकरालितः । भुवः प्रादुर्भवम् विद्युद्युतमेघविडंब्यभूत् ॥ ८७९ ॥
वंशानां दह्यमानानां त्रटत्त्रटिति निःस्वनम् । आक्रंदं श्वापदानां च ततः शुश्राव नैषधिः ॥ ८८० ॥
ततो दावानले दीप्ते शब्द शुश्राव मानुषम् । इक्ष्वाकुनल भूपाल रक्ष मां क्षत्रियोत्तम ॥ ८८१ ॥
निष्कारणोपकारी त्वं पुंव्रतेनासि यद्यपि । तथापि तुभ्यमुर्वीशोपकरिष्यामि रक्ष माम् ॥ ८८२ ॥
तं शब्दमभिगच्छंश्च लतागहनमध्यगम् । महोरगं नलोऽद्राक्षीद्रक्ष रक्षेति भाषिणम् ॥ ८८३ ॥
पप्रच्छ च कथं वेत्सि मां मन्नाम मदन्वयम् । कथं वा मानुषी वाक् ते ममाख्याहि महोरग ॥ ८८४ ॥
आख्यत्सर्पोऽहमभवं मनुष्यः पूर्वजन्मनि । तज्जन्माभ्यासतो भाषा मानुषी मे प्रवर्तते ॥ ८८५ ॥
ममास्ति चावधिज्ञानमुज्ज्वलं तेन वेद्म्यहम् । त्वां च त्वन्नामधेयं च त्वद्वंशं च यशोनिधे ॥ ८८६ ।



नलेना–
ऽनलात
सर्परक्षणम् ।

नलो जातानुकंपोऽथ कंपमानस्य भोगिनः । कर्षणायाक्षिपद्वल्लीवनोपरि निजां पटीम् ॥ ८८७ ॥
उत्तरीयांचलं राज्ञो भूलग्नं प्राप्य पन्नगः । अवेष्टयत् स्वभोगेन वालकेनोर्मिकामिव ॥ ८८८ ॥
पन्नगेन तदाक्रांतमुत्तरीयं निजं नलः । उदपानाद्[1] रज्जुमिव चकर्षोत्कर्षभाग् नृपः ॥ ८८९ ॥
गत्वोखरप्रदेशे च वनवह्नेरगोचरे । मुमुक्षुं मंक्षु भूपालं दंदशूकोऽदशत् करे ॥ ८९० ॥
स्वेदबिंदुमिवाच्छोट्य तं नागमवनीतले । नलः प्रोवाच भोः साधु कृतज्ञेन कृतं त्वया ॥ ८९१ ॥
ममोपकारिणः साधूपकृतं पन्नग त्वया । यो हि पाययति क्षीरं त्वज्जात्या सोऽपि दश्यते ॥ ८९२ ॥
नलस्यैवं विवदतो विषेणांगे प्रसर्पता । कुब्जतां वपुरापेदे धन्वेवाधिज्यतां गतम् ॥ ८९३ ॥
सर्पदंशेन नलस्य कुब्जीभवनम् ।
सोऽणुपिंगकचः[2] प्रेत इव लंबौष्ट उष्ट्रवत् । सूक्ष्मपादकरः स्थूलोदरो रंक इवाभवम् ॥ ८९४ ॥
सर्वांगमपि बीभत्सविकृताकारधार्यभूत् । आशीविषविषग्रस्तो नलो नट इव क्षणात् ॥ ८९५ ॥
अचिंतयच्च रुपेणामुना मे जीवितं मुधा । गृह्णामि तत् परिव्रज्यां परलोकोपकारिणीम् ॥ ८९६ ॥
नलस्यैवं चिंतयतः सोऽहिस्त्यक्त्वाहिरुपताम् । दिव्यालंकारवसनस्तेजोरुपः सुरोऽभवत् ॥ ८९७ ॥
ऊचे च मा विषीदः स्म तवाहं निषधः पिता । तुभ्यं दत्वा तदा राज्यं परिव्रज्यामुपात्तवान् ॥ ८९८ ॥
परिव्रज्याफलेनाहं ब्रह्मलोके सुरोऽभवम् । अद्राक्षं चावधिना त्वां प्रपेदानमिमां दशाम् ॥ ८९९ ॥

१ कूपात् । २ केशः ।

सर्पदंशेन नलस्य कुब्जी-भवनम् ।

मया मायोरगीभूय दुर्दशापतितस्य ते । गंडोपरि[1] पिटक[2]वत् कृतांगेषु विरुपता ॥ ९०० ॥
अंगेषु वैरुप्यमपि मयोत्पादितमीदृशम् । उपकाराय मन्यस्व कटुभेषजपानवत् ॥ ९०१ ॥
त्वया दासीकृताः सर्वे राजानस्ते तव द्विषः । वैरुप्यानुपलक्ष्यं त्वां नोपद्रोष्यंति संप्रति ॥ ९०२ ॥
इदानीमपि मा कार्षीः परिव्रज्यामनोरथम् । भोक्तव्या भूस्तवाद्यापि तावत्येव चिरं नल ॥ ९०३ ॥
कथयिष्यामि समयं परिव्रज्योचितं च ते । सोऽहं मोहूर्तिक इव सुस्थितोऽतः परं भव ॥ ९०४ ॥
पुत्रेदं श्रीफलफलमिमं रत्नकरंडकम् । गृहाण यत्नाद्रक्षेश्च क्षत्रव्रतमिवात्मनः ॥ ९०५ ॥
स्वरुपार्थी यदा त्वं स्याः श्रीफलं स्फोटयेस्तदा । देवदूष्याण्यदूष्याणि द्रक्ष्यसि त्वं तदंतरे ॥ ९०६ ॥
तदैवोद्घाटये रत्नकरंडमपि तत्र तु । हारादीन्यतिहारीणि द्रक्ष्यस्याभरणानि च ॥ ९०७ ॥
सद्यः परिहितैर्देवदूष्यैराभरणैश्च तैः । तदेव देवताकारं निजं रुपमवाप्स्यसि ॥ ९०८ ॥
नलः पप्रच्छ तं तात दवदंती स्नुषा तव । किं यत्र मुक्ता तत्रास्ति गता वा क्वचिदन्यतः ॥ ९०९ ॥
देवोऽप्याख्यत्ततः स्थानाद्विदर्भागमनावधि । भैम्या वृत्तांतमखिलं तत्सतीत्वं प्ररुपयन् ॥ ९१० ॥
जगाद च नलं वत्स किमरण्ये भ्रमन्नसि । नयामि तत्र स्थाने त्वां यस्मिञ्जिगमिषा तव ॥ ९११ ॥
नलः प्रोवाच मां देव सुसुमारपुरं नय । देवोऽपि हि तथा कृत्वा जगाम निजधामनि ॥ ९१२ ॥
नलोऽपि नंदनवने तत्पुरोपांतवर्त्मनि । स्थितो ददर्शायतनं सिद्धायतनसंनिभम् ॥ ९१३ ॥

१ लोके 'फोल्लो' । २ लोके 'फोल्लो' ।

तत्र चैत्ये विशन् कुब्जो ददर्श च तदंतरे । प्रतिमां नमिनाथस्योत्पुलकस्तामवंदत ॥ ९१४ ॥
ततो नलः सुसुमारनगरद्वारमभ्यगात् । तत्र चालानमुन्मूल्य भ्रमन्मत्तगजोऽभवत् ॥ ९१५ ॥
स्पृष्टासनोऽनिलेनापि स व्यधूनयदासनम् । उपरि स्फुरतो हस्तेनाचकर्ष खगानपि ॥ ९१६ ॥
दृष्टिं दृष्टिविषस्येव जहुस्तस्येभजीविकाः[१] । महावात इवोद्यानतरुनपि बभंज सः ॥ ९१७ ॥
दधिपर्णनृपस्तत्र वप्रमारुह्य सत्वरम् । उच्चैरुवाच तं नागं वशं नेतुमनीश्वरः ॥ ९१८ ॥
कुर्याद्गजं मे यो वश्यमवश्यं तस्य वांछितम् । ददामि किं भोः कोऽप्यस्ति गजारोहणधूर्वहः ॥ ९१९ ॥
कुब्जोऽवादीत्तदाकर्ण्य क्व स क्व स मतंगजः । तमहं गमयिष्यामि वश्यतां पश्यतां हि वः ॥ ९२० ॥

नलेन
गज–
दमनम् ।

आगात् कुब्जे वदत्येवं स गर्जन्नूर्जितं गजः । तमभ्यधावत् कुब्जोऽपि क्ष्मां पद्भ्यामस्पृशन्निव ॥ ९२१ ॥
मा मृथा मा मृथाः कुब्जापसरापसरेत्यलम् । लोको जगाद निःशंकं केसरीव ययौ तु सः ॥ ९२२ ॥
प्रससारापससार पपात च लुलोठ च । स कंदुक इव कुब्जः कुंजरं विप्रतारयन् ॥ ९२३ ॥
भूयो भूयश्च लांगूलमाक्रमन् विक्रमी नलः । वार्तिकः पन्नगमिव खेदयामास तं गजम् ॥ ९२४ ॥
जितश्रमो नलो जातश्रमं विज्ञाय तं गजम् । द्राग्गरुत्मानिवोत्पत्यारुरोहारोहकाग्रणीः ॥ ९२५ ॥
पूर्वासनमधिष्ठाय पादौ न्यस्य कलापके[२] । दृढयामास तद्ग्रंथिमाघ्नन् कुंभौ चपेटया ॥ ९२६ ॥

१ हस्तिरक्षकाः । २ कलापको गजकंठरज्जुः । गरुडः ।

[1]कलापताडनाव्यात्तवक्त्रचीत्कारकारिणम् । करिणं वाहयामास तं कुब्जो नर्तयन् [2]सृणिम् ॥ ९२७ ॥
तस्याथो घोषयामास जनो जयजयारवम् । तद्गले चाक्षिपद्राजा स्वयं कनकशृंङ्खलाम् ॥ ९२८ ॥
[3]मदनमयमिव तं कृत्वा व्यालं नलो बली । आलानलीनतां निन्ये [4]कक्षानाड्योत्ततार च ॥ ९२९ ॥
ततो नलोऽमलयशाः प्रणिपातमसंस्पृशन् । [+]अभ्यर्णे दधिपर्णस्योपाविशत् [•]सवया इव ॥ ९३० ॥
दधिपर्णोऽथ तं प्रोचे गजशिक्षाविचक्षण । किमन्यदपि भोः कुब्ज वेत्सि संभावनास्ति ते ॥ ९३१ ॥
कुब्जोऽप्युवाच हे राजन् किमन्यत् कथयामि ते । सूर्यपाकां रसवतीं वेद्मि किं तां दिदृक्षसे ॥ ९३२ ॥
स राजा सदनं गत्वा सूर्यपाककुतूहली । कुब्जाय तंडुलान् शाकान् [5]वेशवारादि चार्पयत् ॥ ९३३ ॥
चरुन् सूर्यातपे मुक्त्वा सौरीं विद्यामनुस्मरन् । मंक्षु निष्पादयामास दिव्यां रसवतीं नलः ॥ ९३४ ॥
कल्पवृक्षविशेषेण दत्तयेव मनोज्ञया । रसवत्या तया राजा बुभुजे सपरिच्छदः ॥ ९३५ ॥
श्रमापनोदजननीं परमानंददायिनीम् । आस्वाद्य तां रसवतीं दधिपर्णनृपोऽवदत् ॥ ९३६ ॥
एवंविधां रसवतीं नलो जानाति नापरः । चिरं परिचिता ह्येषा सेवमानस्य मे नलम् ॥ ९३७ ॥
तत् किं नलोऽसि विकृताकारो नैतादृशो नलः । योजनद्विशत्या तस्यांतरितस्यागमः कुतः ॥ ९३८ ॥
एकाकित्वं कुतस्तस्य भरतार्धमहीपतेः तद्रूपं च मया दृष्टं [卐]जितगीर्वाणखेचरम् ॥ ९३९ ॥

नलेन गज–दमनम् ।

१ कलापः अंकुशः । २ कुंतम् अंकुशः । ३ मदनं भाषायां "मीण" इति ख्यातम् । ४ पार्श्वरज्ज्वा । ५ पात्रादि । · मत्तगजम् । + समीपे । • मित्रम् ।
卐 जिताः देवाः विद्याधराश्च येन तद् रुपम् ।

ततः कुब्जाय तुष्टोऽदाद्वस्त्रालंकरणादिकम् । टंकलक्षं च नृपतिर्ग्रामपंचशतीमपि ॥ ९४० ॥
सर्वं जग्राह तत्कुब्जो ग्रामपंचशतीं विना । राजाप्युवाच किं कुब्ज तवान्यदपि दीयताम् ॥ ९४१ ॥
कुब्जो बभाषे तर्ह्येतन्मम पूरय वांछितम् । मृगयां मद्यपानं च यावदाज्ञं[1] निवारय ॥ ९४२ ॥
राजापि वचनं तस्य मानयन्निजशासने । वार्तामपि निराकार्षीन्मृगयामद्यपानयोः ॥ ९४३ ॥
दधिपर्णनृपोऽन्येद्युः कुब्जमूचे रहःस्थितः । कोऽसि त्वं कुत आयासीः क्व वास्तव्योऽसि वा वद ॥ ९४४ ॥
कुब्जः प्रोचे कोशलायां नलराजस्य सूपकृत् । हुंडिकाख्योऽस्मि तत्पार्श्वे शिक्षिताश्च कला मया ॥ ९४५ ॥
नलो भ्रात्रा कूबरेण जितो द्यूतेऽखिलां महीम् । दवदंतीमुपादाय प्रपेदेऽरण्यवासिताम् ॥ ९४६ ॥
नलो विपेदे तत्रैव ततोऽहं त्वामुपागमम् । मायाविनमपात्रज्ञं श्रितोऽस्मि न तु कूबरम् ॥ ९४७ ॥
दधिपर्णोऽपि हि तया नलपंचत्ववार्तया । हृदि वज्राहत इव चक्रंद सपरिच्छदः ॥ ९४८ ॥
दधिपर्णनृपः प्रेतकार्यं बाष्पांबुवारिदः । चक्रे नलस्य कुब्जेन वीक्ष्यमाणो धृतस्मितम् ॥ ९४९ ॥
दवदंतीपितुः पार्श्वे दधिपर्णो नृपोऽन्यदा । केनापि हेतुना दूतं प्रैषीत् सौहार्दवर्त्मना ॥ ९५० ॥
भीमेन सत्कृतो दूतः स तत्पार्श्वे सुखं वसन् । उवाच वार्तां प्रस्तावेऽन्यदैवं वदतां वरः ॥ ९५१ ॥
नलस्य सूपकारोऽस्ति मत्स्वामिनमुपागतः । सूर्यपाकां रसवतीं स वेत्ति नलशासनात् ॥ ९५२ ॥

दधिपर्ण–
नृपान्तिके
नलस्य
सूपकार–
रूपेण
वसनम् ।

---

१ यावत्तवाज्ञा वर्तते तावत् । · एकांते स्थितः ।

दधिपर्ण-
नृपान्तिके
नलस्य
सूपकार-
रूपेण
वसनम् ।

दवदंती तदाकर्ण्योत्कर्णा पितरमब्रवीत् । प्रणिधिं* प्रेष्य जानीहि कीदृगस्ति स सूपकृत् ॥ ९५३ ॥
सूर्यपाकां रसवतीं वेत्ति नान्यो नलं विना । गोपितात्मा यदि पुनर्भविता नल एव सः ॥ ९५४ ॥
ततः स्वाम्यर्थकुशलं कुशलाख्यं द्विजोत्तमम् । आहूय सत्क्रियापूर्वमादिदेश विशां पतिः ॥ ९५५ ॥
सुसुमारपुरे गत्वा पश्य तद्राजवल्लभम् । कां कां कलामसौ वेत्ति किंरुपश्चेति निश्चिनु ॥ ९५६ ॥
प्रभोः प्रमाणमादेश इत्युक्त्वा चलितो द्विजः । प्रेर्यमाणः सुशकुनैः सुसुमारपुरं ययौ ॥ ९५७ ॥
पृच्छन् पृच्छन् ययौ कुब्जसमीपे निषसाद च । सर्वांगविकृताकारं तं दृष्ट्वा विषसाद सः ॥ ९५८ ॥
दध्यौ च क्व नलः क्वायं क्व मेरुः क्व च सर्षपः । उत्पन्नास्मिन्नलभ्रांतिर्दवदंत्या वृथैव हि ॥ ९५९ ॥
निश्चेष्ये सम्यगिति च मनसा संप्रधार्य सः । जगौ श्लोकयुगलकं नलापश्लोकगर्भितम्[1] ॥ ९६० ॥
निर्घृणानां निस्त्रपाणां निःसत्त्वानां दुरात्मनाम् । धूर्यहो नल एकैव पत्नीं तत्याज यः सतीम् ॥ ९६१ ॥
सुप्तामेकाकिनीं मुग्धां विश्वस्तां त्यजतः सतीम् । उत्सेहाते कथं पादौ नैषधेरल्पमेधसः ॥ ९६२ ॥
मुहुर्मुहु पठ्यमानं तच्छ्रुत्वा दयितां स्मरन् । रुरोदानर्गलगलन्नयनाब्जजलो नलः ॥ ९६३ ॥
किं रोदिषीति विप्रेण पृष्टः प्रोवाच हुंडिकः । गीतं ते मंजु करुणरसमाकर्ण्य रोदिमि ॥ ९६४ ॥
कुब्जेन पृष्टः श्लोकार्थं स विप्रोऽकथयत् कथाम् । आद्यूतात्कुंडिनपुरे वैदर्भीगमनावधि ॥ ९६५ ॥



१ नलापकीर्तिगर्भितम् । * गुप्तपुरुषम् ।

पुनराख्यदहो कुब्ज सूर्यपाकेन सूपकृत् । सुसुमारेशदूतेनाख्यतस्त्वं भीमभूपतेः ॥ ९६६ ॥
एवंविधचरित्रेण नलो भवति नापरः । भैम्येति भीममभ्यर्थ्य त्वां द्रष्टुं प्रेषितोऽस्म्यहम् ॥ ९६७ ॥
अचिंतयं च त्वां दृष्ट्वा क्व कुब्जस्त्वं दुराकृतिः । क्व नलो देवतारुपः क्व खद्योतः क्व भास्करः ॥९६८ ॥
मम चागच्छतोऽभूवञ्च्छकुनानि शुभानि तु । तानि सर्वाण्यन्यथात्वं ययुर्नासि नलो यतः ॥ ९६९ ॥
दवदंतीं हृदि ध्यायन् रुदन् कुब्जोऽधिकाधिकम् । उपरुध्य गृहेऽनैषीत्तं विप्रमिति चावदत् ॥ ९७० ॥
महासत्या दवदंत्या महापुंसो नलस्य च । कथां तवाख्यातवतः स्वागतं किं विधीयताम् ॥ ९७१ ॥
इत्युक्त्वा विदधे स्नानभोजनादिभिरौचितीम् । तस्यादाच्च दधिपर्णदत्तमाभरणादि सः ॥ ९७२ ॥
कुशलः कुशलेनाथ कुंडिनं नगरं ययौ । यथादृष्टं च कुब्जं भैमीपित्रे शशंस च ॥ ९७३ ॥
कुब्जो यथा खेदयति स्मारुरोह च तं गजम् । तथाख्यात्सूर्यपाकां च दृष्यां रसवतीं द्विजः ॥ ९७४ ॥
हेममालां टंकलक्षं वस्त्रालंकरणानि च । आख्यत् कुब्जेन दत्तानि श्लोकगानं च तन्निजम् ॥ ९७५ ॥
भैम्यूचे स नलस्तात प्राप्तो वैरुप्यमीदृशम् । केनाप्याहारदोषेण कर्मदोषेण वा खलु ॥ ९७६ ॥
कौशलं गजशिक्षायां दानमद्भुतमीदृशम् । सूर्यपाकरसवती नान्यस्यास्ति नलं विना ॥ ९७७ ॥
तात केनाप्युपायेन तं कुब्जकमिहानय । यथा स्वयं परीक्षेऽहं तं निरीक्ष्येङ्गित्तादिभिः ॥ ९७८ ॥
भीमराजोऽवदत् पुत्रि तवालीकस्वयंवरम् । प्रारभ्य दधिपर्णस्याह्वानाय प्रेष्यतां नरः ॥ ९७९ ॥



कुब्जो नलेति दवदंत्यादीनां परिज्ञानम् ।

दवदंत्या
अलीक-
स्वयंवरः ।

तव स्वयंवरं श्रुत्वा दधिपर्णः समेष्यति । सोऽग्रेऽपि त्वयि लुब्धोऽभूद्वृतः किं तु नलस्त्वया ॥ ९८० ॥
दधिपर्णेन च सह स कुब्जोऽप्यागमिष्यति । त्वामन्यस्मै दीयमानां न सोढा स हि चेन्नलः ॥ ९८१ ॥
नलोऽश्वहृदयज्ञोऽस्ति स कुब्जो नल एव चेत् । रथाश्वैरेव विज्ञेयः स स्वयं प्रेरयन् रथम् ॥ ९८२ ॥
तस्य च प्रा[1]जतो वाहाः स्युः समीरण[*]रंहसः । वाहरुपेण संप्राप्ता मूर्ता इव समीरणाः ॥ ९८३ ॥
आसन्नं दिनमाख्येयं यस्तदैति नलो हि सः । न स्त्रीपरिभवं कोऽपि सहते किं पुनर्नलः ॥ ९८४ ॥
दूतेन सुसुमारेशं भीमराट् पंचमीदिने । आह्वदा[2]गमन[+]प्रह्वश्चिंतयामास चेतसि ॥ ९८५ ॥
भैमीप्रे[3]प्सातिदूरे सा तत्र श्वो गम्यते कथम् । किं करोम्यरतिं प्राप्तो मीनः स्तोक इवांभसि ॥ ९८६ ॥
कुब्जो दध्यौ सती भैमी नान्यं पुरुषमिच्छति । इच्छेद्वा तर्हि तां को हि गृह्णीयान्मयि सत्यपि ॥ ९८७ ॥
दधिपर्णं विदर्भायां षड्भिर्यामैर्नयाम्यहम् । अनेन सह मेऽपि स्याद्यानं प्रासंगिकं यथा ॥ ९८८ ॥
ऊचे च दधिपर्णं स मा ताम्य ब्रूहि कारणम् । न ह्यनाख्यातरोगस्य रोगिणोऽपि चिकित्सितम् ॥ ९८९ ॥
दधिपर्णोऽवदत् कुब्ज कथाशेषो नलोऽभवत् । स्वयंवरं पुनरपि वैदर्भी श्वः करिष्यति ॥ ९९० ॥
चैत्रस्य शुद्धपंचम्यां भावी तस्याः स्वयंवरः । षड्याम्येवांतरे तस्य ग[4]तिः का मे भविष्यति ॥ ९९१ ॥
बहुभिर्दिवसैर्दूतोऽप्यागात्तेनैव वर्त्मना । सार्धेनाह्ना कथं यामि भैमीलुब्धो मुधास्म्यहम् ॥ ९९२ ॥



---

१ प्रेरयतः । २ आगमने प्रह्व आतुरो दधिपर्णः । ३ भैम्याः प्रेप्सा प्राप्तुमिच्छा । ४ गमनम् । * पवनवेगिनः । + आगमनाय तत्परः ।

दवदंत्या
अलीक-
स्वयंवरः ।

कुब्जो जगाद हे राजन्मा विषीदाचिरादपि । नेष्यामि त्वां विदर्भायां रथं साश्वं ममार्पय ॥ ९९३ ॥
गृहाण स्वैरमित्युक्तो राज्ञा कुब्जो वरं रथम् । जग्राह जात्यावश्वौ च सर्वलक्षणलक्षितौ ॥ ९९४ ॥
दध्यौ च दधिपर्णस्तं कुशलं वीक्ष्य सर्वतः । न सामान्यः पुमानेष देवो वा खेचरोऽथवा ॥ ९९५ ॥
रथं कृत्वा च युक्ताश्वं कुब्जः प्रोवाच तं नृपम् । रथमारोह नेष्यामि विदर्भां त्वां निशात्यये ॥ ९९६ ॥
राजा स्थगी×धरश्छत्रधरश्चामरधारिणौ । कुब्जश्च षडमी सज्जीकृतमारुरुहू रथम् ॥ ९९७ ॥
तद्बिल्वं तं करंडं च कट्यामाबध्य वाससा । स्मृत्वा पंचनमस्कारं कुब्जो [1]रथ्यानखेट[2]यत् ॥ ९९८ ॥
रथः [3]प्रचीयमानाश्वो नैषधिनाश्वहृद्विदा । जगाम स्वामि•चित्तेन विमानमिव नाकिनः ॥ ९९९ ॥
[4]प्रच्छदो दधिपर्णस्य रथवेगानिलोद्धुतः । अथापतत् कृतस्तेन नलस्येवावतारणे ॥ १००० ॥
दधिपर्णोऽवदत् कुब्जं मुहुर्तं धार्यतां रथः । वातेनोड्डीय खगवद्गतां गृह्णाम्यहं पटीम् ॥ १००१ ॥
दधिपर्णनृपो यावदवादीदिति कुब्जकम् । तावद्रथो व्यतीयाय पंचविंशतियोजनीम् ॥ १००२ ॥
स्मयमानोऽवदत् कुब्जः क्वास्ति ते नृपते पटी । पटीपाताद्योजनानां पंचविंशतिरुज्झिता ॥ १००३ ॥
एते हि मध्यमा वाहा भवेयुर्यदि नूत्तमाः । एतावता तद्व्रजेयुः पंचाशद्योजनीमपि ॥ १००४ ॥
दधिपर्णनृपो दूरादनेकफलसंकुलम् । अक्षाख्यं वृक्षमद्राक्षीदिति चोवाच सारथिम् ॥ १००५ ॥



---

१ अश्वान् । २ अनोदयत् । ३ प्रचीयमानौ पुष्यवश्वौ यस्य सः । ४ उत्तरीयवस्त्रम् ।
× स्थगी–भाषायाम् 'पानदानी' । • दधिपर्णस्य स्वामिनः चित्तेन समं वेगेन ।

दवदंत्या
अलीक-
स्वयंवरः ।

अस्मिन् फलानि यावंति तावंत्यगणयन्नपि । वेद्म्यहं दर्शयिष्यामि व्यावृत्तः कौतुकं तव ॥ १००६ ॥
कुब्जो जगाद हे राजन् कालक्षेपाद्बिभेषि किम् । मा भैषीरश्वहृदयविदुरे मयि सारथौ ॥ १००७ ॥
एकमुष्टिप्रहारेण सर्वाणि पुरतस्तव । फलानि पातयिष्यामि मेघोऽम्भःपृषतानिव[1] ॥ १००८ ॥
राजा प्रोवाच तर्हि त्वं फलानि कुब्ज पातय । अष्टादश सहस्राणि तेषां स्युः पश्य कौतुकम् ॥ १००९ ॥
कुब्जोऽप्यपातयत्तानि संख्याति स्म च भूपतिः । यथाख्यातानि चाभूवन्नैकं हीनं न चाधिकम् ॥ १०१० ॥
कुब्जोऽश्वहृदयविद्यां दधिपर्णाय याचिताम् । ददौ तस्माडाददे च संख्याविद्यां यथाविधि ॥ १०११ ॥
प्रातर्विदर्भाभ्यर्णोऽगात् सरथः कुब्जसारथिः । दधिपर्णनृपश्चाभूत् पद्म द्विकसन्मुखः ॥ १०१२ ॥
तदैव च निशाशेषे वैदर्भी स्वप्नमैक्षत । यथावत् कथयामास पितुरग्रे च हर्षभाक् ॥ १०१३ ॥
मया निर्वृतिदेव्यद्य निशांते सुखसुप्तया । अदर्शि कोशलोद्यानं तयेहानीतमंबरे ॥ १०१४ ॥
पुष्पितं फलितं चूतं चारुढास्मि तदाज्ञया । विकस्वरं सरोजं च मम हस्ते तयार्पितम् ॥ १०१५ ॥
मयि तत्राधिरुढायां कश्चिदेको विहंगमः । पुराधिरुढो झटिति पपात धरणीतले ॥ १०१६ ॥
भीमोऽप्युवाच हे पुत्रि स्वप्नोऽयमतिशोभनः । तथाहि निर्वृतिर्देवी पुण्यराशिस्तवोद्यतः ॥ १०१७ ॥
खे दृष्टं कोशलोद्यानं कोशलैश्वर्यदं तव । माकंदा[2]रोहणात् पत्या सह संगंस्यसे द्रुतम् ॥ १०१८ ॥
अग्रे तत्राधिरुढश्च यः पपात विहंगमः । स कूबरनृपो राज्यात् पतिष्यति न संशयः ॥ १०१९ ॥

१ बिंदून् । २ आम्रवृक्षः ।

प्रभातसमये स्वप्नदर्शनादद्य ते नलः । मिलिष्यत्यत्र काले हि स्वप्नः शीघ्रं फलप्रदः ॥ १०२० ॥
तदानीमेव पूर्द्वारं संप्राप्तो दधिपर्णराट् । पुमांश्च मंगलो नाम भीमायाख्यात्तमागतम् ॥ १०२१ ॥
भीमोऽभ्यगाद्दधिपर्णं परिरेभे च मित्रवत् । गृहार्पणादिनातिथ्यं कृत्वा चैवमवोचत ॥ १०२२ ॥
सूर्यपाकां रसवतीं कुब्जस्ते वेत्ति सूपकृत् । तां दर्शय दिदृक्षोर्मे वार्तया कृतमन्यया ॥ १०२३ ॥
आदिक्षद्दधिपर्णोऽपि कुब्जं रसवतीकृते । सोऽपि तां दर्शयामास कल्पवृक्ष इव क्षणात् ॥ १०२४ ॥
भीमस्तया रसवत्या बुभुजे सपरिच्छदः । दधिपर्णोपरोधेन तत्स्वादं च परीक्षितुम् ॥ १०२५ ॥
स्थालं तदोदनभृतमानाय्य दवदंत्यपि । बुभुजे तद्रसास्वादादज्ञासीत् कुब्जकं नलम् ॥ १०२६ ॥

नल दवदंत्योर्मिलनम् ।

भैम्यूचे च ममाख्यातं ज्ञानिना सूरिणा पुरा । सूर्यपाका रसवती नलस्यैवेह भारते ॥ १०२७ ॥
अयं कुब्जोऽस्तु कुंटोऽस्तु यादृशस्तादृशोऽस्तु वा । कारणं तत्त किमपि नल एव न संशयः ॥ १०२८ ॥
नलस्यैका रसवती परीक्षान्यापि विद्यते । नलांगुल्याप्यहं स्पृष्टा भवाम्युत्पुलका खलु ॥ १०२९ ॥
कुब्जोऽङ्गुल्या स्पृशतु मां तिलकं रचयन्निव । अभिज्ञानांतरेणैव भवेद्यदि पुनर्नलः ॥ १०३० ॥
कुब्जो नलोऽसीति पृष्टः प्रोचे भ्रांताः स्थ सर्वथा । क्व नलो देवतारुपः क्वानर्हो द्रष्टुमप्यहम् ॥ १०३१ ॥
तद्वक्षोऽस्पृक्षदंगुल्या कुब्जोऽथात्युपरोधतः । अतिलाघवतः पत्रमिवार्द्राक्षरमार्जकः ॥ १०३२ ॥
तावताप्यंगुलिस्पर्शेनानंदाद्वैतदायिना । भैम्याः [1]कर्कोटकमिवाजनिष्टोत्कंटकं वपुः ॥ १०३३ ॥



---

१ भाषायाम् 'शाहुडी' ।

सुप्तां तदा मामत्याक्षीरिदानीं क्व नु यास्यसि । चिरात् प्राणेश दृष्टोऽसीत्यवोचद्भीमजा मुहुः ॥ १०३४ ॥
नीतो गृहांतरेऽभ्यर्थ्य कुब्जो बिल्वात् करंडकात् । आकृष्य वस्त्रालंकारानामुं[1]च्याभूत्स्वरुपभाक् ॥ १०३५ ॥
ततश्च भीमतनया यथारुपं निजं पतिम् । तमालिलिंग सर्वांगमपि वल्लीव पादपम् ॥ १०३६ ॥
समागतं पुनर्द्वारि नलं कमललोचनम् । आलिंग्याध्यासयामास भीमः सिंहासने निजे ॥ १०३७ ॥
त्वं स्वामी सर्वमेतत्ते समादिश करोमि किम् । एवं वदन् भीमरथो वे[*]त्रीवास्थात् कृतांजलिः ॥ १०३८ ॥
दधिपर्णो नलं नत्वाऽवदन्नाथोऽसि नः सदा । तत्क्षमस्व यदज्ञानात्त्वय्यकार्यमनुष्ठितम् ॥ १०३९ ॥
अत्रांतरे धनदेवः सार्थवाहो महर्द्धिकः । स आगादुप[+]दापाणिर्द्रष्टुं भीमरथं नृपम् ॥ १०४० ॥
वैदर्भी सार्थवाहस्य तस्य पूर्वोपकारिणः । अकारयद्भीमनृपं स्वबंधोरिव गौरवम् ॥ १०४१ ॥
ऋतुपर्णश्चंद्रयशास्तत्सुता चंद्रवत्यपि । वसंतश्रीशेखरश्च स तापसपुरेश्वरः ॥ १०४२ ॥
तत्रcraftyायुर्दवदंत्याह्वायिताः पितृवाचकैः । नितांतमुत्कंठितया पूर्वोपकृतिलिप्तया ॥ १०४३ ॥
॥ युग्मम् ॥
अतिसत्क्रियमाणास्ते नित्यं भीमेन भूभुजा । तस्थुर्मासं नवनवैरातिथ्यैः प्रीतचेतसः ॥ १०४४ ॥
अन्यदा तस्थुषां तेषां सर्वेषां भीमपर्षदि । प्रातर्देवो दिवः कश्चिदायासीद्[2]भाप्लुतांबरः ॥ १०४५ ॥

१ परिधाय । २ कांत्या दीपितांबरः । * प्रतिहारीव । + प्राभृतम् ।



नल
दवदंत्यो-
र्मिलनम् ।

प्रोचे च प्रांजलिर्भैमी स तापसपतिः पुरा । त्वया विमलमत्याख्यः प्रबोधित इति स्मर ॥ १०४६ ॥
स तापसपतिर्मृत्वा सौधर्मेऽहं सुरोऽभवम् । श्रीकेसरोऽभिधानेन विमाने केसराभिधे ॥ १०४७ ॥
अर्हद्धर्मे स्थापितोऽहं मिथ्यादृष्टिरपि त्वया । तेन धर्मेण देवोऽहमभूवं त्वत्प्रसादतः ॥ १०४८ ॥
इत्युक्त्वा च हिरण्यस्य कोटीः सप्त प्रवृष्य सः । क्वचिदंतर्दधे देवः स्वां प्रकाश्य कृतज्ञताम् ॥ १०४९ ॥
वसंतदधिपर्णर्तुपर्णा भीमोऽपरेऽपि हि । महाबला महीपाला राज्येऽभिषिषिचुर्नलम् ॥ १०५० ॥
ते राजानो नलादिष्टः स्वानि स्वानि बलान्यथ । संकीर्णत्वं ददानानि पृथ्व्याः प्राज्यान्यमेलयन् ॥ १०५१ ॥
शुभेऽह्नि तैर्नृपैः सार्धं नलोऽतुलपराक्रमः । राज्यलक्ष्मीं जिघृक्षुः स्वामयोध्यामभ्यषेणयत् ॥ १०५२ ॥
कैरप्यहोभिस्तरणिं* तिरयन् सैन्यरेणुभिः । अयोध्योपवनं गत्वाध्युवास रतिवल्लभम् ॥ १०५३ ॥
समागतं नलं ज्ञात्वा कूबरो वरवैभवम् । भिया कंठगतप्राण इवाभूद्भृशमाकुलः ॥ १०५४ ॥
नलस्तं स्माह दूतेन देवनैर्दीव्यतां पुनः । ममैवास्तु त्वदीया श्रीर्मदीयापि तवास्तु वा ॥ १९५५ ॥
कूबरोऽपि रणाशंकामपाकृत्य प्रमोदभाक् । पुनर्द्यूतं समारेभे जितकाशी हि तत्र सः ॥ १०५६ ॥
सर्वामुर्वीं जिगायाथ भाग्यवान्नैषधोऽनुजात् । भाग्ये हि विजयो नृणां पाणिपद्मे मरालति ॥ १०५७ ॥
नलेन जितराज्योऽपि सोऽतिक्रूरोऽपि कूबरः । ममानुजन्मायमिति नाप्रसादास्पदं कृतः ॥ १०५८ ॥

द्यूते नलेन कूबरपराजयो राज्य–प्राप्तिश्च ।



---

१ मराली हंसः स इव आचरति । * सूर्यम् आच्छादयन् ।

वैदर्भीजानिना[1] राज्यमलंकृत्य निजं तदा । अरुषा कूबरश्चक्रे पूर्ववद्यौवराज्यभाक् ॥ १०५९ ॥
नलः स्वं राज्यमासाद्य दवदंतीयुतस्तदा । कोशलानगरीचैत्यान्युत्कंठावानवंदत ॥ १०६० ॥
राज्याभिषेकमांगल्योपायनानि महीभुजः । सर्वेऽप्यानिन्यिरे भक्त्या भरतार्धनिवासिनः ॥ १०६१ ॥
सकलैरवनीपालैः पालिताखंडशासनः । बहून्यब्दसहस्राणि भरतार्धं नलोऽशिषत् ॥ १९६२ ॥
स्वर्गादन्येद्युरागत्य निषधो देवभूयभाक् । विषयार्णवपाठीनमिति प्राबोधयन्नलम् ॥ १९६३ ॥
भवारण्ये लुंट्यमानं सदा विषयतस्करैः । आत्मनोऽपि विवेकस्वमरक्षन्[2] पुरुषोऽसि किम् ॥ १९६४ ॥
प्रव्रज्यासमयाख्यानं प्रतिपन्नं पुरा मया । तदिदानीं परिव्रज्यां गृहाणायुस्तरोः फलम् ॥ १०६५ ॥
इत्युक्त्वांतर्दधे देवस्तत्र चाभ्याययौ तदा । जिनसेनाभिधः सूरिरवधिज्ञानशेवधिः[3] ॥ १०६६ ॥
दवदंतीनलौ गत्वा ववंदाते तमादरात् । पृष्टश्च प्राग्भवं ताभ्यामाख्यायैवमुवाच सः ॥ १०६७ ॥
प्राप्तं राज्यं त्वया साधोः क्षीरदानात्तथा मुनौ । क्रोधाद्द्वादशघटिकाद्विरहो द्वादशाब्दिकः ॥ १०६८ ॥
इति श्रुत्वा पुष्कलाख्ये सुते राज्यं निधाय तौ । गृहीत्वा च व्रतं तस्मात् पालयामासतुश्चिरम् ॥ १०६९ ॥
नलोऽन्यदा तु भोगार्थं दवदंत्यां मनोऽकरोत् । अथाचार्यैः परित्यक्तः पित्रागत्य प्रबोधितः ॥ १०७० ॥
अशक्नुवन् व्रतं कर्तुं प्रपेदेऽनशनं नलः । नले जातानुरागाथ दवदंत्यपि तद्व्यधात् ॥ १०७१ ॥

१ वैदर्भी जाया यस्य सः नलः । २ विवेक एव स्वं धनम् । ३ अवधिज्ञाननिधिः ।



नल
दवदंत्यो-
र्व्रतमनशनं
च ।

वसुदेव-
कनकवत्यो-
र्विवाहः ।

नलो मृत्वा कुबेरोऽहमभूवं सा तु भीमजा । मत्प्रियाजनि सा च्युत्वा शौरे कनकवत्यभूत् ॥ १९७२ ॥
अस्याः प्राग्भवपत्नीत्वस्नेहातिशयमोहितः । इहागतोऽस्मि स्नेहो हि याति जन्मशतान्यपि ॥ १०७३ ॥
अस्मिन्नेव भवे तावदियं कनकवत्यहो । दशार्ह कर्माण्युन्मूल्य निर्वाणं च गमिष्यति ॥ १०७४ ॥
सहेन्द्रेण वंदनाय गतस्यैतत्पुरा मम । महाविदेहे कथितं विमलस्वामिनार्हता ॥ १०७५ ॥
इत्थं कनकवत्यास्तु कथां प्राग्भवसंगताम् । कुबेरो वसुदेवाय समाख्याय तिरोदधे ॥ १०७६ ॥

अतिशयितचिरानुरागयोगात् कनकवतीमुपयम्य वृष्णिसूनुः ।
अरमत पुनरेव खेचरीभिः सुभगशिरोमणिरद्वितीयरुपः ॥ १०७७ ॥

❖ ❖ ❖

इत्याचार्यश्रीहेमचंद्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्येऽष्टमे पर्वणि कनकवतीपरिणयनतत्पूर्वभववर्णनो नाम तृतीयः सर्गः समाप्तः ।

# चतुर्थः सर्गः ।

सूर्पकेणान्यदा सुप्तः स[1] जह्रेऽथ प्रबोधभाक् । जघान सूर्पकं मुष्ट्या सूर्पकस्तं मुमोच च ॥ १ ॥
गोदायां पतितः शौरिस्तीर्त्वा कोल्लापुरे ययौ । पद्मश्रियं पद्मरथराजपुत्रीं व्युवाह च ॥ २ ॥
तत्रापि नीलकंठेन हृतो मुक्तश्च सोऽपतत् । चंपासरसि तत्तीर्त्वा मंत्रिपुत्रीमुपायत ॥ ३ ॥
ततो हृतः सूर्पकेण मुक्तो गंगाजलेऽपतत् । ततोऽप्युत्तीर्य विचरन् ययौ पल्लीं सहाध्वगैः ॥ ४ ॥
पल्लीपतेर्जरां नाम कन्यां परिणिनाय च । अजीजनत्तत्र जरत्कुमारं नाम नंदनम् ॥ ५ ॥
सोऽवंतिसुंदरीं सुरसेनामथ नरद्विषम् । जीवयशसमपरांश्चोपयेमे नृपात्मजाः ॥ ६ ॥
गच्छंतमन्यदा मार्गे तमूचे देवता मया । दत्ता रुधिरराट्कन्या रोहिणी ते स्वयंवरे ॥ ७ ॥
त्वया तु पटहस्तत्र वाद्य इत्युदितस्तया । स जगामारिष्टपुरे स्वयंवरणमंडपम् ॥ ८ ॥
जरासंधप्रभृतिषु तत्रासीनेषु राजसु । आययौ रोहिणी साक्षाद्भुवं प्राप्तेव रोहिणी ॥ ९ ॥
ते स्वं रु[2]रोचयिषवस्तस्यै तत्तच्चिचेष्टिरे । स्वानुरुपमपश्यंत्यै न कोऽपि रुरुचे परम् ॥ १० ॥

१ वासुदेवः । २ रोचयितुमिच्छवः ।



राजकन्या–
रोहिणी
स्वयंवरः ।

कृतवेषांतरः शौरिर्मध्यस्थस्तूर्यवादिनाम् । वादयामास पटहमेवं पाठस्फुटाक्षरम् ॥ ११ ॥
एह्येहि मां कुरंगाक्षि कुरंगीव किमीक्षसे । तवानुरुपो भर्तास्मि त्वत्संगमसमुत्सुकः ॥ १२ ॥
तच्छ्रुत्वा रोहिणी रोहत्पुलका तन्निरीक्षणात् । स्वयंवरस्रजं कंठे वसुदेवस्य विन्यधात् ॥ १३ ॥
जज्ञे राज्ञां कलकलो हतैनमिति भाषिणाम् । अनया तौर्यिको[1] वव्रे प्रहासश्चेत्यभूद्भृशम् ॥१४ ॥
रुधिरं कोशलाधीशो दंतवक्रोऽतिवक्रवाक् । सोपहासमुवाचैवं वैहासिक[2] इवोच्चकैः ॥ १५ ॥
यदि पाणविकायेयं कन्यका दित्सिता[3] त्वया । तत्कुलीनाः कुलीनेन किमाहूता अमी नृपाः ॥ १६ ॥
गुणानभिज्ञा चेदेषा वृणुते तौर्यिकं नरम् । नोपेक्षणीयं तत्पित्रा पिता बाल्ये हि शासिता ॥ १७ ॥

राजकन्या-
रोहिण्या
वसुदेव-
वरणम् ।

ऊचे च रुधिरस्तेऽलं विचारेणामुना नृप । स्वयंवरे कन्यकानां प्रमाणं हि वृतो नरः ॥ १८ ॥
अथोचे न्यायविदुरो[4] विदुरः साध्विदं नृपः । तथापि युज्यते प्रष्टुं वर एष कुलादिकम् ॥ १९ ॥
वसुदेवोऽवदत् कोऽयं प्रस्तावः कुलकीर्तने । वृतोऽहमनया यस्माद्यादृशस्तादृशोऽपि सन् ॥ २० ॥
असहिष्णुर्ममेमां योऽपहरिष्यति तस्य तु । कथयिष्यामि दोर्वीर्यदर्शनेनात्मनः कुलम् ॥ २१ ॥
जरासंधो निशम्याथ वचस्तस्येदमुद्धतम् । इत्यादिक्षन्नृपान् क्रुद्धः समुद्रविजयादिकान् ॥ २२ ॥
राजविप्लवकृत्तावद्रुधिरोऽयं नृपाधमः । द्वितीयोऽयं पाणविको मत्तः पणववादनात् ॥ २३ ॥



---

१ तूर्यवादयिता । २ विदूषकः । ३ दातुमिष्य । ४ न्यायचतुरः । * तूर्यविशेषवादकः, लोके 'ढोली' ।

राजकन्या मयाप्याप्तेतीयतापि । वातास्तोच्चद्रुफलाप्त्या खर्वांग इव दृप्यति ॥ २४ ॥
ततो हतेमौ रुधिरतौर्यिकौ तूर्णमेव भोः । इत्युक्तास्ते युधेऽसज्जन् समुद्रविजयादयः ॥ २५ ॥
खेचरेन्द्रो दधिमुखः सारथीभूय स स्वयम् । रथेऽधिरोहयामास वसुदेवं रणोद्यतम् ॥ २६ ॥
ततो वेगवतीमात्रांगारवत्यार्पितान्यथ । आददे चापतूणानि शौरिः समरदुर्धरः ॥ २७ ॥
भग्नं च रुधिरबलं जरासंधस्य पार्थिवैः । वसुदेवो दधिमुखेनेरयामास वाजिनः ॥ २८ ॥
आदावप्युत्थितं शत्रुंजयं यदुवरोऽजयत् । दंतवक्रमभांक्षीच्च शल्यराजं बभंज च ॥ २९ ॥
जरासंधोऽथ साशंकं समुद्रनृपमब्रवीत् । न पाणविकमात्रोऽयमसाध्योऽन्यमहीभुजाम् ॥ ३० ॥
जह्येनं स्वयमुत्थाय हतेऽस्मिन् रोहिणी तव । सर्वेषां भंगवैलक्ष्यमपाकुरु महीभुजाम् ॥ ३१ ॥
समुद्रविजयोऽप्यूचे परदारैः कृतं मम । त्वदाज्ञया तु योत्स्येऽहमनेन सह दोष्मता ॥ ३२ ॥
इत्युक्त्वा युयुधे भ्रात्रा समुद्रविजयोऽपि हि । विश्वाश्चर्यकरं जज्ञे शस्त्राशस्त्रि चिरं तयोः ॥ ३३ ॥
को न्वसौ मेऽप्यलमिति दध्यौ यावदूत्तमः । वसुदेवः पुरस्तावत् साक्षरं बाणमक्षिपत् ॥ ३४ ॥
समुद्रस्तं गृहीत्वेषुं तद्वर्णानित्यवाचयत् । वसुदेवो नमति त्वां निर्गतश्छद्मना तदा ॥ ३५ ॥
अथ हृष्टो दशार्हेशो वत्स वत्सेत्युदीरयन् । सायं गौरिव वत्सोत्का दधावे रथमुत्सृजन् ॥ ३६ ॥

१ वातेनास्तं क्षिप्तं यदुन्नतवृक्षफलं तस्य प्राप्त्या । २ वामनः ।



समुद्रविजय-
वसुदेवयो-
र्मिलनम् ।

उत्तीर्य वसुदेवोऽपि न्यपतत्तस्य पादयोः । उध्धृत्य च समुद्रस्तं दोर्भ्यां सपदि सस्वजे ॥ ३७ ॥
वत्स वर्षशतं क्वास्था इति पृष्टोऽग्रजन्मना । आचख्यौ वसुदेवस्तं वृत्तांतं सर्वमादितः ॥ ३८ ॥
समुद्रविजयो भ्रात्रा तादृग्विक्रमशालिना । यथाहृष्यत्तथा तेन जामात्रा रुधिरोऽपि हि ॥ ३९ ॥
जरासंधः स्वसामंतबंधुं ज्ञात्वा च तं तथा । संप्राप कोपोपशमं मुदे हि स्वो[1] गुणाधिकः ॥ ४० ॥
प्रसंगमिलितै राजस्वजनैर्जनितोत्सवः । जज्ञे विवाहः पुण्येऽह्नि रोहिणीवसुदेवयोः ॥ ४१ ॥
रुधिरेणार्चिता जग्मुर्जरासंधादयो नृपाः । यादवास्तत्र तस्थुस्तु वत्सरं कंससंयुताः ॥ ४२ ॥
तत्रान्येद्युर्वसुदेवोऽपृच्छद्रहसि रोहिणीम् । कथं त्वया नृपान्मुक्त्वा वृतः पाटहिकोऽप्यहम् ॥ ४३ ॥
साप्याचख्यौ सदा विद्यां प्रज्ञप्तिमहमार्चयम् । तयाख्यातं भविता ते दशार्हो दशमो वरः ॥ ४४ ॥
ज्ञेयः पटहवाद्येन स त्वया तु स्वयंवरे । इति तत्प्रत्ययादेव त्वं वृतोऽसि मया तदा ॥ ४५ ॥
सभास्थितेषु चान्येद्युः समुद्रविजयादिषु । काप्यर्धजरती यच्छंत्याशिषं खाद[2]वातरत् ॥ ४६ ॥
उवाच वसुदेवं सा बालचंद्राजनन्यहम् । नाम्ना धनवती पुत्र्याः कृते त्वां नेतुमागता ॥ ४७ ॥
सा पुत्री बालचंद्रा मे पुत्रिका वेगवत्यपि । त्व[3]द्विप्रलंभविधुरे तिष्ठतस्ते दिवानिशम् ॥ ४८ ॥
ऐक्षिष्ट वसुदेवोऽपि समुद्रविजयाननम् । राजाप्यूचे याहि परं मा स्म स्थाः पूर्ववच्चिरम् ॥ ४९ ॥

समुद्रविजय-
वसुदेवयो-
र्मिलनम् ।

१ स्वकीयः । २ गगनात् । ३ त्वद्वियोगविह्वले ।

राजानं क्षमयित्वाथ वसुदेवस्तया सह । ययौ गगनयानेन पुरे गगनवल्लभे ॥ ५० ॥
समुद्रविजयोऽप्यगात् स्वं पुरं कंससंयुतः । तस्थौ च वसुदेवस्यागमने नित्यमुन्मुखः ॥ ५१ ॥
पित्रा कांचनदंष्ट्रेण खेचरेन्द्रेण कल्पिताम् । चंद्रास्यां बालचंद्रां तु वसुदेव उपायत ॥ ५२ ॥
पूर्वोढा वरयोषितो निजनिजस्थानादथादाय सोऽन्वीतो व्योमचरैः पदातिभिरिवात्युच्चैर्विमानस्थितः
आगाच्छौर्यपुरं समुद्रविजयेनोत्कंठितेनादरादाश्लिष्टः प्रसरद्भुजोर्मिपयसां पत्येव शीतद्युतिः ॥ ५३ ॥

* * *

इत्याचार्यश्रीहेमचंद्रविरचिते त्रिषष्टिशलाकापुरुषचरिते
महाकाव्येऽष्टमे पर्वणि वसुदेवहिंडिवर्णनो नाम
चतुर्थः सर्गः ।



वसुदेवस्य
गृहे
आगमनम् ।

वासुदेव
बलदेव–
पूर्वभव–
चरिते
ललितगंग
दत्तभवः ।

## पञ्चमः सर्गः ।

इतश्च हास्तिनपुरे श्रेष्ठ्यभूत् कोऽपि तस्य च । ललिताख्योऽभवत् पुत्रो मातुरत्यंतवल्लभः ॥ १ ॥
श्रेष्ठिन्यान्यदा जज्ञे गर्भः संतापदो भृशम् । तया च विविधद्रव्यैः पात्यमानोऽपि नापतत् ॥ २ ॥
जातश्च पुत्रः श्रेष्ठिन्या दास्यै त्यक्तुं च सोऽर्पितः । दृष्टश्च श्रेष्ठिना पृष्टा किमेतदिति दास्यथ ॥ ३ ॥
असावनिष्टः श्रेष्ठिन्यात्याज्यतेति तयोदिते । श्रेष्ठी गृहित्वा तं छन्नमन्यत्र समवर्धयत् ॥ ४ ॥
गंगदत्त इति नामादत्त तस्य शिशोः पिता । मातुश्छन्नं ललितोऽपि लालयामास तं सदा ॥ ५ ॥
पितरं ललितोऽन्येद्युरभ्यधत्त मधूत्सवे । भोज्यते गंगदत्तोऽद्य सह चेच्छोभनं तदा ॥ ६ ॥
श्रेष्ठ्युचे यदि ते माता तं पश्येत्तन्न शोभनम् । ललितोऽप्यब्रवीत्तात यतिष्ये तददर्शने ॥ ७ ॥
श्रेष्ठिनापि तथादिष्टो ललितो गंगदत्तकम् । तिरस्करिण्यांतरितं[1] भोजनार्थं न्यषेदयत् ॥ ८ ॥
पुरस्तात् स्वयमासीनौ तौ श्रेष्ठिललितौ तदा । भुंजानौ गंगदत्ताय भोज्यं छन्नं च यच्छतः ॥ ९ ॥
वातोद्धूतेऽकांडपटे श्रेष्ठिनी तं ददर्श च । केशैः कृष्ट्वा कुट्टयित्वा गृहश्रोतसि[2] चाक्षिपत् ॥ १० ॥

---

१ लोके 'पडदो' । २ भाषायाम् 'गटर' ।

बलदेव–
पूर्वभव
चरिते
गंगदत्त–
भवः ।

उद्विग्नौ श्रेष्ठिललितौ श्रेष्ठिन्याश्छन्नमेव तम् । स्नपयित्वाबोधयतां गंगदत्तं महामती ॥ ११ ॥
तदा च साधवस्तत्र भिक्षार्थं समुपागताः । पृष्टाश्च ताभ्यां श्रेष्ठिन्यास्तत्पुत्रद्वेषकारणम् ॥ १२ ॥
अथैकः साधुरित्याख्यदेकस्मिन् संनिवेशने । अभूतां भ्रातरौ तौ तु बहिः काष्ठार्थमीयतुः ॥ १३ ॥
काष्ठैर्भृत्वा तथा गंत्रीमग्रस्थो ज्येष्ठ आपतत् । ददर्श पथि वेल्लंतीं[1] चक्कुंडां महोरगीम् ॥ १४ ॥
सोऽप्यवोचत् कनीयांसं गंत्र्याः सारथिमग्रतः । गंत्रीतो रक्षणीयेयं चक्कुंडा वराकिका ॥ १५ ॥
तच्छ्रुत्वा सर्पिणी सापि हृष्टा विश्वासभागभूत् । तत्रायातः कनिष्ठिस्तां दृष्ट्वा चैवमवोचत ॥ १६ ॥
ज्येष्ठेन रक्षितास्तीयं तथाप्यस्या उपर्यहम् । नेष्ये गंत्रीं श्रोतुमेतदस्थिभंगस्वरं मुदा ॥ १७ ॥
तथा चक्रे स च क्रूरस्तच्छ्रुत्वा सापि पन्नगी । कोऽप्येष मम वैरीति चिंतयंती व्यपद्यत ॥ १८ ॥
सा जज्ञे तव भार्येयं ज्येष्ठो भ्राता विपद्य सः । अस्याः सूनुर्ललितोऽभूत् प्रियः प्राग्जन्मकर्मणा ॥ १९ ॥
सोऽयं मृत्वा कनिष्ठोऽस्या अनिष्टः पूर्वकर्मणा । गंगदत्तः समुत्पेदे प्राक्तनं कर्म नान्यथा ॥ २० ॥
ततो विरक्ता जगृहुः पिता पुत्रौ च ते व्रतम् । जग्मतुः श्रेष्ठिललितौ महाशुक्रमुभौ दिवम् ॥ २१ ॥
तत्तु मातुरनिष्टत्वं गंगदत्तः पुनः स्मरन् । विश्ववाल्लभ्यनिदानी महाशुक्रदिवं ययौ ॥ २२ ॥
ततश्च ललितजीवो महाशुक्रात् परिच्युतः । वसुदेवस्य भार्याया रोहिण्या उदरेऽभवत् ॥ २३ ॥

---

१ लुठंतीम् । * उक्षयानम्, लोके 'बलदगाडुं' ।

गजाब्धिसिंहशशिनो विशतो रोहिणी मुखे । स्वप्नेऽपश्यन्निशाशेषे हलभृज्जन्मसूचकान् ॥ २४ ॥
रोहिणी रोहिणीशाभं[1] समये सुषुवे सुतम् । तस्य जन्मोत्सवं चक्रू राजानो मागधादयः ॥ २५ ॥
राम इत्यभिरामं च तस्य नामाकरोत् पिता । क्रमाच्च ववृधे रामः सर्वेषां रमयन् मनः ॥ २६ ॥
जग्राह च कलाः सर्वा रामो गुरुजनांतिके । अम्लानप्रतिभादर्शसंक्रांतसकलागमः ॥ २७ ॥
अथान्यदा वसुदेवकंसादिपरिवारितम् । आगात् समुद्रविजयं स्वच्छंदो नारदो मुनिः ॥ २८ ॥
समुद्रविजयः कंसो वसुदेवोऽपरेऽपि च । अभ्युत्थाय तमानर्चुरुद्यंतमिव भास्करम् ॥ २९ ॥
तेषां च पूजया प्रीतः क्षणं स्थित्वा च नारदः । उत्पपातान्यतो गंतुं स्वैरचारी सदा हि सः ॥ ३० ॥
कोऽसाविति च कंसेन पृष्टोऽवादीदिदं नृपः । पुरादस्माद्बहिर्यज्ञयशाः प्राक् तापसोऽभवत् ॥ ३१ ॥
यज्ञदत्ता तस्य भार्या सुमित्रो नाम नंदनः । अभूत् पत्नी सुमित्रस्य नाम्ना सोमयशा इति ॥ ३२ ॥
मध्याज्जृंभकदेवानां देवश्च्युत्वायुषः क्षये । आगात् सोमयशःकुक्षौ स जज्ञे चैष नारदः ॥ ३३ ॥
एकाहं तापसास्ते चोपोष्याहन्यपरे पुनः । उपेत्य वनमुंछेन[2] पारयंति सदापि हि ॥ ३४ ॥
तेऽन्यदा ययुरुंछायाशोकद्रौ न्यस्य नारदम् । ददशुर्जृंभकास्ते च तं बालमसमद्युतिम्[3] ॥ ३५ ॥
प्राग्जन्ममित्रमवधेर्ज्ञात्वा ते नारदं तदा । अस्तंभयन्नशोकस्य छायां तदुपरिस्थिताम् ॥ ३६ ॥

वसुदेव–पुत्रत्वेन बलदेव–जन्म ।

---

१ रोहिण्या ईशश्चंद्रस्तत्समानाभम् २ शीलोञ्छवृत्या । ३ अद्वितीयद्युतिम् ।

ततो ययुः स्वकार्याय सिद्धार्था वलितास्तु ते । तं दृष्ट्वा जगृहुः स्नेहाद्वैताढ्याद्रौ च निन्यिरे ॥ ३७ ॥
तैर्देवैः स्तंभितच्छायः सोऽशोकस्तत्प्रभृत्यपि । छायावृक्ष इति ख्यातो बभूव पृथिवीतले ॥ ३८ ॥
जृंभकैः पालितो बालः स वैताढ्याद्रिकन्दरे । शिक्षितश्चाष्टवर्षः सन् विद्याः प्रज्ञप्तिकादिकाः ॥ ३९ ॥
ताभिश्च व्योमगमनो नवमो नारदो मुनिः । एतस्यामवसर्पिण्यामयं चरम[1]विग्रहः ॥ ४० ॥
मुनिना सुप्रतिष्ठेन त्रिकालज्ञानशालिना । उत्पत्तिर्नारदमुनेरियं हि कथिता मम ॥ ४१ ॥
कलिप्रियः प्रकृत्यायमवज्ञातश्च कुप्यति । एकत्र चानवस्थायी सर्वत्रापि हि पूज्यते ॥ ४२ ॥

नारदोत्पत्तिः ।

कंसेनान्येद्युराहूतः स्नेहादानकदुन्दुभिः । दशार्हेशमनुज्ञाप्य मथुरायां ययौ पुरि ॥ ४३ ॥
कंसस्तत्रान्यदा शौरिमूचे जीवयशोऽन्वितः । गरीयस्यस्ति नगरी नामनो मृत्तिकावती ॥ ४४ ॥
तस्यां मम पितृव्योऽस्ति देवको नाम भूपतिः । देवकी नाम तस्यास्ति देवकन्योपमा सुता ॥ ४५ ॥
गत्वा परिणय त्वं तामेषोऽस्म्यनुचरस्तव । मा मे प्रणययांचाया अमुष्याः खंडनं कृथाः ॥ ४६ ॥
दाक्षिण्यनिधिरित्युक्तो दशार्हो दशमः स तु । चचाल सह कंसेन मार्गे चैक्षिष्ट नारदम् ॥ ४७ ॥
विधिना शौरिकंसाभ्यामर्चितो नारदो मुनिः । प्रीतोऽपृच्छत् कुतो हेतोः कुत्र वा चलितौ युवाम् ॥ ४८ ॥
उवाच शौरिः कंसेन सुहृदा चालितोऽस्म्यहम् । परिणाययितुं कन्यां देवकीं देवकात्मजाम् ॥ ४९ ॥
जगाद नारदः साधु कंसेनारब्धमीदृशम् । निर्मायाप्यनुरुपाणां योगे धाताप्यपंडितः ॥ ५० ॥



---

१ अंतिमशरीरी ।

रुपेणाप्रतिरुपस्त्वं वसुदेव यथा नृषु । नारीषु देवकसुता तथा सा खलु देवकी ॥ ५१ ॥
परिणीतास्त्वया बह्व्यः खेचर्योऽपि हि कन्यकाः । असारा मन्यसे तास्तु नूनं संप्रेक्ष्य देवकीम् ॥ ५२ ॥
अस्मिन्नुचितसंयोगे मा भूद्विघ्नः कुतोऽप्यतः । गत्वाख्यास्यामि देवक्यै वसुदेव भवद्गुणान् ॥ ५३ ॥
इत्युक्त्वोत्पत्य स मुनिर्देवकीसदनं ययौ । तयार्चितश्चाशास्तेति वसुदेवो वरोऽस्तु ते ॥ ५४ ॥
वसुदेवः क इत्युक्तस्तया स मुनिरब्रवीत् । युवा दशार्हो दशमो विद्याधरवधूप्रियः ॥ ५५ ॥
किमन्यद्यस्य रुपेण तुल्या देवादयोऽपि न । वसुदेवः स इत्युक्त्वा नारदर्षिस्तिरोदधे ॥ ५६ ॥
॥ युग्मम् ॥

वसुदेव-
देवक्यो-
र्विवाहः ।

तद्गिरा हृदि देवक्या विवेशानकदुन्दुभिः । आयातौ मृत्तिकावत्यां पुर्यां तु क्रमयोगतः ॥ ५७ ॥
देवकेनार्चितौ तौ तु शौरिकंसौ विवेकिना । आसयित्वासनेऽनर्घे पृष्टावागमकारणम् ॥ ५८ ॥
कंसोऽप्यवोचदुचितां वसुदेवाय देवकीम् । प्रदापयितुमत्रागामिदमागमकारणम् ॥ ५९ ॥
अवदद्देवको नैष विधिः कन्यार्थमागमः । स्वयमेव वरस्येति दास्याम्यस्मै न देवकीम् ॥ ६० ॥
एवं विलक्षौ तौ द्वावपीयतुः शिबिरं निजम् । अंतःपुरं प्राविशित्तु देवकः पृथिवीपतिः ॥ ६१ ॥
नमस्कृतोऽथ देवक्या देवकः परया मुदा । अनुरुपं वरं पुत्रि लभस्वेत्याशिषं ददौ ॥ ६२ ॥
आख्यच्च देवको देव्यै वसुदेवाय देवकीम् ।अद्य दापयितुं कंस उद्युक्तो मामयाचत ॥ ६३ ॥

देवकीं वसुदेवाय नादां तद्विरहासहः । तच्छ्रुत्वा व्यषदद्देवी रुरोदोच्चैश्च देवकी ॥ ६४ ॥
देवकोऽपि तयोर्भावं सम्यग्ज्ञात्वैवमब्रवीत् । अलं विषादेन युवां प्रष्टुं ह्यहमिहागमम् ॥ ६५ ॥
देव्यप्यूचे वसुदेवो देवक्या उचितो वरः । पुण्यैरस्याः स्वयमसावागाद्वरणहेतवे ॥ ६६ ॥
इत्युक्तो देवकः कंसवसुदेवौ स्वमंत्रिणा । सद्यः समानयामास स्वयं पूर्वापमानितौ ॥ ६७ ॥
जज्ञे विवाहः पुण्येऽह्नि देवकीवसुदेवयोः । तारतारं गीयमानैर्नवैर्धवलमंगलैः ॥ ६८ ॥
देवको वसुदेवाय ददौ स्वर्णादि भूरिशः । दशगोकुलनाथं च नंदं गोकोटिसंयुतम् ॥ ६९ ॥
दशार्हकंसौ मथुरामीयतुर्नन्दसंयुतौ । सुहृद्विवाहोपज्ञं चारेभे कंसो महोत्सवम् ॥ ७० ॥
पूर्वोपात्तव्रतश्चातिमुक्तः कंसानुजो मुनिः । तपःकृशांगः कंसौकस्यागात् पारणहेतवे ॥ ७१ ॥
तदा जीवयशाः कंसपत्नी मद्यवशंवदा । साधूत्सवदिनेऽमुष्मिन् देवरासि समागतः ॥ ७२ ॥
नृत्य गाय मया सार्धमित्यादि बहुधा तया । कंठे लगित्वा स मुनिरकदर्थि गृहस्थवत् ॥ ७३ ॥
सोऽपि ज्ञानी शशंसैवं यन्निमित्तोऽयमुत्सवः । तद्गर्भः सप्तमो हंता पतिपित्रोस्त्वदीययोः ॥ ७४ ॥
तां वाचं स्फुर्जथु[1]निभां श्रुत्वा जीवयशा द्रुतम् । भयाद्गतमदावस्था तं मुमोच महामुनिम् ॥ ७५ ॥
गत्वा कंसाय साचख्यौ कंसोऽप्येवमचिंतयत् । मोघीभवेद्वज्रमपि न पुनर्मुनिभाषितम् ॥ ७६ ॥

१ वज्रधातसदृशीम् ।



वसुदेव–
देवक्यो–
र्विवाहः ।

न यावत् कोऽपि जानाति तावदानकदुंदुभिम् । सप्तापि देवकीगर्भान् याचे स्वयमनागतान् ॥ ७७ ॥
याचितो देवकीगर्भान् न चेद्दास्यति मे सुहृद् । तदान्यथा यतिष्येऽहं यथा स्यात् क्षेममात्मनः ॥ ७८ ॥
विचिंत्यैवं मदावस्थां नाटयन्नमदोऽपि सः । जगामोपवसुदेवं दूराद्विरचितांजलिः ॥ ७९ ॥
अभ्युत्थाय दशार्हस्तमर्हति स्म यथोचितम् । स्वपाणिना परामृश्य ससंभ्रममुवाच च ॥ ८० ॥
सुहृत्प्राणप्रियो मेऽसि किंचिद्वक्तुमना इव । प्रेक्ष्यसे च तदाचक्ष्व यद्ब्रवीषि करोमि तत् ॥ ८१ ॥
जगाद प्रांजलिः कंसः कृतार्थोऽग्रेऽप्यहं सखे । जरासंधाज्जीवयशोदापनेन कृतस्त्वया ॥ ८२ ॥
सप्तेतो देवकीगर्भाञ्जातमात्रान्ममार्पयेः । वसुदेवोऽप्यृजुमनास्तत्तथा प्रत्यपद्यत ॥ ८३ ॥

कंसेन छद्मना वसुदेव–देवकी–प्रतारणम् ।

वृत्तानभिज्ञा देवक्यप्यभ्यधादेवमस्त्विदम् । वसुदेवसुतानां च त्वत्सूतानां च नांतरम् ॥ ८४ ॥
त्वयैव ह्यावयोर्योगो व्यधायि विधिनेव भोः । किमद्यानधिकारीव हे कंस व्याकरोष्यदः ॥ ८५ ॥
दशार्होऽप्यवदत् सुभ्रु पर्याप्तं बहुभाषितैः । जातमात्राः सप्त गर्भाः कंसायत्ता[1] भवंतु ते ॥ ८६ ॥
प्रसादोऽयं ममेत्यूचे कंसः क्षीबापदेशतः[2] । समं दशार्हेण सुरां पीत्वा च स्वगृहं ययौ ॥ ८७ ॥
अश्रौषीन्मुनिवृत्तांतं पश्चादानकदुंदुभिः । कंसेन च्छलितोऽस्मीति सत्यवागन्वतप्यत ॥ ८८ ॥
इतश्च भद्दिलपुरे श्रेष्ठीभ्यो[*] नाग इत्यभूत । श्रेष्ठिनी सुलसा नाम परमश्रावकौ च तौ ॥ ८९ ॥

१ कंसाधीनाः । २ क्षीबो मत्तस्तस्यापदेशतो मिषतः । * इभ्यः – धनवान् ।

सुरेण
देवकी–
षट्गर्भाणाम्
सुलसायां
संहरणम् ।

अतिमुक्तश्चारणर्षिः सुलसायास्तु शैशवे । आचख्यौ यदसौ बाला निंदुरेव[1] भविष्यति ॥ ९० ॥
तया च तपसाराधि नैगमेषी हरेः सुरः । तुष्टश्च याचितः पुत्रानूचे ज्ञात्वा तु सोऽवधेः ॥ ९१ ॥
अहं हि देवकीगर्भान् हंतुं कंसेन याचितान् । निंदोस्ते गर्भसंचारादर्पयिष्यामि धार्मिके ॥ ९२ ॥
इत्युक्त्वा निजशकत्या स देवकीसुलसे समम् । रजस्वले व्यधात्ते च समं गुर्व्यौ बभूवतुः ॥ ९३ ॥
समं च सुषुवाते ते मृतं गर्भं च सौलसम्[+] । संचार्य देवकीगर्भं सुलसायाः सुरो ददौ ॥ ९४ ॥
एवं तयोस्तु षड्गर्भान् स सुरः पर्यवर्तयत् । कंसोऽपि निंदुगर्भांस्तान् दृषद्या[2]स्फालयद्दृढम् ॥ ९५ ॥
षट् च ते देवकीगर्भाः सुलसायाः स्वपुत्रवत् । गृहे सुखमवर्धंत तस्या एव स्तनंधयाः ॥ ९६ ॥
नाम्नानीकयशोऽनंतसेनावजितसेनकः । निहतारिर्देवयशाः शत्रुसेनश्च ते त्वमी ॥ ९७ ॥
अथ देवक्यृतुस्नाता सिंहार्काग्निगजध्वजान् । विमानपद्मसरसी निशांते स्वप्नमैक्षत ॥ ९८ ॥
च्युत्वा शुक्राद्गंगदत्तस्तस्याः कुक्षाववातरत् । गर्भं च धारयामास रत्नमाकरभूरिव ॥ ९९ ॥
पुत्रं नभःसि[3]ताष्टम्यां निशीथेऽसूत देवकी । कृष्णं सदेवसान्निध्यं शत्रुदृक्पातघातिनम् ॥ १०० ॥
तद्गृह्या देवताः कंसायुक्तान् यामिकपूरुषान् । स्वशक्त्या स्वापयामासुरुपभुक्तविषानिव ॥ १०१ ॥
देवक्यवोचदाहूय पतिं कंसेन पाप्मना । अमित्रेण मित्ररुपेणासि वाचा नियंत्रित ॥ १०२ ॥

१ निंदुर्मृतवत्सा । २ शिलोपरि । ३ श्रावण शुक्ल अष्टम्याम् । + सुलसायाः अयं – सौलसः तं तथा ।

कृष्ण-
वासुदेवस्य
जन्म
गोकुले
स्थापनं च ।

जातं जातं सुतं मेऽसौ हंति तन्माययाप्यमुम् । रक्ष पुत्रं न मायापि पाप्मने भ्रूणरक्षणात्[1] ॥ १०३ ॥
नंदस्य गोकुले नीत्वा मुंचेमं मम बालकम् । गृहे मातामहस्येव तत्र वर्धिष्यते ह्यसौ ॥ १०४ ॥
साधु साध्विति तां जल्पन् स्नेहार्द्रो यदुपुंगवः । बालमादाय निरगात्तद्गृहात् सुप्तयामिकात् ॥ १०५ ॥
दधुस्तस्योपरि च्छत्रं पुष्पवृष्टिं च चक्रिरे । उद्दंडैरष्टभिर्दीपैर्मार्गोद्योतं च देवताः ॥ १०६ ॥
धवलर्षभरुपेण भूत्वाग्रे तस्य देवताः । द्वाराण्युद्घाटयामासुः पुर्या अन्यैरलक्षितम् ॥ १०७ ॥
प्राप्तश्च गोपुरे शौरिरुग्रसेनेन भूभुजा । पृष्टश्च पंजरस्थेन किमेतदिति विस्मयात् ॥ १०८ ॥
कंसस्य प्रत्यनीकोऽयमिति शौरिस्तमर्भकम् । दर्शयन्नुग्रसेनाय सहर्षमिदमभ्यधात् ॥ १०९ ॥
त्वद्द्विषो निग्रहोऽमुष्मादमुष्माच्च तवोदयः । भविष्यति परं राजन्नाख्येयं[2] कस्यचित्वया ॥ ११० ॥
एवमस्त्विति तेनोक्ते शौरिर्नंदगृहे ययौ । नंदभार्या यशोदापि तदैव सुषुवे सुताम् ॥ १११ ॥
सुतं दत्वा यशोदायै शौरिरादाय तत्सुताम् । आनीय देवकीपार्श्वे सुतस्थानेऽमुचत् क्षणात् ॥ ११२ ॥
शौरिश्च निर्ययौ ते च प्रबुद्धाः कंसपूरुषाः । किं जातमिति जल्पंतो ददृशुस्तत्र तां सुताम् ॥ ११३ ॥
तां कंसस्यार्पयंस्तेऽथ दध्यौ कंसोऽपि यो मम । मृत्यवे सप्तमो गर्भः स स्त्रीमात्रमभूदसौ ॥ ११४ ॥
मन्ये मुनिवचो मिथ्या तया किं हतयेति सः । छिन्ननासापुटां कृत्वा देवक्यास्तां समार्पयत् ॥ ११५ ॥

१ गर्भरक्षणात् २ न आख्येयं ।

कृष्णांगत्वात् कृष्ण इति नाम्नाहूतः स बालकः । रक्ष्यमाणो देवताभिर्ववृधे नन्दवेश्मनि ॥ ११६ ॥
देवकी तु गते मासे वसुदेवमभाषत । द्रष्टुमुत्कंठिता पुत्रं तत्र यास्यामि गोकुले ॥ ११७ ॥
ऊचे शौरिरकस्मात्त्वं यांती कंसेन लक्ष्यसे । उत्पाद्य कारणं तस्माद्गंतुं देवकि युज्यते ॥ ११८ ॥
ततोऽन्विता बहुस्त्रीभिः सर्वतो गोपथेन गाः । अर्चंती गोकुलं गच्छेर्देवक्यपि तथाकरोत् ॥ ११९ ॥
श्रीवत्सलांछितोरस्कं नीलोत्पलदलद्युतिम् । उत्फुल्लपुंडरीकाक्षं चक्राद्यंककरक्रमम् ॥ १२० ॥
नीलरत्नमिवोन्मृष्टं यशोदोत्संगवर्तिनम् । ददर्श हृदयानंदं नंदनं तत्र देवकी ॥ १२१ ॥
॥ युग्मम् ॥

देवताभिः कृष्णस्य रक्षणम् ।

गोपूजाव्याजतो नित्यं ययौ तत्र च देवकीः । ततः प्रभृति गोपूजाव्रतं प्रववृते जने ॥ १२२ ॥
तदा च पितृवैरेण सूर्पकस्यात्मजे उभे । वसुदेवापकारायाक्षमे शकुनिपूतने ॥ १२३ ॥
शाकिन्याविव पापिष्ठे यशोदानंदवर्जितम् । कृष्णमेकाकिनं हंतुमीयतुस्तत्र गोकुले ॥ १२४ ॥
॥ युग्मम् ॥
शकुनिः शकटारुढाधःस्थे कृष्णे कटु व्यरौत् । विषलिप्तं पूतना तु स्तनं कृष्णाननेऽक्षिपत् ॥ १२५ ॥
कृष्णसान्निध्यकारिण्यो देवतास्तत्क्षणादपि । तेनैव शकटेनोभे ते प्रहृत्य व्यपादयन् ॥ १२६ ॥
नंदस्तत्रागतोऽपश्यत् कृष्णमेकाकिनं स्थितम् । पर्यस्तं शकटं तच्च खेचर्यौ ते च मारिते ॥ १२७ ॥

मूषितोऽस्मीति जल्पंश्च कृष्णमंके निधाय सः । साक्षेपमूचे गोपालान् पर्यस्तः शकटं कथम् ॥ १२८ ॥
राक्षस्याविव रक्तास्ये के चैते गतजीविते । वत्सो ममायमेकाकी स्व भाग्येनैव जीवितः ॥ १२९ ॥
गोपा अप्यूचिरे स्वामिन् बालेन बलिना तव । पर्यस्तं शकटमिदमेते चैकेन मारिते ॥ १३० ॥
तच्छ्रुत्वा नंदः प्रैक्षिष्ट सर्वेष्वंगेषु केशवम् । अक्षतांगं च तं प्रेक्ष्य यशोदामित्यभाषत ॥ १३१ ॥
कथमेकाकिनं पुत्रं मुक्त्वा यास्यन्यकर्मसु । स्तोकान्मुक्तोऽयमद्यैवापायेषु निपतन्निह ॥ १३२ ॥
सर्पिर्घटेष्वपि लुठत्सूज्झित्वा कृष्णमेककम् । न त्वया क्वापि गंतव्यं पर्याप्तं तेऽन्यकर्मभिः ॥ १३३ ॥
इति श्रुत्वा यशोदापि हा हतास्मीति भाषिणी । आघ्नाना पाणिना वक्षोऽभ्येत्य कृष्णमुपाददे ॥ १३४ ॥
न क्षतोऽसीति पृच्छंती सर्वांगेक्षणपूर्वकम् । कृष्णं चुचुंब शिरसि यशोदा सस्वजे च तम् ॥ १३५ ॥
आदरेण यशोदा तं नित्यं स्वयमधारयत् । उत्साहशीलः कृष्णस्तु छलेनेतस्ततो ययौ ॥ १३६ ॥
दाम्नोदरेऽन्यदा कृष्णं तद्दातमांतमुदूखले[1] । बद्ध्वा तद्यानभीता सा प्रातिवेश्मगृहे ययौ ॥ १३७ ॥
तदा च सूर्पकसुतो वैरं पैतामहं स्मरन्[2] । तत्रैत्यान्योऽन्यमासन्नयमलार्जुनतां ययौ ॥ १३८ ॥
कृष्णं सोदूखलं पेष्टुं स तयोश्चांतरेऽनयत् । भंक्त्वार्जुनतरु जघ्ने कृष्णदेवतयाथ सः ॥ १३९ ॥
कलभेनेव कृष्णेनोन्मूलितौ यमलार्जुनौ । इति गोपमुखाच्छ्रुत्वा नंदोऽभ्यागाद्यशोदया ॥ १४० ॥
तौ धूलिधूसरं कृष्णं मोहान्मुर्ध्नि चुचुंबतुः । दामोदरेत्यूचिरे च तं गोपा दामबंधनात् ॥ १४१ ॥

१ लोके 'खांडणियो' । २ विष्णोः शत्रुः ।



देवताभिः
कृष्णस्य
रक्षणम् ।

वल्लवै[1]र्वल्लवीभिश्च सोऽत्यंतं प्राणवल्लभः । उरस्यंके शिरसि चारोप्यते स्म दिवानिशम् ॥ १४२ ॥
जग्रह दधि[2]साराणि मं[3]थनीभ्यः स चापलात् । अवार्यमाणः स्नेहार्द्रैर्गोपैस्तत्कौतुकेक्षुभिः ॥ १४३ ॥
व्याहरन् विहरन् वापि प्रहरन्नाहरन्नपि । यशोदानंदगोपानामानंदाय बभूव सः ॥ १४४ ॥
अपायभीतास्ते धर्तुं तं यांतं जातु नाशकन् । अन्वयुः केवलं स्नेहगुण[4]पाशनियंत्रिताः ॥ १४५ ॥
दशार्होऽप्यश्रृणोत्तेन हते शकुनिपूतने । पर्यस्तं शकटं भग्नौ तौ चापि यमलार्जुनौ ॥ १४६
चिंतयामास चैवं स गोपितोऽपि मया सुतः । स्वौजसा प्रथमानोऽस्ति मा ज्ञासीत् कंस एष तम् ॥ १४७ ॥
ज्ञात्वापि किंच मालं भूत् कर्तुं सोऽस्मिन्नमंगलम् । ततः कृष्णस्य साहाय्ये सुतेभ्यः प्रेषयामि कम् ॥ १४८ ॥
अक्रूराद्याः क्रूरबुद्धेः कंसस्य विदिताश्च ते । आदेष्टुं साधु रामस्तदद्याप्यविदितोऽस्य सः ॥ १४९ ॥
निश्चित्यैवं कोशलाया रोहिणीं रामसंयुताम् । शौरिरानाय्य संभाष्य प्रैषीच्छौर्यपुरे पुरे ॥ १५० ॥
राममाहूय सोऽन्येद्युः कथयित्वा यथातथम् । शिक्षां दत्वा सुतत्वेनार्पयन्नंदयशोदयोः ॥ १५१ ॥
तौ द्वौ दशधनुस्तुंगौ रेमाते सुंदराकृती । निर्निमेषं वीक्ष्यमाणौ गोपीभिर्मुक्तकर्मभिः ॥ १५२ ॥
कृष्णोऽध्यैष्ट धनुर्वेदमन्या अप्यखिलाः कलाः । रामस्य पार्श्वे गोपोपनीतोपकरणः सदा ॥ १५३ ॥
कदाचित् सुहृदौ भूत्वा शिष्याचार्यौ कदापि तौ । विविधं विचिचेष्टाते क्षणमप्यवियोगिनौ ॥ १५४ ॥

कृष्णस्य कला-ग्रहणम् ।

१ गोपैः । २ नवनीतानि । ३ मंथनपात्रम्, लोके 'गागर' । ४ गुण-रज्जु ।

गच्छतो मत्तवृषभान् पुछे जग्राह केशवः । रामो भ्रातृबलं जानन्नुदासीन इवैक्षत ॥ १५५ ॥
यथा यथा हि ववृधे कृष्णस्तत्र तथा तथा । गोपीनां मान्मथो जज्ञे विकारस्तन्निरीक्षणात् ॥ १५६ ॥
तं मध्येकृत्य हल्लीसं[1] चक्रुर्गोपालयोषितः । भ्रमंत्यः परितोऽम्भोजं भ्रमर्य इव निर्भरम् ॥ १५७ ॥
तं पश्यंत्यो यथा गोप्यो नयने न ह्यमीलयन् । कृष्ण कृष्णेति जल्पंत्यस्तथैवोष्ठपुटे अपि ॥ १५८ ॥
कृष्णे गतमनस्कत्वात् पतिता अपि दोहनीः[2] । अजानंत्यो गवां दोहं भुवि चक्रुः कदापि ताः ॥ १५९ ॥
कृष्णं पराङ्मुखं यांतं सन्मुखीकर्तुमाशु ताः । अस्थानेऽनाटयंस्त्रासं त्रस्तत्राणपरो हि सः ॥ १६० ॥
सिंदुवारादिदामानि[*] ग्रथित्वा गोपिकाः स्वयम् । स्वयंवरस्रज इव निदधुः कृष्णवक्षसि ॥ १६१ ॥



स्खलितं गीतनृत्यादौ चक्रुस्ता बुद्धिपूर्वकम् । कृष्णाच्छिक्षापदेशेन प्रसादालापलिप्सवः ॥ १६२ ॥
येन तेन प्रकारेण जजल्पुः पस्पृशुश्च तम् । अगोपितविकारास्ता गोपेंद्रं गोपयोषितः ॥ १६३ ॥
मयूरपिच्छाभरणः कृष्णो गोपालगुर्जरीः[3] । गोपालीभिरविच्छिन्नं पूर्यमाणश्रुतिर्जगौ ॥ १६४ ॥
कृष्णोऽत्यगाधवारिस्थान्यपि पद्मानि लीलया । तरन् हंस इवोद्धृत्य गोपीभ्योऽदत्त याचितः ॥ १६५ ॥
दृष्टो हरति नश्चित्तमदृष्टो जीवितं पुनः । भवद्भ्रातेत्युपालंभं ददू रामाय गोपिकाः ॥ १६६ ॥
गिरिश्रृंगस्थितो वेणुं[4] वादयन्मधुरस्वरम् । नृत्यंश्च हासयामास रामं रामानुजो मुहुः ॥१६७ ॥



---

१ क्रीडाविशेषम् । २ दुग्धधारा । ३ गुर्जरी रागविशेषः । ४ वाद्यविशेष । लोके 'वांसळी' । ७ वृक्षविशेषः । लोके 'नगोड' ।

गायंतीषु च गोपीषु कृष्णगोपे च नृत्यति । हस्ततालं ददौ रामो रंगाचार्य इवोद्भटः ॥ १६८ ॥
एवं च क्रीडतोस्तत्र गोपयो रामकृष्णयोः । एकादश समा जग्मुः सुषमाकालवत् सुखम् ॥ १६९ ॥
इतश्च श्रीसूर्यपुरे समुद्रविजयप्रिया । शिवापश्यन्निशाशेषे महास्वप्नांश्चतुर्दश ॥ १७० ॥
गजोक्षसिंहश्रीदामचंद्रार्कध्वजावार्घटा* । पद्मसरोऽब्धिविमानरत्नपुंजाग्नयस्तु ते ॥ १७१ ॥
तदा च कार्तिके कृष्णद्वादश्यां त्वाष्ट्रगे[1] विधौ[2] । च्युत्वापराजिताच्छंखः शिवाकुक्षाववातरत् ॥ १७२ ॥
नारकाणामपि सुखमुद्योतश्च जगत्त्रये । तदाभूदावश्यकं हि कल्याणेष्वर्हतामदः ॥ १७३ ॥

श्रीनेमिनाथ जन्म ।

प्रबुद्धा च शिवादेवी पत्युः स्वप्नान् शशंस तान् । स्वप्नार्थं प्रष्टुमाहूतः क्रोष्टुकिस्तत्र चाययौ ॥ १७४ ॥
चारणश्रमणश्चैकस्तत्र स्वयमुपाययौ । नृपेणोत्थाय सोऽवंदि न्यषादि च महासने ॥ १७५ ॥
सक्रोष्टुकिर्मुनिः पृष्टो राज्ञा स्वप्नफलं तदा । आख्याद्यते सुतो भावी तीर्थकृन्त्रिजगत्पतिः ॥ १७६ ॥
इत्याख्याय जगामर्षी राजा राज्ञी च तौ मुदम् । बिभरांचक्रतुर्भूरि स्नाताविव सुधारसैः ॥ १७७ ॥
देवी च धारयामास गर्भं गूढं सुखावहम् । प्रत्यंगमपि लावण्यसौभाग्योत्कर्षदायिनम् ॥ १७८ ॥
श्रवणश्वेतपंचम्यां निशीथे त्वाष्ट्रगे विधौ । सा देवी सुषुवे सूनुं कृष्णाभं शंखलांछनम् ॥ १७९ ॥
षट्पंचाशद्दिक्कुमार्यः स्वस्वस्थानेभ्य एत्य ताः । चक्रिरे सूतिकर्माणि शिवादेवीजिनेन्द्रयोः ॥ १८० ॥



१ चित्रानक्षत्रस्थिते । २ चन्द्रे । * जलकलशः ।

श्रीनेमिनाथ-
जन्मोत्सवः ।

एत्य शक्रः पंचरुपो रुपेणैकेन च प्रभुम् । आददे चामरे द्वाभ्यामेकेन छत्रमुज्वलम् ॥ १८१ ॥
एकेनोल्लालयन् वज्रं बलान्नर्तकवत्पुरः । जगाम मेरुशिखरेऽतिपांडुकंबलां शिलाम् ॥ १८२ ॥
॥ युग्मम् ॥
स्वांके स्वामिनमारोप्य सिंहासन इवोच्चकैः । अधिसिंहासनं तत्र निषसाद पुरंदरः ॥ १८३ ॥
अथाच्युतप्रभृतयः सुरेन्द्रास्तत्र च क्षणात् । जिनेन्द्रं स्नपयामासुस्त्रिषष्टिरपि भक्तितः ॥ १८४ ॥
ईशानांके स्थापयित्वा शक्रोऽपि स्वामिनं ततः । विधिनास्नपयद्दिव्यैश्चानर्च कुसुमादिभिः ॥ १८५ ॥
विधायारात्रिकं भर्तुः प्रणम्य च कृतांजलिः । इति स्तोतुं समारेभे भक्तिनिर्भरवाग्घरिः ॥ १८६ ॥
शिवगामिन् शिवाकुक्षिशुक्तिमुक्तामणे प्रभो । शिवानाम[1]एकनिलय भगवंस्त्वं शिवंकरः ॥ १८७ ॥
तुभ्यमभ्यर्णमोक्षाय समक्षा[2]शेषवस्तवे । विविधर्द्धिनिधानाय द्वाविंशायार्हते नमः ॥ १८८ ॥
हरिवंशः पवित्रोऽयं पवित्रा भारती च भूः । यस्मिंश्चरमदेहस्त्वमवातारीर्जगद्गुरो ॥ १८९ ॥
कृपाया एक आधारो ब्रह्मण[3]श्चैकमास्पदम् । ऐश्वर्यस्याश्रयश्चैकस्त्वमेव त्रिजगद्गुरो ॥ १९० ॥
भवतो दर्शनेनैवातिमहिम्ना जगत्पते । देहिनां मोहविध्वंसाद्देशनाकर्म सिध्यति ॥ १९१ ॥

१ कल्याणानाम् । २ समक्षाणि प्रत्यक्षाणि समग्रवस्तूनि यस्य तस्मै । ३ ब्रह्मचर्यस्य ।

विनैव कारणं त्राता विना हेतुं च वत्सलः । विनानिमित्तं भर्ता त्वं हरिवंशैकमौक्तिकः ॥ १९२ ॥
अद्यापराजितादेतद्भरतक्षेत्रमुत्तमम् । शर्मणे यत्र लोकस्य बोधिदस्त्वमवातरः ॥ १९३ ॥
नित्यं भजंतु त्वत्पादा मानसे मम हंसताम् । चरितार्था भवतु च त्वद्गुणस्तवनेन गीः ॥ १९४ ॥
इति स्तुत्वा जगन्नाथमादाय च पुरंदरः । मुमोच श्रीशिवादेवीपार्श्वे नीत्वा यथास्थिति ॥ १९५ ॥
स्वामिनोऽप्सरसो धात्रीः पंचादिश्याथ वासवः । कृत्वा नंदीश्वरे यात्रां निजं स्थानमुपाययौ ॥ १९६ ॥
प्रातरर्कमिवोद्यंतं प्रेक्ष्य पुत्रं महाद्युतिम् । जन्मोत्सवं प्रमुदितः समुद्रविजयोऽकरोत् ॥ १९७ ॥
स्वप्नेऽरिष्टमयी दृष्टा चक्रधारात्र गर्भगे । मात्रा तस्यारिष्टनेमिरित्याख्यां तत्पिता व्यधात् ॥ १९८ ॥
अरिष्टनेमिनो जन्म श्रुत्वा हर्षप्रकर्षतः । मथुरायां वसुदेवादयश्चक्रुर्महोत्सवम् ॥ १९९ ॥

कंसेन कृष्णप्रवृत्ति–परिज्ञानम् ।

वसुदेवगृहेऽन्येद्युर्देवकीं द्रष्टुमागतः । तां छिन्नैकघ्राणपुटां कंसः कन्यामुदैक्षत ॥ २०० ॥
भीतोऽथ कंसो वेश्मैत्यापृच्छन्नैमित्तिकोत्तमम् । सप्तमाद्देवकीगर्भान्मुनिनोक्तं वृथाथ न ॥ २०१ ॥
नैमित्तिकोऽप्यभाषिष्ट न मृषा ऋषिभाषितम् । सप्तमो देवकीगर्भः क्वचिदस्ति तवांतकृत् ॥ २०२ ॥
अरिष्टो यस्तवोक्षास्ति केशी नाम महाहयः । खरमेषौ च दुर्दांतौ मुंच वृन्दावनेऽथ तान् ॥ २०३ ॥
गिरिसारानप्यमून् यस्तत्र क्रीडन् यदृच्छया । हनिष्यति स हंता ते देवक्याः सप्तमः सुतः ॥ २०४ ॥
अन्यच्च यत्क्रमायातं शार्ङ्गं धन्व त्वदोकसि । पूज्यमानं त्वज्जनन्या स एवारोपयिष्यति ॥ २०५ ॥

कंसेन
कृष्णप्रवृत्ति-
परिज्ञानम् ।

आख्यातं ज्ञानिना यत्तद्भविष्यति भविष्यंतः[1] । दोष्मतो वासुदेवस्य दुःस्पर्शमितरैर्जनैः ॥ २०६ ॥
कालियाहेः स दमकश्चाणूरस्य च घातकः । पद्मोत्तरं चंपकं च हनिष्यति तव द्विपौ ॥ २०७ ॥
स्वारिं ज्ञातुमथो कंसोऽरिष्टादीनमुचद्वने । चाणूरमुष्टिकौ मल्लावादिदेश श्रमाय च ॥ २०८ ॥
तदा शरद्यरिष्टोक्षा स रिष्टं[2]मिव मूर्तिमत् । अंतर्वृन्दावनं गर्जन् गोपलोकमुपाद्रवत् ॥ २०९ ॥
श्रृंगाग्रेणोद्दध्रे गाः स तटीपंकमिवोच्चकैः । तुंडाग्रेणालोठयच्च सर्पिर्भांडान्यनेकशः ॥ २१० ॥
त्रायस्व कृष्ण कृष्णेति राम रामेति चोच्चकैः । अतिदीनो वल्लवानां[*] तदा कलकलोऽभवत् ॥ २११ ॥
रामेण सह गोविन्दः किमेतदिति संभ्रमात् । धावितः पुरतोऽद्राक्षीत्तमुक्षाणं[3] महौजसम् ॥ २१२ ॥
कश्चिदर्थो न नो गोभिर्न चाज्यैरपि तिष्ठ तत् । इति वृद्धैर्निषिद्धोऽपि कृष्ण आह्वास्त तं वृषम् ॥ २१३ ॥
विषाणे उन्नमय्योच्चैराकुंचितमुखो रुषा । उत्पुच्छ्यमानोऽरिष्टो गोविंदायाभ्यधावत ॥ २१४ ॥
तं श्रृंगयोर्गृहीत्वाशु वालयित्वा च तद्गलम् । विधाय च निरुच्छ्वासमरिष्टमवधीद्धरिः ॥ २१५ ॥
मृस्याविव मृतिं नीतेऽरिष्टे हृष्टाः समंततः । आनर्चुर्वल्लवाः कृष्णं सतृष्णास्तन्निरीक्षणे ॥ २१६ ॥
कृष्णस्य क्रीडतोऽन्येद्युः केशी कंस[4]किशोरकः । कीनाश इव दुष्टाशो विवृतास्यः समाययौ ॥ २१७ ॥
दंतैर्वत्सतरान् गृह्णन्निघ्नन् गोगर्भिणीः खुरैः । भीषणं हेषमाश्च स कृष्णेनात्यतर्ज्यत ॥ २१८ ॥

---

१ भाविनो वासुदेवस्य । २ अशुभम् । ३ वृषभम् । ४ कंसस्य किशोरकोऽश्वतरः । * गोपालानाम्

जिघत्सोः प्रसृते तस्य दंत[1]क्रकचदारुणे । मुखे वज्रोपमं बाहुं वालयित्वा हरिर्न्यधात् ॥ २१९ ॥
आग्रीवं बाहुना तेन तथादार्यत तन्मुखम् । परासुः स यथा जज्ञेऽरिष्टसार्थ इवोत्सुकः ॥ २२० ॥
कंसस्य खरमेषौ तु तत्राटंतौ [2]खरौजसौ । अन्येद्युर्लीलया कृष्णो निजघान महाभुजः ॥ २२१ ॥
तानकर्ण्य हतान् कंसः सम्यक् स्वारिं परीक्षितुम् । शार्ङ्गपूजोत्सवव्याजात् स्थापयामास पर्षदि ॥ २२२ ॥
तस्य चोपासिकां सत्यभामां जामिं कुमारिकाम् । चक्रे सदा सन्निहितामुत्सवं च प्रचक्रमे ॥ २२३ ॥
एवं चाघोषयत् कंसो यः शार्ङ्गमधिरोपयेत् । सत्यभामाहं तस्मै दास्ये सुरवधूपमाम् ॥ २२४ ॥
श्रुत्वेदं तत्र संप्रापुर्दूरादपि महीभुजः । न चारोपयितुं धन्वालंभूष्णुः कश्चिदप्यभूत् ॥ २२५ ॥

कंसेन कृष्णप्रवृत्ति–परिज्ञानम् ।

तच्छ्रुत्वा मदनवेगानंदनो वसुदेवजः । अनाधृष्टिर्वीरमानी वेगिनं रथमास्थितः ॥ २२६ ॥
आगच्छन् गोकुले तत्र रामकृष्णौ युतावुभौ । प्रेक्ष्योवास निशामेकामालपन् लालयंश्च तौ ॥ २२७ ॥
प्रातश्च रथमारुह्यानुजं रामं विसृज्य च । सोऽचलत् कृष्णमादाय मथुरामार्गदर्शकम् ॥ २२८ ॥
मार्गे महाद्रुसंकीर्णे विलग्नस्तद्रथो वटे । तं च मोचयितुं नालमनाधृष्टिर्बभूव सः ॥ २२९ ॥
पत्तिस्तत्र व्रजन् कृष्णो लीलयोन्मूल्य तं वटम् । चिक्षेपान्यत्र तदनु रथाध्वानमृजुं व्यधात् ॥ २३० ॥
अनाधृष्टिस्ततो हृष्ट प्रेक्ष्य तं तस्य विक्रमम् । उत्तीर्य परिरेभे तं रथे चारोपयत् स्वयम् ॥ २३१ ॥



१ दंता एव क्रकचस्तेन दारुणे । क्रकचः भाषायां "करवत" इति ख्यातम् । २ खरं तीक्ष्णमोजो ययोस्तौ ।

क्रमादुत्तीर्य कालिंदीं प्रविश्य मथुरां च तौ । तामनेकागतनृपां धनुःपर्षदमीयतुः ॥ २३२ ॥
अभ्यर्णे धनुषस्तस्याधिष्ठात्रीमिव देवताम् । तौ तां दद्दशतुः सत्यभामासंभोजलोचनाम् ॥ २३३ ॥
कृष्णं सतृष्णं पश्यंति सत्यभामापि तत्क्षणम् । तं वरं मनसा वव्रे मनो भवशरातुरा ॥ २३४ ॥
अनाधृष्टिरथोपेत्योद्धरन्नपि हि तद्धनुः । पपात पिच्छिल[1]भ्रश्यत्पाद उष्ट्र इवावनौ ॥ २३५ ॥
तं शीर्णहारं निष्पिष्टमुकुटं भ्रष्टकुंडलम् । सत्यभामा तदाल्पं चान्ये च स्मेरदृशोऽहसन् ॥ २३६ ॥
तत्प्रहासासहः सद्यस्तद्धनुः पुष्पदामवत् । दामोदर उपादत्ताधिज्यीचक्रे च हेलया ॥ २३७ ॥
तेन कुंडलितेनाभाद्धनुषोद्दामतेजसा । आखंडलधनुर्दंडेनेव [2]वार्षुकवारिदः ॥ २३८ ॥
अनाधृष्टिः पितुर्वेश्म गत्वा तद्द्वारि केशवम् । मुक्त्वा रथस्थं मध्येऽगादिति पित्रे शशंस च ॥ २३९ ॥
शार्ङ्गधन्व मया तातैकाकिनाप्यधिरोपितम् । यदन्यैः पार्थिवैः स्पृष्टुमप्यशक्यत न क्वचित् ॥ २४० ॥
साक्षेपो वसुदेवस्तमूचे याह्यविलंबितम् । त्वां धन्वारोपणं ज्ञात्वा कंसो व्यापादयिष्यति ॥ २४१ ॥
अ:कर्ण्य तदनाधृष्टिर्भीतो निर्गत्य वेश्मतः । जगाम सह कृष्णेन त्वरितं नंदगोकुले ॥ २४२ ॥
आपृच्छ्य रामगोविंदौ सोऽथ शौर्यपुरे ययौ । प्रवादश्चेत्यभून्नंदपुत्रेणारोपितं धनुः ॥ २४३ ॥
चापाधिरोषणाद्दूनः कंसश्चापमहोत्सवम् । अपदिश्य नियुद्धाय मल्लान् सर्वान् समादिशत् ॥ २४४ ॥



कंसेन
कृष्णप्रवृत्ति–
परिज्ञानम् ।



---

१ पिच्छिल आद्रपंके भ्रश्यन्तौ पादौ यस्य सः । २ वर्षतीति वार्षुकः स चासौ वारिदश्च ।

तत्र चाकारिता[१] मंचेष्वस्थुर्भूपा दिदृक्षवः । महामंचस्थिते कंसे निवेशितदृशो भृशम् ॥ २४५ ॥
वसुदेवेन चाहूताः कंसदुर्भाववेदिना । सर्वेऽपि स्वाग्रजाः सर्वेप्यक्रूराधाश्च सूनवः ॥ २४६ ॥
कंसेनापि हि सत्कृत्य मंचेषूच्चतरेषु च । उपावेश्यंत भास्वंत इव तेजोभिरुद्भटाः ॥ २४७ ॥
मल्लयुद्धोत्सवं श्रुत्वा रामं कृष्णोऽब्रवीदिति । तत्रावामार्य गच्छावः पश्यावो मल्लकौतुकम् ॥ २४८ ॥
प्रतिपद्य च तद्रामो यशोदामित्यभाषत । प्रगुणीकुरु नौ स्नानं यियास्वोर्मथुरां पुरीम् ॥ २४९ ॥
तां किंचिदलसां प्रेक्ष्य साक्षेपमवदद्बलः । गोविंदस्य भ्रातृवधाख्यानप्रस्तावनाकृते ॥ २५० ॥
अयि किं विस्मृतः प्राच्यो दासीभावस्तवाधुना । अस्मदीयं यदादेशं नानुतिष्ठसि सत्वरम् ॥ २५१ ॥

कृष्ण-
बलरामयो-
र्मथुरा-
गमनम् ।

विच्छायं[२] वचसा तेन कृष्णमादाय सात्वतः[३] । नद्यां निनाय स्नानाय यमुनायां वशंवदः ॥ २५२ ॥
तमुवाच च किं वत्स विच्छाय इव दृश्यसे । प्रावृषेण्यांबुदमरुत्संस्पृष्ट इव दर्पणः ॥ २५३ ॥
बलदेवं जगादैवं गोविंदो गद्गदाक्षरम् । किं मे माता त्वया भ्रातर्दासीत्याक्षिप्य जल्पिता ॥ २५४ ॥
रामाभिरामं[४] रामोऽपि निजगाद जनार्दनम् । न ते यशोदा जननी नंदश्च जनको न च ॥ २५५ ॥
किंतु ते देवकी माता सा देवकनृपात्मजा । विश्वैकवीरसुभगो वसुदेवश्च ते पिता ॥ २५६ ॥
मासे मासे दिदृक्षुस्त्वां स्तन्यसिक्तमहीतला । गोपूजाव्याजतोऽत्रैति देवकी साश्रुलोचना ॥ २५७ ॥



---

१ आहूताः । २ कांतिरहितम् । ३ कृष्णभक्तो राम इति यावत् । ४ वनिताभिरामम् ।

उपरोधेन कंसस्य मथुरायामवस्थितः । वसुदेवोऽस्ति नौ तातो दाक्षिण्यैकमहोदधिः ॥ २५८ ॥
वैमात्रेयोऽग्रजस्तेऽहं त्वदपायाभिशंकिभिः । तातपादैः समादिष्ठस्त्वां रक्षितुमिहागमम् ॥ २५९ ॥
किं पित्राहमिह क्षिप्त इति पृष्टोऽनुजन्मना । कंसोपज्ञं स आचख्यौ सर्वं भ्रातृवधादिकम् ॥ २६० ॥
तच्छ्रुत्वा कुपितः कृष्णः कृष्णवर्त्मेव[1] दारुणः । प्रत्यज्ञासीत् कंसवधं नद्यां स्नातुं विवेश च ॥ २६१ ॥
कंसस्येव प्रियसुहृद्द्रष्टुकामो जनार्दनम् । कालिंदीजलमग्नांगः कालियोऽहिरधावत ॥ २६२ ॥
तत्फणामणिविद्योतात् किमेतदिति वादिनि । रामे कृष्णः समुत्थाय तमुत्पलमिवाददे ॥ २६३ ॥
घ्राणे[2] नलिनीनालेन सोऽहिर्गौरिव नस्थितः[3] । उपर्यारुह्य कृष्णेन वाहितश्च चिरं जले ॥ २६४ ॥
निर्जीवमिव तं खिन्नं मुक्त्वा कृष्णोऽथ निर्ययौ । एत्य सौस्नातिकैर्[4]विप्रैः परिवव्रे च कौतुकात् । २६५ ॥
ततः परिवृतो गोपै रामकृष्णौ महौजसौ । चेलतुः प्रति मथुरां प्रपेदाते च गोपुरम् ॥ २६६ ॥
कंसादिष्टमहामात्रप्रेरितौ तत्र च द्विपौ । पद्मोत्तरश्चंपकश्चाधावतां सन्मुखं तयोः ॥ २६७ ॥
दंतोत्खननमुष्ट्यादि घातैः पद्मोत्तरं गजम् । कृष्णोवधीत् सिंह इव बलभद्रस्तु चंपकम् ॥ २६८ ॥
तौ नंदनंदनावेतावरिष्टादिनिघातिनौ । इत्यन्योन्यं दर्श्यमानौ नागरैर्गुरुविस्मयैः ॥ २६९ ॥
नीलपीताबंरथरौ वनमालाधरावुभौ । गोपावृतौ रामकृष्णावक्ष[5]वाटमुपेयतुः ॥ २७० ॥

कृष्ण–
बलरामयो–
र्मथुरा–
गमनम् ।

१ अग्निरिव । २ नासिकायाम् । ३ नाथितः । ४ सुस्नातं पृच्छंतीति सौस्नातिकाःतैः । ५ अक्षवाटं मल्लस्थानम् ।

कृष्ण–
बलरामयो–
मल्लैः सह
युद्धम् ।

तत्रैकस्मिन्महामंचे जनमुत्सार्य तत्स्थितम् । निःशंकौ सपरीवारौ भ्रातरो तौ निषेदतुः ॥ २७१ ॥
तं शत्रुं दर्शयामास कंसं कृष्णाय सात्वतः । अनुज्येष्ठं पितृंस्तांश्च समुद्रविजयादिकान् ॥ २७२ ॥
कौ तु देवोपमावेतावित्यन्योऽन्यविमार्शिनः । तौ प्रेक्षांचक्रिरे भूपा मंचस्था नागराश्च ते ॥ २७३ ॥
कंसाज्ञया युयुधिरे तत्र मल्ला अनेकशः । तत्प्रेरितश्च चाणुर उदस्थात् पर्वताकृतिः ॥ २७४ ॥
सोग्रपर्जन्यवद्गर्जन् करास्फोटं विधाय च । आक्षिपन् क्ष्माभुजः सर्वांश्चापूरोऽवोचदुच्चकैः ॥ २७५ ॥
यः कोऽपि जातो वीरेण वीरमानी च कोऽपि यः नियुद्धयुद्धश्रद्धां मे स पूरयतु दुर्धरः ॥ २७६ ॥
कृष्णोऽसहिष्णुस्तं दर्पं चाणूरस्यातिगर्जतः । मंचादुत्तीर्य विदधे भुजास्फोटं महाभुजः ॥ २७७ ॥
गोविंदस्य करास्फोटः पुच्छाच्छोटो हरेरिव[१] । अस्फोटयदिव द्यावापृथिव्यावुद्भटध्वनि ॥ २७८ ॥
वयसा वपुषा चैष गरिष्ठः श्रमकर्कशः । नियुद्धजीवी चाणूरः सदा क्रुरश्चमूरुवत्[२] ॥ २७९ ॥
अयं दुग्धमुखो मुग्धो मृदुः पद्मोदरादपि । वनवासादनभ्यासो न युद्धं युज्यतेऽनयोः ॥ २८० ॥
असमंजसमेतद्धिग्धिगहो विश्वगर्हितम् । इत्युच्चैर्भाषमाणानां लोकानां तुमुलोऽभवत् ॥ २८१ ॥
॥ त्रिभिर्विशेषकम् ॥
अथ क्रुद्धोऽवदत्कंसः केनेहाकारिताविमौ । गोपालौ गोपयःपानमत्तौ किं त्वागतौ स्वयम् ॥ २८२ ॥



१ सिंहस्येव । २ चमूरुर्मृगविशेषस्तद्वत् ।

कृष्ण–
बलरामयो–
र्मल्लैः सह
युद्धम् ।

युध्यमानौ स्वयं चैतौ को नामेह निषेधति । यस्य पीडानयोश्चास्ति पृथग्भूत्वा स जल्पतु ॥ २८३ ॥
इति कंसवचः श्रुत्वा तूष्णीकोऽभूज्जनोऽखिलः । स्मेरनेत्रारविंदश्च गोविंद इदमभ्यधात् ॥ २८४ ॥
राजपिंडेन पुष्टोऽयं कृताभ्यासश्च सर्वदा । समर्थश्च शरीरेण चाणूरो मल्लकुंजरः ॥ २८५ ॥
मया गोपालबालेन गोपयःपानजीविना । हरिपोतेन हस्तीव हन्यमानोऽद्य दृश्यताम् ॥ २८६ ॥
॥ युग्मम् ॥
कंसस्तत्सौष्ठवाद्भीतो युगपद्युद्धहेतवे । द्वितीयं मुष्टिकं नाम महामल्लं समादिशत् ॥ २८७ ॥
उत्थितं मुष्टिकं दृष्ट्वा मंचादुत्तीर्य सात्वतः । नियुद्धाय तमाह्वास्त विहस्तो[1] रणकर्मणि ॥ २८८ ॥
ततश्च कृष्णचाणूरौ तौ चोभौ राममुष्टिकौ । नियोद्धुं प्रववृताते नागपाशोपमैर्भुजैः ॥ २८९ ॥
तेषां दृढपदन्यासैरकंपिष्टेव मेदिनी । पुस्फोटेव करास्फोटरवैर्ब्रह्मांडमंडपः ॥ २९० ॥
तौ च मुष्टिकचाणूरावुत्क्षिप्य तृणपूलवत् । क्षिप्तौ खे रामकृष्णाभ्यां पश्यंतो जहृषुर्जनाः ॥ २९१ ॥
चाणूरमुष्टिकाभ्यां च मनागपि हि तौ भटौ । उत्क्षिप्यमाणौ संप्रेक्ष्य लोको म्लानमुखोऽभवत् ॥ २९२ ॥
दृढमुष्ट्या च चाणूरं ताडयामास केशवः । दंतीव तरसा दंतमुशलेन शिलोच्चयम् ॥ २९३ ॥
मानदो जयमानी च चाणूरोऽरिष्टसूदनम् । जघानोरःस्थले मुष्ट्या वज्रगोलसमौजसा ॥ २९४ ॥

१ पंडितः ।

मदेनेव लुलद्दृष्टिसेन घातेन पीडितः । अधोक्षजो मीलिताक्षः पपात पृथिवीतले ॥ २९५ ॥
कंसेन प्रेरितो दृष्ट्वा चाणूरच्छलवेदिना । हंतुं विसंज्ञं गोविंदं पापः पुनरधावत ॥ २९६ ॥
जिघांसुं तं बलो ज्ञात्वा सद्योऽभ्युत्सृष्टमुष्टिकः[1] । अताडयत् प्रकोष्टेन पतद्वज्रानुहारिणा ॥ २९७ ॥
चाणूरस्तेन घातेन सप्त चापानपासरत् । कृष्णोऽपि हि समाश्वस्य पुनराह्वास्त तं युधि ॥ २९८ ॥
मध्यमाक्रम्य जानुभ्यां शीर्षं दोष्णा नमय्य च । जघान मुष्ट्या गोविंदश्चाणूरं गुरुविक्रमः ॥ २९९ ॥
चाणूरो वांतरुधिरधारो विधुरलोचनः । कृष्णेन मुमुचे भीतैरिव प्राणैरपि क्षणात् ॥ ३०० ॥
कंसोऽथ भयकोपाभ्यां वेपमानोऽब्रवीदिति । अरे गोपसुतावेतौ मार्यतामविलंबितम् ॥ ३०१ ॥

कृष्णकृतः कंसवधः ।

येनैतो पोषितौ सर्पौ तं नंदमपि रे हत । आदाय तस्य सर्वस्वमिहानयत दुर्मतेः ॥ ३०२ ॥
तद्गृह्योऽन्योऽपि यः कश्चित्तस्य त्रातान्तरे भवेत् । समानदोषः सोऽप्याशु निहंतव्यो मदाज्ञया ॥ ३०३ ॥
अथोचे पुंडरीकाक्षोऽरुणाक्षः कोपसंभ्रमात् । मृतंमन्योऽसि नोऽद्यापि त्वं चाणूरे हतेऽपि हि ॥ ३०४ ॥
तावद्रक्ष त्वमात्मानं हन्यमानं मयाद्य रे । पश्चात् स्वामर्षसदृशं नंदादिषु समादिशेः ॥ ३०५ ॥
इत्युक्त्वोत्पत्य गोविंदो मंचमारुह्य तत्क्षणात् । संगृह्य कंसं केशेषु पृथिव्यां पर्यपातयत् ॥ ३०६ ॥
विशीर्णमुकुटं स्रस्तांतरीयं तरलेक्षणम् । सूनाबद्धं पशुमिव तमुवाच जनार्दनः ॥ ३०७ ॥

[1] उत्सृष्टस्त्यक्तो मुष्टिको येन सः ।

त्वया कृता भ्रूणहत्या स्वरक्षार्थं वृथैव रे । इदानीं न भवस्येक्ष स्वकर्मफलभाग्भव ॥ ३०८ ॥
आत्तरूप इव व्याले धृतकंसे हरौ तदा । विसिष्मिये च बिभयांचकार च जनोऽखिलः ॥ ३०९ ॥
अथ यौत्रिकबंधेनानुच्छ्वासीकृत्य मुष्टिकम् । यज्ञोपनीताजामिव वीरो नीलांबरोऽवधीत् ॥ ३१० ॥
इतश्च कंसरक्षार्थं कंसगृह्या महाभटाः । कृष्णं हन्तुमधावन्त विविधायुधपाणयः ॥ ३११ ॥
मंचस्तंभमथोद्धृत्य रामस्तान् परिताडयन् । द्रुतं विद्रावयामास मधुस्था मक्षिका इव ॥ ३१२ ॥
कृष्णोऽपि पादं शिरसि न्यस्य कंसं व्यपादयत् । केशै कृष्ट्वाक्षिपद्रंगाद्बहिस्तं दार्विवार्णवः ॥ ३१३ ॥
कंसेन पूर्वमानीता जरासंघस्य सैनिकाः । तदा संवर्मयामासू रामकृष्णजिघांसया ॥ ३१४ ॥
तांश्च सन्नह्यतः प्रेक्ष्य समूद्रविजयो नृपः । सन्नह्याढौकयद्युद्धे तदर्थं हि तदागमः ॥ ३१५ ॥
द्राक् समुद्र इवोद्वेले समुद्रविजये नृपे । दिशो दिशं ययुर्नष्ट्वा जरासंघस्य सैनिकाः ॥ ३१६ ॥
रामकृष्णावनाधृष्टिरारोप्य स्यंदने निजे । समुद्रविजयादेशाद्वसुदेवगृहेऽनयत् ॥ ३१७ ॥
सर्वेऽपि यादवास्तत्र समुद्रविजयादयः । वसुदेवगृहे गत्वा दत्वास्थानीमुपाविशन्[१] ॥ ३१८ ॥
अर्धासनासितबलः स्वांकमारोप्य केशवम् । मुहुश्चुचुंब शिरसि वसुदेवोऽश्रुलोचनः ॥ ३१९ ॥
किमेतदिति सोदर्यैः पृष्ट आनकदुंदुभिः । कृष्णवृत्तांतमाचख्यावतिमुक्तकवृत्ततः ॥ ३२० ॥

कृष्णकृतः
कंसवधः ।

---

१ आस्थानीं सभाम् ।

ततः समुद्रविजयः स्वोत्संगे कृष्णमादधे । रामं तत्पालनप्रीतः प्राशंसच्च मुहुर्मुहुः ॥ ३२१ ॥
तयैकनासया पुत्र्या सहागत्य च देवकी । अंकादंकं संचरंतं कृष्णमादाय सस्वजे ॥ ३२२ ॥
ऊचुश्च यादवा वीरा वसुदेवमुदश्रवः । एकाक्यपि जगज्जेतुं त्वं क्षमोऽसि महाभुज ॥ ३२३ ॥
कंसेनातिनृशंसेन जातजातांस्त्वमात्मनः । हन्यमानान् सुतान् वीर कथं नामासि सोढवान् ॥ ३२४ ॥
वसुदेवोऽप्युवाचैवमाजन्म परिपालितम् । सत्यव्रतं त्रातुमहं दुःकर्मेदं विसोढवान् ॥ ३२५ ॥
देवक्याश्चाग्रहेणायं कृष्णः प्रक्षिप्य गोकुले । मयारक्षि नंदसुतां संचार्येमां वराकिकाम् ॥ ३२६ ॥
स्त्रीमात्रं सप्तमो गर्भो देवक्या इत्यवज्ञया । एकं नासापुटं छित्वा मुमोचेमां स पापधीः ॥ ३२७ ॥
भ्रातृभ्रातृव्यसंमत्या समुद्रविजयस्ततः । कारागारादुग्रसेनं कर्षयामास पार्थिवम् ॥ ३२८ ॥
राज्ञा सहोग्रसेनेन समुद्रविजयादयः । कंसस्य प्रेतकार्याणि कालिंदीपुलिने व्यधुः ॥ ३२९ ॥
कंसस्य माता पत्न्यश्च ददुर्नद्यां जलांजलीन् । मानात्तु न ददौ जीवयशाः कोपादुवाच च ॥ ३३० ॥
गोपावेतौ रामकृष्णौ दशार्हांश्च ससंततीन् । घातयित्वा प्रेतकार्यं करिष्ये स्वपतेरहम् ॥ ३३१ ॥
अन्यथाग्नौ प्रवेक्ष्यामि प्रतिश्रुत्येति सोच्चकैः । निर्गत्यागाज्जरासंघश्रिते राजगृहे पुरे ॥ ३३२ ॥
रामकृष्णानुज्ञयाथ समुद्रविजयो नृपः । चकार मथुरापुर्यामुग्रसेनं नरेश्वरम् ॥ ३३३ ॥
प्रदत्तामुग्रसेनेन सत्यभामां जनार्दनः । दिने कोष्टुकिनाख्याते पर्यणैषीद्यथाविधि ॥ ३३४ ॥



कंसपत्नी–
जीवयशसः
रामकृष्णा–
दीनां वधाय
प्रतिज्ञा ।

इतश्च सा जीवयशा रुदंती मुक्तकुंतला । प्रविवेश जरासंधास्थान्यामश्रीरिवांगिनी[1] ॥ ३३५ ॥
जरासंधेन पृष्टाथ कथंचिदपि सावदत् । अतिमुक्तकवृत्तांतं कंसघातकथां च ताम् ॥ ३३६ ॥
प्रत्युवाच जरासंधः साधु कंसेन नो कृतम् । यन्नाहन् देवकीमेव क्षेत्राभावे कुतः कृषिः ॥ ३३७ ॥
मा रोदीरधुना वत्से रोदयिष्यामि तत्स्त्रियः । समूलघातं तान् हत्वा परितः कंसघातकान् ॥ ३३८ ॥
तामित्युक्त्वा जरासंधः सोमकं नाम पार्थिवम् । अनुशिष्य प्रजिघाय समुद्रविजयांतिके ॥ ३३९ ॥
स एत्य मथुरापुर्यां समुद्रविजयं नृपम् । इत्युवाच जरासंधः समादिशति वः प्रभुः ॥ ३४० ॥
अस्माकं जीवयशा जीवितादपि वल्लभा । तत्स्नेहात्तत्पतिः कंसः कस्यैतद्विदितं न हि ॥ ३४१ ॥
भवंतोऽपि हि भृत्या नः सुखं तिष्ठंतु किं तु नः । अर्पणीयौ रामकृष्णौ क्षुद्रौ कंसद्रुहाविमौ ॥ ३४२ ॥
किं चायं सप्तमो गर्भः पुराप्यर्पित एव हि । सोऽद्यार्प्यतामसौ रामः पुनस्तद्गोपनादपि ॥ ३४३ ॥
ऊचे समुद्रविजयो मत्परोक्षेऽर्पिता यदि । ऋजुना वसुदेवेन षड्गर्भास्तद्धि नोचितम् ॥ ३४४ ॥
वत्साभ्यां रामकृष्णाभ्यां स्वभ्रातृवधवैरतः । कंसो हतश्चेत्तदिह किमेतावपराध्यतः ॥ ३४५ ॥
एको दोषोऽयमस्माकं यत्स्वैरी बाल्यतोऽपि हि । वसुदेवस्तस्य बुद्ध्या हताः षट् सूनवो मम ॥ ३४६ ॥
प्राणभूतौ रामकृष्णौ मम सुतौ वधैच्छया । त्वद्भर्तुर्याचमानस्य न विमृश्य विधायिता ॥ ३४७ ॥
सकोपः सोमकोऽप्यूचे न खलु स्वामिशासने । युक्तायुक्तविचारोऽर्हः सेवकानां कदाचन ॥ ३४८ ॥

जरासंधस्य कृष्णरामयोर्वधाय यत्नकरणम् ।



[1] शोभारहिता ।

षड्गर्भा यत्र ते राजंस्तत्रैतावपि दुर्मती । गच्छतां मा स्म कंडूयस्तुंडं तक्षकभोगिनः ॥ ३४९ ॥
विरोधो बलिना सार्धं न हि क्षेमाय जायते । कस्त्वं मेष इवेभस्य पुरतो मगधेशितुः ॥ ३५० ॥
क्रुद्धोऽभ्यधाच्च गोविंदस्तातेन चिरमार्जवात् । पालिते स्नेहसंबंधे त्वत्स्वामी किं प्रभूयते ॥ ३५१ ॥
न नः प्रभुर्जरासंघः प्रत्युतैवं स विब्रुवन् । कंसो द्वितीयस्तद्गच्छ यथेच्छं शंस तस्य भोः ॥ ३५२ ॥
इत्युक्तः सोमकोऽवोचत् समुद्रविजयं प्रति । कुलांगारः सुतस्तेऽसौ दशार्ह किमुपेक्षसे ॥ ३५३ ॥
तद्गिरा प्रज्वलन् कोपादनाधृष्टिरदोऽवदत् । भूयो भूयो याचमानः पुत्रौ तातान्न लज्जसे ॥ ३५४ ॥
स जामातृवधेनापि दूनो राजगृहेश्वरः । षड्भ्रातृनिधनेनापि न दूनाः किं वयं पुनः ॥ ३५५ ॥
दोष्मान्रामश्च कृष्णश्चान्येऽप्यक्रूरादयो वयम् । न सहिष्यामहे हंत त्वामेवमभिभाषिणम् ॥ ३५६ ॥
इत्यनाधृष्टिना रोषाद्धर्षितो रोषविह्वलः । उपेक्षितः समुद्रेण स्वस्थानं सोमको ययौ ॥ ३५७ ॥
द्वितीयेऽह्नि दशार्हेण मेलयित्वा स्वबांधवान् । पप्रच्छ कोष्टुकिं नाम हितं नैमित्तिकोत्तमम् ॥ ३५८ ॥
त्रिखंडभरतेशेन जरासंघेन विग्रहः । उपस्थितोऽयमस्माकं ब्रूहि यद्भाव्यतः परम् ॥ ३५९ ॥
सोऽप्युवाचाचिरादेतौ रामकृष्णौ महाभुजौ । त्रिखंडभरताधीशौ तं निहत्य भविष्यतः ॥ ३६० ॥
यात प्रतीच्यामधुना समुद्दिश्यांबुधेस्तटम् । भावी शत्रुक्षयारंभो गच्छतामपि तत्र वः ॥ ३६१ ॥
सत्यभामा च यत्रैषा प्रसूते दारकद्वयम् । पुरीनिवेशं तत्रैव कृत्वा स्थेयमशंकितैः ॥ ३६२ ॥



जरासंघस्य
कृष्णरामयो–
र्वधाय
यत्नकरणम् ।

ततो घोषणया राजा स्वां यात्रां स्वानजिज्ञपत्[1] । एकादशकुलकोटीसंयुतो मथुरां जहौ ॥ ३६३ ॥
गत्वा शौर्यपुरे सप्त कुलकोटीस्ततोऽपि हि । आदाय ज्ञातिसहितः समुद्रविजयोऽचलत् ॥ ३६४ ॥
उग्रसेननरेन्द्रोऽपि समुद्रनृपमन्वगात् । मध्येविंध्यं च सर्वेऽपि जग्मुः सुखसुखं[2] पथि ॥ ३६५ ॥
तदा च सोमको राजा जरासंघार्धचक्रिणे । गत्वा शशंस तत्सर्वं क्रोधवह्नींधनायितम् ॥ ३६६ ॥
जरासंघमथ क्रुद्धं कालः संप्रेक्ष्य तत्सुतः । उवाच भवतां के हि यदवोऽमी तपस्विनः ॥ ३६७ ॥
तदादिश दिशामंताद्वह्नेरब्धेश्च मध्यतः । कृष्ट्वा यदून् हनिष्यामि निवर्तिष्येऽन्यथा न हि ॥ ३६८ ॥
ततः कालं जरासंघो राजपंचशतीयुतम् । महासेनापरिवृतं यदून् प्रति समादिशत् ॥ ३६९ ॥

देवतामायया जरासंघ–वञ्चनम् ।

कालो भ्रात्रा यवनेन सहदेवेन चान्वितः । वार्यमाणोऽप्यशकुनैर्दुर्निमित्तैर्निरीयिवान्[3] ॥ ३७० ॥
स यदूनामनुपदं गच्छन् प्रापाचिरादपि । विंध्याचलोपत्यकोर्वीमदूरोषितयादवाम् ॥ ३७१ ॥
दृष्ट्वा कालमथासन्नं रामकृष्णाभिरक्षकाः । विचक्रुर्देवताः शैलमेकद्वारं पृथून्नतम् ॥ ३७२ ॥
उषितं च यदुसैन्यं भस्मीभूतं कृशानुना । उपचित्यं[4] स्त्रियमेकां रुदंतीं च विचक्रिरे ॥ ३७३ ॥
तां प्रेक्ष्य कालः पप्रच्छ भद्रे किमिति रोदिषि । साख्यद्भीता जरासंघाद्दुद्रुवुर्यदवोऽखिलाः ॥ ३७४ ॥
तेषां च पृष्ठतो वीरः कालः काल इवाचलत् । तत्रासन्ने च चकिताः प्राविशन् यदवोऽनले ॥ ३७५ ॥

१ आप्तान् । २ सुखप्रकारं । ३ निर्जगाम । ४ चितासमीपम् ।

देवतामायया
जरासंघ–
वञ्चनम् ।

दशार्हा रामकृष्णौ च चितायामविशन्निह । तेषां वियोगे बंधूनां वेक्ष्याम्यग्नावसावहम् ॥ ३७६ ॥
इत्युक्त्वा साविशद्वह्नौ देवतामोहितश्च सः । कालोऽवोचत् सहदेवं यवनं भूभुजोऽपि च ॥ ३७७ ॥
मया तातस्य जामेश्च पुरतोऽदः प्रतिश्रुतम् । वह्न्यादिभ्योऽपि कृष्ट्वाहं हनिष्यामि यदून् खलु ॥ ३७८ ॥
प्रविष्टान् मद्भयादग्नौ तान् हन्तुमहमप्यहो । सत्यसंधः प्रवेक्ष्यामि ज्वलितेऽस्मिन् हुताशने ॥ ३७९ ॥
इत्युक्त्वा सोऽसिफलकी विवेशाग्नौ पतंगवत् । मृतश्च स्वेषु पश्यत्सु देवतामोहितात्मसु ॥ ३८० ॥
अत्रांतरे चास्तगिरिं जगाम भगवान्रविः । ऊषुस्तत्रैव यवनसहदेवादयश्च ते ॥ ३८१ ॥
जाते प्रभाते तेऽपश्यंस्तं नाद्रिं न चितां च ताम् । दूरं गता यदवश्चेत्याख्यंस्तेभ्यश्च हेरिकाः[1] ॥ ३८२ ॥
वृद्धालोचनतो ज्ञात्वा संमोहं देवताकृतम् । यवनाद्या निवृत्याख्युस्तत्सर्वं मगधेशितुः ॥ ३८३ ॥
अतुच्छ्या मूर्छयाथ जरासंघोऽपतद्भुवि । ससंज्ञः काल कालेति कंस कंसेति चारुदत् ॥ ३८४ ॥
विज्ञाय कालमरणं गच्छंतो यदवोऽपि ते । आनर्चुः कोष्टुकिं जातप्रत्ययं भूरिसंमदाः ॥ ३८५ ॥
पथ्येकस्मिन् वने तेषां तस्थुषां सोऽतिमुक्तकः । समाययौ चारणर्षिर्दशार्हेशेन चार्च्यत ॥ ३८६ ॥
समुद्रविजयोऽपृच्छत्तं प्रणम्य महामुनिम् । अमुष्मिन् व्यसनेऽस्माकं भगवन् किं भविष्यति ॥ ३८७ ॥
ऋषिर्बभाषे मा भैषीर्द्वाविंशो ह्येष तीर्थकृत् । कुमारोऽरिष्टनेमिस्ते त्रैलोक्याद्वैतपौरुषः ॥ ३८८ ॥

१ दूताः ।

रामकृष्णौ बलविष्णू द्वारकास्थाविमौ पुनः । जरासंघवधादर्धभरतेशौ भविष्यतः ॥ ३८९ ॥
ततो हृष्टस्तमर्चित्वा समुद्रो व्यसृजन्मुनिम् । सुखाकरैः प्रयाणैश्च सुराष्ट्रामंडलं ययौ ॥ ३९० ॥
तत्र रैवतकस्याद्रेः प्रत्यगुत्तरतोऽथ ते । अष्टादशकुलकोटीसंयुताः शिबिरं न्यधुः ॥ ३९१ ॥
कृष्णपत्नी सत्यभामा तत्रासूत सुतावुभौ । भानुभामरनामानौ जात्यजांबूनदद्युती ॥ ३९२ ॥
दिने कोष्टुकिनाख्याते स्नातः कृतबलिर्हरिः । अंभोधिं पूजयामास विदधे चाष्टमं तपः ॥ ३९३ ॥
ततस्तृतीययामिन्यां नभस्थः सुस्थितोऽमरः । लवणाब्धेरधिष्ठाता तत्रागच्छत् कृतांजलिः ॥ ३९४ ॥
कंसारये पांचजन्यं सुघोषं मुष्टिकारये । ददौ स देवो दिव्यानि रत्नमाल्यांशुकानि च ॥ ३९५ ॥
स देवः कृष्णमूचे च कुतो हेतोस्त्वया स्मृतः । सुस्थितो नाम देवोऽहं ब्रूहि किं करवाणि ते ॥ ३९६ ॥
उवाच कृष्णस्तं देवं या पूर्वं पूर्वशार्ङ्गिणाम् । पुर्यत्र द्वारकेत्यासीत् पिहिता सा त्वयांभसा ॥ ३९७ ॥
ममापि हि निवासाय तस्याः स्थानं प्रकाशय । तथा कृत्वा सोऽपि देवो गत्वेन्द्राय व्यजिज्ञपत् ॥ ३९८ ॥
शक्राज्ञया वैश्रवणश्चक्रे रत्नमयीं पुरीम् । द्वादशयोजनायामां नवयोजनविस्तृताम् ॥ ३९९ ॥
तुंगमष्टादशहस्तान्नवहस्तांश्च भूगतम् । विस्तीर्णं द्वादशहस्तांश्चके वप्रं सुखातिकम् ॥ ४०० ॥
वृत्ताश्च चतुरस्राश्च व्यायत्ता गिरिकूटकाः । स्वस्तिकाः सर्वतोभद्रा मंदरा अवतंसकाः ॥ ४०१ ॥



द्वारिका–
निर्माणम् ।

द्वारिका–
निर्माणम् ।

वर्धमानाश्चेतिसंज्ञाः प्रासादास्तत्र लक्षशः । एकभूमा द्विभूमाश्च त्रिभूमाद्याश्च निर्मिताः ॥ ४०२ ॥
॥ युग्मम् ॥
विचित्ररत्नमाणिक्यैश्चत्वरेषु त्रिकेष्वपि । जिनचैत्यानि दिव्यानि निर्मितानि सहस्रशः ॥ ४०३ ॥
आग्नेय्यां दिशि तत्रादौ सौवर्णो वप्रसंयुतः । समुद्रविजयस्याभूत् प्रासादः स्वस्तिकाभिधः ॥ ४०४ ॥
प्रासादौ च तदभ्यर्णेऽक्षोभ्यस्तिमितयोः क्रमात् । नंद्यावर्तगिरिकूटौ सप्राकारौ बभूवतुः ॥ ४०५ ॥
नैर्ऋत्यां सागरस्याभूत् प्रासादोऽष्टांश उच्चकैः । प्रासादौ वर्धमानाख्यौ ततः पंचमषष्ठयोः ॥ ४०६ ॥
नाम्ना पुष्करपत्रोऽभून्मारुत्यां धरणस्य तु । आलोकदर्शनो नाम पूरणस्य ततोऽपि हि ॥ ४०७ ॥
तदभ्यर्णेऽभिचंद्रस्य विमुक्तो नामतोऽभवत् । ऐशान्यां वसुदेवस्य कुबेरच्छंदसंज्ञितः ॥ ४०८ ॥
स्त्रीविहारक्षमो नाम राजमार्गसमीपतः । उग्रसेननरेन्द्रस्य जज्ञे प्रासाद उन्नतः ॥ ४०९ ॥
कल्पद्रुमैर्वृताः सर्वे सेभशालाः[१] समंदुराः । सप्राकारा बृहद्द्वाराः पताकामालधारिणः ॥ ४१० ॥
तेषां च मध्ये प्रासादो नामतः पृथिवीजयः । चतुरस्रो बृहद्द्वारो बलदेवस्य निर्ममे ॥ ४११ ॥
प्रासादोऽष्टादशभूमः सर्वतोभद्रसंज्ञकः । नानागृहपरिवारो वासुदेवस्य चाभवत् ॥ ४१२ ॥
सुधर्मासदृशी रामकृष्णप्रासादयोः पुरः । सभा सर्वप्रभासाख्या नानामाणिक्यमय्यभूत् ॥ ४१३ ॥

१ वाजिशालागजशालासहिताः ।

द्वारिका-
निर्माणम् ।

अष्टोत्तरशतेनोच्चैर्जिनबिंबैर्विभूषितम् । मेरुश्रृंगमिवोत्तुंगं मणिरत्नहिरण्मयम् ॥ ४१४ ॥
नानाभूमिगवाक्षाढ्यं विचित्रस्वर्णवेदिकम् । अर्हदायतनं रम्यं निर्ममे विश्वकर्मणा ॥ ४१५ ॥
॥ युग्मम् ॥
सरांसि दीर्घिका वाप्यश्चेत्यान्युद्यानवीथिकाः । अन्यच्च सर्वं तत्राहोरात्रेण धनदोऽकरोत् ॥ ४१६ ॥
एवं च रम्या नगरी द्वारकेन्द्रपुरीसमा । बभूव वासुदेवस्य देवताभिर्विनिर्मिता ॥ ४१७ ॥
तस्याः पुरो[1] रैवतकोऽपाच्यामासीत्तु माल्यवान् । सौमनसोऽद्रिः प्रतीच्यामुदीच्यां गंधमादनः ॥ ४१८ ॥
ततः प्रातः कुबेरोऽदाद्विष्णवे पीतवाससी । नक्षत्रमालां मुकुटं महारत्नं च कौस्तुभम् ॥ ४१९ ॥
शार्ङ्गधन्वाक्षय्यशरौ तूणौ खड्गं च नंदकम् । कौमोदकीं गदां चैव रथं च गरुडध्वजम् ॥ ४२० ॥
रामायादाद्वनमालां मुसलं नीलवाससी । तालध्वजं रथं तूणावक्षय्येषू धनुर्हलम् ॥ ४२१ ॥
दशभ्योऽपि दशार्हेभ्यो रत्नान्याभरणानि च । व्यश्राणयद्[2]वैश्रवणस्ते ह्यर्च्या रामकृष्णयोः ॥ ४२२ ॥
ज्ञात्वा द्विट्सूदनं कृष्णं सर्वेऽपि यदवस्ततः । अभ्यर्षिंचन् प्रमुदिता अपरोदधिरोधसि ॥ ४२३ ॥
सिद्धार्थसारथिं रामः कृष्णो दारुकसारथिम् । रथमारोहतां वीरौ प्रवेष्टुं द्वारकापुरीम् ॥ ४२४ ॥

---

१ पूर्वस्याम् । २ अयच्छत् ।

वृतौ रथस्थैर्यदुभिश्चंद्रार्को भग्रहैरिव । तौ तां पुरीं प्राविशतां भवज्जयजयारवम् ॥ ४२५ ॥
तस्यां वैश्रवणेन दर्शितगृहेष्वस्थुर्दशार्हा हरी रामोऽन्ये यदवः कुलानि च परीवारोऽथ कृष्णाज्ञया ।
रत्नस्वर्णधनैर्विचित्रवसनैर्धान्यैश्च सार्धद्व्यहं वर्षन् यक्षपतिः पुरीमभिनवां तां पूरयामास सः ॥ ४२६ ॥

* * *

इत्याचार्यश्रीहेमचंद्रविरचिते त्रिषष्टिशलाकापुरुषचरिते
महाकाव्येऽष्टमे पर्वणि रामकृष्णारिष्टनेमिजन्म-
कंसवधद्वारिकानिवेशकीर्तनो
नाम पंचमः सर्ग : ।



द्वारिका-
निर्माणम् ।

# षष्ठः सर्गः ।

नारदस्याऽवज्ञा, क्रोधश्च ।

तत्र कृष्णः सरामोऽपि दशार्हाननुवर्तयन् । रममाणः सुखं तस्थौ यदुभिः परिवारितः ॥ १ ॥
तन्वन्मुदं दशार्हाणां भ्रात्रोश्च हलिकृष्णयोः । अरिष्टनेमिर्भगवान् ववृधे तत्र च क्रमात् ॥ २ ॥
ज्यायांसोऽपि लघूभूय चिक्रीडुः स्वामिना समम् । सर्वेऽपि भ्रातरः क्रीडाशैलोद्यानादिभूमिषु ॥ ३ ॥
स्वामी दशधनुस्तुंगः क्रमात् प्राप च यौवनम् । आजन्म कामविजयी तेनाविकृतमानसः ॥ ४ ॥
पितृभ्यां रामकृष्णाद्यैर्भ्रातृभिश्च दिने दिने । अर्थ्यमानोऽपि कन्यानामुद्वाहं न ह्यमन्यत ॥ ५ ॥
रामकृष्णौ च तौ भूपान् समाचक्रमतुर्बहून् । शक्रेशानाविव युतौ [1]पर्यपातामुभौ प्रजाः ॥ ६ ॥
पर्यटन्नारदोऽन्येद्युः कृष्णौकसि समाययौ । कृष्णेन च सरामेण स्वयं विधिवदर्चितः ॥ ७ ॥
सोऽथ कृष्णांतःपुरेऽगात्तत्र स्वं सत्यभामया । पश्यंत्या [2]दर्पणे [3]नार्चि व्यग्रत्वाद्विष्टरादिना ॥ ८ ॥
ततः स निरगात्क्रुद्धो विरुद्धं चेत्यचिंतयत् । केशवांतःपुरे सर्वैरर्चिता नारदाः सदा ॥ ९ ॥

१ अरक्षताम् । २ आदर्शे स्वं आत्मानं रुपमिति यावत् पश्यंत्या सत्यभामया व्यग्रत्वाद्विष्टरादिना आसनादिना न पूजितः ।
३ अर्च-पूजायाम् अद्यतन्यां भावकर्मणि ।

नारदस्या–
ऽवज्ञा,
क्रोधश्च ।

इयं तु पतिवाल्लभ्याद्रूपयौवनगर्विता । अभ्युत्थानं दूरतोऽस्तु दृग्मात्रमपि न ह्यदात् ॥ १० ॥
ततोऽमूमतिरुपायाः सपत्न्याः प्राप्तिसंकटे । पातयामीति विमृशन् स ययौ कुंडिनं पुरम् ॥ ११ ॥
तत्राभुद्भीष्मको राजा तस्य पत्नी यशोमती । तयो रुक्मी सुतो कन्या रुक्मिणी रुपशालिनी ॥ १२ ॥
गतश्च नारदस्तत्र रुक्मिण्या च नमस्कृतः । वरोऽर्धभरतेशस्ते कृष्णः स्तादित्युवाच च ॥ १३ ॥
कृष्णः कोऽसाविति तया पृष्ट आख्यच्च नारदः । अद्वैतान् रुपसौभाग्यशौर्यादीन् कृष्णगान् गुणान् ॥ १४ ॥
तच्छ्रुत्वा रुक्मिणी कृष्णे सानुरागाभवत् क्षणात् । कृष्णमेवाभिलष्यंती तस्थौ मन्मथविह्वला ॥ १५ ॥
पटे लिखित्वा तद्रूपं द्वारिकामेत्य नारदः । दर्शयामास कृष्णस्य सुधावर्तिनिभं दृशोः ॥ १६ ॥
दृष्टवा च कृष्णः पप्रच्छ नारदं भगवन्नियम् । का नाम देवतालेखि पटेऽस्मिन् भवता वद ॥ १७ ॥
स्मित्वोचे नारदो नेयं देवता किं तु मानुषी । कुमारी रुक्मिणी जामिः कुंडिनेशस्य रुक्मिणः ॥ १८ ॥
तद्रूपविस्मितः कृष्णः सद्योऽपि प्रेष्य पूरुषम् । रुक्मिणीं रुक्मिणः पार्श्वे ययाचे प्रियया गिरा ॥ १९ ॥
हसित्वोवाच रुक्म्येवं गोपो हीनकुलोऽप्यहो । मज्जामिं याचते मूढः कोऽयं तस्य मनोरथः ॥ २० ॥
दास्ये मैथुनिकायाम्[१] शिशुपालाय भूभुजे । उचितो ह्यनयोर्योगो रोहिणीशशिनोरिव ॥ २१ ॥
इति श्रुत्वा स दूतोऽपि तद्वाचं परुषाक्षराम् । आगत्य कथयामास स्वामिने पीतवाससे ॥ २२ ॥

१ मैत्रीकरणाय ।

तं च व्यतिकरं ज्ञात्वा नीत्वा रहसि रुक्मिणीम् । ऊचे पितृष्वसा धात्री गिरा प्रेमपवित्रया ॥ २३ ॥
शैशवे त्वां ममांकस्थां प्रेक्ष्यर्षिरतिमुक्तकः । आख्याद्यदग्रमहिषी कृष्णस्यैषा भविष्यति ॥ २४ ॥
कथं कृष्णः परिज्ञेय इति पृष्टस्तु सोऽवदत् । ज्ञेयः कृष्णोऽपरांभोधौ द्वारिकासन्निवेशनात् ॥ २५ ॥
कृष्णाय याचमानायाप्यसि दत्ता न रुक्मिणा । शिशुपालाय किं तु त्वं प्रदत्ता दाम[1]घोषये ॥ २६ ॥
रुक्मिण्यूचे किमृषीणां विसंवदति भाषितम् । प्रातस्तनितमब्दानां किं वा भवति निष्फलम् ॥ २७ ॥
कृष्णेऽभिलाषं रुक्मिण्या ज्ञात्वैवं सा पितृष्वसा । सद्यः प्रच्छन्नदूतेन कृष्णायैवमजिज्ञपत् ॥ २८ ॥
माघमासे सिताष्टम्यां नागपूजामिषादहम् । रुक्मिण्या सह निर्गत्य यास्याम्युद्यानवीथिकाम् ॥ २९ ॥
आगंतव्यं त्वया तत्र रुक्मिण्या चेत्प्रयोजनम् । अन्यथा शिशुपालोऽमूं परिणेष्यति मानदः ॥ ३० ॥
इतश्च शिशुपालः स आहूतस्तेन रुक्मिणा । उद्वोढुं रुक्मिणीमागात् ससैन्यः कुंडिनं पुरम् ॥ ३१ ॥
तत्रायातं शिशुपालं रुक्मिणीवरणोद्यतम् । ज्ञापयामास कृष्णाय नारदः कलिकौतुकी ॥ ३२ ॥
कृष्णोऽपि सह रामेण विभि[2]न्नं रथमास्थितः । जगाम कुंडिनपुरं स्वैरप्यनुपलक्षितः ॥ ३३ ॥
तदा तया पितृष्वस्रा सखीभिश्च समावृता । नागपूजाकृते रुक्मिण्युद्यानभुवमाययौ ॥ ३४ ॥
अवतीर्य रथात् कृष्णो ज्ञापयित्वा स्वमादितः । नत्वा पितृष्वसारं तामित्यवोचत रुक्मिणीम् ॥ ३५ ॥

कृष्णेन
रुक्मिणी–
हरणम् ।

---

१ दमघोषपुत्राय । २ भिन्नं भिन्नम् ।

त्वामागां दूरतोऽप्येष द्विरेफ इव मालतीम् । कृष्णोऽहं त्वद्गुणाकृष्टो रथमध्यास्व तन्मम ॥ ३६ ॥
अनुज्ञाता पितृष्वस्रा तया तद्भावविज्ञया । आरुरोह रथं स्वांतमिव कृष्णस्य रुक्मिणी ॥ ३७ ॥
ततः किंचिद्गते कृष्णे स्वदोषापोहहेतवे[1] । पितृष्वसान्यदास्यश्च तस्याः पूच्चक्रुरुच्चकैः ॥ ३८ ॥
रुक्मिन् रुक्मिन् स्वसा तेऽसौ प्रसह्य ननु रुक्मिणी । ह्रियते तस्करेणेव सरामेणाद्य शार्ङ्गिणा ॥ ३९ ॥
पांचजन्यं सुघोषं च दध्मतुस्तौ च यादवौ । यादोराशि[2]रिवाक्षुभ्यदभितो रुक्मिणः पुरम् ॥ ४० ॥
रुक्मी च शिशुपालश्च महाबाहू महाबलौ । महासैन्यावनुपदं चेलतू रामकृष्णयोः ॥ ४१ ॥
दृष्टवा च चकिता रुक्मिण्युवाचांकस्थिता हरिम् । क्रूरो महौजा मद्भ्राता शिशुपालश्च तत्समः ॥ ४२ ॥
तद्गृह्या[3] बहवोऽन्येऽपि वीराः संवर्मिता इह । युवां त्वेकाकिनावत्र तेन भीतास्मि का गतिः ॥ ४३ ॥
हसित्वा हरिप्यूचे मा भैषीः क्षत्रिया ह्यसि । केऽमी वराका रुक्म्याद्याः पश्यादः सुभ्रु मद्बलम् ॥ ४४ ॥
इत्युक्त्वा तत्प्रत्ययार्थमर्धचंद्रेण शार्ङ्गभृत् । तालाली[4]मेकघातेन नालपंक्ति[5]मिवाच्छिदत् ॥ ४५ ॥
अंगुलीयकवज्रं चांगुष्ठांगुलिनिपीडनात् । दलयामास निर्भ्रष्टमसूरकणलीलया[6] ॥ ४६ ॥
तेन पत्योजसात्यंतं रुक्मिणी प्रमदं दधौ । पद्मिनीव प्रभातार्कतेजसा विकचानना ॥ ४७ ॥
रामं बभाषे गोविंद गृहीत्वेमां वधूं व्रज । अहमेतान् हनिष्यामि रुक्म्यादीननुधावतः ॥ ४८ ॥

कृष्णेन रुक्मिणी-हरणम् ।

---

१ स्वदोषस्य गुप्तिहेतवे । २ समुद्रः । ३ तत्पक्षीयाः । ४ तालवृक्षपंक्तिम् । ५ पद्मनालपंक्तिमिव । ६ रंधितमसूरधान्यस्य कणलीलया ।

रामोऽप्युवाच गच्छ त्वं हनिष्याम्यहमेव तान् । रुक्मिण्यप्यवदद्भीता त्रातव्यः सोदरो मम ॥ ४९ ॥
रामोऽपि कृष्णानुमतः प्रत्यपद्यत तद्वचः । योद्धुं तत्रैव तस्थौ च जगाम तु जनार्दनः ॥ ५० ॥
अथायतं परबलं प्रोत्क्षिप्तमुशलो बलः । मंथाचल इवांभोधिं ममंथा[1]मंथरो रणे ॥ ५१ ॥
वज्रेणेवाद्रयः पेतुस्तस्यायोऽग्रेण दंतिनः । चूर्णसादभवंश्चापि घटकर्परवद्रथाः ॥ ५२ ॥
सहैव शिशुपालेन दुद्राव रुक्मिणश्चमूः । वीरमानी पुना रुक्मी बलभद्रमदोऽवदत् ॥ ५३ ॥
अहो दृष्टोऽसि गोपाल तिष्ठ तिष्ठाग्रतो मम । एषोऽहं ते हरिष्यामि गोपयःपानजं मदम् ॥ ५४ ॥
प्रतिपन्नं स्मरन्नाम संत्यज्य मुशलं शरैः । तस्याभांक्षीद्रथं वर्माच्छिदद्रथ्याञ्जघान च ॥ ५५ ॥
ततश्च रुक्मिणं रामो वध्यकोटिमुपागतम् । लूनकेशं क्षुरप्रेण कृत्वोवाच हसन्निति ॥ ५६ ॥
मद्वध्वा बांधव इति न वध्योऽसि प्रयाहि रे । मुंडोऽपि हि स्वपत्नीभिर्विलसास्मत्प्रसादतः ॥ ५७ ॥
एवमुक्तश्च मुक्तश्च ह्रिया नेयाय कुंडिनम् । रुक्म्यस्थात् किं तु तत्रैव न्यस्य भोजकटं पुरम् ॥ ५८ ॥
कृष्णोऽपि रुक्मिणीमूचे प्राविशन् द्वारकापुरीम् । देवीयं देवरचिता पुरी रत्नमयी मम ॥ ५९ ॥
सुरद्रुममयोद्यानेष्वस्यां सुभ्रु मया सह । रंस्यसे त्वमविच्छिन्नं सुखं सुरवधूरिव ॥ ६० ॥
बभाषे रुक्मिणी कृष्णं पत्न्यस्तव महर्द्धयः । प्रदत्ताः पितृभिः संति सहायातपरिच्छदाः ॥ ६१ ॥

कृष्णेन रुक्मिणी–हरणम् ।

[1] अमंथरोऽमंदः ।

एकाकिन्यहमानीता बंदीव भवता प्रिय । हसनीया यथा तासां न भवामि तथा कुरु ॥ ६२ ॥
करिष्ये त्वां तदधिकामित्युक्त्वा रुक्मणीं स्वयम् । सत्यभामागृहाभ्यर्णप्रासादेऽमुंचदच्युतः ॥ ६३ ॥
गांधर्वेण विवाहेन परिणीयाथ रुक्मिणीम् । स्वच्छंदं रमयामास रजनीं तां जर्नादनः ॥ ६४ ॥
जनप्रवेशं रुक्मिण्याः सदनेऽ[1]रक्षदच्युतः । स्वप्रियां मे दर्शयेति तं भामोचे च साग्रहम् ॥ ६५ ॥
लीलोद्याने श्रीगृहे श्रीप्रतिमां [2]सज्जनच्छलात् । हरिरुत्सारयामास निपुणैश्चित्रकारकैः ॥ ६६ ॥
तत्रैत्य कृष्णः श्रीस्थाने स्थापयामास रुक्मिणीम् । देवीनामागमे तिष्ठेर्निश्चलेत्यशिषच्च ताम् ॥ ६७ ॥
गतोऽथ कृष्णः स्वं स्थानं पप्रच्छे चेति भामया । कुत्र स्थाने त्वया मुक्ता विद्यते हंत वल्लभा ॥ ६८ ॥
अस्ति सा श्रीगृहे मुक्तेत्याख्याते शार्ङ्गधन्विना । सपत्नीभिः समं सत्यभामा श्रीसदनं ययौ ॥ ६९ ॥
श्रीस्थानस्थां तत्र दृष्टवा रुक्मिणीं साब्रवीदिति । अहो रुपं श्रियो देव्याः कौशलं शिल्पिनामहो ॥ ७० ॥
इत्युक्त्वा तां प्रणम्योचे लक्ष्मि देवि तथा कुरु । यथा नव्यां हरेः पत्नीं रुपलक्ष्म्या जयाम्यहम् ॥ ७१ ॥
एवं जाते च ते पूजां करिष्यामीत्युदीर्य सा । जगाम पार्श्वे कृष्णस्य प्रिया ते क्वेत्युवाच च ॥ ७२ ॥
सत्ययाथापराभिश्च सहागाच्छ्रीगृहे हरिः । रुक्मिणी तत्र चोत्थाय कां नमामीत्युवाच ॥ ७३ ॥
कृष्णेन दर्शिता तस्याः सत्यभामाब्रवीदिति । कथं वंदिष्यतेऽसौ मामज्ञानाद्वंदिता मया । ७४ ॥

१ जनप्रवेश न्यषेधदित्यर्थः । २ सज्जीकरणमिषात् ।



कृष्णेन
रुक्मिणी–
हरणम् ।

कृष्ण–
जांबवती–
विवाहः ।

हसित्वा हरिरप्यूचे को दोषः स्वसृवन्दने । सत्या विलक्षा गेहेऽगाद्रुक्मिणीं नतपूर्विणी ॥ ७५ ॥
रुक्मिण्यै महतीमृद्धिं ददौ कंसनिषूदनः । प्रेमपीयूषनिर्मग्नो रेमे च सहितस्तया ॥ ७६ ॥
कृष्णेनान्येद्युरायातो नारदोऽभ्यर्च्य भाषितः । किं दृष्टं किंचिदाश्चर्यं भ्रमसि त्वं हि तत्कृते ॥ ७७ ॥
नारदोऽप्यब्रवीद्दृष्टं श्रृणु वैताढ्यपर्वते । जांबवान् खेचरेन्द्रोऽस्ति शिवचंद्रा च तत्प्रिया ॥ ७८ ॥
विष्वक्सेनस्तयोः सूनुः कन्या जांबवती पुनः । रुपेण तस्याः सदृशी न कापि त्रिजगत्यपि ॥ ७९ ॥
क्रीडार्थं सा च गंगायां नित्यं हंसीव गच्छति । आश्चर्यभूतां तां दृष्टवा तवाख्यातुमिहागमम् ॥ ८० ॥
तच्छ्रुत्वा शार्ङ्गभृत्तत्र ययौ सबलवाहनः । सखीवृतां जांबवतीं रममाणां ददर्श च ॥ ८१ ॥
यथोक्ता नारदेनेयं तथैवेति वदन् हरिः । अपाहरज्जांबवतीं जज्ञे च तुमुलो महान् ॥ ८२ ॥
खड्गखेटकभृच्चागाज्जांबवान् क्रोधमुद्वहन् । जिग्येऽनाधृष्टिना चाशु निन्येऽभ्यर्णे च शार्ङ्गिणः ॥ ८३ ॥
तां जांबवाञ्जांबवतीं ततश्चादत्त शार्ङ्गिणः । अपमानाद्विरक्तस्तु प्रव्रज्यां स्वयमाददे ॥ ८४ ॥
जांबवत्सूनुना विष्वक्सेनेन सहितो हरिः । आदाय तां जांबवतीं जगाम द्वारकापुरीम् ॥ ८५ ॥
रुक्मिणीसदनाभ्यर्णे तस्या हर्म्यं ददौ हरिः । योग्यम्[1]न्यच्च सा त्वासीद्रुक्मिण्या सह सख्यभाक् ॥ ८६ ॥
अन्यदा सिंहलेशस्य श्लक्ष्णरोम्णोऽन्तिके गतः । निवृत्य चागतो दूतः कृष्णायेति व्यजिज्ञपत् ॥ ८७ ॥

१ च पुनरन्यद्योग्यं दासीदासादिकं ददौ सातु रुक्मिणीसखी जाता इत्यर्थः ।

नाभ्यनंदत्तवादेशं श्लक्ष्णरोमास्ति तस्य तु । कन्यका लक्ष्मणा नाम तवैवार्हति लक्षणैः ॥ ८८ ॥
द्रुमसेनेन सेनान्या रक्षिता स्नातुमर्णवे । सेदानीमाययौ सप्तरात्रं स्नास्यति तत्र च ॥ ८९ ॥
श्रुत्वेति सह रामेण कृष्णस्तत्र जगाम च । निहत्य तं च सेनान्यमगादादाय लक्ष्मणाम् ॥ ९० ॥
उदूह्य लक्ष्मणां कृष्णो जांबवत्योकसोऽन्तिके । निदधे रत्नसदने प्रददौ च परिच्छदम् ॥ ९१ ॥
इतश्चायुरखरीपुर्यां सुराष्ट्राराष्ट्रभूपतिः । राष्ट्रवर्धन इत्यासीद्विनया तस्य तु प्रिया ॥ ९२ ॥
तयोश्च नमुचिः सूनुर्युवराजो महाभुजः । दुहिता तु सुसीमेति निःसीमा रुपसंपदा ॥ ९३ ॥
नमुचिः सिद्धदिव्यास्त्रः कृष्णाज्ञां न ह्यमन्यत । स्नातुं प्रभाते सोऽन्येद्युर्ययौ सह सुसीमया ॥ ९४ ॥
निवेश्य शिबिरं तत्र स्थितं विज्ञाय तं हरिः । जघान सबलोऽभ्येत्य सुसीमामाददे च ताम् ॥ ९५ ॥
तामप्युद्वाह्य गोविंदो लक्ष्मणासदनांतिके । मुमोच हर्म्ये तस्यै च प्रक्रियां महतीं ददौ ॥ ९६ ॥
राष्ट्रवर्धनराजोऽपि सुसीमायै परिच्छदम् । प्राहिणोत् कृष्णहेतोश्च विवाहार्थं गजादिकम् ॥ ९७ ॥
मरौ वीतभयेशस्य गौरीं कन्यामुपायत । हरिः सुसीमागेहस्योपांतगेहे मुमोच च ॥ ९८ ॥
अथारिष्टपुरे कृष्णः प्रययौ हलिना सह । हिरण्यनाभदुहितुः पद्मावत्याः स्वयंवरे ॥ ९९ ॥
राज्ञा हिरण्यनाभेन रोहिणी[1]सोदरेण तौ । पूजितौ विधिवद्वीरौ जामेयाविति संमदात् ॥ १०० ॥



कृष्णस्य लक्ष्मणा-सुसीमाभ्यां विवाहः ।



---

१ रोहिणी राममाता ।

हिरण्यनाभनृपते रैवतो नामतोऽग्रजः । प्रवव्राज समं पित्रा तीर्थे भगवतो नमेः ॥ १०१ ॥
तत्सुता रेवती रामा सीता बंधुमतीति च । पुरा प्रदत्ता रामाय रोहिणीतनुजन्मने ॥ १०२ ॥
सर्वेषां पश्यतां राज्ञां जह्रे पद्मावतीं हरिः । स्वयंवरागतान्राज्ञो युध्यमानाञ्जिगाय च ॥ १०३ ॥
पत्नीयुतौ रामकृष्णावीयतुर्द्वारकां ततः । कृष्णो गौरीगृहाभ्यर्णे गृहे पद्मावतीं न्यधात् ॥ १०४ ॥
इतश्च पुष्कलावत्यां पुर्यां[1] गांधारनीवृति । नग्नजित्तनयश्चारुदत्तो नामाभवन्नृपः ॥ १०५ ॥
गांधारी नाम तस्यासीद्भगिनी सुभगाकृतिः । [2]दत्तपत्रेव लावण्यसंपदा खेचरीष्वपि ॥ १०६ ॥
मृते पितरि दायादैश्चारुदत्तः पराजितः । दूतेन शिश्रिये कृष्णं शरण्यं शरणाय सः ॥ १०७ ॥
गंधारेषु हरिर्गत्वा तद्दायादान् रणेऽवधीत् । चारुदत्तप्रदत्तां च तां गांधारीमुपायत ॥ १०८ ॥
पद्मावतीगृहाभ्यर्णे तस्या वेश्म ददौ हरिः । इत्यभूवन्महिष्योऽष्टौ कृष्णस्य क्रमवेश्मगाः ॥ १०९ ॥

कृष्णस्य पद्मावती–गान्धारीभ्यां विवाहः ।

रुक्मिण्याश्च गृहेऽन्येद्युरतिमुक्तर्षिरागतः । तं दृष्ट्वा सत्यभामापि तत्रैवाशु समाययौ ॥ ११० ॥
रुक्मिण्याप्रच्छि स मुनिः किं मे स्यात्तनयो न वा । भावी कृष्णसमः पुत्रस्तवेत्युक्त्वा ययौ च सः ॥ १११ ॥
सत्यभामा मुनिवचो मन्यमाना तदात्मगम् । उवाच रुक्मिणीं सूनुर्भावी कृष्णसमो मम ॥ ११२ ॥
प्रत्यूचे रुक्मिणी [3]नैर्षिवचनं फलति च्छलात् । एवं विवदमाने ते कृष्णाभ्यर्णमुपेयतुः ॥ ११३ ॥

१ गांधारदेशे । २ दत्तं पत्रं प्रशस्तिपत्रं यस्याः सा । ३ न ऋषी ।

तदा दुर्योधनो राजा तत्रायातः स्वसोदरः । भामयोचे मम सुतो जामाता ते भविष्यति ॥ ११४ ॥
रुक्मिण्यापि तथोक्तः स्माह दास्ये सुतामहम् । तस्मै यं युवयोरेका तनयं प्रसविष्यते ॥ ११५ ॥
भामोवाच सुतो यस्याः प्रथमं परिणेष्यति । तद्विवाहेऽन्यया केशा देयास्तस्याः स्वकाः खलु ॥ ११६ ॥
साक्षिणः प्रतिभुवश्च रामपादा जनार्दनः । दुर्योधनश्चेत्युदित्वा स्वौको द्वे अपि जग्मतुः ॥ ११७ ॥
अन्यदा रुक्मिणी स्वप्ने [1]बलक्षवृषभस्थिते । विमाने स्वं समारुढं ददर्श प्रत्यबोधि च ॥ ११८ ॥
तदानीमेव च सुरो महाशुक्रान्महर्द्धिकः । प्रच्युतो रुक्मिणीदेव्या उदरे समवातरत् ॥ ११९ ॥
तं च स्वप्नं हरे रुक्मिण्याचख्यौ प्रातरुत्थिता । विश्वैकवीरस्ते सूनुर्भावीति व्याकरोच्च सः ॥ १२० ॥
तदा च दासी भामायाः स्वप्नव्याख्यां निशम्य ताम् । गत्वा शशंस भामायै तस्याः श्रवणदुःखदाम् ॥ १२१ ॥
सापि स्वप्नं कल्पयित्वोपेत्याख्याच्छार्ङ्गपाणये । हस्तिमल्लोपमो हस्ती स्वप्नेऽद्य ददृशे मया ॥ १२२ ॥
तत्कूटमिंगितैर्ज्ञात्वाप्यसौ मा कुप्यदित्यथ । व्याख्यात्कृष्णस्तव सुतो भविष्यति शुभः खलु ॥ १२३ ॥
दैवात्तदाभवत्तस्या गर्भोऽवर्धिष्ट चोदरम् । रुक्मिण्युत्तमगर्भत्वाद्यथावस्थोदरा त्वभूत् ॥ १२४ ॥
सत्यभामान्यदा विष्णुमुवाच तव पत्न्यसौ । शशंस मायया गर्भं निरीक्षस्वोदरं द्वयोः ॥ १२५ ॥
तदा चावर्धयत् कृष्णं दास्येका यत्सुतोऽधुना । सुषुवे रुक्मिणीदेव्या महात्मा कांचनप्रभः ॥ १२६ ॥

कृष्णपुत्र–
प्रद्युम्न–
जन्म ।

---

१ बलक्षः श्वेतः ।

कृष्णपुत्र–
प्रद्युम्न–
जन्म
तद्धरणं च ।

सत्यभामापि तच्छ्रुत्वा विलक्षा क्रोधविह्वला । गृहं यांत्येव सुषुवे भानुकं नामतः सुतम् ॥ १२७ ॥
कृष्णोऽपि मुदितोऽगच्छद्रुक्मिण्याः सदने तदा । अर्वाक्सिंहासनासीन आनाय्यापश्यदात्मजम् ॥ १२८ ॥
प्रद्योतयन् दिशः सर्वाः प्रद्युम्नोऽस्त्वेष नामतः । तमित्युल्लापयन् बालं क्षणमस्थाज्जनार्दनः ॥ १२९ ॥
प्राग्वैराद्रुक्मिणीवेषो धूमकेतुसुरस्तदा । एत्य कृष्णाद्गृहीत्वार्भं[1] प्रति वैताढ्यमभ्यगात् ॥ १३० ॥
ययौ च भूतरमणोद्याने टंकशिलोपरि । दध्यौ चैनं किमास्फाल्य हन्मि नैवं स दुःखभाक् ॥ १३१ ॥
तन्मुञ्चामि शिलापृष्ठे निराहारः क्षुधातुरः । क्रंदन्नेष म्रियेतेति तं तत्रोत्सृज्य सोऽगमत् ॥ १३२ ॥
सोऽर्भश्चरमदेहत्वान्निरुपक्रमजीवितः[2] । बहुपर्णांचिते देशे निःपपाताविबाधितम् ॥ १३३ ॥
प्रातश्चाग्निज्वालपुरात् स्वपुरं गच्छतः सतः । यानं तत्रास्खलत् कालसंचरस्य खचारिणः ॥ १३४ ॥
विमानस्खलने हेतुं खेचरेन्द्रः स चिंतयन् । अधस्तादुत्ततारार्भं तं चापश्यन्महाद्युतिम् ॥ १३५ ॥
विमानस्खलने हेतुर्महात्मा कोऽप्यसाविति । पत्न्यै कनकमालायै पुत्रत्वेनार्पयत् सुतम् ॥ १३६ ॥
स्वपुरे मेघकूटाख्ये स गत्वा खेचरोऽवदत् । मत्पत्नी गूढगर्भासीत्तनयं सुषुवेऽधुना ॥ १३७ ॥
पुत्रजन्मोत्सवं कृत्वा संवरः सुदिनेऽकरोत् । दिशां प्रद्योतनात्तस्य प्रद्युम्न इति चाभिधाम् ॥ १३८ ॥
इतश्च कृष्णो रुक्मिण्योपेत्याप्रच्छि क्व ते सुतः । संप्रत्येव त्वया नीत इत्यूचे सा च विष्णुना ॥ १३९ ॥

१ बालं । २ निरुपक्रमं जीवितं यस्य सः ।

सीमन्धर–
स्वामिनो–
ऽन्तिके
नारदस्य
गमनम्
प्रद्युम्न
प्रवृत्त्या–
ख्यिश्च ।



प्रतारयसि किं नाथेत्युक्तः कृष्णस्तया पुनः । केनापि च्छलितोऽस्मीति बहुधान्वेषयत्सुतम् ॥ १४० ॥
सुतोदंते त्वसंप्राप्ते रुक्मिणी मूर्छितापतत् । रुरोद लब्धसंज्ञा तु तारं परिजनैः समम् ॥ १४१ ॥
यदवो यदुपत्न्यश्च तस्थुः सर्वेऽपि दुःखिताः । सत्यभामां विमुच्यैकां तदीयं च परिच्छदम् ॥ १४२ ॥
प्रभविष्णोर्न[१] किं विष्णोः पुत्रोदंतोऽधुनापि हि । रुक्मिण्येवं ब्रुवाणादाद्[२]दुःखं कृष्णस्य दुःखिनः ॥ १४३ ॥
अशेषैर्यदुभिः सार्धं तत्रोद्विग्नस्य शार्ङ्गिणः । सभायां नारदोऽभ्यागात्किमेतदिति चावदत् ॥ १४४ ॥
कृष्णो बभाषे रुक्मिण्या जातमात्रः करान्मम । हृतः केनापि तनयः शुद्धिं जानासि तस्य किम् ॥ १४५ ॥
उवाच नारदोऽत्रासीन्महाज्ञान्यतिमुक्तकः । स गतो मोक्षमधुना न ज्ञानी कोऽपि भारते ॥ १४६ ॥
सीमन्धरस्तीर्थकरः सर्वसंशयनाशनः । सांप्रतं प्राग्विदेहेषु गत्वा पृच्छामि तं हरे ॥ १४७ ॥
कृष्णेन यदुभिश्चान्यैरभ्यर्च्याभ्यर्थितो ययौ । नारदस्त्वरितं तत्र यत्र सीमंधरः प्रभुः ॥ १४८ ॥
स्थितं समवसरणे तं जिनेन्द्रं प्रणम्य सः । पप्रच्छ कृष्णरुक्मिण्योर्भगवन् क्व सुतोऽधुना ॥ १४९ ॥
स्वाम्याख्याद्[३]द्युसदा धूमकेतुना प्राग्भवारिणा । हृतच्छलेन कृष्णस्य प्रद्युम्नो नाम नंदनः ॥ १५० ॥
मुक्तस्तेनोपवैताढ्यं शिलायां न तु सोऽमृत । हंतुं चरमदेहत्वात्स केनापि न शक्यते ॥ १५१ ॥
प्रातश्च गच्छता दृष्टः संवरेण खचारिणा । पुत्रत्वेनार्पितः पत्न्यै वर्धमानोऽस्ति संप्रति ॥ १५२ ॥

---

१ समर्थस्य । २ अदात् । ३ देवेन ।

कथं वैरं धूमकेतोस्तेनाभूत्पूर्वजन्मनि । भूयोऽपि नारदेनैवं पृष्टः स्वामीत्यवोचत ॥ १५३ ॥
जंबूद्वीपस्य भरते मगधेषु महर्द्धिके । शालिग्रामेऽस्त्युपवनं ख्यातं नाम्ना मनोरमम् ॥ १५४ ॥
तस्योद्यानस्याधिपतिर्यक्षोऽभूत् सुमना इति । अवात्सीत्तत्र च ग्रामे सोमदेव इति द्विजः ॥ १५५ ॥
सोमदेवस्याग्निलायां पत्न्यामभवतां सुतौ । अग्निभूतिर्वायुभूतिश्चोभौ वेदार्थकोविदौ ॥ १५६ ॥
विद्यया विश्रुतौ तत्र द्वावपि प्राप्तयौवनौ । भुंजानौ विविधान् भोगांस्तस्थतुस्तौ मदोद्धुरौ ॥ १५७ ॥
तस्मिन्मनोरमोद्यानेऽपरेद्युर्नंदिवर्धनः । आचार्यः समवासा[1]र्षील्लोकेनैत्य च वंदितः ॥ १५८ ॥
अग्निभूतिवायुभूती दृप्तौ त्वेत्यैवमूचतुः । शास्त्रार्थं वेत्सि चेत्कंचित्तद्भो वद सि[2]तांबर ॥ १५९ ॥
नंदिवर्धनशिष्यस्तौ सत्योऽवोचत् कुतो युवाम् । समायातौ शालिग्रामादिति तावप्यशंसताम् ॥ १६० ॥
भूयः सत्योऽवदत्प्राप्तौ मानुष्यं भोः कुतो भवात् । इति पृच्छामि तद्ब्रूतं जानीथो यदि किंचन ॥ १६१ ॥
ततस्तौ तस्थतुर्लज्जाधोमुखौ ज्ञानवर्जितौ । आख्यातुं तद्भवं सत्यो मुनिरेवं प्रचक्रमे ॥ १६२ ॥
ग्रामस्यास्य वनस्थल्यां शृगालौ प[3]ललाशिनौ । युवां पूर्वभवेऽभूतमहो ब्राह्मणसत्तमौ ॥ १६३ ॥
क्षेत्रे कुटुंबिनैकेन चर्मरज्ज्वादिकं निशि । मुक्तं वृष्ट्यार्द्रीकृतं तत्ताभ्यां सर्वमभक्ष्यत ॥ १६४ ॥
अत्याहाराद्विपद्योभौ तौ युवां निजकर्मणा । सोमदेवजद्विसुतौ संजाताविह जन्मनि ॥ १६५ ॥

प्रद्युम्न-
पूर्वभवः ।



१ सृधातोः अद्यतनीरुप् । २ श्वेतांबर । ३ मांसभक्षिणौ ।

प्रभाते हालिकः सोऽपि सर्वं तत्प्रेक्ष्य भक्षितम् । गतः स्वगेहे कालेन मृत्वाभूत् स्वस्नुषा[1]सुतः ॥ १६६ ॥
जातिस्मरत्वं संप्राप्तः स्नुषा माता सुतः पिता । कथं वाच्यो मयेत्यासीज्जन्ममूकः सकैतवात् ॥ १६७ ॥
न चेद्वां प्रत्ययस्तत्तं पृच्छतं मूकहालिकम् । वृत्तांतमेनं स यथा मौनं मुक्त्वा ब्रवीति वाम् ॥ १६८ ॥
लोकेन सद्योऽप्यानीतः स मौनी तत्र हालिकः । ऊचे च मुनिना ब्रूहि प्राग्जन्म निजमादितः ॥ १६९ ॥
पुत्रः पिता पिता पुत्र ईदृक् प्रायो भवस्थितिः । प्राग्जन्मसंबंधभवां ह्रियं मौनं च तत्त्यज ॥ १७० ॥
आत्मसंवादमुदितः स नमस्कृत्य तं मुनिम् । सर्वेषां श्रृण्वतामाख्यत् प्राग्जन्म स्वं तथैव हि ॥ १७१ ॥
प्राव्रजन् बहवस्तत्र प्रबुध्य स च हालिकः । हास्यमानौ जनैस्तौ तु विलक्षौ जग्मतुर्गृहम् ॥ १७२ ॥



विप्रौ वैरायमाणौ तौ सासी[2] हंतुं तु तं मुनिम् । निश्यायातौ सुमनसा यक्षेण स्तंभितौ क्षणात् ॥ १७३ ॥
प्रातश्च ददृशुर्लोकास्तन्मातापितरौ च तौ । क्रंदंतौ सुमना यक्षः प्रत्यक्षमिदमभ्यधात् ॥ १७४ ॥
एतौ मुनिं जिघांसंतौ दुर्मती स्तंभितौ मया । प्रव्रज्यां यदि गृह्णीतस्तदा मुंचामि नान्यथा ॥ १७५ ॥
दुष्करः साधुधर्मो नौ धर्मं तु श्रावकोचितम् । करिष्याव इति ताभ्यामुक्ते मुक्तौ सुरेण तौ ॥ १७६ ॥
तदादि चक्रतुस्तौ तु जिनधर्मं यथाविधि । नार्हद्धर्मं तत्पितरौ प्रपेदाते मनागपि ॥ १७७ ॥
अग्निभूतिवायुभूती तौ मृत्वाभवतां सुरौ । षट्पल्यप्रमितायुष्कौ कल्पे सौधर्मनामनि ॥ १७८ ॥



---

१ स्नुषा पुत्रवधूः । २ खङ्गसहितौ ।

प्रद्युम्न–
पूर्वभवः ।

च्युत्वाभूतां गजपुरेऽर्हद्दासर्वणिजः सुतौ । पूर्णभद्रमाणिभद्रौ श्रावकौ प्राग्भवक्रमात् ॥ १७९ ॥
माहेन्द्रो नाम तत्रर्षिरन्यदा समवासरत् । अर्हद्दासः प्रवव्राज श्रुत्वा धर्मं तदंतिके ॥ १८० ॥
पूर्णभद्रमाणिभद्रौ माहेन्द्रं वंदितुं मुनिम् । यांतौ शुनिकां चंडालं दृष्ट्वा सिष्णिहतुः पथि ॥ १८१ ॥
गत्वा नत्वा महेन्द्रर्षिं तौ पप्रच्छतुरेष कः । चंडालः का च शुनिका स्नेहो यद्दर्शनेन नौ ॥ १८२ ॥
स आचख्यावग्निभूतिवायुभूतिभवे हि वाम् । पिता विप्रः सोमदेवोऽभवन्माताग्निलाभिधा ॥ १८३ ॥
पिता स मृत्वा भरतेऽत्रैव शंखपुरे ऽभवत् । जितशत्रुर्नाम नृपः परदाररतः सदा ॥ १८४ ॥
मृत्वाग्निला तु तत्रैव पुरे शंखपुरेऽजनि । सोमभूतेर्ब्राह्मणस्य रुक्मिणी नाम गेहिनी ॥ १८५ ॥
तां स्वगेहांगणगतां जितशत्रुर्नृपोऽन्यदा । व्रजन् ददर्श सद्योऽपि जज्ञे कामवशंवदः ॥ १८६ ॥
उत्पाद्यागः[1] सोमभूतेस्तां राजांतःपुरे न्यधात् । सोऽग्निमग्न इवास्थात्तु द्विजस्तद्विरहातुरः ॥ १८७ ॥
जितशत्रुस्तया रंत्वा सहस्रं शरदामथ । मृत्वा बभूव नरके त्रिपल्योपमजीवितः ॥ १८८ ॥
ततश्च हरिणः सोऽभूद्धतो मृगयुना पुनः । जज्ञे श्रेष्ठिसुतो मायी सोऽपि मृत्वाभवद्गजः ॥ १८९ ॥
दैवाज्जातिस्मरः सोऽभूत्प्रायं[2] कृत्वा मृतोऽहनि । अष्टादशे त्रिपल्यायुर्वैमानिकसुरोऽभवत् ॥ १९० ॥
ततश्च्युत्वैष चंडालः सोऽभूत्सा रुक्मिणी पुनः । भवं भ्रांत्वाभूच्छुनीयं तेन वां स्नेह एतयोः ॥ १९१ ॥

१ अपराधं । २ अनशनम् ।

प्रद्युम्न–
पूर्वभवः ।

इति श्रुत्वा पूर्णभद्रमाणिभद्रौ तदाप्तया । जातिस्मृत्याबोधयतां चंडालं शुनिकां च ताम् ॥ १९२ ॥
ततो विरक्तश्चंडालो मासं सोऽनशने स्थितः । मृत्वा नंदीश्वरद्वीपे त्रिदशः समजायत ॥ १९३ ॥
प्रबुद्धा शुनिका सापि विहितानशना मृता । तत्रैवाभूच्छंखपुरे राजपुत्री सुदर्शना ॥ १९४ ॥
पुनरप्यागतस्तत्र महेन्द्रर्षि शशंस ताम् । पृष्टोऽर्हद्दासपुत्राभ्यां शुनीचंडालसद्‍गतिम् ॥ १९५ ॥
ताभ्यां भूयोऽपि सा राजदुहिता प्रतिबोधिता । उपादाय परिव्रज्यां देवलोकमुपाययौ ॥ १९६ ॥
पूर्णभद्रमाणिभद्रौ गृहिधर्मं तु तौ तदा । कृत्वा मृत्वा च सौधर्मेऽभूतां सामानिकौ सुरौ ॥ १९७ ॥
च्युत्वा च हस्तिनपुरे विष्वक्सेनस्य भूपतेः । मधुकैटभनामानावभूतां तनयावुभौ ॥ १९८ ॥
नंदीश्वरसुरः सोऽपि च्युत्वा भ्रांत्वा भवं चिरम् । अभूद्वटपुरे राजा नामतः कनकप्रभः ॥ १९९ ॥
च्युत्वा सुदर्शना सापि भवं भ्रांत्वा च भूरिशः । कनकप्रभराजस्य चंद्राभेति महष्यभूत् ॥ २०० ॥
विष्वक्सेनो मधुं राज्ये यौवराज्ये च कैटभम् । निधाय व्रतमादाय ब्रह्मलोकमुपागतः ॥ २०१ ॥
वशीकृताशेषभुवोर्मधुकैटभयोस्तयोः । पल्लीपतिच्छलादेव भीमो देशमुपाद्रवत् ॥ २०२ ॥
मधु प्रतस्थे तं हंतुं मार्गे वटपुरेऽथ सः । अभ्यर्चितो भोजनाद्यैः कनकप्रभभूभुजा ॥ २०३ ॥
स सेवकः स्वामिभक्त्या पत्न्या चंद्राभया समम् । उपतस्थे भोजनांते प्राभृतेन मधुं नृपम् ॥ २०४ ॥

मधुं प्रणम्य चंद्राभा भूयोऽप्यंतःपुरं ययो । तदै[1]वादित्सति मधुः कामार्तस्तां बलादपि ॥ २०५ ॥
तदा निषिद्धोऽमात्येन ययौ मधुनृपोऽग्रतः । भीमं पल्लीपतिं जित्वा निवृत्तस्तत्र चाययौ ॥ २०६ ॥
कनकप्रभराजेन भूयोऽपि मधुरर्चितः । उवाच प्राभृतैस्तेऽलं चंद्राभैव ममार्प्यताम् ॥ २०७ ॥
याच्यमानोऽपि कनकप्रभस्तां न ददौ यदा । तदाच्छि[2]द्यापि चंद्राभां निनाय स्वपुरे मधुः ॥ २०८ ॥
पपात मूर्छितः पृथ्व्यां विधुरः कनकप्रभः । उत्थाय विललापोच्चैरुन्मत्त इव चाभ्रमत् ॥ २०९ ॥
[3]व्यवहारे सहामात्यैस्तस्थौ मधुनृपोऽन्यदा । तन्निर्णयमकृत्वापि चंद्राभासदनं ययौ ॥ २१० ॥
चिरायितं किमद्येति पृष्टश्चंद्राभया मधुः । पारदारिकवादेऽस्थामहमद्येत्यवोचत ॥ २११ ॥
तं स्मित्वोवाच चंद्राभा स पूज्यः पारदारिकः । मधुरुचे कथं पूज्यो निग्राह्याः पारदारिकाः ॥ २१२ ॥
भूयोऽप्युवाच चंद्राभा यद्येवं न्यायनिष्ठुरः । आत्मानं किं न जानीषे प्रथमं पारदारिकम् ॥ २१३ ॥
तच्छ्रुत्वा प्रतिबुद्धः स लज्जितोऽस्थादथाययौ । गायन्नृत्यन्राजमार्गे वृतोऽर्भैः कनकप्रभः ॥ २१४ ॥
दध्यौ तं प्रेक्ष्य चंद्राभा मद्वियोगे दशामिमाम् । मत्पतिः प्राप्तवानेष धिग्मां परवशामिमाम् ॥ २१५ ॥
सा विचिंत्येति मधवे तमायांतमदर्शयत् । स्वेन दुष्कर्मणा तेन मधुरप्यन्वतप्यत ॥ २१६ ॥
मधुर्धुंधुसुतं राज्ये न्यस्य कैटभसंयुतः । व्रतं जग्राह विमलवाहनस्यांतिके गुरोः ॥ २१७ ॥

प्रद्युम्न-पूर्वभवः ।

---

१ आदातुमिच्छति । २ बलात् । ३ न्यायकार्ये ।

तौ तेपाते तपोऽत्युग्रं सहस्रान् शरदां बहून् । द्वादशांगधरौ साधुवैयावृत्त्यकरौ सदा ॥ २१८ ॥
विधायानशनं प्रांते विहितालोचनावुभौ । मृत्वाभूतां महाशुक्रे तौ सामानिकनाकिनौ ॥ २१९ ॥
कनकप्रभराजोऽपि क्षुत्तृषादिभिरर्दितः । समासहस्रत्रितयं क्षपयित्वा व्यपद्यत ॥ २२० ॥
स नामतो धूमकेतुर्ज्योतिष्केषु सुरोऽभवत् । ज्ञात्वावधेः पूर्ववैरं मधुजीवं ममार्ग[1] च ॥ २२१ ॥
मधुं महर्द्धिदेवत्वादपश्यन्नैव सोऽमरः । च्युत्वा प्राप्य च मर्त्यत्वं तापसः समजायत ॥ २२२ ॥
कृत्वा बालतपो मृत्वा सोऽथ वैमानिकोऽभवत् । मधुं महर्द्धिं तत्रापि न ह्यमुं द्रष्टुमीश्वरः ॥ २२३ ॥
च्युत्वा ततोऽपि संसारं भ्रांत्वा कर्मवशात् पुनः । धूमकेतुरिति नाम्ना ज्योतिष्केषु सुरोऽभवत् ॥ २२४ ॥
अत्रांतरे मधुजीवो महाशुक्रात्परिच्युतः । रुक्मिण्या वासुदेवस्य महिष्या उदरेऽभवत् ॥ २२५ ॥
धूमकेतुः पूर्ववैराज्जातमात्रं तमर्भकम् । जह्रे जिघांसुश्चाक्षैप्सीद्दुष्टष्टंकशिलोपरि ॥ २२६ ॥
स्वप्रभावादक्षतांगः संवरेणाददे च सः । रुक्मिण्याः षोडशाब्दांते भविता तस्य संगमः ॥ २२७ ॥
एवं वियोगः पुत्रेण रुक्मिण्याः केन कर्मणा । इति पृष्टो नारदेन प्रभुः सीमन्धरोऽवदत् ॥ २२८ ॥
जंबुद्वीपस्य भरतक्षेत्रे मगधमंडले । लक्ष्मीग्रामाभिधे ग्रामे सोमदेवोऽभवद्द्विजः ॥ २२९ ॥
तस्य लक्ष्मीवती भार्या कदाप्युपवने गता । दृष्ट्वास्पृशन्मयूरांडं कुंकुमाक्तेन पाणिना ॥ २३० ॥

1 मार्गण्–अन्वेषणे परोक्षरुपम् ।



प्रद्युम्न–
पूर्वभवः ।

तत्स्पर्शेन तदंडं तु वर्णगंधांतरं गतम् । मात्रा स्वमित्यजानंत्या घटिकाषोडशोज्झितम् ॥ २३१ ॥
ततो वृष्टाब्दतोयेन स्वभावस्थं तदंडकम् । दृष्ट्वा संगोपितं[1] मात्रा कालेनाभून्मयूरकः ॥ २३२ ॥
भूयो लक्ष्मीवती तत्रायाता तं केकिबालकम् । दृष्ट्वातिरम्यं जग्राह रुदंत्यामपि मातरि ॥ २३३ ॥
स्वगृहे पंजरे न्यस्य प्रीणाति पानभोजनैः । तं तथा साशिषन्[2]नृत्यं यथा चारु ननर्त सः ॥ २३४ ॥
तन्माता तु मयूरी सा रसंती[3] विरसस्वरम् । न मुमोच प्रदेशं तं पुत्रस्नेहनियंत्रिता ॥ २३५ ॥
ततस्तां लोक इत्यूचे कौतुकं ते न पूर्यते । इयं वराकी म्रियते मयूरी मुंच तत्सुतम् ॥ २३६ ॥
तद्गिरा सापि सकृपामुंचत् षोडशाब्दिकम् । उद्यौवनं तत्र नीत्वा यतः स्थानादुपाददे ॥ २३७ ॥
बद्धं तेन प्रमादेन ब्राह्मण्या षोडशाब्दिकम् । कर्म स्वपुत्रविरहवेदनीयं महत्तरम् ॥ २३८ ॥
अन्येद्युर्दर्पणे तस्यां पश्यंत्यां स्वं[4] विभूषितम् । मुनिः समाधिगुप्ताख्यो भिक्षार्थं प्राविशद्गृहे ॥ २३९ ॥
भिक्षामस्मै प्रदेहीति तामूचे तत्पतिर्द्विजः । आहूतः केनचित्पुंसा तदैव स बहिर्ययौ ॥ २४० ॥
तया थुक्कृतिकुर्वंत्या जल्पित्वा परुषाक्षरम् । निर्वासितः स महर्षिः द्वारं च पिहितं द्रुतम् ॥ २४१ ॥
जुगुप्साकर्मणा तेन सप्तमेऽहनि साभवत् । सर्वांगीणगलत्कुष्टा विरक्ताग्नौ विवेश च ॥ २४२ ॥
मृत्वाऽत्रैवाभवद्ग्रामे गर्दभी रजकस्य सा । भूयोऽपि मृत्वा तत्रैव ग्रामेऽभूद्गर्तसूकरी ॥ २४३ ॥



१ सेवितम् । २ शासक् अनुशिष्टौ अधतनी रुपम् । ३ कूजंती । ४ स्वदेहम् ।

सापि मृत्वा शुन्यभवद्दग्धा सापि दवाग्निना । भावभेदेन मर्त्यायुर्बद्ध्वा तत्र व्यपद्यत ॥ २४४ ॥
पुरस्य भृगुकच्छस्य समीपे नर्मदातटे । दुर्गंधा दुर्भगा काणाभिधाभूद्धीवरात्मजा ॥ २४५ ॥
मुक्ता पितृभ्यां तद्गंधासहाभ्यां नर्मदातटे । उद्यौवना जनं नावोत्तारयामास सानिशम् ॥ २४६ ॥
दैवात्समाधिगुप्तर्षिः शीतर्तौ तत्र चाययौ । कायोत्सर्गेण निश्यस्थान्निष्कंपः सानुमानिव ॥ २४७ ॥
महात्मैष निशां सर्वां कथं शीतं सहिष्यते । विमृश्येत्यार्द्रचित्ता सा तं तृणैः प्रावृणोन्मुनिम् ॥ २४८ ॥
व्यतीतायां विभावर्यां मुनिवर्यं ननाम सा । भद्रिकेत्यादिशद्धर्मं तस्यै सोऽपि महामुनिः ॥ २४९ ॥
एष क्वापि मया दृष्ट इति ध्यात्वा चिरं तया । पृष्टः स मुनिराचख्यौ तस्यास्तान्प्राकृतान् भवान् ॥ २५० ॥

रुक्मिणी–पूर्वभवः ।

भूयोऽप्यूचे महर्षिः स कृतसाधुजुगुप्सया । इह जातासि दुर्गंधा सर्वं कर्मानुसारि हि ॥ २५१ ॥
सा जातजातिस्मरणा जुगुप्सां प्राग्भवे कृताम् । तं मुनिं क्षामयामास गर्हंती स्वं मुहुर्मुहुः ॥ २५२ ॥
साभूच्च श्राविका तेन मुनिना च कृपालुना । धर्मश्रीनामधेयाया आर्यिकायाः समर्पिता ॥ २५३ ॥
सहैव विहरंती सा ग्रामे क्वापि प्रयातया । धर्मश्रिया [1]नायलस्य श्रावकस्य समर्पिता ॥ २५४ ॥
एकांतरोपवासस्था जिनपूजरता सदा । अनैषीद्द्वादशाब्दानि सा स्थिता नायलाश्रये ॥ २५५ ॥
सा कृतानशना मृत्वाच्युतेन्द्रस्य महिष्यभूत् । पंचपंचाशत्पल्यायुः प्रच्युत्याभूत्तु रुक्मिणी ॥ २५६ ॥



---

१ नायलनाम्नः ।

मयूरीपुत्रविरहदानादब्दानि षोडश । रुक्मिणी पुत्रविरहदुःखान्यनुभविष्यति ॥ २५७ ॥
श्रुत्वेति भगवंतं तं नमस्कृत्य च नारदः । उत्पत्येयाय वैताढ्ये मेघकूटाह्वये पुरे ॥ २५८ ॥
दिष्ट्या ते चाभवत् पुत्र इति जल्पंश्च नारदः । संवरेणर्चितस्तस्य प्रद्युम्नश्च प्रदर्शितः ॥ २५९ ॥
नारदोऽपि हि तं दृष्ट्वा रुक्मिणीसदृशं सुतम् । सप्रत्ययः संवरं तमापृच्छ्य द्वारकां ययौ ॥ २६० ॥
कृष्णादीनां स आचख्यौ पुत्रोदंतमशेषतः । रुक्मिण्याश्च लक्ष्मीवतीभववृत्तांतपूर्वकम् ॥ २६१ ॥
ततश्च रुक्मिणी देवी भक्तितो रचितांजलिः । सीमंधरं भगवंतं तत्रस्थापि नमोऽकरोत् ॥ २६२ ॥
भविता षोडशाब्दांते सुतेन सह संगमः । इत्यार्हतेन वचसा स्वस्था तस्थौ च रुक्मिणी ॥ २६३ ॥
इतश्च पूर्वं वृषभस्वामिनः कुरुरित्यभूत् । सुतो यस्याभिधानेन कुरुक्षेत्रमिहोच्यते ॥ २६४ ॥
कुरोः सुतोऽभवद्धस्ती यन्नाम्ना हस्तिनापुरम् । हस्तिभूपतिसंतानेऽनंतवीर्योऽभवन्नृपः ॥ २६५ ॥
तस्माच्च कृतवीर्योऽभूत् सुभूमश्चक्रभृत्ततः । ततोऽप्यसंख्यभूपेषु शांतनुः पार्थिवोऽभवत् ॥ २६६ ॥
गंगा सत्यवती चेति तस्याभूतामुभे प्रिये । गंगायामभवत्पुत्रो भीष्मो भीष्मपराक्रमः ॥ २६७ ॥
चित्रांगदचित्रवीर्यौ सत्यवत्याः सुतावुभौ। अंबिकांबालिकांबेति चित्रवीर्यस्य तु प्रियाः ॥ २६८ ॥
तासां धृतराष्ट्रपांडुविदुरास्तनयाः क्रमात् । धृतराष्ट्रे न्यस्तराज्येऽभूत् पांडुर्मृगयापरः ॥ २६९ ॥



कुरुवंशो–
त्पत्तिः ।

धृतराष्ट्रः पर्यणैषीदष्टौ सुबलजन्मनः । गंधारराजशकुनेर्[1]गांधार्याद्याः सहोदराः ॥ २७० ॥
दुर्योधनादयस्तासु शतं संजज्ञिरे सुताः । पांडोर्युधिष्ठिरभीमार्जुनाः कुंत्यास्तु नंदनाः ॥ २७१ ॥
पांडोः पत्न्यां द्वितीयायां शल्यस्वसरि नंदनौ । मद्र्यामभूतां नकुलसहदेवौ महाभुजौ ॥ २७२ ॥
ते पांडुपुत्राः पंचापि शूराः पंचानना इव । खेचराणामप्यजय्या विद्याभुजबलोर्जिताः ॥ २७३ ॥
अनुज्येष्ठं विनीतास्ते दुर्नीतिमसहिष्णवः । अचित्रीयंत पंचापि लोके लोकोत्तरैर्गुणैः ॥ २७४ ॥

द्रौपदी-
स्वयंवरः ।

अन्येद्युः कांपील्यपुराद्द्रुपदस्य महीपतेः । आगत्य दूतो नत्वा च पांडुराजमदोऽवदत् ॥ २७५ ॥
सुता द्रुपदराजस्य धृष्टद्युम्नस्य चानुजा । चुलनीकुक्षिजातास्ति द्रौपदी नाम कन्यका ॥ २७६ ॥
तस्याः स्वयंवरे सर्वे दशार्हाः सीरिशार्ङ्गिणौ । दमदंतशिशुपालौ रुक्मी कर्णः सुयोधनः ॥ २७७ ॥
अपरेऽपि हि राजानः कुमाराश्च महौजसः । राजाहूताः प्रेष्य दूतान् गच्छन्तः संति संप्रति ॥ २७८ ॥
॥ युग्मम् ॥
एभिर्देवकुमाराभैः कुमारैः पंचभिः सह । तत्रागत्यालंकुरुष्व तं स्वयंवरमंडपम् ॥ २७९ ॥
तैः सुतैः पंचभिर्जैत्रैर्[2]युक्तो बाणैरिव स्मरः । पांडुस्तदागात् कांपील्यं राजानोऽन्येऽपि चाययुः ॥ २८० ॥
द्रुपदेनार्चितास्तत्र प्रत्येकमपि पार्थिवाः । स्वयंवरसदोऽध्यस्थुरन्तरिक्षमिव ग्रहाः ॥ २८१ ॥



१ शकुनिर्गंधारराजस्याभिधानम् । २ जयनशीलैः ।

अथ स्नाता शुचिवेषा माल्यालंकारधारिणी । द्रौपद्यर्हंतमर्चित्वा सखीभिः परिवारिता ॥ २८२ ॥
रुपेणामरकन्याभागात्स्वयंवरमंडपम् । सामानिकैरिव सुरैः कृष्णादिभिरलंकृतम् ॥ २८३ ॥
तत्र सख्या नामग्राहं दर्श्यमानेषु राजसु । पश्यंती द्रुपदसुता प्रययौ यत्र पांडवाः ॥ २८४ ॥
सा सानुरागा चिक्षेप स्वयंवरणमालिकाम् । पंचानामपि कंठेषु युगपत्पांडुजन्मनाम् ॥ २८५ ॥
किमेतदिति साश्चर्यं तत्राभूद्राजमंडलम् । यावत्तावच्चारणर्षिस्तत्र कश्चित् समाययौ ॥ २८६ ॥
द्रौपद्याः पंच भर्तारः किं नु स्युरिति राजभिः । कृष्णादिभिः सोऽ[1]नुयुक्तः समाचख्याविदं मुनिः ॥ २८७ ॥
इयं हि पंचपतिका प्राग्भवार्जितकर्मणा । भविष्यति किमाश्चर्यं कर्मणां विषमा गतिः ॥ २८८ ॥

द्रौपदी-पूर्वभवः ।

तथा ह्यत्रैव चंपायां पुरि विप्रास्त्रयोऽभवन् । सोमदेवः सोमभूतिः सोमदत्तश्च सोदराः ॥ २८९ ॥
तेषां धान्यधनाढ्यानामासन् पत्न्यः क्रमादिमाः । नागश्रीरथ भूतश्रीर्यक्षश्रीश्चेति नामतः ॥ २९० ॥
मिथः स्निग्धाश्च तेऽन्येद्युर्व्यवस्थामिति चक्रिरे । वारवारेण भोक्तव्यं सर्वैरेकैकवेश्मनि ॥ २९१ ॥
तथैव कुर्वतां तेषां सोमदेवगृहेऽन्यदा । भोजनावसरे प्राप्ते नागश्रीः [2]प्रगुणं व्यधात् ॥ २९२ ॥
तया विविधभोज्यानि पचंत्या विविधं तदा । अजानत्या [3]कटूवलाबु विपच्य व्यंजनीकृतम् ॥ २९३ ॥
एतत्कीदृग्जातमिति ज्ञातुमास्वादितं तया । अभोज्यमिति चाज्ञायि थूत्कृतं च तदैव हि ॥ २९४ ॥



---

१ पृष्टः । २ प्रगुणं बहुप्रकारेण सज्जम् । ३ कटु च तत् अलाबु तुंबिकाफलम् ।

संस्कृतं स्वादुभिर्द्रव्यैरप्येतद्विविधैर्मया । कट्वेवेति विमृशंती विषण्णा तदगोपयत् ॥ २९५ ॥
तद्वर्जमपरैर्भोज्यैर्भोजयामास सा तदा । सकुटुंबानपि पतिदेवरान् गृहमागतान् ॥ २९६ ॥
तदा सुभूमिभागाख्य उद्याने समवासरत् । श्रीधर्मघोष आचार्यो ज्ञानवान् सपरिच्छदः ॥ २९७ ॥
शिष्यो धर्मरुचिस्तस्य मासक्षपणपारणे । सोमदेवादिषु गतेष्वागान्नागश्रियो गृहे ॥ २९८ ॥
एषोऽपि तोषितोऽनेन भवत्विति विमृश्य सा । अलाबूव्यंजनं तस्मै नागश्रीर्मुनये ददौ ॥ २९९ ॥
सोऽप्यपूर्वं मया द्रव्यं लब्धमित्यभिचिंतयन् । गत्वा दर्शयितुं पात्रं गुरुहस्ते समार्पयत् ॥ ३०० ॥
गुरुस्तद्गंधमाघ्रायोवाचेदं भोक्ष्यसे यदि । तदा विपत्स्यसे वत्स तत्परिष्ठापयाश्विदम् ॥ ३०१ ॥
सम्यग्ज्ञात्वापरं पिंडं गृहीत्वा पारयेरिति । तेनोक्तः स बहिर्गत्वा शुद्धं स्थंडिलमासदत् ॥ ३०२ ॥
तत्र पात्रात्तुंबरसबिंदुरेकोऽपतत् स्वयम् । म्रियमाणा अपश्यच्च तत्र लग्नाः पिपीलिकाः ॥ ३०३ ॥
दध्यौ च बिंदुनाप्यस्य म्रियंतेऽनेकजंतवः । स्यात्परिष्ठापितेऽस्मिंस्तु कियतां प्राणिनां मृतिः ॥ ३०४ ॥
वरमेको विपन्नोऽहं न पुनः प्राणिराशयः । निश्चित्येति स तं तुंबं स्वयमादत् समाहितः ॥ ३०५ ॥
विधायाराधनां सम्यक् स समाधिपरायणः । मृत्वा सर्वार्थसिद्धेऽभूदहमिंद्रः सुरोत्तमः ॥ ३०६ ॥
इतश्च ते धर्मघोषाचार्यो धर्मरुचेः कुतः । विलंबोऽभूतिति ज्ञातुमादिक्षन्नरान्मुनीन् ॥ ३०७ ॥
तैर्बहिः स मृतो दृष्टस्तद्रजोहरणादि च । आदायाख्यायि गत्वा च गुरवे गुरुखेदिभिः ॥ ३०८ ॥



द्रौपदी-
पूर्वभवः ।

ततः साऽतिशयज्ञानोपयोगेन गुरुर्जगौ । नागश्रिया दुश्चरितं श्रमणानामशेषतः ॥ ३०९ ॥
ततः सकोपा व्रतिनो व्रतिन्यश्चैत्य तत्र ते । सोमदेवप्रभृतीनां लोकानामाचचक्षिरे ॥ ३१० ॥
सोमाद्यैः सापि नागश्रीर्विप्रैर्निष्कासिता गृहात् । निर्भर्त्स्यमाना लोकैश्च दुःखं पर्याट सर्वतः ॥ ३११ ॥
कासश्वासज्वरकुष्टादिभी रोगैः सुदारुणैः । क्रांता षोडशभिः सापन्नारकत्वमिहापि हि ॥ ३१२ ॥
क्षुधिता तृषिता जीर्णखंडवासा निराश्रया । पर्यटंती क्रमान्मृत्वा सा षष्ठं नरकं ययौ ॥ ३१३ ॥
उद्धृत्य नरकान्म्लेच्छेऽप्यजायत विपद्य च । सप्तमं नरकं प्राप तदुद्धृता झषेष्वभूत्[1] ॥ ३१४ ॥
सप्तमं नरकं भूयो गत्वा म्लेच्छेष्वजायत । एवं द्विर्द्विर्ययौ पापा सर्वेषु नरकेषु सा ॥ ३१५ ॥

द्रौपदी-
पूर्वभवः ।

ततश्च पृथ्वीकायादिषूत्पद्यानेकशश्च सा । अकामनिर्जरायोगाद्दुःकर्माशातयद्बहु ॥ ३१६ ॥
ततश्चात्रैव चंपायां नाम्नाभूत्सुकुमारिका । श्रेष्ठिसागरदत्तस्य सुभद्राकुक्षिजा सुता ॥ ३१७ ॥
तत्रैवासीज्जिनदत्तः सार्थवाहो धनाधिपः । भद्रा च गेहिनी तस्य सागरो नाम तत्सुतः ॥ ३१८ ॥
[2]उपसागरदत्तौको जिनदत्तोऽन्यदा व्रजन् । उद्यौवनामपश्यत्तां कुमारीं सुकुमारिकाम् ॥ ३१९ ॥
अधिसौधं कंदुकेन रममाणामुदीक्ष्य ताम् । योग्येयं मत्सुतस्येति स ध्यायन् स्वगृहं ययौ ॥ ३२० ॥
ततः सबंधुरभ्येत्य जिनदत्तः स्वसूनवे । ययाचे सागरदत्तात्कुमारीं सुकुमारिकाम् ॥ ३२१ ॥



१ मत्स्येषु । २ सागरदत्तगृहस्य समीपे ।

ऊचे सागरदत्तोऽपि सुता प्राणप्रिया मम । न स्थातुमहमीशोऽस्मि मनागप्यनया विना ॥ ३२२ ॥
मम चेद्गृहजामाता त्वत्सुतः सागरो भवेत् । तदा स्वपुत्रीं यच्छामि तस्मै सह धनादिभिः ॥ ३२३ ॥
आलोचयिष्यामीत्युक्त्वा[1] जिनदत्तो गृहं ययौ । सागरस्य समाख्याच्च मौनेनास्थाच्च सागरः ॥ ३२४ ॥
अनिषिद्धं ह्यनुमतमिति न्यायेन तत्पिता । मेने सागरदत्ताय गृहजामातरं सुतम् ॥ ३२५ ॥
तया कुमार्या ताभ्यां तु सागरः परिणायितः । तया समं वासगृहे गत्वा तल्पं च शिश्रिये ॥ ३२६ ॥
पूर्वकर्मवशात्तस्याः स्पर्शेनांगारवद्भृशम् । दह्यमानः क्षणं तस्थौ कथंचित्तत्र सागरः ॥ ३२७ ॥
निद्रायमाणां तां मुक्त्वा नंष्टवा स स्वगृहं ययौ । अपश्यंती पतिं सापि निद्राच्छेदेऽरुदद्भृशम् ॥ ३२८ ॥
वधूवरस्य दशनशौचहेतोः सुभद्रया । चेट्यादिष्टा प्रगेऽद्राक्षीद्रुदंतीं तां धवोज्झिताम् ॥ ३२९ ॥
सा गत्वाख्यत्सुभद्रायै सुभद्रा श्रेष्ठिने पुनः । श्रेष्ठी तु जिनदत्तायोपालंभं प्रददौ स्वयम् ॥ ३३० ॥
आहूय जिनदत्तोऽपि रहः स्वसुतमब्रवीत् । त्वया न युक्तं विदधे त्यजता सज्जनात्मजाम् ॥ ३३१ ॥
इदानीमपि तद्गच्छ वत्सोपसुकुमारिकाम् । प्रतिपन्नं मया हीदृक् सज्जानानां पुरस्तदा ॥ ३३२ ॥
व्याहरत्सागरोऽप्येवं वरमग्नौ विशाम्यहम् । यास्यामि न पुनस्तात जातूपसुकुमारिकाम्[2] ॥ ३३३ ॥
एतत्सागरदत्तोऽपि तत्कुड्यांतरितोऽशृणोत् । निराशश्च ययौ गेहमूचे च सुकुमारिकाम् ॥ ३३४ ॥

द्रौपदी-
पूर्वभवः ।

१ विचारयिष्यामि । २ सुकुमारिकासमीपम् ।

द्रौपदी–
पूर्वभवः ।

विरक्तः सागरस्ते हि तत्तुभ्यमपरं पतिम् । अन्विष्याहं करिष्यामि पुत्रि मा खेदमुद्वह ॥ ३३५ ॥
सोऽथान्येद्युर्गवाक्षस्थोऽपश्यत् कर्परधारिणम् । जीर्णखंडांबरं भिक्षायाचकं मक्षिकावृतम् ॥ ३३६ ॥
आहूय श्रेष्ठिना सोऽपि त्याजितः कर्परादिकम् । स्नपयित्वा भोजितश्च चर्चितश्चंदनेन च ॥ ३३७ ॥
ऊचे च तं मया दत्ता पुत्रीयं सुकुमारिका । भोजनादिषु निश्चिंतः सुखं तिष्ठ सहानया ॥ ३३८ ॥
इत्युक्तः प्रययौ वासगृहं सह तयाथ सः । सुप्तश्च तद्वपुःस्पर्शादग्निस्पृष्ट इवाभवत् ॥ ३३९ ॥
उत्थाय च निजं वेषमादाय स पलायितः । विषण्णा सा तथैवास्थाद् दृष्ट्वा पित्रेत्यभाष्यत ॥ ३४० ॥
वत्से प्राक्कर्मणामेष उदयोऽह्यत्र कारणम् । संतुष्टा तिष्ठ तद्दानं ददती मम वेश्मनि ॥ ३४१ ॥
तथैव सा ददौ दानं शान्ता धर्मरता सती । कदाचिदागुस्तद्वेश्मन्यार्या गोपालिका इति ॥ ३४२ ॥
सा प्रत्यलाभयत्ताश्च शुद्धैः पानाशनादिभिः । तत्पार्श्वे धर्ममाकर्ण्य प्रबुद्धा व्रतमाददे ॥ ३४३ ॥
तुर्यषष्ठाष्टमादिनी सा तपांसि प्रकुर्वती । गोपालिकाभिरार्याभिः सह व्यहरतान्वहम् ॥ ३४४ ॥
आर्यास्ताः सा कदाप्यूचे पश्यंती रविमंडलम् । सुभूमिभागोद्यानस्थातापनां विदधाम्यहम् ॥ ३४५ ॥
ता अप्यूचुः स्ववसतेर्बहिर्न खलु कल्पते । आतापना व्रतिनीनामाम्नातमिदमागमे ॥ ३४६ ॥
तदश्रुत्वेव सुभूमिभागोद्यानेऽभ्युपेत्य सा । आतापनामुपाक्रंस्त सूर्ये निहितलोचना ॥ ३४७ ॥
अथैककामुकेनांके स्थापितापरेण तु । धृतातपत्रामन्येन वीज्यमानां सुखानिलम् ॥ ३४८ ॥

बध्यमानकचामेकेनान्येनांके धृतांघ्रिकाम् । गणिकां देवदत्ताख्यां तत्रायातां ददर्श सा ॥ ३४९ ॥
॥ युग्मम् ॥

सा त्वसंपूर्णभोगेच्छा निदानमकरोदिदम् । एषेव पंचपतिका भूयासं तपसामुना ॥ ३५० ॥
स्वांशौचपरा चासीदभ्युक्षंती पदे पदे । आर्याभिर्वार्यमाणा च चेतस्येवमचिंतयत् ॥ ३५१ ॥
आर्यिकाणां गौरविता पुराभूवं गृहे स्थिता । भिक्षाचरीमिदानीं मां तर्जयंति यथा तथा ॥ ३५२ ॥
किममूभिरिति ध्यात्वा विभिन्नेऽस्थात्प्रतिश्रये । एकाकिनी स्वैरिणी सा चिरं व्रतमपालयत् ॥ ३५३ ॥
संलेखनामष्टमासान् कृत्वानालोच्य सा मृता । नवपल्योपमायुष्का सौधर्मे देव्यजायत ॥ ३५४ ॥
च्युत्वा चाभूद्द्रौपदीयं निदानात्प्राक्तनादमी । अमुष्याः पतयः पंच संजाताः कोऽत्र विस्मयः ॥ ३५५ ॥
इत्युक्ते मुनिना व्योम्नि साधु साध्विति गीरभूत् । साध्वमी पतयोऽभूवन्निति कृष्णादयो जगुः ॥ ३५६ ॥
तैरेव राजस्वजनैः स्वयंवरसमागतैः । कृतोत्सवं पर्यणैषुर्द्रौपदीमथ पांडवाः ॥ ३५७ ॥
ततः पांडुर्दशार्हांस्तान् कृष्णमन्यांश्च भूभुजः । विवाहार्थमिहानीतान् गौरवात् स्वपुरेऽनयत् ॥ ३५८ ॥
अर्चित्वा सुचिरं तत्र दशार्हान् सीरिशार्ङ्गिणौ । आपृच्छमानान् व्यसृजद्भूपानन्यांश्च पांडुराट् ॥ ३५९ ॥
पांडुर्युधिष्ठिरायाथ दत्वा राज्यं व्यपद्यत । अन्वियाय च तं मद्री कुंत्यै दत्वा सुतद्वयम् ॥ ३६० ॥
ततश्चास्तंगते पांडौ पांडवांस्तान् समत्सराः । न मेनिरे धार्तराष्ट्रा राष्ट्रलुब्धा दुराशयाः ॥ ३६१ ॥



द्रौपदी–
पूर्वभवः ।

पाण्डवानां
वनवासो
द्वारिका–
गमनं च ।

दुर्योधनेन तद्वृद्धास्तोषिता विनयादिना । जिताश्च पांडवा द्यूते राज्यं तर्षात्[1] पणीकृतम् ॥ २६२ ॥
पणीकृतां द्रौपदीं च जित्वा दुर्योधनोऽग्रहीत् । क्रोधरक्तेक्षणाद्भीमादि्बभ्यत्तां पुनरार्पयत् ॥ २६३ ॥
कृत्वावमाननां ते च धार्तराष्ट्रैः स्वराष्ट्रतः । निर्वासिताः पांडुसुता वनवासमशिश्रियन् ॥ ३६४ ॥
वनाद्वनं चिरं भ्रांत्वा दशार्हानुजया तया । कुंत्या द्वारवतीं नीतास्ते पंचापि हि पांडवाः ॥ ३६५ ॥
दिव्यास्त्रयोधिनः सर्वे विद्याभुजबलोर्जिताः । ययुः समुद्रविजयस्यौकः प्रथमतोऽपि ते ॥ ३६६ ॥
समुद्रविजयस्तत्राक्षोभ्याद्या भ्रातरश्च ते । भगिनीं भागिनेयांश्च स्नेहादानर्चुरंजसा ॥ ३६७ ॥
ऊचुर्दशार्हास्तां तेभ्यो दायादेभ्यः[2] समागता । दिष्ट्या दृष्टासि जीवंती सापत्यापि हि हे स्वसः ॥ ३६८ ॥
कुंत्यप्यूचे सपुत्रापि जीविताहं तदैव हि । मया यदैव जीवंतः श्रुता यूयं ससूनवः ॥ ३६९ ॥
लोकोत्तरं चरित्रं च वत्सयो रामकृष्णयोः । श्रृण्वती मुदितात्रागां[3] तद्दर्शनसमुत्सुका ॥ ३७० ॥
सानुज्ञाता भ्रातृभिस्तैः सपुत्रागात्सभां हरेः । तामभ्युत्तस्थतू रामकृष्णौ भक्त्या च नेमतुः ॥ ३७१ ॥
रामकृष्णौ पांडवाश्च यथापूर्वं परस्परम् । कृताश्लेषनमस्कारा यथोचितमुपाविशन् ॥ ३७२ ॥
ऊचे कृष्णः साधु यूयमिहायाताः स्ववेश्मनि । युष्माकं च यदूनां च लक्ष्मीः साधारणी खलु ॥ ३७३ ॥
ऊचे युधिष्ठिरस्तेषां सदा दास्यः श्रियो हरे । येषामभिमतोऽसि त्वं किं पुनर्ये मतास्तव ॥ ३७४ ॥

१ लोभात् । २ कौरवेभ्यः । ३ त्राऽऽगां ।

अस्मन्मातृकुलमिदं त्वयालंकुर्वता हरे । वर्तामहे विश्वतोऽपि विशेषेण महौजसः ॥ ३७५ ॥
सत्कृत्य विविधालापैः कुंतीकुंतीसुतानपि । कृष्णो नियोजयामास प्रासादेषु पृथक् पृथक् ॥ ३७६ ॥
लक्ष्मीवतीं वेगवतीं सुभद्रां विजयां रतिम् । ददुः क्रमात् पांडवेभ्यो दशार्हा निजकन्यकाः ॥ ३७७ ॥
यदुभिः पूज्यमानास्ते कृष्णेन च बलेन च । युधिष्ठिराद्याः पंचापि सुखं तत्रावतस्थिरे ॥ ३७८ ॥
इतश्चाधिगतकलाकलापं प्राप्तयौवनम् । प्रद्युम्नं प्रेक्ष्य कनकमालाभून्मदनातुरा ॥ ३७९ ॥
दध्यौ च सा न हीदृक्षः खेचरेष्वस्ति कश्चन । मन्ये देवोऽपि नेदृक्षः का कथा भूमिचारिषु ॥ ३८० ॥
तत्स्वयंवर्धितस्यास्य तरोरिव फलं ह्यदः । स्वयंभोगोऽन्यथा नूनं जन्मापि हि मुधा मम ॥ ३८१ ॥
विमृश्यैवं सा जगाद प्रद्युम्नं कलया[1] गिरा । इहैवास्त्युत्तरश्रेण्यां नाम्ना नलपुरं पुरम् ॥ ३८२ ॥

प्रद्युम्नेन विद्या– प्राप्तिः ।

गौरीवंशोद्भवस्तत्र निषधो नाम भूपतिः । तस्याहं राजसिंहस्य पुत्री पुत्रस्तु नैषधिः ॥ ३८३ ॥
गौरी नाम महाविद्या दत्ता पित्रा मम स्वयम् । दत्वा प्रज्ञप्तिविद्यां च मामुपायत संवरः ॥ ३८४ ॥
संवरो मयि रक्तस्तु नान्यां युवतिमिच्छति । सिद्धविद्याद्वयाया मे बलात्तस्य तृणं जगत् ॥ ३८५ ॥
एवंविधानुसरक्ताहं त्वां वृणोमि भजस्व माम् । मा स्म प्रणयभंगं मे कार्षीरज्ञानतोऽपि हि ॥ ३८६ ॥
प्रद्युम्नोऽप्यब्रवीच्छांतं पापं किंचिद्ब्रवीष्यदः । माता त्वमसि पुत्रोऽहं पापायेदं द्वयोरपि ॥ ३८७ ॥



१ मधुरया ।

साप्यूचे नासि मे जातः किं तु त्वां प्राप संवरः । अग्निज्वालपुरादायन्मार्गे केनचिदुज्झितम् ॥ ३८८ ॥
ममार्पितो वर्धनाय त्वं कस्यापि हि नंदनः । निःशंकं भुंक्ष्व तद्भोगान्मया सह यदृच्छया ॥ ३८९ ॥
स्त्रीग्रहे पतितोऽस्मीति चिंतयन् सोऽब्रवीत्ततः । संवरात्त्वत्सुतेभ्यश्च लप्स्येऽहं जीवितं कथम् ॥ ३९० ॥
सोचे सुभग मा भैषीर्महाविद्ये उभे अपि । गृहाण गौरीप्रज्ञप्त्यौ भवाजय्यो जगत्यपि ॥ ३९१ ॥
न ह्यकृत्यं करिष्यामीत्यंतर्निश्चित्य कृष्णसूः । ऊचे प्रयच्छ मे विद्ये करिष्ये त्वद्वचस्ततः ॥ ३९२ ॥
प्रज्ञप्तिगौर्यौ सादत्त महाविद्ये स्मरातुरा । असाधयच्च प्रद्युम्नः पुण्योदयवशाद्द्रुतम् ॥ ३९३ ॥
तया चाभ्यर्थितो रंतुं व्याहार्षीत्कृष्णनंदनः । मम संवर्धनात्पूर्वं केवलैव जनन्यभूः ॥ ३९४ ॥
आचार्या तु भवस्यद्य विद्यादानेन मेऽनघे । न वाच्यस्तत्त्वया किंचिदत्राहं पापकर्मणि ॥ ३९५ ॥
तामेवमुक्त्वा मुक्त्वा च प्रद्युम्नोऽथ पुराद्बहिः । गत्वा कालांबुकावापीतटे चास्थित दुर्मनाः ॥ ३९६ ॥
नखैः कनकमाला स्वं दीर्त्वा कलकलं व्यधात् । किमेतदिति पृच्छंतस्तत्पुत्राश्च समाययुः ॥ ३९७ ॥
युष्मत्पितुः पुत्रकेणोद्यौवनेन दुरात्मना । स्वैरं विदारितास्म्येषा मार्जारेणेव पिंडदा ॥ ३९८ ॥
ततस्ते कुपिताः सर्वे गत्वा कालांबुकातटे । पाप पापेति जल्पंतः प्रद्युम्ने प्राहरन् द्रुतम् ॥ ३९९ ॥
विद्याद्वयोर्जितद्युम्नः[१] प्रद्युम्नो लीलयापि तान् । जघान संवरसुतान् शंबरा[२]निव केसरी ॥ ४०० ॥

प्रद्युम्नेन विद्या–प्राप्तिः ।



१ द्युम्नं बलम् । २ शंबरो मृगविशेषः ।

संवरोऽपि सुतवधात्क्रुद्धस्तं हंतुमागतः । विद्याजनितमायाभिः प्रद्युम्नेन जितश्च सः ॥ ४०१ ॥
प्रद्युम्नः सानुतापोऽथ संवराय यथातथम् । मूलादारभ्य कनकमालोदंतं शशंस तम् ॥ ४०२ ॥
तेनापि सानुतापेन प्रद्युम्नः परिपूजितः । तदा च नारद ऋषिः प्रद्युम्नांतिकमाययौ ॥ ४०३ ॥
प्रज्ञत्या ज्ञापितं तं च प्रद्युम्नः पर्यपूजयत् । अज्ञापयच्च कनकमालावृत्तांतमादितः ॥ ४०४ ॥
अथ प्रद्युम्नरुक्मिण्योः सीमंधरजिनोदितम् । सर्ववृत्तान्तमाख्याय निजगादेति नारदः ॥ ४०५ ॥
आदौ पुत्रस्य वीवाहे केशदानपणः पुरा । सपत्न्या भामया सार्धमस्ति त्वन्मातुरुद्यतः[1] ॥ ४०६ ॥
भामाया भानुकः सूनुः सांप्रतं परिणेष्यते । त्वन्मात्रा तत्र दातव्याः स्वकेशाः पणहारिताः ॥ ४०७ ॥
केशदानविप्लवेन त्वद्वियोगरुजा च सा । सत्यपि त्वयि तनये मरिष्यत्येव रुक्मिणी ॥ ४०८ ॥

प्रद्युम्नस्य द्वारिका-गमनम् ।

सनारदोऽपि प्रद्युम्नस्ततः प्रज्ञप्तिनिर्मितम् । विमानमारुह्य ययावाश्वेव द्वारकापुरीम् ॥ ४०९ ॥
आख्यच्च नारदः सेयं त्वत्पितुर्द्वारकापुरी । यां विधाय स्वयं रत्नैर्धनदोऽपूरयद्धनैः ॥ ४१० ॥
प्रद्युम्नोऽप्यभ्यधात्तिष्ठेर्विमाने त्वमिहैव हि । द्वारकायां चमत्कारं यावत् किंचित् करोम्यहम् ॥ ४११ ॥
आमेति नारदेनोक्ते तत्रस्थां कृष्णनंदनः । सत्यभामासूतोद्वाहजन्ययात्रामुदैक्षत ॥ ४१२ ॥
हृत्वा कन्यां तदुद्वाह्याममुंचन्नारदांतिके । मा भैषीः कृष्णपुत्रोऽसावित्यूचे नारदोऽपि ताम् ॥ ४१३ ॥



---

१ निश्चितः ।

प्रद्युम्नस्य द्वारिका-गमनम्, मायासाधू-भूय मातृ-वञ्चनं च ।

कपिभृत्पुरुषो भूत्वा प्रद्युम्नो वनपालकान् । ऊचे फलादि ददतां क्षुधितस्यास्य मत्कपेः ॥ ४१४ ॥
अयं भानुकविवाहायारामो रक्ष्यते खलु । न किंचित्तत्त्वया वाच्यमित्युचुर्वनपालकाः ॥ ४१५ ॥
प्रलोभ्य भूरिभिर्द्युम्नैस्तान्[1] प्रद्युम्नः प्रविश्य च । कपिनाकारयत्तेनोद्यानं रिक्तं फलादिभिः ॥ ४१६ ॥
जात्यवाजिवणिग्भूत्वा ततः सोऽगात्तृणापणे । तत्रापणिभ्योऽयाचिष्ट तृण्यां[2] स्वहयहेतवे ॥ ४१७ ॥
तथैवाददतस्तांस्तु प्रलोभ्य द्रविणेन सः । चकार सर्वमतृणं प्रद्युम्नो निजविद्यया ॥ ४१८ ॥
तथैव स्वादु सलिलस्थानान्यसलिलानि सः । पीत्वा चकार वाह्याल्यां वाहं चावाहयत् स्वयम् ॥ ४१९ ॥
दृष्टश्च भानुकेनाश्वः पृष्टः कस्यैष इत्यथ । प्रद्युम्नोऽपि ममैषोऽश्व इत्याचख्यौ कुतूहली ॥ ४२० ॥
भानुकः सादरोऽवोचत्प्रयच्छामुं तुरंगमम् । यत्त्वं याचिष्यसे मूल्यं तत्ते दास्यामि बह्वपि ॥ ४२१ ॥
प्रद्युम्नस्तमभाषिष्ट परीक्ष्यादत्स्व वाजिनम् । राजापराधोऽपरथाऽनागसोऽपि भवेन्मम ॥ ४२२ ॥
परीक्षितुमथारोहद्भानुकस्तस्य वाजिनम् । वीजं[3] नाट्यता तेन पातितः स महीतले ॥ ४२३ ॥
स एडकम्[4]थारुढो हस्यमानः पुरीजनैः । वसुदेवसदस्यागात् पार्षद्यानपि हासयन् ॥ ४२४ ॥
प्रद्युम्नोऽपि द्विजीभूय पठन् वेदं कलस्वरम् । प्राविशद्द्वारिकां भ्राम्यन् सर्वत्रापि त्रिकादिषु ॥ ४२५ ॥
भामादासीमपश्यच्च कुब्जिकां तां च विद्यया । सरलांगीं चकाराशु पथि वेत्रलतामिव ॥ ४२६ ॥

१ द्रव्यैः । २ तृणसमूहम् । ३ वेगम् । ४ महाजम् ।

पतित्वा पादयोः सोचे क्व यूयं चलिता ननु । प्रद्युम्नोऽप्यब्रवीद्यत्र लप्स्ये भोजनमिच्छया ॥ ४२७ ॥
सोचे तर्ह्येहि दास्यामि भामादेव्या निकेतने । सज्जितं सुतविवाहे मोदकादि यथारुचि ॥ ४२८ ॥
जगाम धाम भामाया प्रद्युम्नोऽपि तया सह । तोरणद्वारि तं मुक्त्वा दासी भामांतिकं ययौ ॥ ४२९ ॥
कासीति भामया पृष्ट्या दास्यूचे सास्मि कुब्जिका । भूयोऽपि भामाभाषिष्ट केनासि सरलीकृता ॥ ४३० ॥
दास्याख्यद्ब्राह्मणोदंतं भामोचे क्वास्ति स द्विजः । साप्यूचे तोरणद्वारे मया मुक्तोऽस्ति संप्रति ॥ ४३१ ॥
तमानय महात्मानमित्यादिष्टा च भामया । तं वेगादानयत्तत्र सा दासी कपटद्विजम् ॥ ४३२ ॥
स दत्त्वाशिषमासीनो जगदे सत्यभामया । ब्रह्मन् सपत्न्या रुक्मिण्या मां रुपेणाधिकां कुरु ॥ ४३३ ॥
मायाविप्रोऽप्युवाचैवं सुरुपा त्वं हि दृश्यसे । ईदृग्नापरनारीणां रुपं पश्यामि कुत्रचित् ॥ ४३४ ॥
बभाषे सत्यभामापि भद्र जल्पसि साध्विदम् । तथापि रुपेऽनुपमां विशेषेण कुरष्व माम् ॥ ४३५ ॥
सोऽप्यभाषत यद्येवं विरुपा भव सर्वतः । भवेद्रूपविशेषो हि वैरुप्ये सति मूलतः ॥ ४३६ ॥
किं करोमीति तत्पृष्ट उपादिशदिति द्विजः । शिरो मुंड्य मष्या च लिंप देहमशेषतः ॥ ४३७ ॥
जीर्णखंडस्यूतवासा भूत्वा भव ममाग्रतः । यथा लावण्यसौभाग्यश्रियमारोपयामि ते ॥ ४३८ ॥
सा तदप्यर्थिनी चक्रे विप्रोऽप्येवमवोचत । बुभुक्षया पीडितोऽहमस्वस्थः किं करोमि तत् ॥ ४३९ ॥
भामापि तं भोजयितुं सूपकारान् समादिशत् । विप्रोऽप्येवमुपादिक्षद्भामायाः श्रवणांतिके ॥ ४४० ॥



प्रद्युम्नस्य
मायासाधू–
भूय मातृ–
वञ्चनम् ।

रुडुबुडुरुडुबुडु इति मंत्रस्त्वयानघे । पुरतः कुलदेवीनां जप्यो मद्भोजनावधि ॥ ४४१ ॥
सा तथा कुर्वती तस्थौ भुंजानो द्विजकश्च सः । सर्वं रसवतीसारं विद्याशक्त्या समापयत् ॥ ४४२ ॥
भामातो बिभ्यतीभिः स पयःकरकपाणिभिः । कथंचित्सूपकारीभिः समुत्तिष्ठेत्यभाष्यत ॥ ४४३ ॥
अहमद्यापि नो तृप्तस्तृप्तिर्यत्र भविष्यति । तत्र यास्यामीति वदन् स मायाब्राह्मणो ययौ ॥ ४४४ ॥
बालसाधुवपुर्भूत्वा ततोऽगाद्रुक्मिणीगृहे । रुक्मिण्या ददृशे दूरात्स नेत्रानंदचंद्रमाः ॥ ४४५ ॥
तस्याशनार्थं वेश्मांतः प्रविवेश च रुक्मिणी । कृष्णसिंहासने सोऽपि पूर्वन्यस्त उपाविशत् ॥ ४४६ ॥
आत्ताशना निर्गता च तथासीनमुदीक्ष्य तम् । बभाषे रुक्मिणी देवी विस्मयस्मेरलोचना ॥ ४४७ ॥
कृष्णं वा कृष्णजातं वा विना सिंहासनेऽत्र हि । अन्यं पुमांसमासीनं सहंते नहि देवताः ॥ ४४८ ॥
स मायासाधुरप्युचे प्रभावात्तपसो मम । न किंचिद्देवताः कर्तुमलंकर्मीण[1]विक्रमाः ॥ ४४९ ॥
आगात्तर्हि कुतो हेतोरिति पृष्टस्तयाथ सः । ऊचे तपो निराहारं षोडशाब्दीं मया कृतम् ॥ ४५० ॥
मातुः स्तन्यमपि मया न पीतं जन्मतोऽपि हि । तत्पारणार्थमत्रागां देहि किंचिद्यथोचितम् ॥ ४५१ ॥
रुक्मिण्युवाच न क्वापि षोडशाब्दं तपः श्रुतम् । श्रुतं चतुर्थादारभ्य वत्सरावधिकं मुने ॥ ४५२ ॥
सोऽप्यूचे किं तवानेन [2]यद्यस्ति यदि दित्ससि । तद्देहि नो चेद्यास्यामि सत्यभामानिकेतनम् ॥ ४५३ ॥

प्रद्युम्नस्य मायासाधूभूय मातृवञ्चनम् ।



---

१ अलं कर्म कर्तुमित्यलंकर्मीणः खप्रत्ययः । २ यदि किंचिदस्ति तथा च यदि दातुमिच्छसि तदा देहीत्यन्वयः ।

साप्यवोचन्नाद्य किंचिदुद्वेगात् पाचितं मया । सोऽपि पप्रच्छ किं नाम तवोद्वेगस्य कारणम् ॥ ४५४ ॥
उवाच सापि तनयवियोगे कुलदेवताः । आराधयमियत्कालमहं तत्संगमाशया ॥ ४५५ ॥
इदानीं कुलदेवीनां दातुकामा शिरोबलिम् । ग्रीवायां प्राहरं यावत्तावद्देवीत्यवोचत ॥ ४५६ ॥
पुत्रि मा साहसं कार्षीः पुष्पिष्यति यदा तव । अकालेऽप्येष कामन्दस्तदा त्वत्सूनुरेष्यति ॥ ४५७ ॥
अयं कुसुमितश्चाद्य न च सूनुः समेति मे । तत्साधो पश्य होरां त्वं कदा मे पुत्रसंगमः ॥ ४५८ ॥
सोऽप्यूचे रिक्तहस्तानां न होरा फलदायिनी । रुक्मिण्यपि प्रत्युवाच ब्रूहि तुभ्यं ददामि किम् ॥ ४५९ ॥
सोऽप्यवादीत्तपःक्षामकुक्षेः पेयां प्रयच्छ मे । उदयुंक्त च पेयार्थं तद्द्रव्यान्वेषणेन सा ॥ ४६० ॥
भूयो बभाषे तां साधुरत्यंतं क्षुधितोऽस्म्यहम् । द्रव्येण येन केनापि पेयां कृत्वा प्रयच्छ मे ॥ ४६१ ॥
प्राक्सिद्धैर्मोदकैः साथ पेयां कर्तुं प्रचक्रमे । तस्य विद्याप्रभावेण ज्वलनः प्राज्वलन्न तु ॥ ४६२ ॥
खिन्नां प्रेक्ष्य स तामुचे पेया निष्पद्यते न चेत् । प्रीणयातिक्षुधितं मां तदेभिरपि मोदकैः ॥ ४६३ ॥
साप्युचे मोदका ह्येते कृष्णस्यान्यैः सुदुर्जराः । नर्षिहत्यां करिष्यामि दत्त्वैतान् भवते मुने ॥ ४६४ ॥
सोऽप्यभाषिष्ट तपसा न मे किमपि दुर्जरम् । सा साशंकं ततस्तस्मायेकैकं मोदकं ददौ ॥ ४६५ ॥
दत्तान् दत्तान् शीघ्रमेव भुंजानं तं तु मोदकान् । सस्मिता विस्मिता सोचे महर्षे ! बलवानसि ॥४६६॥
इतस्तथा जपंतीं तां भामामेत्यावदन्नराः । फलादिरिक्तमारामं चक्रे स्वामिनि कोऽपि ना ॥ ४६७ ॥



प्रद्युम्नस्य मायासाधूभूय मातृवञ्चनम् ।

तृणाट्टान्निस्तृणांश्चक्रे कोऽपि कोऽपि जलाशयान् । निर्जलान् कोऽपि ते भानुमश्वेनोपाद्रवत्सुतम् ॥ ४६८ ॥
श्रुत्वेति भामा पप्रच्छ क्व नु स ब्राह्मणो हला[1]: । तद्दास्योऽपि यथावस्थमाचख्युस्तस्य चेष्टितम् ॥ ४६९ ॥
ततो विषण्णा सामर्षा केशानयनहेतवे । दासीः पटलिकाहस्ताः प्राहिणोद्रुक्मिणीं प्रति ॥ ४७० ॥
ऊचिरे रुक्मिणीं ताश्च केशानर्पय मंक्षु नः । श्रीभामास्वामिनी ह्येवं समादिशति मानिनी ॥ ४७१ ॥
मायासाधुः स तच्छ्रुत्वा तासामेव हि कुंतलैः । भृत्वा पटलिकां भामासमीपं प्रजिघाय ताः ॥ ४७२ ॥
किमेतदिति भामोक्ता दास्य ऊचुर्न वेत्सि किम् । यादृशः स्वामिनि स्वामी परिवारोऽपि तादृशः ॥ ४७३ ॥
भामोद्भामा ततः प्रैषीन्नापितान्रुक्मिणीगृहे । तानेवामुंडयत्साधुः शिरस्त्वक्छेदपूर्वकम् ॥ ४७४ ॥

प्रद्युम्नस्य मायासाधू-भूय मातृ-वञ्चनम् ।

आयातान्नापितान्मुंडान् प्रेक्ष्य भामा क्रुधा हरिम् । गत्वाभाषिष्ट रुक्मिण्यास्त्वं केशप्रतिभूरभूः ॥ ४७५ ॥
केशदानपणः सोऽद्य दाप्यतां मम केशव । उत्थाय स्वयमाहूय मुंडां कारय रुक्मिणीम् ॥ ४७६ ॥
हसित्वा हरिरप्यूचे त्वमेवासीह मुंडिता । साप्यूचे नर्मणाद्यालं तत्केशानद्य दापय ॥ ४७७ ॥
कृष्णेन प्रेषितो रामो रुक्मिण्याः सदने ततः । प्रद्युम्न कृष्णरुपं च विचक्रे तत्र विद्यया ॥ ४७८ ॥
ह्रीणो वलित्वा रामोऽपि पूर्वस्थानं पुनर्ययौ । तत्रापि कृष्णं प्रेक्ष्योचे हास्यं किं प्रस्तुतं त्वया ॥ ४७९ ॥
केशार्थं तत्र मां प्रेष्य स्वयं गत्वेह चागतः । वधूर्वयं च सहसा ह्रेपिता युगपत्त्वया ॥ ४८० ॥



१ सख्या आह्वाने हला ।

तत्र नागामिति हरिश्चोचे शपथपूर्वकम् । माया तवैवेति वदंत्यगाद्भामा निजे गृहे ॥ ४८१ ॥
प्रत्याययितुमारेभे[1] तां विष्णुस्तद्गृहे गतः । रुक्मिण्यै नारदश्चाख्यत् प्रद्युम्नोऽयं सुतस्तव ॥ ४८२ ॥
आविष्कृत्य निजं रुपं प्रद्युम्नो देवसन्निभम् । पपात पादयोर्मातुश्चिरदुःखतमोरविः ॥ ४८३ ॥
रुक्मिणी प्रक्षरत्स्तन्या बाहुभ्यामालिलिंग तम् । चुचुंब च मूर्ध्नि मुहुर्हर्षाश्रुप्लावितेक्षणा ॥ ४८४ ॥
प्रद्युम्नस्तां जगादाथ ज्ञाप्यस्तावन्न खल्वहम् । दर्शयामि पितुर्यावदाश्चर्यं किंचनापि हि ॥ ४८५ ॥
हर्षव्यग्रा रुक्मिणी तु न हि प्रत्युत्तरं ददौ । मायारथे समारोप्य रुक्मिणीं प्रचचाल सः ॥ ४८६ ॥
प्रद्युम्नः पूरयन् शंखं क्षोभयज्जनमब्रवीत् । हरामि रुक्मिणीमेष कृष्णो रक्षतु चेद्बली ॥ ४८७ ॥
कोऽयं मुमूर्षुर्दुर्बुद्धिरिति जल्पन् जनार्दनः । ससैन्योऽप्यन्वधाविष्ट शार्ङ्गमास्फालयन्मुहुः ॥ ४८८ ॥
प्रद्युम्नस्तच्चमूं भङ्क्त्वा विद्यासामर्थ्यतो हरिम् । सद्यो निरायुधीचक्रे निर्दंतमिव दंतिनम् ॥ ४८९ ॥
यावद्विष्णुर्विषण्णोऽभूत्तावद्वामेतरो भुजः । स्पंदितस्तेन सहसा बलाय च निवेदितः ॥ ४९० ॥
तदैत्य नारदोऽवादी गृह्यतामेष ते सुतः । रुक्मिणीसहितः कृष्ण पर्याप्तं युद्धवार्तया ॥ ४९१ ॥
कृष्णं ननाम प्रद्युम्नो रामं च चरणान् स्पृशन् । ताभ्यां च सस्वजे गाढं चुंबद्भ्यामसकृच्छिरः ॥ ४९२ ॥

प्रद्युम्नस्य पितृभ्यां मिलनम् ।



---

१ प्रतीतिं कारयितुम् ।

प्रद्युम्नं सहजातयौवनमिव स्वर्वासि[1]लीलास्पृशं स्वांके न्यस्य जनार्दनो जनमनःकौतूहलोत्पादकम् ।
रुक्मिण्या सहितो विवेश नगरीं तामिंद्रवद्द्वारिकां द्वारे न्यस्तनवीनतोरणकृतभ्रूविभ्रमां संभ्रमात् ।। ४९३ ।।

प्रद्युम्नस्य पितृभ्यां मिलनम् ।

✣ ✣ ✣

इत्याचार्यश्रीहेमचंद्रसूरिविरचिते त्रिषष्टिशलाकापुरुषचरिते
महाकाव्येऽष्टमपर्वणिरुक्मिण्यादिपरिणयन-
पांडवद्रौपदीस्वयंवरप्रद्युम्नचरितकीर्तनो
नाम षष्ठः सर्गः ।



१ स्वर्वासी देवः ।

भामायाः
प्रद्युम्नाभ–
पुत्राप्त्यै
प्रतिश्रवः ।



# सप्तमः सर्गः ।

अथ प्रवर्तमानेऽत्र प्रद्युम्नागमनोत्सवे । दुर्योधनः समुत्थाय वासुदेवं व्यजिज्ञपत् ॥ १ ॥
पुत्री मे ते स्नुषा स्वामिन् केनाप्यपहृताधुना । तन्मृग्यतां क्वापि यथा भानुकः परिणीयते ॥ २ ॥
कृष्णोऽप्युवाच सर्वज्ञो नाहं स्यां तादृशोऽपि चेत् । तत् किं मया रौक्मिणेयो न ज्ञातः केनचिद्धृतः ॥३॥
प्रज्ञप्त्या तामहं ज्ञात्वात्रानेष्यामीत्युदीरयन् । तत्र प्रद्युम्न आनैषीत्तां स्वयंवरकन्यकाम् ॥ ४ ॥
कृष्णेन दीयमानां तां मम ह्येषा वधूरिति । प्रद्युम्नो न हि जग्राह पर्यणैषीच्च भानुकः ॥ ५ ॥
अनिच्छुनापि प्रद्युम्नेनोत्सवेन महीयसा । खेचरक्ष्मापकन्याश्च गोविंद उदवाहयत् ॥ ६ ॥
प्रद्युम्नानयनहेतोरुपकारिणमर्चितम् । नारदं व्यसृजतां च रुक्मिणीशार्ङ्गधारिणौ ॥ ७ ॥
प्रद्युम्नस्य महाऋद्ध्या ताम्यंती श्लाघयापि च । भामा कोपगृहे गत्वा शिश्ये जर्जरमंचके ॥ ८ ॥
तत्रायातश्च कंसारिर्व्याजहार ससंभ्रमः । केनापमानितासि त्वं येनैवं सुभ्रु ताम्यसि ॥ ९ ॥
साप्यूचे नापमानो मे किं तु प्रद्युम्नसन्निभः । न चेन्मे भविता सूनुर्मरिष्यामि तदा ध्रुवम् ॥ १० ॥

कृष्णस्तदाग्रहं ज्ञात्वा त्रिदशं नैगमेषिणम् । उद्दिश्याष्टमभक्तेन पौषधं प्रत्यपद्यत ॥ ११ ॥
आविर्भूय नैगमेषी तमूचे किं करोमि ते । कृष्णोऽप्युवाच भामायै देहि प्रद्युम्नवत्सुतम् ॥ १२ ॥
नैगमेष्यवदद्यस्यां पुत्रेच्छा ते भजस्व ताम् । त्वममुं हारमामोच्य ततो भावीप्सितः सुतः ॥ १३ ॥
अर्पयित्वा च तं हारं नैगमेषी तिरोदधे । वासकं वासुदेवोऽपि सत्यायै मुदितो ददौ ॥ १४ ॥
प्रज्ञप्त्या ज्ञापितस्तच्च प्रद्युम्नोऽम्बामजिज्ञपत् । ऊचे चादत्स्व तं हारं मत्तुल्यसुतकाङ्क्षया ॥ १५ ॥
रुक्मिण्यूचे त्वयैवास्मि कृतार्था वत्स सूनुना । किं च प्रसूते भूयोऽपि न स्त्रीरत्नं कदाचन ॥ १६ ॥
का सपत्नीषु तेऽभीष्टा यस्याः पुत्रं ददाम्यहम् । प्रद्युम्नेनेति सा भूयः पृष्टाभाषिष्ट रुक्मिणी ॥ १७ ॥
त्वद्वियोगे दुःखितायाः समदुःखा ममाभवत् । पुरा जांबवती वत्स तस्याः स्तात्त्वत्समः सुतः ॥ १८ ॥
प्रद्युम्नानुज्ञया साथाजूहवज्जांबवत्सुताम् । प्रद्युम्नोऽपि हि तां भामारुपामकृत विद्यया ॥ १९ ॥
सा तदाख्याय रुक्मिण्या प्रेषिता सदने हरेः । सायं ययौ तेन हारं दत्त्वा च बुभुजे मुदा ॥ २० ॥
तदैव च महाशुक्राद्देवः प्रच्युत्य कैटभः । आगात् कुक्षौ जांबवत्याः सिंहस्वप्नोपसूचितः ॥ २१ ॥
ततो ययौ जांबवती हृष्टा निजनिकेतने । आययौ सत्यभामा च कृष्णौको[1]वासकार्थिनी ॥ २२ ॥
तां दृष्ट्वाचिंतयत् कृष्णो भोगा[2]तृप्ता अहो स्त्रियः । अधुनैव गता ह्येषा यद्भूयोऽप्येति सत्वरा ॥ २३ ॥

१ कृष्णस्यौको गृहं तस्मिन्वासकार्थिनी भोगार्थिनीति यावत् । २ भोगेषु अतृप्ता ।



प्रद्युम्न–
मायया
जांबवत्याः
पुत्ररत्न–
प्राप्तिः ।

सत्यारुपं विधायाथ कयापि च्छलितोऽस्मि किम् । यदेषा मा विलक्षा भूदिति रेमे तया सह ॥ २४ ॥
तस्या रमणसमयं रौक्मिणेयोऽवगम्य तम् । भेरीमताडयद्विष्णोर्विश्वविक्षोभकारिणीम् ॥ २५ ॥
केनेयं ताडिता भेरीत्यपृच्छत् क्षुभितो हरिः । ताडिता रौक्मिणेयेन शशंसेति परिच्छदः ॥ २६ ॥
स्मित्वा दध्यौ हरिर्नूनं भामाद्य च्छलितामुना । तनयोऽपि हि सापत्नः सपत्नीदशकोपमः ॥ २७ ॥
किंचित् सभयं संभोगाद्भामाया भीरुरात्मजः । भविता भवति खलु नान्यथा भवितव्यता ॥ २८ ॥
प्रातश्च रुक्मिणीगेहे गतोऽपश्यज्जनार्दनः । तेन दिव्येन हारेण भूषितां जांबवत्सुताम् ॥ २९ ॥
निस्पंदाक्षं प्रेक्षमाणमूचे जांबवती हरिम् । किमेवं वीक्षसे स्वामिन् सैवास्मि तव पत्न्यहम् ॥ ३० ॥
ऊचे च विष्णुर्हारोऽयं दिव्यो देवि कुतो न्विति । साप्यूचे त्वत्प्रसादेन किं न वेत्सि स्वयं कृतम् ॥ ३१ ॥
सिंहस्वप्नं च सा चख्यौ व्याचख्यौ च जनार्दनः । प्रद्युम्नतुल्यस्तनयस्तव देवि भविष्यति ॥ ३२ ॥
इत्युक्त्वा प्रययौ विष्णुः समये जांबवत्यपि । शांबं नामासूत सुतं सिंहीवाद्वैतविक्रमम् ॥ ३३ ॥
दारुको जयसेनश्च सारथेर्मंत्रिणः पुनः । सुबुद्धिरेते तनयाः समं शांबेन जज्ञिरे ॥ ३४ ॥
अभूच्च सत्यभामायाः सूनुर्नाम्ना तु भानुकः । गर्भाधानानुसारात्तु भीरुरित्यपराभिधः ॥ ३५ ॥
अन्यासामपि गोविंदपत्नीनां जज्ञिरे सुताः । महौजसो महावीर्या भद्रेभकलभा इव ॥ ३६ ॥
मंत्रिसारिथपुत्रैश्च समं शांबो व्यवर्धत । क्रमात्कलाकलापं च प्राज्ञो जग्राह लीलया ॥ ३७ ॥



प्रद्युम्नमायया जांबवत्याः पुत्ररत्नाप्तिः, भामया भीरु पुत्रप्राप्तिश्च ।

अन्येद्यू रुक्मिणी पुत्रीं वैदर्भीं नाम रुक्मिणः । प्रद्युम्नेनोद्वाहयितुं प्रैषीद्भोजकटे नरम् ॥ ३८ ॥
सोऽवोचद्रुक्मिणं नत्वा देवी त्वां वक्ति रुक्मिणी । वैदर्भीयं निजसुता प्रद्युम्नाय प्रदीयताम् ॥ ३९ ॥
उचितो मम विष्णोश्च दैवाद्योगः पुरा ह्यभूत् । योगः प्रद्युम्नवैदर्भ्योर्भवतु त्वत्कृतोऽधुना ॥ ४० ॥
प्राग्वैरं संस्मरन् रुक्मीत्यूचे दास्ये निजां सुताम् । चंडालेभ्यो वरमहं न तु विष्णोः कुलेऽपि हि ॥ ४१ ॥
दूतोऽपि गत्वा रुक्मिण्यास्तदाचख्यौ यथातथम् । भ्रात्रापमानिता सास्थान्म्लाना नक्तमिवाब्जिनी ॥ ४२ ॥
किमेवं खिद्यसे चेति प्रद्युम्नेन तु सोदिता । शशंस रुक्मिवृत्तांतं मनःशल्यनिबंधनम् ॥ ४३ ॥
प्रद्युम्नोऽप्यब्रवीन्मातर्मा ताम्य स हि मातुलः । न सामार्हस्तदुचितं ततस्तातोऽकरोत्तदा ॥ ४४ ॥
तस्योचितं विधायैष तत्पुत्रीमुद्वहाम्यहम् । इत्युक्त्वा सह शांबेनोत्पत्य भोजकटे ययौ ॥ ४५ ॥
किन्नरस्वरचंडालरुपौ भूत्वा च तत्र तौ । गायंतौ जहृतुः सर्वपौराणां मृगवन्मनः ॥ ४६ ॥
ज्ञात्वाहूय च तौ मायामातंगौ मधुरस्वरौ । अगापयद्रुक्मिनृपः स्वोत्संगे तां सुतां दधन् ॥ ४७ ॥
तयोर्गीतेन मुदितो रुक्मिराट् सपरिच्छदः । दत्त्वा द्रव्यमपृच्छत्तावत्रायातौ कुतो युवाम् ॥ ४८ ॥
तावप्याचख्यतुः स्वर्गादायातौ द्वारकां पुरीम् । विदधे स्वर्गिभिः सा हि कृते देवस्य शार्ङ्गिणः ॥ ४९ ॥
मुदिता तौ तु पप्रच्छ वैदर्भी तत्र किं युवाम् । जानीथः कृष्णरुक्मिण्योः प्रद्युम्नं नाम नंदनम् ॥ ५० ॥

[1] सामवचनयोग्यः ।

अष्टमं पर्व
सप्तमः
सर्गः
श्रीअरिष्ट–
नेमिजिन–
चरितम् ।

प्रद्युम्न–
वैदर्भी–
विवाहः ।

उवाच शांबः को नाम प्रद्युम्नं रुपमन्मथम् । पृथ्व्यलंकारतिलकं न जानाति महौजसम् ॥ ५१ ॥
तच्छ्रुत्वोत्कंठिता जज्ञे वैदर्भी रागगर्भिता । तदा च स्तंभमुन्मूल्य मत्तेभः कोऽप्यधावत ॥ ५२ ॥
उपद्रवन्पुरं सर्वमकांडकृतविड्वरः[1] । नाशक्यत स केनापि वशीकर्तुं निषादिना ॥ ५३ ॥
वशीकरोति यः कश्चिदिमं तस्मै ददाम्यहम् । अभीप्सितमिति क्ष्मापः पटहं पर्यदापयत् ॥ ५४ ॥
पटहो न स केनापि दध्रे ताभ्यां च धारितः । गीत्या प्रद्युम्नशांबाभ्यां स्तंभितश्च महागजः ॥ ५५ ॥
द्वावप्यारुह्य तं नागं नीत्वालाने बबंधतुः । चित्रीयमाणौ पौराणां राज्ञाप्याह्वायितौ मुदा ॥ ५६ ॥
याचेथां रुचितं यद्वामित्युक्तौ रुक्मिणा च तौ । इमां प्रदेहि वैदर्भीं नास्ति नौ धान्यरंधनी[2] ॥ ५७ ॥
तच्छ्रुत्वा कुपितो रुक्मी तौ पुरान्निरवासयत् । प्रद्युम्नोऽप्यब्रवीच्छांबं दुःखं तिष्ठति रुक्मिणी ॥ ५८ ॥
वैदर्भ्याः परिणयने विलंबस्तन्न युज्यते । इति तत्र ब्रुवाणेऽपि रजन्यजनि निर्मला ॥ ५९ ॥
ततः सुप्तेषु लोकेषु प्रद्युम्नो निजविद्यया । प्रासादभूम्यां सप्तम्यां स्थितां रुक्मिसुतां ययौ ॥ ६० ॥
रुक्मिणीस्नेहलेखं स तस्याः कृतकमा[3]र्पयत् । वाचयित्वा साप्यवोचद्ब्रूहि किं ते ददाम्यहम् ॥ ६१ ॥
सोऽप्यूचे मह्यमात्मानमेव देहि सुलोचने । यदर्थे याचितासि त्वं प्रद्युम्नः सोऽस्मि सुंदरि ॥ ६२ ॥
अहो सुघटितं दैवाज्जातं ननु विधेरिति । ब्रुवाणा रुक्मितनया तद्वचः प्रत्यपद्यत ॥ ६३ ॥

प्रद्युम्न–
वैदर्भी–
विवाहः ।



---

१ जनक्षोभः । २ अन्नपाचिका । ३ कृत्रिमम् ।

प्रद्युम्न-
वैदर्भी-
विवाहः ।

कृत्वा विद्याबलादग्निं साक्षीकृत्य च कृष्णसूः । आ[1]मुक्तकंकणां श्वेतदुकूलां तामुपायत ॥ ६४ ॥
रमयामास तां स्वैरं कार्ष्णिर्विविधभंगिभिः । निशाशेषेऽब्रवीच्चैवं याम्यहं शांबसन्निधौ ॥ ६५ ॥
पितृभ्यां परिवारेण पृच्छ्यमानापि मा ब्रवीः । त्वद्देहोपद्रवरक्षा विहितास्ति मयानघे ॥ ६६ ॥
इत्युक्त्वा कार्ष्णिरगमद्वैदर्भ्यप्यतिजागरात् । रतश्रमाच्च सुष्वाप जजागार प्रगेऽपि न ॥ ६७ ॥
तत्राययौ च तद्धात्री तद्दृष्ट्वा कंकणादिकम् । विवाहचिह्नं साशंका तामुत्थाप्या[2]न्वयुंक्त च ॥ ६८ ॥
नाख्यच्च किंचिद्वैदर्भी धात्री च स्वाग[3]श्छिदे । शशंस रुक्मिणे गत्वा राज्ञ्यै च भयविह्वला ॥ ६९ ॥
ताभ्यामपि समागत्य सानुयुक्ता शशंस न । व्यक्तं विवाहसंभोगचिह्नं ददृशतुश्च तौ ॥ ७० ॥
दध्यौ मनसि रुक्म्येवं कन्येयं कुलपांसुना । अदत्तापि हि केनापि सह रेमे निजेच्छया ॥ ७१ ॥
चंडालाभ्यां वरं ताभ्यां दत्तासीत्कन्यकाधमा । ध्यात्वेत्याजूहवद्रोषात्तौ चंडालौ स्ववेत्रिणा ॥ ७२ ॥
कन्यका गृह्यतामेषा यातं तत्र न यत्र वाम् । पश्यामीति वदन्रोषाद्वैदर्भीं प्रददौ तयोः ॥ ७३ ॥
वैदर्भीमूचतुस्तौ च राज[4]पुत्र्यावयोर्गृहे । जलौ[5]कश्चर्मरज्ज्वादिविक्रयं किं करिष्यसि ॥ ७४ ॥
साप्यूचे परमार्थज्ञा यद्दैवं कारयिष्यति । तदवश्यं करिष्यामि दुर्लंघ्यं दैवशासनम् ॥ ७५ ॥
ततस्तौ तामुपादाय वीरौ जग्मतुरन्यतः । पश्चात्तापाद्रुक्मिराजोऽप्यरोदीदिति पर्षदि ॥ ७६ ॥

---

१ बद्धकंकणाम् । २ अपृच्छत् । ३ स्वपराधस्य नाशाय । ४ हे राजपुत्रि । ५ जलौको, जलस्थानम् ।

प्रद्युम्न–
वैदर्भी–
विवाहः ।

हा वत्से क्वासि वैदर्भि संदर्भो[1] नोचितो ह्यभूत् । मया गौरिव चंडालद्वारे क्षिप्तासि नंदने ॥ ७७ ॥
सत्यं हि कोपश्चंडालश्चंडालाभ्यां स तन्मया । अदापयत्सुतां सर्वो ह्यात्मवर्गहितैषकः ॥ ७८ ॥
रुक्मिण्या याच्यमानापि प्रद्युम्नायात्मसूनवे । क्रोधांधेन न दत्तासि धिङ्मया मंदमेधसा ॥ ७९ ॥
रुदन्नेवं च शुश्राव गंभीरं तूर्यनिस्वनम् । कुतोऽयमिति पृष्टाश्च ज्ञात्वाचख्युर्नियोगिनः ॥ ८० ॥
प्रद्युम्नशांबौ वैदर्भ्या सहितौ नगराद्बहिः । विमानतुल्ये प्रासादे तिष्ठतो नाकिनाविव ॥ ८१ ॥
चारणैः स्तूयमानौ तौ वर्यतूर्यमनोहरम् । संगीतकं कारयंतौ नादोऽयं तद्भवः प्रभो ॥ ८२ ॥
ततः प्रमुदितो रुक्मी तावानिन्ये निजे गृहे । स्वयं जामेयजामातृस्नेहादानर्च चाधिकम् ॥ ८३ ॥
ततो रुक्मिणमापृच्छ्य वैदर्भीशांबसंयुतः । प्रद्युम्नोऽगाद्द्वारवत्यां रुक्मिणीनयनोत्सवः ॥ ८४ ॥
नवयौवनया रुक्मिपुत्र्या रत्येव नव्यया । रममाणः सुखं तस्थौ प्रद्युम्नो नवयौवनः ॥ ८५ ॥
शांबो हेमांगदनृपपुत्र्या वेश्याप्रसूतया । सुहरिण्याख्यया रेमे रुपादत्यप्सरः[2]श्रिया ॥ ८६ ॥
जघान क्रीडयन्नित्यं शांबो भीरुं तथा धनम् । प्राज्यं द्यूते हारयित्वा दापयामास कौतुकी ॥ ८७ ॥
रुदन् गत्वा भीरुराख्यद्भामायै सापि विष्णवे । सोऽपि देव्यै जांबवत्यै तच्छांबस्य विचेष्टितम् ॥ ८८ ॥
जगाद जांबवत्येवमियत्कालं मया न हि । शांब[3]दुर्विनयोऽश्रावि किमिदं विष्टर[4]श्रवः ॥ ८९ ॥

१ संयोगः । २ अप्सरसां श्रियमतिक्रान्तात्यप्सरःश्रीस्तया । ३ शांबस्य दुर्विनयः । ४ हे विष्णो विष्टरं विस्तृतं श्रवः कीर्तिर्यस्येति समासः ।

ऊचे विष्णुः सुतं सिंही सौम्यं भद्रं च मन्यते । गजा एव हि जानंति तस्य क्रियां शिशोरपि ॥ ९० ॥
दर्शयाम्यद्य तच्चेष्टा इत्युक्त्वा भीररुपभृत् । चक्रे हरिस्तामाभीरीरुपां जांबवतीमपि ॥ ९१ ॥
विक्रीणानावुभौ तक्रं विशंतौ द्वारकापुरीम् । दृष्टौ शांबकुमारेण सदा स्वैरविहारिणा ॥ ९२ ॥
शांबोऽवोचदथाभीरीमेही क्रीणामि गोरसम् । इत्युक्ता सान्वगाच्छांबं स आभीरश्च तां पुनः ॥ ९३ ॥
एकं देवकुलं शांबः प्रविष्टस्तामथाह्वत । सोचे नात्र प्रवेक्ष्यामि मूल्यमत्रैव देही मे ॥ ९४ ॥
अत्रावश्यं प्रवेष्टव्यमित्युदित्वा करेण ताम् । गृहीत्वाक्रष्टुमारेभे शांबो हस्ती लतामिव ॥ ९५ ॥
रे किं गृह्णासि मद्भार्यामित्याभीरः स तं द्रुतम् । जघानाविरभूतां च तौ तु जांबवतीहरी ॥ ९६ ॥

कृष्णकृता शांबपरीक्षा ।

संप्रेक्ष्य पितरौ शांबः पिधायास्यं पलायितः । अदर्शि सुतदुश्चेष्टेत्यूचे जांबवतीं हरिः ॥ ९७ ॥
प्रसह्यानीयमानः स द्वितीयेऽहनि शार्ङ्गिणा । कीलिकां घटयन्नागात् पृष्टश्चैवमवोचत ॥ ९८ ॥
वचनं ह्यस्तनं योऽद्य वदिष्यति तदानने । क्षेपणीया कीलिकेयमतोऽहं घटयाम्यमूम् ॥ ९९ ॥
निर्लज्जः कामविवशः स्वैरमत्र विचेष्टते । इति निर्वासितः शांबः स्वपुर्याः शार्ङ्गपाणिना ॥ १०० ॥
प्रज्ञप्तिविद्यां प्रद्युम्नोऽप्यन्तःस्नेहाधिवासितः । शांबाय गच्छतेऽदत्त प्राग्जन्मन्यपि बंधवे ॥ १०१ ॥
प्रद्युम्नो भीरुकं नित्यमर्दयन् भामयौच्यत । नगर्याः किं न निर्यासि रे शांब इव दुर्मते ॥ १०२ ॥
सोऽप्यूचे कुत्र गच्छामि श्मशान इति सावदत् । कदा मया समागम्यमित्युवाच स तां पुनः ॥ १०३ ॥

यदा हस्ते गृहीत्वाहं शांबमत्रानयाम्यरे । तदा त्वया समागम्यमित्यूचे सापि तं क्रुधा ॥ १०४ ॥
यदादिशति मे मातेत्युदित्वा रुक्मिणीसुतः । ययौ स्मशाने शांबोऽपि भ्रांत्वा तत्र समाययौ ॥ १०५ ॥
उभौ स्मशानभूम्यां तौ दाहशुल्कं महत्तरम् । गृहीत्वा ददतुर्दग्धुं मृतकानि पुरीसदाम् ॥ १०६ ॥
इतश्च भीरवे भामैकोनकन्याशतं शुभम् । अमेलयत्प्रयत्नाच्च कन्यामेकामियेष च ॥ १०७ ॥
प्रज्ञप्त्या तत्तु विज्ञाय प्रद्युम्नो व्यकरोच्चमूम् । जितशत्रुर्नाम नृपः स्वयं जज्ञे च तत्क्षणात् ॥ १०८ ॥
शांबश्च जज्ञे तत्कन्या देवकन्यासहोदरा । भीरुधात्र्या च ददृशे क्रीडंती सा सखीवृता ॥ १०९ ॥
तां ज्ञात्वा सत्यभामायै सा सद्योऽपि व्यजिज्ञपत् । भामाऽयाचिष्ट भीर्वर्थे जितशत्रुं नरेण ताम् ॥ ११० ॥
जितशत्रुर्बभाषे तं तदा कन्यां ददाम्यहम् । भामा हस्ते गृहीत्वामूं द्वारकां प्रविशेद्यदि ॥ १११ ॥
अन्यच्चोद्वाहकालेऽस्याः करं भीरुकरोपरि । चेत्कारयति भामा तद्भीरवेऽस्तु ममात्मजा ॥ ११२ ॥
इत्युक्तः स नरो गत्वा भामायै तद्व्यजिज्ञपत् । आमेत्युक्त्वा ययौ भामार्थिनी तच्छिबिरे द्रुतम् ॥ ११३ ॥
शांबो बभाषे प्रज्ञप्तिं भामा तस्या जनोऽपि च । कन्यारुपं पश्यतु मां शांबमेवापरो जनः ॥ ११४ ॥
तथा कृते च प्रज्ञप्त्या भामाया दक्षिणे करे । गृहीतः शांबकुमारः प्राविशद्द्वारकापुरीम् ॥ ११५ ॥
आनिन्ये भामया शांबो भीरोः पाणिग्रहोत्सवे । अहो चित्रमहो चित्रमित्यूचुर्नागरस्त्रियः ॥ ११६ ॥

शांबस्य मायया भामापुत्र-भीरुविवाहे कन्याभिः सह विवाहः ।

शांबस्य
मायया
भामापुत्र-
भीरुविवाहे
कन्याभिः
सह
विवाहः ।

भामौकसि गतः शांबो भीरोर्वामेतरं करम् । स्वहस्तेनोपरिस्थेनादाय वामेन वामधीः[1] ॥ ११७ ॥
एकोनकन्याशतस्य पाणीन् दक्षिणपाणिना । धृत्वा च युगपद्वह्निं परितो विधिनाभ्रमत् ॥ ११८ ॥
पश्यंत्यः कन्यकाः शांबमूचुः पुण्योदयादसि । विधिना योजितो नस्त्वं पती रतिपतेः[2] समः ॥ ११९ ॥
वृत्तोद्वाहः समं ताभिः शांबो वासगृहे ययौ । भीरुः शांबेन तत्रायान् भ्रुकुट्या भीषितो ययौ ॥ १२० ॥
गत्वा स आख्यद्भामायै साप्यश्रद्दधती स्वयम् । तत्रागत्यैक्षिष्ट शांबं शांबोऽपि प्रणनाम ताम् ॥ १२१ ॥
सकोपा साप्युवाचैवं केनानीतोऽसि धृष्ट रे । सोऽप्यूचेऽहं त्वयानीतः कन्योद्वाहं च कारितः ॥ १२२ ॥
प्रमाणमत्र निःशेषो मध्यस्थो द्वारिकाजनः । इत्युक्ता सापि पप्रच्छ तत्रायातान् पुरीजनान् ॥ १२३ ॥
तेऽप्यूचुर्देवि मा कुप्य त्वया शांबः प्रवेशितः । अस्माकं पश्यतामेव कन्योद्वाहं च कारितः ॥ १२४ ॥
मायी मायिसुतो मायिकनिष्ठो मायिनीभवः । कन्यारुपोऽच्छलयन्मामित्युक्त्वा सा ययौ रुषा ॥ १२५ ॥
प्रत्यक्षं सर्वलोकानां कृष्णस्ताः कन्यकाः स्वयम् । ददौ शांबाय चक्रे च जांबवत्युत्सवं परम् ॥ १२६ ॥
वसुदेवं नमस्कर्तुं गतः शांबोऽब्रवीदिति । भ्रांत्वा क्ष्मां तात युष्माभिश्चिरेणोढाः खलु स्त्रियः ॥ १२७ ॥
अभ्रांत्वापि मयैकत्र युगपत्कन्यकाशतम् । परिणीतमिति व्यक्तं युष्माकं मम चांतरम् ॥ १२८ ॥
प्रत्यूचे वसुदेवोऽपि कूपमंडूककल्प रे । पित्रा निःसारितोऽप्येष धिग्धिक् त्वां मानवर्जितम् ॥ १२९ ॥

१ वामा सुंदरा धीर्बुद्धिर्यस्य सः । २ कामस्य ।

भ्रात्रावमानितोऽहं तु वीरवृत्त्या निरीय रे । सर्वत्रास्खलीतोऽभ्राम्यं पर्यणैषं च कन्यकाः ॥ १३० ॥
यथावसरमिलितैर्बन्धुभिश्चैभिरादरात् । अर्थितः स्वगृहाण्यागां न पुनस्त्वमिव स्वयम् ॥ १३१ ॥
शांबः पूज्यतिरस्कारमथ ज्ञात्वा स्वयं कृतम् । कृतांजलिः प्रणम्योच्चैरित्युवाच पितामहम् ॥ १३२ ॥
उक्तं मयैतदज्ञानाद्बालदुर्ललितं ह्यदः । क्षंतव्यं तातपादैस्तत्तातो लोकोत्तरो गुणैः ॥ १३३ ॥
इतश्च यवनद्वीपात्तत्रैयुर्जलवर्त्मना । महाभांडान्युपादाय वणिजः केचिदीश्वराः ॥ १३४ ॥
व्यक्रीणंतान्यवस्तूनि न पुना रत्नकंबलान् । विशेषलाभमिच्छतः पुरे राजगृहे ययुः ॥ १३५ ॥
वणिग्भिस्तत्र वास्तव्यैरग्रे भूत्वाथ निन्यिरे । मगधाधीशदुहितुस्ते जीवयशसो गृहे ॥ १३६ ॥
अदर्शयंश्च ते जीवयशसो रत्नकंबलान् । उष्णे शीतान् शीते चोष्णान् बहलश्लक्ष्णरोमकान् ॥ १३७ ॥



मूल्यार्धे कंबलानां तु कृते पूच्चक्रिरेऽथ ते । आयामो द्वारिकां मुक्त्वा वयं किम[1]धिलिप्सवः ॥ १३८ ॥
पप्रच्छ ताञ्जीवयशाः का नाम द्वारिका पुरी । को नाम नृपतिस्तत्र वणिजस्तेऽप्यदोऽवदन् ॥ १३९ ॥
दत्ते स्थाने समुद्रेण द्वारिका पूः सुरैः कृता । तत्र कृष्णो नृपः सूनुर्देवकीवसुदेवयोः ॥ १४० ॥
तच्च श्रुत्वा जीवयशा जगादैवं रुदत्यथ । जीवत्यद्यापि मद्भर्तुः संहर्ता शास्ति चावनिम् ॥ १४१ ॥
तां च दृष्ट्वा जरासंघोऽपृच्छद्रोदनकारणम् । साप्याख्यत्कृष्णवृत्तांतमित्यूचे च कृतांजलिः ॥ १४२ ॥



१ अधिकं लब्धुमिच्छवः ।

तात मां विसृजाद्यैव प्रवेक्ष्यामि हुताशनम् । स्वसंधां पूरयिष्यामि न जीविष्याम्यतः परम् ॥ १४३ ॥
जरासंघोऽभ्यधात् पुत्रि मा रोदीरेष नन्वहम् । रोदयिष्यामि कंसारेर्मातृस्व सृवधूजनम् ॥ १४४ ॥
अयादवं भवत्वद्येत्युदित्वा मगधेश्वरः । प्रयाणायादिशत्सेनां वार्यमाणोऽपि मंत्रिभिः ॥ १४५ ॥
महौजसस्तमन्वीयुः सहदेवादयः सुताः । चेदिराजः शिशुपालो धुरीणः स च दोष्मताम् ॥ १४६ ॥
राजा हिरण्यनाभश्च महाबलपराक्रमः । दुर्योधनश्च कौरव्य आयोधनधुरंधरः[१] ॥ १४७ ॥
अन्येऽपि बहवो भूपाः सामंताश्च सहस्त्रशः । जरासंघं समापेतुः प्रवाहा इव सागरम् ॥ १४८ ॥
॥ युग्मम् ॥

कृष्ण-
जरासंघ-
युद्धम् ।

पपात मुकुटो मूर्ध्नो हारस्तुत्रोट चोरसः । स्खलितश्चांचलेनांध्रिस्तस्याग्रे चाभरवत्क्षुतम् ॥ १४९ ॥
पस्पंदे नयनं वामं विष्मूत्रे तद्गजोऽकरोत् । प्रतिकूलः समीरोऽभूद्गृधाश्च भ्रेमुरंबरे ॥ १५० ॥
आप्तैरिवानिमित्तैश्चाशकुनैश्चैवमादिभिः । कथ्यमानाशुभोदर्कोऽप्यस्थान्न स मनागपि ॥ १५१ ॥
रजोभिरिव सैन्योत्थैस्तुमुलैः पूरयन् दिशः । दिशां गज इवोद्भ्रांतः कंपयन्नवनीतलम् ॥ १५२ ॥
जरासंघः क्रूरसंघोऽध्यारुढो गंधसिंधुरम् । प्रति प्राचेतसीमाशां[२] प्रचचाल महाबलः ॥ १५३ ॥
॥ युग्मम् ॥



---

१ अयोधनं युद्धम् । २ पश्चिमदिशाम् ।

समायांतं जरासंघं नारदः किल कौतुकी । चराश्च गत्वा त्वरित्वं शशंसुः शार्ङ्गपाणये ॥ १५४ ॥
कृष्णावर्त्मेव कृष्णोऽपि तेजसामेकमास्पदम् । प्रयाणाय समुत्तस्थे भंभाताडनपूर्वकम् ॥ १५५ ॥
तन्नादेनामिलन् सर्वे यादवा भूभुजोऽपि च । सुघोषाघंटाघोषेण सौधर्मत्रिदशा इव ॥ १५६ ॥
समुद्रविजयस्तेषु समुद्र इव दुर्धरः । तत्रागात् सर्वसन्नाही तस्यैते तनया अपि ॥ १५७ ॥
महानेमिः सत्यनेमिर्दृढनेमिसुनेमिनौ । अरिष्टनेमिर्भगवान् जयसेनो महाजयः ॥ १५८ ॥
तेजःसेनो जयो मेघश्चित्रको गौतमोऽपि च । श्वफल्कः शिवनंदश्च विष्वक्सेनो महारथाः ॥ १५९ ॥
अक्षोभ्यो द्विषदक्षोभ्यः समुद्रविजयानुजः । आययौ युधि धौरेयास्तस्याष्टौ च सुता इमे ॥ १६० ॥
उद्धवश्च धवश्चैव क्षुभितोऽथ महोदधिः । अंभोनिधिर्जलनिधिर्वामदेवो दृढव्रतः ॥ १६१ ॥
स्तिमितोऽपि हि तत्रागात् पंचैते तत्सुतोत्तमाः । उर्मिमान् वसुमान् वीरः पातालः स्थिर एव च ॥ १६२ ॥
सागरः षट् च तत्पुत्रा निःकंपः कंपनस्तथा । लक्ष्मीवान् केशरी श्रीमान् युगांतश्च समाययुः ॥ १६३ ॥
आययौ हिमवांस्तत्र तत्तनूजास्त्रयोऽप्यमी । विद्युत्प्रभस्तथा गंधमादनो माल्यवानपि ॥ १६४ ॥
अचलोऽचलपुत्राश्च सप्ताजग्मुर्महौजसः । महेंद्रो मलयः सह्यो गिरिः शैलो नगो बलः ॥ १६५ ॥
धरणः पंच तत्पुत्राः कर्कोटकधनंजयौ । विश्वरुपः श्वेतमुखो वासुकिश्च समाययुः ॥ १६६ ॥
पूरणः पूरणपुत्राश्चत्वारश्च समाययुः । दुःपूरो दुर्मुखश्चैव दुर्दशो दुर्धरस्तथा ॥ १६७ ॥



कृष्ण–
जरासंघ–
युद्धम् ।

आययावभिचंद्रोऽपि षट् तस्य च सुता इमे । चंद्रः शशांकश्चंद्राभः शशी सोमोऽमृतप्रभः ॥ १६८ ॥
वसुदेवोऽपि तत्रागाद्देवदेव इवौजसा । तत्सूनवश्च बहवो दोष्मंतो नामतस्त्वमी ॥ १६९ ॥
जातौ विजयसेनाया अक्रूरः क्रूर इत्यपि । ज्वलनाशनिवेगौ च श्यामायास्तनुजावुभौ ॥ १७० ॥
पुत्रा गन्धर्वसेनायास्त्रयोऽग्रय इवांगिनः । वायुवेगोऽमितगतिर्महेन्द्रगतिरेव च ॥ १७१ ॥
पद्मावत्या मंत्रिपुत्र्यास्त्रयः पुत्रा महौजसः । सिद्धार्थो दारुकश्चापि सुदारुरपि विक्रमी ॥ १७२ ॥
उभौ च नीलयशसः पुत्रौ सिंहमतंगजौ । नारदो मरुदेवश्चेत्युभौ सोमश्रियः सुतौ ॥ १७३ ॥
मित्रश्रियः सुमित्रस्तु कपिलः कपिलाभवः । पद्मावत्या अपि सुतौ पद्मः कुमुद एव च ॥ १७४ ॥
अश्वसेनोऽश्वसेनाजः पुंड्रः पुंड्राभवः पुनः । रत्नवत्या रत्नगर्भो वज्रबाहुश्च बाहुभृत् ॥ १७५ ॥
सोमश्रियः सोमपुत्र्याश्चंद्रकांतशशिप्रभौ । वेगवान् वायुवेगश्च वेगवत्याः सुतावुभौ ॥ १७६ ॥
पुत्रा मदनवेगायास्त्रैलोक्यप्रथितौजसः । अनाधृष्टिर्दृढमुष्टिर्हिममुष्ठिरिति त्रयः ॥ १७७ ॥
बंधुमत्या बंधुषेणः सिंहसेनश्च नंदनौ । पुत्रः प्रियंगुसुंदर्या युधि धुर्यः शिलायुधः ॥ १७८ ॥
तनयौ तु प्रभावत्याः ख्यातौ गांधारपिंगलौ । जराकुमारवाह्लीकौ जरादेव्याश्च नंदनौ ॥ १७९ ॥
अवंतिदेव्यास्तनयौ सुमुखो दुर्मुखोऽपि च । रोहिण्यास्तु सुतो रामः सारणोऽथ विदूरथः ॥ १८० ॥
तनयौ बालचंद्राया वज्रदंष्ट्रामितप्रभौ । पुत्रा रामस्य बहवो मुख्यास्त्वेतेऽभिधानतः ॥ १८१ ॥

कृष्ण–
जरासंघ–
युद्धम् ।

उल्मूको निषधश्चैव प्रकृतिद्युतिरेव च । चारुदत्तो ध्रुवः शत्रुदमनः पीठ एव च ॥ १८२ ॥
श्रीध्वजो नंदनश्चैव श्रीमान् दशरथस्तथा । देवानंदस्तथानंदो विप्रथुः शांतनुस्तथा ॥ १८३ ॥
पृथुः शतधनुश्चैव नरदेवो महाधुनः । दृढधन्वा तथा विष्णोरप्यायमुरमी सुताः ॥ १८४ ॥
भानुश्च भामरश्चैव महाभान्वनुभानुकौ । बृहद्ध्वजश्चाग्निशिखो धृष्णुः संजय एव च ॥ १८५ ॥
अकंपनो महासेनो धीरो गंभीर एव च । उदधिर्गौतमश्चैव वसुधर्मा प्रसेनजित् ॥ १८६ ॥
सूर्यश्च चंद्रवर्मा च चारुकृष्णक इत्यपि । सुचारुर्देवदत्तश्च भरतः शंख एव च ॥ १८७ ॥
प्रद्युम्नशांबप्रमुखा अपरेऽपि महौजसः । सहस्त्रशो विष्णुपुत्रास्तत्रापेतुर्युयुत्सवः ॥ १८८ ॥

कृष्ण–
जरासंघ–
युद्धम् ।

उग्रसेनस्तत्सुताश्च धरो गुणधरोऽपि च । शक्तिको दुर्धरश्चंद्रसागरश्चायुर्युधि ॥ १८९ ॥
पितृत्यो ज्येष्ठनृपतेः सांत्वनस्तत्सुतास्त्वमी । महासेनो विषमित्रो हृदिकः सत्यमित्रकः ॥ १९० ॥
महासेनस्यापि सुतः सुषेणो नाम पार्थिवः । विषमित्रस्य हृदिकः सिनिः सात्यक एव च ॥ १९१ ॥
हृदिकात् कृतवर्माख्यो दृढधर्मा च पार्थिवः । सत्यकाद्युयुधानाख्यस्तत्सुतो गंध एव च ॥ १९२ ॥
दशार्हाणां सुताश्चान्ये रामविष्णवोश्च भूरिशः । पितृष्वसृस्वसृसुता अप्याजग्मुर्महाभुजाः ॥ १९३ ॥
ततः क्रोष्टुकिनाख्याते दिने दारु[1]कसारथिम् । ताक्ष्यांकं रथमारुढः सर्वैर्यदुभिरावृतः ॥ १९४ ॥



---

१ दारुकः सारथिर्यस्य तम् ।

शुभैर्निमित्तैः शकुनैः संसूचितजयोत्सवः । प्रति पूर्वोत्तरामाशां प्रचचाल जनार्दनः ॥ १९५ ॥
॥ युग्मम् ॥

पंचचत्वारिंशतं तु योजनानि निजात् पुरात् । गत्वा तस्थौ सेनपल्यां ग्रामे संग्रामकोविदः ॥ १९६ ॥
अर्वाग्जरासंघसैन्याच्चतुर्भिर्योजनैः स्थिते । तत्र कृष्णबले केचिदागुर्विद्याधरोत्तमाः ॥ १९७ ॥
समुद्रविजयं नत्वा तेऽवोचन्नृपते वयम् । गुणगृह्यास्त्वदीयस्य भ्रातुरानकदुन्दुभेः ॥ १९८ ॥
॥ युग्मम् ॥

कृष्ण-
जरासंघ-
युद्धम् ।

येषां कुलेऽरिष्टनेमिर्जगद्[1]रक्षाक्षयक्षमः । एतौ च रामगोविंदावद्वितीयपराक्रमौ ॥ १९९ ॥
प्रद्युम्नशांबप्रमुखा नप्तारोऽमी च कोटिशः । तेषां वो युधि साहाय्यमन्येभ्यः कीदृशं ननु ॥ २०० ॥
तथाप्यवसरं ज्ञात्वा स्वभक्त्या वयमागताः । समादिशस्व सामंतवर्गे गणय नः प्रभो ॥ २०१ ॥
एवमस्त्विति राज्ञोक्ते ते भूयोऽप्येवमूचिरे । जरासंघस्तृणमसौ केवलस्यापि शार्ङ्गिणः ॥ २०२ ॥
वैताढ्याद्रौ जरासंघगृह्या ये संति खेचराः । इहायांति न यावत्ते तान् प्रति तावदादिश ॥ २०३ ॥
सेनानीश्चायमस्मासु वसुदेवोऽस्तु तेऽनुजः । प्रद्युम्नशांबसहितः सत्येवं ते जिताः खलु ॥ २०४ ॥
समुद्रविजयः कृष्णानुज्ञयानकदुंदुभिम् । प्रैषीत्प्रद्युम्नशांबौ च पौत्रौ तैः खेचरैः समम् ॥ २०५ ॥



---

१ जगतो रक्षायां क्षये च समर्थः ।

तदा च वसुदेवाय प्रददेऽरिष्टनेमिना । जन्मस्नात्रे सुरैर्दोष्णि बद्धौषध्यस्त्रवारणी[1] ॥ २०६ ॥
इतश्च मगधाधीशं सहैत्यापरमंत्रिभिः । उवाच हंसको मंत्री मंत्रपूर्वमिदं वचः ॥ २०७ ॥
अमंत्रितं पुराकार्षीत्कंसः सोऽप्याप तत्फलम् । मंत्रशक्तिं विनोत्साहप्रभुशक्ती दुरायती[2] ॥ २०८ ॥
परः[3] स्तोकः समो वापि दृष्टव्यः स्वाधिकः खलु । किं पुनर्योऽधिकः स्वस्माद्विष्णुरेष महाबलः ॥ २०९ ॥
स्वयंवरे हि रोहिण्या दशार्हो दशमश्च सः । मुखांधकारो भूपानां तदैक्षि स्वामिना स्वयम् ॥ २१० ॥
तदाभूत्त्वब्दले नालं वसुदेवाय कोऽपि हि । तज्ज्यायसा समुद्रेण त्वत्सैन्याः परिरक्षिताः ॥ २११ ॥
द्यूते कोटिजयाज्ज्ञानः स्वसुतायाश्च जीवनात् । घातितोऽपि वसुदेवो न मृतः स्वप्रभावतः ॥ २१२ ॥
जातौ चास्माद्रामकृष्णौ वृद्धिं चैतावतीं गतौ । ययोः कृते वैश्रवणो द्वारकां निर्ममे पुरीम् ॥ २१३ ॥



एतावतिरथौ वीरौ शरणं यौ महारथाः । युधिष्ठिराद्या व्यसने शिश्रियुः पांडवा अपि ॥ २१४ ॥
प्रद्युम्नशांबौ तनयौ रामकृष्णाविवापरौ । तौ च भीमार्जुनौ भीमौ[4] कृतांतस्यापि दोर्बलात् ॥ २१५ ॥
किं चान्यैर्व्याहृतैर्वीरैर्नमिरेकोऽ पि तत्र यत् । लीलया निजदोर्दंडच्छत्रीकर्तुमलं महीम् ॥ २१६ ॥
सैन्ये त्वदीये धौरेयौ दमघोषजरुक्मिणौ । रुक्मिणीहरणे दृष्टं बलं बलरणे[6] तयोः ॥ २१७ ॥



---

१ शस्त्रवारणी ओषधी या देवैर्बद्धासीत्सा वसुदेवाय प्रददे इत्यर्थः । २ दुष्ठा आयतिः परिणामो ययोस्ते । ३ शत्रुः । ४ भयंकरौ । ५ दमघोषजः शिशुपालः । ६ बलरामेण सह युद्ध ।

दुर्योधनश्च कौरव्यो गांधारः शकुनिस्तथा । श्ववच्छलबलौ[1] ह्येतौ न वीरगणना तयोः ॥ २१८ ॥
अंगाधिराजः कर्णोऽपि सक्तुमुष्टिरिवार्णवे । शंके कृष्णबले स्वामिन् कोटिसंख्यमहारथे[2] ॥ २१९ ॥
नेमिः कृष्णो बलश्चातिरथः परबले त्रयः त्वमेक एव स्वबले बलयोर्महदंतरम् ॥ २२० ॥
अच्युताद्याः सुरेन्द्रा यं नमस्कुर्वंति भक्तितः । तेन श्रीनेमिना सार्धं युद्धाय प्रोत्सहेत कः ॥ २२१ ॥
छलयित्वा सुरैरेव कृष्णगृह्यैर्निपातितः । कालस्तव सुतस्तेन विद्धि दैवं पराङ्मुखम् ॥ २२२ ॥
नयं प्रमाणयंतोऽमी यदवो बलिनोऽपि हि । प्रणश्य मथुरापुर्या द्वारकां नगरीं ययुः ॥ २२३ ॥
बिलादिव त्वया सर्पः कृष्ट आहत्य यष्टिना । आययौ संमुखीनस्ते कृष्णोऽसौ न पुनः स्वयम् ॥ २२४ ॥

कृष्ण-
जरासंघ-
युद्धम् ।

इयत्यपि गते स्वामिन्न योद्धुं युज्यतेऽमुना । अयुध्यमाने त्वय्येष स्वयं व्यावृत्य यास्यति ॥ २२५ ॥
इति तद्वचसा क्रुद्धो जरासंघोऽभ्यधादिति । यदुभिर्मायिभिर्नूनं भेदितोऽसि दुराशय ॥ २२६ ॥
यत्तु भेषयसि त्वं मां शत्रुं शंसन् वृथैव तत् । किं बिभेति हरिः फेरुफेत्कारैः[3] क्वापि दुर्मते ॥ २२७ ॥
करोमि भस्मसादेष गोपालानां बलं बलात् । धिक् ते मनोरथमिमं निवर्तनकरं रणात् ॥ २२८ ॥
अथोचे डिंभको मंत्री तद्भावसदृशं वचः । प्राप्तकालो रणो ह्येष न त्याज्यः स्वामिनाधुना ॥ २२९ ॥
संग्रामे संमुखीनानां वरं मृत्युर्यशस्करः । रणात् पराङ्मुखानां तु न जीवितमपि प्रभो ॥ २३० ॥



---

१ श्वानवत् छलमेव बलं ययोस्तौ । २ कोटिः संख्या येषां तादृशा महाराथ यस्मिंस्तस्मिन् । ३ फेरुः शृगालस्तस्य फेत्कारैः शब्दैः ।

चक्ररत्नमिवामेद्यं चक्रव्यूहं निजे बले । विरचय्य हनिष्यामः परानीकमनीकगम्[1] ॥ २३१ ॥
अथ हृष्टो जरासंघस्तमूचे साधु साध्विति । चक्रव्यूहाय चादिक्षत्सेनानाथान् महौजसः ॥ २३२ ॥
हंसको डिंभकोऽमात्यौ चमूनाथास्तथापरे । चक्रव्यूहं चक्रिरेऽथ शासनादर्धचक्रिणः ॥ २३३ ॥
चक्रे तत्र सहस्रारे[2] राजैकैकोऽध्यरं स्थितः । तेषां च राज्ञां प्रत्येकं शतमेकं च दंतिनाम् ॥ २३४ ॥
स्यंदनानां द्वे सहस्रे सहस्राः पंच वाजिनाम् । पदातीनां सहस्राणि षोडशामिततेजसाम् ॥ २३५ ॥
[3]प्रधेश्च परिधौ राज्ञां सपादषट्सहस्र्यभूत् । सहस्रैः पंचभिः साग्रैस्तत्रांतर्मगधेश्वरः ॥ २३६ ॥
गांधारसैन्धवबलं पृष्ठेऽभून्मगधेशितुः धार्तराष्ट्राः शतं ते च राज्ञो दक्षिणतोऽभवन् ॥ २३७ ॥
मध्यदेशनृपा वामे पुरोऽगणनरेश्वराः[4] । पंचाशच्छकटव्यूहाः संधौ संधौ प्रधेर्नृपाः ॥ २३८ ॥
अंतरांतरसंस्थाश्च गुल्मा[5] गुल्मांतराद्गणाः । व्यूहस्य बहिरप्यस्थुश्चित्रैर्व्यूहैर्महीभुजः ॥ २३९ ॥
अथ राजा जरासंघः सत्यसंधं महाभुजम् । नानासंग्रामविख्यातकौशलं कौशलेश्वरम् ॥ २४० ॥
हिरण्यनाभनामानं चक्रव्यूहस्य तस्य च । सेनानीत्वेऽभिषिषेच ययौ चास्तं दिवाकरः ॥ २४१ ॥
॥ युग्मम् ॥

१ अनीके युद्ध गतं स्थितं परानीकं शत्रुसैन्यं हनिष्याम इत्यन्वयः । २ सहस्रमरा यस्मिंस्तस्मिंश्चक्रे अरे इत्यध्यरं प्रत्यरं राजा स्थितः । ३ प्रधिश्चक्रनाभिस्तस्याः परिधौ वर्तुले । ४ असंख्यनृपाः अथवा गणनरेश्वरा इति पदं तत्र गणाश्चतुर्विधसेनास्तासामधिपाः । ५ गुल्माश्चतुर्विधसेनाः ।

चक्रव्यूहप्रतिद्वंद्वं निशायां यदवोऽपि हि । विदधुर्गरुडव्यूहं दुर्भेदमरिपार्थिवैः ॥ २४२ ॥
व्यूहस्याऽस्य कुमाराणामर्धकोटी महात्मनाम् । सीरपाणिशार्ङ्गपाणी स्थितौ तस्य तु मूर्धनि ॥ २४३ ॥
अक्रूरः कुमुदः पद्मः सारणो विजयी जयः । जरत्कुमारः सुमुखो दृढमुष्टिर्विदूरथः ॥ २४४ ॥
अनाधृष्टिर्दुर्मुखश्च वसुदेवसुता इमे । रथलक्षयुताः पृष्ठारक्षाः कंसद्विषोऽभवन् ॥ २४५ ॥
तेषां पृष्ठ चोग्रसेनो रथकोटीवृत्तोऽभवत् । तस्यापि पृष्ठरक्षत्वेऽभूवंश्चत्वार आत्मजाः ॥ २४६ ॥
सपुत्रं रक्षितुं [1]भोजं पृष्ठे तस्थुर्नृपा अमी । घरः सारणचंद्रौ च दुर्धरः सत्यकस्तथा ॥ २४७ ॥
आश्रित्य दक्षिणं पक्षं समुद्रविजयः स्वयम् । भ्रातृभिर्भ्रातृपुत्रैश्च सह तस्थौ महाभुजः ॥ २४८ ॥
महानेमिः सत्यनेमिर्दृढनेमिसुनेमिनौ । अरिष्टनेमिर्विजयसेनो मेघो महीजयः ॥ २४९ ॥
तेजःसेनो जयसेनस्तथा जयमहाद्युती । समुद्रविजयस्यैते कुमाराः पार्श्वतोऽभवन् ॥ २५० ॥
रथानां पंचविंशत्या लक्षैरन्येपि भूभुजः । समुद्रविजयस्यास्थुः पुत्रवत्पारिपार्श्वकाः ॥ २५१ ॥
आश्रित्य वामपक्षं तु तस्थू रामस्य सूनवः । युधिष्ठिरप्रभृतयः पांडवाश्चामितौजसः ॥ २५२ ॥
उल्मूको निषधः शत्रुदमनः प्रकृतिद्युतिः । सात्यकिः श्रीध्वजो देवानंद आनंदशांतनू ॥ २५३ ॥
शतधन्वा दशरथो ध्रुवश्च पृथुविप्रथू । महाधनुर्दढधन्वातिवीर्यो देवनंदनः ॥ २५४ ॥

कृष्ण-
जरासंध-
युद्धम् ।

॥ २७१ ॥

---

१ उग्रसेनम् ।

कृष्ण-
जरासंघ-
युद्धम् ।

रथानां पंचविंशत्या लक्षैः परिवृता इमे । पृष्ठे तस्थुः पांडवानां धार्तराष्ट्रवधोद्यताः ॥ २५५ ॥
पृष्ठे तेषामभूच्चंद्रयशाः सिंहलबर्बरौ । कांबोजः केरलश्चापि द्रविडोऽपि च भूपतिः ॥ २५६ ॥
षष्ट्या रथसहस्त्रैश्च तेषामपि च पृष्ठतः । महासेनपिता तस्थौ स्थैर्यंस्थामैकपर्वतः ॥ २५७ ॥
पक्षिणो रक्षणायास्थुर्भानुभामरभीरुकाः । असितः संजयो भानुर्धृष्णुः कंपितगौतमौ ॥ २५८ ॥
शत्रुंजयमहासेनौ गंभीरश्च बृहद्ध्वजः । वसुवर्मोदयश्चैव कृतवर्मा प्रसेनजित् ॥ २५९ ॥
दृढधर्मा च विक्रांतश्चंद्रवर्मा च पार्थिवः । इत्यभूद्गरुडव्यूहो गरुडध्वजनिर्मितः ॥ २६० ॥
भ्रातृस्नेहाद्युयुत्सुं च शक्रो विज्ञाय नेमिनम् । प्रैषीद्रथं मातलिना[1] जैत्रशास्त्रांचितं निजम् ॥ २६१ ॥
सूर्योदयमिवातन्वन् स रथो रत्नभासुरः । उपानीतो मातलिनालंचक्रेऽरिष्टनेमिना ॥ २६२ ॥
कृष्णाग्रजमनाधृष्टि समुद्रविजयः स्वयम् । अभ्यर्षिंचच्चमूपत्वे[2] पट्टबंधनपूर्वकम् ॥ २६३ ॥
जज्ञे जयजयारावः सकलेऽपि हरेर्बले । जरासंघबले चाभूत्प्रक्षोभः सर्वतोऽपि हि ॥ २६४ ॥
व्यूहयोरग्रसुभटैः प्रारेभे युद्धमुद्धतम् । अविस्फोटं प्रसर्पद्भिर्मिथो बद्धांचलैरिव ॥ २६५ ॥
चित्राण्युत्पेतुरस्त्राणि संफेटे[3] व्यूहयोर्द्वयोः । युगांतोद्भ्रांतयोः पूर्वापराब्ध्योरिव वीचयः ॥ २६६ ॥
द्वयोरपि हि सेनान्योरुभौ व्यूहौ परस्परम् । प्रहेलिकावन्नितरां दुर्भेदत्वं निजग्मतुः ॥ २६७ ॥

१ मातलिरिंद्रसारथिः । २ चमूं पोतीति चमूपः सेनापतिस्तस्य भावस्तत्त्वं तस्मिन् । ३ संगमे ।

चिरं युद्ध्वा जरासंघसैनिकैः स्वामिभक्तितः । दृढीयांसोऽप्यभज्यंत तार्क्ष्यव्यूहाग्रसैनिकाः ॥ २६८ ॥
आत्मेव तार्क्ष्यव्यूहस्य स्वयं तार्क्ष्यध्वजस्ततः । सैनिकांस्तान् स्थिरीचक्रे पताकं करमुत्क्षिपन् ॥ २६९ ॥
पक्षाविव महानेमिपार्थौ[1] दक्षिणवामगौ । चंचूरिवाग्रव्यूहस्यानाधृष्टिचुकुपुस्त्रयः ॥ २७० ॥
दध्मौ शंखं सिंहनादं महानेमिर्महाभुजः । बलाहकमनाधृष्टिर्देवदत्तं च फाल्गुनः[2] ॥ २७१ ॥
यदवोऽताडयंस्तुर्यकोटीस्तन्निदैरथ । अनुजग्मे शंखनादः शंखकैः शंखराजवत् ॥ २७२ ॥
शंखत्रयनिनादेन तूर्यनादेन तेन च । भटाः परबलेऽक्षुभ्यन्नक्रा इव महोदधौ ॥ २७३ ॥
नेम्यनाधृष्टिपार्थास्ते सेनान्यः शरवर्षिणः । चक्रमुर्विक्रमपराः कल्पांत इव सागराः ॥ २७४ ॥
नेमिसंधिषु राजनः शकटव्यूहसंस्थिताः । परिविदुद्रुवुस्तेषां दोर्वीर्यमसहिष्णवः ॥ २७५ ॥
चक्रव्यूहः स चाभंजि त्रिषु स्थानेषु तैस्त्रिभिः । वन्यद्विपैरिव परिणतै[3]र्गिरिनदीतटम् ॥ २७६ ॥
स्वयं विहितमार्गास्ते प्रवाहाः सरितामिव । चक्रव्यूहं प्रविविशुस्तदन्व[4]न्येऽपि सैनिकाः ॥ २७७ ॥
दुर्योधनो रौधिरश्च रुक्मी चेति नृपास्त्रयः । सैन्यान् संस्थापयंतस्तानुत्थितास्ते युयुत्सवः ॥ २७८ ॥
दुर्योधनोऽरुधत्पार्थमनाधृष्टिं तु रौधिरिः । रुक्मी पुनर्महानेमिं महारथनृपैर्वृताः ॥ २७९ ॥
द्वंद्वयुद्धमभूत्तेषां षण्णामपि परस्परम् । महारथानां चान्येषां तद्गृह्याणां सहस्रशः ॥ २८० ॥

१ पार्थोऽर्जुनः । २ अर्जुनः । ३ तिर्यग्दंतप्राहरस्तु गजः परिणतो मतः ईति हैमः । ४ तेषां पश्चातदनु ।



कृष्ण-
जरासंघ-
युद्धम् ।

वीरंमन्यं विब्रुवाणं रुक्मिणं तत्र दुर्मदम् । निरस्त्रं विरथं चक्रे महानेमिरमर्षणः ॥ २८१ ॥
रक्षार्थं रुक्मिणस्तत्र वध्यकोटिमुपेयुषः । निपेतुरंतरा शत्रुंतपाद्याः सप्त पार्थिवाः ॥ २८२ ॥
युगपद्वर्षतां तेषां सप्तानामपि सायकान् । चिक्षेप बाणैः शैवेयो[1] धनूंषि मृणालवत् ॥ २८३ ॥
शत्रुंतपश्चिरं युद्ध्वा शक्तिं चिक्षेप विद्विषे । जाज्वल्यमानां तां प्रेक्ष्य चुक्षुभुर्यदवोऽखिलाः ॥ २८४ ॥
तस्याः शक्तेर्मुखोद्भूता विविधायुधधारिणः । किंकराः क्रूरकर्माणोऽन्तरे पेतुः सहस्रशः ॥ २८५ ॥
अथोवाचारिष्टनेमिं मातलिस्तपसा ह्यमूम् । बलीन्द्रात् प्राप राजायं धरणादिव रावणः ॥ २८६ ॥
वज्रेण भेद्या तदियमित्युक्त्वा नेमिशासनात् । महानेमिशरे वज्रं स समाक्रमयद्द्रुतम् ॥ २८७ ॥



तं वज्रेषुं विमुच्याशु तां शक्तिं भुव्यपातयत् । तं नृपं विरथं व्यस्त्रं महानेमिश्चकार च ॥ २८८ ॥
षण्णां नृपाणामन्येषां चापान् समुद्रजो[2]ऽच्छिदत् । तदा रथांतरारुढो रुक्मी भूयोऽप्यढौकत ॥ २८९ ॥
शत्रुंतपाद्या रुक्मी च संभूयाष्टापि ते नृपाः । शैवेयेन[3] ययुधिरे धुरि मानवतां स्थिताः ॥ २९० ॥
यद्यद्धन्वाददे रुक्मी कुमारस्तत्तदच्छिदत् । धनूंषि विंशतिश्छिन्नान्येवं तस्य निरंतरम् ॥ २९१ ॥
गदां चिक्षेप कौबेरीं स महानेमये ततः । आग्नेयेनेषुणा तां च भस्मीचक्रे शिवात्मजः ॥ २९२ ॥
शरलक्षाणि वर्षंतं रुक्मी वैरोचनं शरम् । शैवेयाय प्रचिक्षेप पराक्षेपासहो युधि ॥ २९३ ॥



१ शिवादेवी पुत्रो नेमिः । २ समुद्रविजयपुत्रो नेमिः । ३ शैवेयः शिवापुत्र नेमिस्तेन ।

तं माहेन्द्रेण बाणेन महानमिर्न्यवारयत् । रुक्मिणं ताडयामास भाले चान्येन पत्रिणा[1] ॥ २९४ ॥
घातेन विधुरं तेन वेणुदारी जहार तम् । दुद्रुवुः सप्त भूपालास्ते महानेमिनो द्रुतम् ॥ २९५ ॥
द्रुमं[2] समुद्रविजयः स्तिमितो भद्रकं नृपम् । वसुसेनमथाक्षोभ्योऽजैषीदक्षोभ्यविक्रमः ॥ २९६ ॥
अमित्रं[3] पुरिमित्राख्यं सागरश्चावधीद्युधि । धृष्टद्युम्नमभांक्षीच्च हिमवान् हिमवत् स्थिरः ॥ २९७ ॥
धरणेन्द्र इव स्थाम्ना धरणोऽन्वष्टकं नृपम् । अवधीदभिचंद्रोऽपि शतधन्वानमुद्धतम् ॥ २९८ ॥
द्रुपदं पूरणोऽभांक्षीत् कुंतिभोजं सुनेम्यपि । महापद्मं सत्यनेमिः श्रीदेवं दृढनेम्यपि ॥ २९९ ॥
एवं च यदुवीरैस्तैर्भग्नाः परनृपा ययुः । हिरण्यनाभं शरणं सेनानीत्वे प्रतिष्ठितम् ॥ ३०० ॥

कृष्ण-
जरासंघ-
युद्धम् ।

इतो भीमार्जुनौ वीरौ रामपुत्राश्च दोर्भृतः । व्यद्रावयन् धार्तराष्ट्रान् धार्तराष्ट्रान्[4] धना इव ॥ ३०१ ॥
अंधकारो दिशां जज्ञे पतद्भिः पार्थपत्रिभिः । घोरैर्गांडीवनिर्घोषैर्विधुरं विश्वमभ्यभूत् ॥ ३०२ ॥
आकर्षतः संदधतोऽमुंचतश्च शरान् रयात् । नालक्ष्यतांतरं तस्यानिमिषैरपि[5] खस्थितैः ॥ ३०३ ॥
अथ दुर्योधनः कासिस्त्रिगर्तः सबलोऽपि च । कपोतो रोमराजश्च चित्रसेनो जयद्रथः ॥ ३०४ ॥
सौवीरो जयसेनश्च शूरसेनोऽथ सोमकः । संभूयायोधयत्पार्थमपास्तक्षत्रियव्रताः ॥ ३०५ ॥
सहदेवः शकुनिना भीमो दुःशासनेन च । ऊलूकेन च नकुलः शल्येन च युधिष्ठिरः ॥ ३०६ ॥



---

१ बाणेन । २ द्रुमनामानं नृपम् । ३ शत्रुम् । ४ धार्तराष्ट्रो हंसविशेषः । ५ अनिमिषैर्देवैः ।

कृष्ण-
जरासंघ-
युद्धम् ।

दुर्मर्षणादिभिः षड्भिद्रौपदेयाः ससैनिकाः । शेषैर्नृपैः पुना रामपुत्रा युयुधिरेतराम् ॥ ३०७ ॥
राज्ञां दुर्योधनादीनां युगपद्वर्षतां शरान् । शरैः किरीटी[1] चिच्छेद नलिनीनाललीलया ॥ ३०८ ॥
अवधीत्सारथिं रथ्यानभांक्षीच्च रथं शरैः । दुर्योधनस्य गांडीवी[2] वर्म चापातयद्भुवि ॥ ३०९ ॥
अंगशेषो धार्तराष्ट्रो विलक्षः पत्तिमात्रवत् । वेगाद्ययौ शकुनिवदुत्पत्य शकुने रथम् ॥ ३१० ॥
दशापि कासिप्रमुखानिषुवृष्ट्या धनंजयः[3] । उपदुद्राव करकवृष्ट्यांबुद इव द्विपान् ॥ ३११ ॥
चकर्त शल्यो बाणेन युधिष्ठिररथध्वजम् । युधिष्ठिरोऽपि शल्यस्य सशरं चापमच्छिदत् ॥ ३१२ ॥
शल्योऽन्यधनुरारोप्य कंकपत्रैर्युधिष्ठिरम् । तिरयामास मेघर्तुर्मेघैरिव दिवाकरम् ॥ ३१३ ॥
ततो मुमोच कौतेयः शक्तिं शल्याय दुःसहाम् । अकालविद्युतमिव विश्वप्रक्षोभकारिणीम् ॥ ३१४ ॥
परबाणैरस्खलितो वेगाद्गोधामिवाशनिः[4] । निपत्य सावधीच्छल्यं नेशुश्च बहवो नृपाः ॥ ३१५ ॥
वृकोदरोऽपि[5] संक्रुद्धो दुर्योधनसहोदरम् । दुरोदर[6]च्छद्मजयं स्मारयन् लीलयावधीत् ॥ ३१६ ॥
मायायुद्धैरस्त्रयुद्धैर्गांधारेणातियोधितः । चिक्षेप सहदेवोऽपि जीवितांतकरं शरम् ॥ ३१७ ॥
शकुनौ तमसंप्राप्तमेव बाणं सुयोधनः । क्षत्राचारं विमुच्यैव चिच्छेद निशितेषुणा ॥ ३१८ ॥
माद्रेयस्तमुवाचोच्चैर्दुर्योधन रणेऽपि ते । छलं द्यूत इव व्यक्तमशक्तानां ह्यदो बलम् ॥ ३१९ ॥



---

१ अर्जुनः । २ अर्जुनः । ३ अर्जुनः । ४ वज्रम् । ५ भीमः । ६ द्यूतच्छद्मजयम् ।

कृष्ण–
जरासंघ–
युद्धम् ।

साधु वां युगपत्प्राप्तौ मायिनौ भूरि[1]मायिवत् । सममेव हनिष्यामि युवयोर्विरहोऽस्तु मा ॥ ३२० ॥
इत्युक्त्वा पत्रिभिस्तीक्ष्णैः सहदेवः सुयो[2]धनम् । तिरोदधे शरत्काल इव कीरैर्वनस्थलीम् ॥ ३२१ ॥
दुर्योधनोऽपि [3]माद्रेयमुपदुद्राव पत्रिभिः । चिच्छेद च धनुर्दंडं मूलं रणमहातरोः ॥ ३२२ ॥
दुर्योधनो मुमुचोच्चैरमोघं मंत्रसत्कृतम् । सहदेवविनाशाय की[4]नाशमिव सायकम् ॥ ३२३ ॥
गरुडनेषुणेषुं तमंतरापि धनंजयः । निवारयामास समं सुयोधनजयाशया ॥ ३२४ ॥
धनुः शकुनिरप्युच्चैरास्फाल्य शरवृष्टिभिः । माद्रयमद्रिमंभोद इव विष्वगुदानशे ॥ ३२५ ॥
शकुनः सहदवोऽपि रथं रथ्यान् ससारथीन् । ममंथ तच्छिरश्चाथ चकर्त फलवत्तरोः ॥ ३२६ ॥
उलूकं नकुलोप्यस्त्रै[5]रुस्त्रैरिव दिवाकरः । द्रुतं विद्रावयामास विरथीकृत्य हेलया ॥ ३२७ ॥
दुर्मर्षणरथं सोऽगात्ते च दुर्मर्षणादयः । विद्राविताः षडपि हि द्रौपदेयैः ससैनिकैः ॥ ३२८ ॥
दुर्योधनं शिश्रियुस्ते सोऽपि दुर्योधनो नृपैः । संभूय कासिप्रमुखैर्धनंजयमयोधयत् ॥ ३२९ ॥
रामपुत्रैर्वृतः पार्थः सुरैरिव पुरन्दरः । दारयामास विशिखैश्चित्रैः परवरुथिनीम् ॥ ३३० ॥
प्राणान् दूर्योधनस्येव पृथग्भूतान् जयद्रथम् । पार्थोऽवधीच्छरैरंधीकुर्वन् सर्वानपि द्विषः ॥ ३३१ ॥
कर्णोऽथाकर्णमाकृष्ट[6]कालपृष्ठोऽधरं दशन् । वी[7]रपृष्टोऽभ्यधाविष्ट हंतुक्रामः किरीटिनम् ॥ ३३२ ॥

१ श्रृगालवत् । २ दुर्योधनम् । ३ सहदेवम् । ४ यममिव । ५ किरणैः । ६ कालपृष्ठं नाम धनुः । ७ वीरः पृष्टो येन सः कर्णविशेणम् ।

चिरं चिक्रीडतुर्वीरावक्षैरिव[1] शिलीमुखैः[2] । कर्णार्जुनौ वीक्ष्यमाणौ देवैरपि कुतूहलात् ॥ ३३३ ॥
अनेकशो भग्नरथः क्षीणान्यस्त्रोऽसिमात्रभृत् । कर्णः किरीटिना जघ्ने कथंचिद्वीरकुञ्जरः ॥ ३३४ ॥
सिंहनादं व्यधाद्भीमः शंखं दध्मौ च फाल्गुनः । जगर्जुः पार्थसैन्याश्च सर्वेपि जितकासिनः ॥ ३३५ ॥
दुर्योधनोऽथ क्रोधान्धो महासिन्धुरसेनया । भीमसेनं हन्तुमना मानी द्रुतमधावत ॥ ३३६ ॥
रथं रथेनाश्वमश्वेनेभं चेभेन मारुतिः[3] । आस्फाल्यास्फाल्य निःशेषीचक्रे दौर्योधनं बलम् ॥ ३३७ ॥
तैरेवं युध्यमानस्य भुञ्जानस्येव मोदकैः । दोष्मतो भीमसेनस्य न हि श्रद्धाप्यपूर्यत ॥ ३३८ ॥
स्वयं दुर्योधनो वीरो निजानाश्वासयन् द्रुतम् । ढुढौके भीमसेनाय कुंजरायेव कुञ्जरः ॥ ३३९ ॥
पर्जन्याविव गर्जन्तौ क्रुद्धौ केसरिणाविव । युयुधाते उभौ वीरौ विविधैरायुधैश्चिरम् ॥ ३४० ॥
द्यूतवैरं स्मरन् भीम उद्यम्य महतीं गदाम् । दुर्योधनं निष्पिपेष सरथ्यरथसारथिम् ॥ ३४१ ॥
दुर्योधने विनिहते निर्नाथास्तस्य सैनिकाः । हिरण्यनाभं शरणं सेनान्यं प्रतिपेदिरे ॥ ३४२ ॥
अनाधृष्टिं च सेनान्यं वामदक्षिणपक्षगाः । पांडवा यदवश्चापि सर्वेऽपि परिवव्रिरे ॥ ३४३ ॥
पोताग्रमिव निर्यामः सेनामुखमधिश्रितः । क्रुद्धो हिरण्यनाभोऽथ दधावे विब्रुवन् यदन् ॥ ३४४ ॥
अभिचंद्रस्तमित्यूचे विटवद्विब्रवीषि किम् । क्षत्रिया हि न वाक्छूराः किं तु शूराः पराक्रमात् ॥ ३४५ ॥

१ अक्षैः पाशैः । २ बाणैः । ३ भीमसेनः ।



कृष्ण-
जरासंघ-
युद्धम् ।

कृष्ण–
जरासंघ–
युद्धम् ।

हिरण्योऽथाभिचंद्राय चिक्षेप विशिखान् शितान् । तांश्चिच्छेदांतरा पार्थो मेघधारा इवानिलः ॥ ३४६ ॥
स चिक्षेपार्जुनायापि दुर्वारां शरधोरणीम् । तमापत्यांतरा भीमो गदयापातयद्रथात् ॥ ३४७ ॥
स ह्रीणः पुनरारुह्य रथं दष्टाधरः क्रुधा । यदुसैन्ये समग्रेऽपि ववर्ष विशिखान् शितान् ॥ ३४८ ॥
न स सादी निषादी वा रथी पत्तिश्च यः शरैः । न तेन प्रहतस्तत्र यदुसैन्ये महत्यपि ॥ ३४९ ॥
जयसेनोऽथ संक्रुद्धः समुद्रविजयात्मजः । योद्धुं हिरण्यनाभेनाढौकिष्टाकृष्टकार्मुकः ॥ ३५० ॥
जामेय[1] यमवक्रं किमायासीरिति विब्रुवन् । हिरण्यनाभो न्यवधीज्जयसेनस्य सारथिम् ॥ ३५१ ॥
जयसेनोऽपि तस्याशु कवचं कार्मुकं ध्वजम् । चकर्त सारथिमथ निनाय यमवेश्मनि ॥ ३५२ ॥
क्रुद्धो हिरण्यनाभोऽपि मर्माविद्भिः शिलीमुखैः । प्रहृत्य दशभिस्तीक्ष्णैर्जयसेनममारयत् ॥ ३५३ ॥
महीजयो जयसेनभ्रातोत्तीर्य रथादथ । खड्गखेटक[2]भृद्वीरो हिरण्यं प्रत्यधावत ॥ ३५४ ॥
दूरादपि क्षुरप्रेण हिरण्यस्तच्छिरोऽहरत् । भ्रातृद्वयवधक्रुद्धोऽनाधृष्टिस्तमयोधयत् ॥ ३५५ ॥
अन्येऽपि हि जरासंघनृपा भीमार्जुनादिभिः । यदुभिश्च समं द्वंद्वेनायुध्यंत पृथक् पृथक् ॥ ३५६ ॥
ज्योतिष्काणामिव पतिः प्राग्ज्योतिषमहीपतिः । भगदत्तो महानेमिमभ्यधावद्गजस्थितः ॥ ३५७ ॥
सोऽवोचन्नास्मि ते भ्रातृश्यालो रुक्मी न वाश्मकः । किं त्वहं नारकिवैरिकृतांतस्तदपेहि भोः ॥ ३५८ ॥

१ हे भगिनीपुत्र । २ खेटको भाषायां "ढाल" इति प्रसिद्धः ।

इत्युक्त्वा प्रेरयामास स जवेन मतंगजम् । महानेमिरथं सूतोऽभ्रामयन्मंडलेन च ॥ ३५९ ॥
तद्गजं तलपादेषु महानेमिः शरैरहन् । गजः सभगदत्तोऽपि जर्जरांघ्रिः पपात च ॥ ३६० ॥
नासि रुक्मी हसित्वेति धनुःकोट्या च तं स्पृशन् । वोरोऽमुंचन्महानेमिः प्रकृत्या करुणापरः ॥ ३६१ ॥
भूरिश्रवाः सात्यकिश्च युयुधाते इतश्च तौ । जरासंघवासुदेवजयश्रीकांक्षिणावुभौ ॥ ३६२ ॥
तौ दिव्यैरायसैश्चास्त्रैर्दंतैरिव सुरद्विपौ । युध्यमानौ समभूतां जगत्त्रयभयंकरौ ॥ ३६३ ॥
चिरादुभौ च क्षीणास्त्रौ क्षीणतोयाविवांबुदौ । दोर्दंडाभ्यामयुध्येतां मुष्टामुष्टिविधायिनौ ॥ ३६४ ॥
तावकंपयतां भूमिं पतनोत्पतनैर्दढैः । भुजास्फोटरवैश्चोभौ दिशोऽस्फोटयतामिव ॥ ३६५ ॥
बद्ध्वा च भूरिश्रवसं योक्त्रबंधेन सात्यकिः । वालयित्वा गलं पृष्ठे जानुनाक्रम्य चावधीत् ॥ ३६६ ॥
इतो हिरण्यनाभस्यानाधृष्टिरखंडयत् । स्फुलिंगजालैरुद्यद्भिरुद्योतितदिगंतरम् ॥ ३६७ ॥
तमापतंतं विशिखैरनाधृष्टिरखंडयत् । स्फलिंगजालैरुधद्भिरुधोतितदिगंतरम् ॥ ३६८ ॥
अनाधृष्टरंतचिं[1]की रथादुत्तीर्य वेगवान् । हिरण्यनाभश्चर्मासिपाणिः भभ्द्र्यामधावत ॥ ३६९ ॥
कृष्णाग्रजोऽपि चोत्तीर्य खड्गखेटकभृद्द्रुतम् । चरन् विचित्रचारीभिः सुचिरं तमखेदयत् ॥ ३७० ॥
अनाधृष्टिर्लधुहस्तश्छलं लब्ध्वासिनाच्छिदत् । वपुर्हिरण्यनाभस्य ब्रह्मसूत्रेण दारुवत् ॥ ३७१ ॥

१ नाशंचिकीर्षुः ।



कृष्ण-
जरासंघ-
युद्धम् ।

जरासंधमथोपेयुः शरणं तन्महीभुजः । पश्चिमाब्धावमज्जच्च तदानीमुष्णदीधितिः ॥ ३७२ ॥
ययौ कृष्णमनाधृष्टिः पूजितो यदुपांडवैः । कृष्णाज्ञया च सर्वेऽपि स्वं स्वं शिबिरमभ्ययुः ॥ ३७३ ॥
अथ राजा जरासंधं मंत्रयित्वा तदैव हि । अभ्यर्षिंचच्चमूपत्वे शिशुपालं महाबलम् ॥ ३७४ ॥
यदवो गरुडव्यूहं गरुडध्वजशासनात् । विधाय प्रातरातस्थुस्तथैव समरावनिम्[1] ॥ ३७५ ॥
तथैव शिशुपालोऽपि चक्रव्यूहं विनिर्ममे । ततो राजा जरासंधः शिश्राय समरावनिम् ॥ ३७६ ॥
जरासंधेन पृष्टोऽथ हंसकः परसैनिकान् । अंगुल्या दर्शयन्नामग्राहमित्याख्यदुच्चकैः ॥ ३७७ ॥
कृष्णाश्वेन रथेनायमनाधृष्टिर्गजध्वजः । नीलाश्वेन रथेनैष पांडुपुत्रो युधिष्ठिरः ॥ ३७८ ॥
धनंजयः पुनरयं रथेन श्वेतवाजिना । नीलोत्पलदलाभाश्वरथस्त्वेष वृषोदरः ॥ ३७९ ॥
समुद्रविजयः स्वर्णवर्णाश्वोऽयं हरिध्वजः । अयं तु शुक्रवर्णाश्वोऽरिष्टनेमिर्वृषध्वजः ॥ ३८० ॥
अयं च शबलैरश्वैरक्रूरः कदलीध्वजः । एष तित्तिरकल्माषैः सात्यकिस्तु तुरंगमैः ॥ ३८१ ॥
महानेमिकुमारोऽयं कुमुदाभैस्तुरंगमैः । उग्रसेनः पुनरयं शुक्रतुंडप्रभैर्हयैः ॥ ३८२ ॥
जरत्कुमारः कनकपृष्ठाश्वोऽयं मृगध्वजः । कांबोजैर्वाजिभिश्चायं सिंहलः श्लक्ष्णरोमसूः ॥ ३८३ ॥
मेरुः कपिलरक्ताश्वः शिशुमारध्वजस्त्वसौ । पद्माभैर्वाजिभिश्चैष राजा पद्मरथपुरः ॥ ३८४ ॥

१ रणभूमिम् ।



कृष्ण–
जरासंघ–
युद्धम् ।

पारापतप्रभाश्वोऽयं सारणः पुष्करध्वजः । पंचपुंड्रैर्हयैरेष कुंभकेतुर्विदूरथः ॥ ३८५ ॥
सैन्यांतर्धवलैरश्वैः कृष्णोऽयं गरुडध्वजः । अंतर्व्योमबलाकाभिः[1] प्रावृषेण्य इवांबुदः ॥ ३८६ ॥
अस्य दक्षिणपक्षस्थो रिष्टवर्णैस्तुरंगमैः । तालध्वजो रौहिणेयः कैलास इव जंगमः ॥ ३८७ ॥
भूयांसो यदवोऽन्येऽपि नानाहयरथध्वजाः । महारथाः सांप्रतं ते शक्याः कथयितुं न हि ॥ ३८८ ॥
तच्च श्रुत्वा जरासंधः क्रोधादास्फालयद्धनुः । रामकृष्णौ प्रति रथं प्रेरयामास वेगतः ॥ ३८९ ॥
युवराजो जरासंधतनयो यवनः क्रुधा । वसुदेवसुतान् हंतुमक्रूरादीनधावत ॥ ३९० ॥
शरभस्येव पंचास्यैः सह तैरभवद्रणः । यवनस्य महाबाहोः संहार इव भीषणः ॥ ३९१ ॥
रामानुजः सारणोऽथाद्वैतसारो रुरोध तम् । विचित्रपत्रिभिवर्षन् वर्षाभव इवांबुदः ॥ ३९२ ॥

कृष्ण-
जरासंध-
युद्धम् ।

मलयेनेव तुंगेन मलयाख्येन दंतिना । यवनः सारणरथं सह रथ्यैरभंजयत् ॥ ३९३ ॥
गजे परिणते तस्मिन् यवनस्य शिरोऽसिना । चिच्छेद सारणो वातांदोलितद्रोः फलं यथा ॥ ३९४ ॥
तस्येभस्योत्तिष्ठतश्च हस्तदंतं चकर्त सः । प्रावृषीव शिखिकुलं कृष्णसैन्यं ननर्त च ॥ ३९५ ॥
दृष्ट्वा सुतवधं क्रुद्धो जरासंधो धनुर्धरः । यदून् हंतुं प्रववृते मृगारातिर्मृगानिव ॥ ३९६ ॥
आनन्दशत्रुदमनौ नंदनः श्रीध्वजो ध्रुवः । देवानन्दश्चारुदत्तः पीठश्च हरिषेणकः ॥ ३९७ ॥



१ आकाशमध्ये ।

कृष्ण-
जरासंघ-
युद्धम् ।

नरदेवो बलस्यैते सुता दश रणास्यगाः[1] । अजा इव क्रतुमुखे जरासंधेन जघ्निरे ॥ ३९८ ॥
कृष्णसेना पलायिष्ट कुमारवधदर्शनात् । निघ्नन् गोत्रामिव[2] व्याघ्रोऽन्वयासीत्तां च मागधः[3] ॥ ३९९ ॥
शिशुपालोऽथ सेनानीर्हसन् कृष्णमवोचत । न ह्येतद्गोकुलं कृष्ण क्षत्रियाणां रणो ह्ययम् ॥ ४०० ॥
कृष्णोऽप्यूचे गच्छ राजन् गम्यं पश्चादपि त्वया । समरे रौक्मिणेऽप्यस्था माद्रीमातः[4] कियच्चिरम् ॥ ४०१ ॥
मर्माविधा शरेणेव विद्धो हरिगिरा तया । चेदिराड् धनुरास्फाल्य नाराचानमुचच्छितान् ॥ ४०२ ॥
हरिस्तस्याच्छिदद्बाणैः कार्मुकं कवचं रथम् । असिमाकृष्य सोऽधावदुद्धूम इव पावकः ॥ ४०३ ॥
खड्गं च मुकुटं चाथ मूर्धानं च हरिः क्रमात् । चिच्छेद चेदिराजस्य विब्रुवाणस्य दुर्मतेः ॥ ४०४ ॥
शिशुपालवधक्रुद्धः कृतांत इव भीषणः । जरासंधः समं पुत्रै राजभिश्चाभ्यधावत ॥ ४०५ ॥
ऊचे चैवं यदूनुच्चैर्मा म्रियध्वं मुधैव रे । तावर्पयत गोपालौ क्षतं नाद्यापि किंचन ॥ ४०६ ॥
यदवस्तद्गिरा क्रुद्धा दंडाघृष्टा इवोरगाः । पूत्कुर्वंतोऽभ्यधावन्त विविधायुधवर्षिणः ॥ ४०७ ॥
एकोऽप्यनेकीभूयेव जरासंधः समंततः । यदुसैन्यान् शरैर्घोरैर्विव्याध व्याधवन्मृगान् ॥ ४०८ ॥
न पत्तयो न रथिनो न वा सादिनिषादि[5] च । अशकन् पुरतः स्थातुं जरासंधस्य योधिनः ॥ ४०९ ॥



१ रणमुखस्थिताः । २ गोसमूहम् । ३ मगधानां राजा मागधो जरासंधः । ४ माद्री माता यस्य सः तत्संबोधनम् ।
५ सादिनश्च निषादिनश्च तेषां समाहारः ।

कृष्ण–
जरासंघ–
युद्धम् ।

वातोद्धूतं तूलमिव यदुसैन्यमशेषतः । जरासंधशरैर्दूनं विदुद्राव दिशो दिशि ।। ४१० ।।
जरासंधः [1]कासरवद्यदुसैन्यमहासरः । जगाहे परितस्तत्र भेकत्वं यदवो ययुः ।। ४११ ।।
जरासंधसुता अष्टाविंशतिर्दृग्विषा इव । विक्षिपंतः शस्त्रविषं रामं समुपदुद्रुवुः ।। ४१२ ।।
एकोनसप्ततिश्चान्ये जरासंधस्य सूनवः । जनार्दनं जिघांसंतो रुरुधुर्दानवा इव ।। ४१३ ।।
तैः समं ववृते घोरः समरो रामकृष्णयोः । मिथोऽस्त्रच्छेदसंभूतस्फुलिंगकणवर्षणः ।। ४१४ ।।
रामोऽष्टाविंशतिमपि ताञ्जरासंधनंदनान् । सीरेणाकृष्य मुशलेनापिषत्तंडुलानिव ।। ४१५ ।।
अद्याप्युपेक्षितो हंति गोपोऽयमिति विब्रुवन् । जरासंधो न्यहन्रामं गदया वज्रकल्पया ।। ४१६ ।।
ववाम रुधिरं रामो गदाघातेन तेन तु । यदुसैन्ये समग्रे च जज्ञे हाहारवो महान् ।। ४१७ ।।
प्रजिहीर्षुं पुना रामे जरासंधमयोधयत् । अंतरापत्य कौंतेयः [2]कनिष्ठः श्वेतवाहनः ।। ४१८ ।।
प्रेक्ष्य रामस्य वैधुर्यं क्रुद्धः कृष्णो धुताधरः । पुरस्थानवधी[3]ज्जारासंधानेकोनसप्ततिम् ।। ४१९ ।।
मरिष्यत्येव रामोऽयं किं हतेन किरीटिना । कृष्णं हन्मीति तमभिदधावे मगधाधिपः ।। ४२० ।।
कृष्णोऽपि हत एवेति सर्वत्राप्यभवद्ध्वनिः । अत्रांतरेऽरिष्टनेमिमित्यवोचत मातलिः ।। ४२१ ।।
कलभः शरभस्येव जरासंधः कियानयम् । भुवनत्रयनाथस्य श्रीनेमे भवतः पुरः ।। ४२२ ।।



---

१ महिषवत् । २ अर्जुनः । ३ जरासंधपुत्रान् ।

अयादवं करोत्यद्य त्वया ह्ययमुपेक्षितः । तद्दर्शय जगन्नाथ मनाग् लीलायितं निजम् ॥ ४२३ ॥
यद्यप्याजन्मविमुखः सावद्यात् कर्मणः प्रभुः । तथापि द्विषदाक्रांतं नोपेक्ष्यं कुलमात्मनः ॥ ४२४ ॥
तेनेत्युक्तो विना कोपं नेमिरादाय पाणिना । दध्मौ पौरंदरं शंखमतिपर्जन्यनिःस्वनम् ॥ ४२५ ॥
तद्ध्वानै रोदसीकुक्षिंभरिभिश्चुक्षुभुः परे । यदुसैन्यं पुनः स्वस्थीबभूव समरक्षमम् ॥ ४२६ ॥
अलातचक्रवन्नेमेराज्ञया मातली रथम् । भ्रमयामास संग्रामे सागरावर्तसंनिभम् ॥ ४२७ ॥
आकृष्टाखंडलधनुर्नवांभोद इव प्रभुः । ववर्ष शरधाराभिः परितस्त्रासयन्नरीन् ॥ ४२८ ॥
ध्वजांश्चिच्छेद केषांचित् केषांचित् कार्मुकाणि च । रथानभांक्षीत् केषांचित्केषांचिन्मुकुटान् प्रभुः ॥ ४२९ ॥

कृष्ण–
जरासंघ–
युद्धम् ।

दूरे प्रहारवार्ता तु न वीक्षितुमपि क्षमाः । बभूवुः परसुभटाः कल्पांतार्कप्रभं प्रभुम् ॥ ४३० ॥
अभांक्षीत् क्ष्माभुजां लक्षं स्वाम्येकोऽपि किरीटिनाम् । उद्भ्रांतस्य महांभोधेः सानुमंतो[1]ऽपि के पुरः ॥ ४३१ ॥
प्रतिविष्णुर्विष्णुनैव वध्य इत्यनुपालयन् । स्वामी त्रैलोक्यनाथोऽपि जरासंधं जघान न ॥ ४३२ ॥
परसैन्यानि रुद्ध्वास्थाच्छ्रीनेमिर्भ्रमयन् रथम् । लब्धोत्साहा युयुधिरे भूयोऽपि यदुसैन्यकाः ॥ ४३३ ॥
अत्रांतरे पांडुपुत्रैः सिंहैरिव कुरंगकाः । अवशिष्टा धार्तराष्ट्रा निजवैरान्निजघ्निरे ॥ ४३४ ॥
स्वस्थीभूतो बलदेवोऽप्युदस्तायोग्रलांगलः । अनेकशो योधयित्वा जघान परसैनिकान् ॥ ४३५ ॥



---

१ पर्वताः ।

इतश्च कृष्णमवदज्जरासंध इयच्चिरम् । जीवितो माययैवासि भो गोपाल शृगालवत् ॥ ४३६ ॥
माययैव हतः कंसो हतः कालोऽपि मायया । त्वया ह्यशिक्षितास्त्रेण समरः क्रियते न हि ॥ ४३७ ॥
तव प्राणैः सहैवाद्य माया पर्यंतयाम्यरे । एषोऽद्य जीवयशसः प्रतिज्ञां पूरयामि च ॥ ४३८ ॥
स्मित्वा कृष्णोऽब्रवीद्राजन्नित्थं निर्मिथ्यमात्थ[1] भोः । ईदृक्षोऽस्मि परं स्वस्य दर्श्यतां शिक्षितास्त्रता ॥ ४३९ ॥
नाहं स्वश्लाघनस्त्वद्वदेकमाख्यामि किं त्विदम् । पूरिष्यते त्वद्दुहितुः प्रतिज्ञाग्निप्रवेशनात् ॥ ४४० ॥
इति विष्णुगिरा क्रुद्धो जरासंधोऽमुचच्छरान् । विकर्तनस्तमांसीव[2] कृष्णोऽपि विचकर्त तान् ॥ ४४१ ॥
उभावपि ससंरंभौ शरभाविव धन्विनौ । अयुध्येतां धनुर्ध्वानैर्ध्वनयंतौ दिशोऽखिलाः ॥ ४४२ ॥
तयोः समरसंमर्दाच्चुक्षुभुर्जलराशयः । वित्रेसुः खेचरा व्योम्नि गिरयश्च चकंपिरे ॥ ४४३ ॥
गतागतं तद्रथयोर्दृढयोः शैलयोरिव । असहिष्णुर्मही सर्वंसहत्वममुचत् क्षणात् ॥ ४४४ ॥
दैवतैर्दैवतान्यस्त्राण्यायसैरायसानि तु । प्रत्यहन्मगधेशस्य लीलयैव जनार्दनः ॥ ४४५ ॥
जाते सर्वास्त्रवैफल्ये वैलक्ष्यामर्षपूरितः । चक्रं सस्मार दुर्वारमन्यास्त्रैर्मगधेश्वरः ॥ ४४६ ॥
चक्रं तदागतं सद्यो भ्रमयित्वा करेण खे । कृष्णाय जयतृष्णावान् कोपांधो मागधोऽमुचत् ॥ ४४७ ॥
चक्रे तत्रापतत्युच्चैस्त्रेसुः खे खेचरा अपि । चुक्षुभुः कृष्णसैन्यानि लब्धदैन्यानि सर्वतः ॥ ४४८ ॥

१ सत्यम् । २ सूर्यः ।



कृष्ण-
जरासंघ-
युद्धम् ।

तच्च स्खलयितुं कृष्णो रामः पञ्चापि पांडवाः । महारथाश्चापरेऽपि स्वान्यस्त्राणि प्रचिक्षिपुः ॥ ४४९ ॥
तैरस्खलितमुत्पूरसिंधुस्रोत इव द्रुमैः । एत्य तुंबेन तच्चक्रं कृष्णं वक्षस्यताडयत् ॥ ४५० ॥
भेदितं भेदनी[1]त्येव तच्चक्रं पार्श्वतः स्थितम् । आददे पाणिना कृष्ण स्वं प्रतापमिवोद्यतम् ॥ ४५१ ॥
नवमो वासुदेवोऽयमुत्पन्न इति घोषिणः । गंधांबुकुसुमवृष्टिं कृष्णे व्योम्नोऽमुचत्सुराः ॥ ४५२ ॥
कृष्णोऽपि जातकारुण्यो बभाषे मगधाधिपम् । एषापि मम किं माया विद्ध्यद्यापि गृहे व्रज ॥ ४५३ ॥
ममाज्ञां प्रतिपद्यस्व पुनरेधस्व संपदा । मुंच मानं दुर्विपाकं जीवाद्यापि जरन्नपि ॥ ४५४ ॥
ममैतदुल्मुकप्रायं मयैव चिरलालितम् । चक्रं मुंचसि तन्मुंचेत्युवाच मगधेश्वरः ॥ ४५५ ॥
जरासंधाय तच्चक्रं मुमोचाथ जनार्दनः । परेषामेव शस्त्राणि स्वकानि स्युर्महात्मनाम् ॥ ४५६ ॥



तच्चक्र[2]कृत्तमपतन्मगधेश्वरस्य पृथ्व्यां शिरः स तु जगाम च[3]तुर्थपृथ्व्याम् ।
कृष्णस्य चोपरि सुराः सुरवृक्षपुष्पवृष्टिं व्यधुर्जय जयेति वदंत उच्चैः ॥ ४५७ ॥

✤ ✤ ✤

**इत्याचार्यश्रीहेमचंद्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्येऽष्टमे पर्वणि शांबप्रद्युम्नविवाहजरासंधवधकीर्तनो नाम सप्तमः सर्गः ।**



१ भेदनीतिः सामाद्युपायेषु तृतीयोपायः । २ तेन चक्रेण कृत्तं छिन्नम् । ३ चतुर्थनरके ।

# अष्टमः सर्गः ।

कृष्णस्य त्रिखण्डे–श्वरत्वम् ।

अथ रोधान्नेमिनाथोऽमुञ्चत् कृष्णारिपार्थिवान् । तं नमस्कृत्य तेऽप्येवं रचिताञ्जलयोऽवदन् ॥ १ ॥
तदैव हि जरासंधो वयं च वञ्चिताः प्रभो । यदैव त्वं यदुकुलेऽवातारीस्त्रिजगत्प्रभो ॥ २ ॥
एकोऽपि विष्णुर्हन्तैव प्रतिविष्णोर्न संशयः । किं पुनर्यस्य नाथ त्वं सहायो बान्धवोऽपि च ॥ ३ ॥
एतन्न ज्ञातमस्माभिर्जरासन्धेन चाग्रतः । तदकृष्महि कर्मेदृगीदृशी भवितव्यता ॥ ४ ॥
अद्य त्वां शरणं प्राप्ताः सर्वेषां शिवमस्तु नः । खलूक्त्वा[1] यदि वाधित्वत्प्रणतानां स्वतः शिवम्[2] ॥ ५ ॥
इत्युक्त्वा तैः स्थितैर्भूपैः सह नेमिर्ययौ हरिम् । अवतीर्य रथाद्गाढं हरिरप्यालिलिंग तम् ॥ ६ ॥
हरिर्नेमिगिरा राज्ञस्तान् स्वीचक्रे तथा च तम् । जारासंधिं सहदेवं समुद्रविजयाज्ञया ॥ ७ ॥
दत्वा मगधतुर्यांशं सहदेवं पितुः पदे । हरिरारोपयामास कीर्तिस्तंभमिवात्मनः ॥ ८ ॥
महानेमिं शौर्यपुरे समुद्रविजयात्मजम् । कोशलायां रुक्मनाभं हिरण्यनाभनन्दनम् ॥ ९ ॥

१ अत्र खलुशब्दोऽलमर्थे । २ कल्याणम् ।

अनाददानस्य राज्यमुग्रसेनस्य नन्दनम् । धरसंज्ञं मथुरायां स्थापयामास केशवः ॥ १० ॥
॥ युग्मम् ॥

अथ प्रत्यक्पयोराशौ ममज्जार्यममंडलम्[1] । विसृष्टो नेमिनाथेन मातलिश्च दिवं ययौ ॥ ११ ॥
कृष्णः कृष्णाज्ञयान्ये च स्वं स्वं शिबिरमभ्ययुः । समुद्रविजयश्चास्थाद्वसुदेवागमोत्सुकः ॥ १२ ॥
वासुदेवं द्वितीयेऽह्नि समुद्रविजयान्वितम् । खेचर्यः स्थविरास्तिस्र एयुरित्यूचिरे च ताः ॥ १३ ॥
प्रद्युम्नशांबसहितो वसुदेवः सखेचरः । नचिरादयमायाति[2] श्रूयतां तस्य चेष्टितम् ॥ १४ ॥
तदितः स्थानतः सार्धं पौत्राभ्यां खेचरैश्च तैः । वैताढ्यं वसुदेवोऽगाद्युयुधे चारिखेचरैः[3] ॥ १५ ॥

कृष्णस्य त्रिखण्डे-श्वरत्वम् ।

नीलकंठाङ्गारकाद्याः खेचराः पूर्वविद्विषः । सर्वे संभूय संभूय वसुदेवमयोधयन् ॥ १६ ॥
तद्युद्धान्तर्ह्यस्तनेऽहन्यूचुश्चासन्नदेवताः । व्यापादितो जरासन्धः कृष्णो विष्णुरभूदिति ॥ १७ ॥
तच्छ्रुत्वा खेचराः सर्वे रणं त्यक्त्वा व्यजिज्ञपन् । राज्ञे मन्दरवेगाय सोऽपि तानेवमादिशत् ॥ १८ ॥
सर्वेऽप्यायात भो यूयं महाप्राभृतपाणयः । द्वारेण वसुदेवस्य यास्यामः शरणं हरिम् ॥ १९ ॥
इत्युक्त्वा वसुदेवान्ते गत्वा स भगिनीं निजाम् । प्रद्युम्नाय ददौ पुत्रीं राजापि त्रिपथर्षभः ॥ २० ॥
राजा देवर्षभो वायुपथश्च तनये निजे । श्रीमच्छांबकुमाराय ददतुः परया मुदा ॥ २१ ॥



१ अर्यम्णः सूर्यस्य मंडलम् । २ शीघ्रं । ३ शत्रु ।

सहैव वसुदेवेन सर्वे विद्याधरेश्वराः । अद्यायांति पुरश्चैतदाख्यातुं प्रेषिता वयम् ॥ २२ ॥
एवं तासु ब्रुवाणासु वसुदेवः सखेचरः । प्रद्युम्नशांबसहितस्तत्रागान्नयनोत्सवः ॥ २३ ॥
आनर्चुः खेचराः कृष्णं वसुधाराविडंबिभिः । स्वर्णरत्नैर्विविधैश्च स्यंदनाश्वगजादिभिः ॥ २४ ॥
जयसेनप्रभृतीनां प्रेतकार्यं व्यधाद्धरिः । जरासन्धप्रभृतीनां सहदेवनृपः पुनः ॥ २५ ॥
पत्युः पितुश्च संहारं सकुलस्यापि वीक्ष्य सा । स्वजीवितं जीवयशा जहौ ज्वलनसाधनात् ॥ २६ ॥
चुस्कुन्दिरे यदानन्दं यदवस्तज्जनार्दनः । तत्रानन्दपुरं चक्रे सिनपल्लीपदे पुरम् ॥ २७ ॥
ततः स्थानाच्च गोविन्दः खेचरैर्भूचरैर्वृतः । षड्भिर्मासैर्भरतार्धं संसाध्य मगधेष्वगात् ॥ २८ ॥
तत्रैकयोजनोत्सेधां विस्तारेऽप्येकयोजनाम् । भरतार्धवासिनीभिर्देवताभिरधिष्ठिताम् ॥ २९ ॥
शिलां कोटिशिलां नाम दक्षिणेतरबाहुना । चतुरंगुलमुद्दध्रे पृथ्वीतः कंससूदनः ॥ ३० ॥

कृष्णस्य त्रिखण्डेश्वरत्वम् ।

॥ युग्मम् ॥

तां भुजाग्रे दधौ विष्णुराद्यो मूर्ध्नि द्वितीयकः । कंठे तृतीयस्तुर्यस्तूरःस्थले पञ्चमो हृदि ॥ ३१ ॥
षष्टः कट्यां षडधिकस्[1]तूर्योराजानु[2] चाष्टमः । चतुरंगुलमन्त्योऽवसर्पिण्यां ते पतद्बलाः[3] ॥ ३२ ॥
ततोऽगाद्द्वारकां कृष्णोऽर्धचक्रित्वेऽभ्यषेचि च । भक्त्या षोडशभी राज्ञां सहस्रैस्त्रिदशैस्तथा ॥ ३३ ॥



१ सप्तमः । २ जानुपर्यंतम् । ३ क्षीणबलाः ।

पांडवान् कुरुदेशाय स्वस्वस्थानाय चापरान् । भूचरान् खेचरांश्चाथ विससर्ज जनार्दनः ॥ ३४ ॥
दशार्हा दश दोष्मन्तः समुद्रविजयादयः । पञ्चसंख्या महावीरा बलदेवादयस्तथा ॥ ३५ ॥
राजान उग्रसेनाद्याः सहस्राणि च षोडश । प्रद्युम्नादिकुमाराणां सार्धं कोटित्रयं तथा ॥ ३६ ॥
शांबादीनां दुर्दान्तानां सहस्राः षष्टिरेव च । वीरसेनादयो वीराः सहस्राण्येकविंशतिः ॥ ३७ ॥
तथैव च महासेनप्रभृतीनां महौजसाम् । महतां तलवर्गाणां षट्पञ्चाशत्सहस्र्यपि ॥ ३८ ॥
अन्येऽपीभ्यश्रेष्ठिसार्थपतिमुख्याः सहस्रशः । कृष्णं सिषेविरे मूर्ध्नि रचिताञ्जलिसंपुटाः ॥ ३९ ॥
भूपाः षोडश सहस्राः वासुदेवाय भक्तितः । रत्नानि ढौकयामासुर्द्वे द्वे च वरकन्यके ॥ ४० ॥
ताभ्यः षोडश सहस्राः कन्याः कृष्ण उपायत । अष्टौ सहस्राणि बलोऽन्ये कुमाराश्च तावतीः ॥ ४१ ॥

कृष्णस्य त्रिखण्डेश्वरत्वम् ।

कृष्णो रामः कुमाराश्च क्रीडोद्याननगादिषु । स्वच्छन्दं रेमिरे रम्यरमणीभिः समावृताः ॥ ४२ ॥
तथा तान् क्रीडतः प्रेक्ष्य समुद्रविजयो नृपः । शिवादेवी चाभिदधे नेमिं प्रेमाक्तया गिरा ॥ ४३ ॥
तात त्वां पश्यतां नेत्रोत्सवोऽस्माकं सदैव हि । अनुरुपवधूपाणिग्रहणेनाधिकोऽस्तु सः ॥ ४४ ॥
जन्मतोऽपि भवोद्विग्नो ज्ञानत्रयधरः प्रभुः । ऊचे नेमिर्नानुरुपाः क्वापि पश्यामि योषितः ॥ ४५ ॥
भवन्त्येता हि पाताय दुःखेऽमूभिः कृतं हि नः । संपत्स्यन्तेऽनुरुपास्तु यदोद्वक्ष्यामि तास्तदा ॥ ४६ ॥

एवं गंभीरया वाचा प्रकृत्या पितरावृजू[1] । नेमिर्निवारयामास विवाहोपक्रमाग्रहात् ॥ ४७ ॥
इतोऽपि च यशोमत्या जीवश्च्युत्वापराजितात् । उग्रसेनस्य भार्याया धारिण्या उदरेऽभवत् ॥ ४८ ॥
धारिण्याः समये जज्ञे नाम्ना राजीमती सुता । अद्वैतरुपलावण्या क्रमेण ववृधे च सा ॥ ४९ ॥
इतश्च द्वारकावासी धनसेनो ददौ सुताम् । नभःसेनाय कमलामेलाख्यामौग्रसेनये[2] ॥ ५० ॥
नभःसेनस्य सदने चाययौ नारदो भ्रमन् । विवाहव्यग्रचित्तेन स तेन न हि पूजितः ॥ ५१ ॥
तस्यानर्थेच्छ्या सोऽगाद्रामसूनिषधात्मजम् । नामतः सागरचन्द्रं शांबादीनामतिप्रियम् ॥ ५२ ॥
तमभ्युत्थाय सोऽपृच्छद्देवर्षे भ्रमता त्वया । किमैक्षि किंचिदाश्चर्यं तदालोकप्रियो ह्यसि ॥ ५३ ॥
सोऽप्यूचे प्रेक्षितात्रैवाश्चर्यभूता जगत्यपि । नामतः कमलामेला धनसेनस्य कन्यका ॥ ५४ ॥
नभःसेनाय सा दत्ताधुनैवेत्यभिधाय सः । उत्पत्यागमदन्यत्र तद्रक्तः सागरस्त्वभूत् ॥ ५५ ॥
तामेव सागरो दध्यौ तन्नामैव जगाद च । तामेव सर्वतोऽपश्यत्पीतोन्मत्तः सुवर्णवत् ॥ ५६ ॥
जगाम कमलामेलासदने नारदोऽप्यथ । तया च पृष्ट आश्चर्यमित्यभाषिष्ट कूटधीः ॥ ५७ ॥
आश्चर्ये द्वे मया दृष्टे तत्रैकं रुपसंपदा । कुमारः सागरचन्द्रो नभःसेनः कुरुपतः ॥ ५८ ॥
सद्यो मुक्त्वा नभःसेनमरज्यत्सागरेऽथ सा । तद्रागं नारदो गत्वा सागराय शशंस च ॥ ५९ ॥

बलरामपौत्र-
सागरचन्द्र-
कमलामेला-
विवाहः ।

१ ऋजू सरलौ । २ उग्रसेनपुत्राय ।

बलरामपौत्र-
सागरचन्द्र-
कमलामेला-
विवाहः ।

सागरं प्रेक्ष्य पतितं तस्या विरहसागरे । मातापरे कुमाराश्च बभूवुर्विधुरा भृशम् ॥ ६० ॥
तदा तत्राययौ शांबस्तथावस्थस्य पृष्ठतः । स्थित्वा सागरचन्द्रस्य पाणिभ्यां पिदधे दृशौ ॥ ६१ ॥
सागरः स्माह कमलामेला किमसि नन्विह । एषोऽहं [1]कमलामेल इति शांबोऽप्यभाषत ॥ ६२ ॥
बभाषे नैषधिस्तर्हि त्वमेव कमलां मम । मेलयिष्यसि पर्याप्तमन्योपायविचिन्तया ॥ ६३ ॥
[2]अप्रतीच्छंस्तद्वचनं शांबः सर्वैः कुमारकैः । पाययित्वा भूरिमद्यं छलयित्वा च मानितः ॥ ६४ ॥
शांबो गतमदावस्थोऽचिन्तयत् किं मया ननु । दुष्करं प्रत्यपादीदं निर्वाह्यं तत्तथापि हि ॥ ६५ ॥
ततश्च स्मृत्वा प्रज्ञप्तिं कुमारैरपरैः समम् । नभःसेनोद्वाहदिने शांब उद्यानमभ्यगात् ॥ ६६ ॥
गृहाच्च कमलामेलां तत्रानाय्य सुरंगया । रक्तां सागरचन्द्रेण विधिवत्पर्यणाययन् ॥ ६७ ॥
गृहे च तामपश्यन्तो मार्गयन्त इतस्ततः । पितृश्वशुरवर्गीयास्तदुद्यानं समाययुः ॥ ६८ ॥
कृतखेचररुपाणां यदूनां मध्यवर्तिनीम् । आलोक्य कमलामेलां विष्णवे ते व्यजिज्ञपम् ॥ ६९ ॥
क्रुद्धः कृष्णोऽपि कमलामेलाहर्तॄनुपेत्य तान् । अयोधयद्धन्तुकामो दुर्नयासहनो हि सः ॥ ७० ॥
कृत्वा स्वरुपं शांबोऽपि कमलामेलया युतम् । गृहीत्वा सागरचन्द्रं न्यपतत् कृष्णपादयोः ॥ ७१ ॥
ऊचे विलक्षः कृष्णोऽपि किमिदं रे त्वया कृतम् । आश्रितोऽयं नभःसेनो यदेवं हन्त वञ्चितः ॥ ७२ ॥

१ कमलां मेलयतीति तथा । २ अनंगीकुर्वन् ।

बलरामपौत्र–
सागरचन्द्र–
कमलामेला–
विवाहः ।

अस्य किं क्रियतेऽद्येति नभःसेनमबोधयत् । ददौ च कमलामेलां सागरायैव केशवः ॥ ७३ ॥
अपकर्तुं नभःसेनोऽप्यक्षमस्तत्प्रभृत्यपि । छिद्रं सागरचन्द्रस्य मार्गयामास सर्वदा ॥ ७४ ॥
इतश्च पत्न्यां वैदर्भ्यां प्रद्युम्नस्य सुतोऽभवत् । अनिरुद्धोऽभिधानेन यौवनं प्रत्यपादि च ॥ ७५ ॥
तदा शुभनिवासाख्ये पुरेऽभूत् खेचरेश्वरः । बाणो नामोल्बणबलस्तस्य चोषेति कन्यका ॥ ७६ ॥
सा च रुपवती स्वानुरुपवल्लभलिप्सया । विद्यामाराधयद्गौरीं निश्चयेन गरीयसा ॥ ७७ ॥
सा तुष्टा तामभाषिष्ट पौत्रः कृष्णस्य शार्ङ्गिणः । भविष्यत्यनिरुद्धस्ते वरः सुरवरोपमः ॥ ७८ ॥
आराधितश्च बाणेन गौरिविद्याप्रियः सुरः । शंकराख्यो ददावस्याजय्यत्वं समरांगणे ॥ ७९ ॥
गौरी तमूचे सर्वत्राजय्यत्वं यद्ददौ वरम् । तन्न युक्तं मया दत्तो ह्यस्त्युषाया वरो ननु ॥ ८० ॥
शंकरोऽप्यवदद्बाणं त्वमजय्यो भविष्यसि । स्त्रीकार्यादन्यत इति बाणस्तेनापि पिप्रिये ॥ ८१ ॥
उषा रुपवतीत्वेन खेचरैर्भूचरैश्च सा । कैः कैर्ययाचे नो बाणान्न ददौ स त्वरोचकी ॥ ८२ ॥
विद्याधरीं चित्रलेखां प्रेष्योषाप्यनुरागिणी । आनाययदनिरुद्धं मनसीव निजे गृहे ॥ ८३ ॥
तां गान्धर्वविवाहेनोदुह्यादाय च सोऽचलत् । उषां हृत्वानिरुद्धोऽहं गच्छामीति जगाद च ॥ ८४ ॥
ततः क्रुद्धः खेचरेन्द्रो बाणो बाणासनी बलैः । व्याधः श्वभिरिव क्रोडमनिरुद्धं निरुद्धवान् ॥ ८५ ॥

१ वराहम् ।

पत्युर्विद्यां तदानीं च पाठसिद्धामुषा ददौ । बृंहितौजास्तया सोऽपि बाणेन युयुधे चिरम् ॥ ८६ ॥
नागपाशैः कलभवद्बद्धः प्रद्युम्ननन्दनः । बाणेनाथ तदाख्यायि प्रज्ञप्त्या शार्ङ्गपाणये ॥ ८७ ॥
तत्राययौ हरिः सीरिशांबप्रद्युम्नसंयुतः । दुद्रुवुंस्तेऽहिपाशास्तु गरुडध्वजदर्शनात् ॥ ८८ ॥
बाणोऽपि शंकरवरेणात्मस्थाम्ना च गर्वितः । ऊचे कृष्णं मदोन्मत्तः किं त्वं वेत्सि न मद्बीलम् ॥ ८९ ॥
सदान्यकन्याहरणं त्वमकार्षीस्ततश्च ते । पुत्रादीनां क्रमायातं तत्फलं दर्शयामि वः ॥ ९० ॥
ऊचे कृष्णोऽपि केयं ते वाचो युक्तिर्दुराशय । कन्या ह्यवश्यं दातव्या दोषस्तद्धरणेऽस्तु कः ॥ ९१ ॥
श्रुत्वेति खेचरवृतो भृकुटीभीषणाननः । कृष्टबाणासनो बाणो बाणांश्चिक्षेप शार्ङ्गिणे ॥ ९२ ॥
तानन्तरापि चिच्छेद च्छेदच्छेको जनार्दनः । शराशरि तयोरेवं वीरयोर्ववृते चिरम् ॥ ९३ ॥
निरस्त्रीकृत्य तं कृष्णः कृष्णाहिमिव पक्षिराट् । निकृत्य खंडशोऽनैषीत् प्रेतराजस्य सद्मनि ॥ ९४ ॥

अनिरुद्धमुषासमन्वितं समुपादाय जनार्दनस्ततः ।
हृष्टः प्रद्युम्नसीरिशांबयुग्नगरीं द्वारवतीं पुनर्ययौ ॥ ९५ ॥

✣ ✣ ✣

इत्याचार्यश्रीहेमचंद्रविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्येऽष्टमे पर्वणि सागरचन्द्रोपाख्यानोषाहरणबाणवधवर्णनो नामाष्टमः सर्गः ।

१ आत्मबलेन । २ छेदे छेकश्चतुरः ।



बलरामपौत्र–
सागरचन्द्र–
कमलामेला–
विवाहः ।

# नवमः सर्गः ।

इतश्च क्रीडया नेमिः कुमारैः सह पर्यटन् । विवेश वासुदेवस्यायुधशालामशंकितः ॥ १ ॥
तत्र चक्रमतिभास्वद्भास्वद्बिंबमिवोच्चकैः । शार्ङ्गकौमोदकीखड्गान् भोगिराड्भोगभीषणान् ॥ २ ॥
पांचजन्यं जन्यनाट्यनांदीतूर्यं महत्तरम् । विष्णोर्यशःकोशमिव कुमारः समुदैक्षत ॥ ३ ॥ ॥ युग्मम् ॥
कौतुकाच्छंखमादित्सुं विज्ञायारिष्टनेमिनम् । प्रणम्यास्त्रगृहारक्षश्चारुकृष्णोऽब्रवीदिति ॥ ४ ॥
यद्यप्यसि हरेर्भ्राता दोष्मानसि तथापि हि । नादातुमपि शक्नोषि शंखं पूरयितुं कुतः ॥ ५ ॥
इमं हि शंखमादातुमाध्मातुं च हरिं विना । न क्षमः कोऽपि मा कार्षीस्तत्प्रयासं मुधैव हि ॥ ६ ॥
स्मित्वाथ नेमिस्तं शंखमुद्दध्रे लीलयापि हि । दध्मौ चाधरविश्रान्तदंतज्योत्स्नाविडंबकम् ॥ ७ ॥
द्वारकावप्रसंमूर्छदुद्वेलजलधिध्वनेः । सब्रह्मचारी तद्ध्वानः पूरयामास रोदसी ॥ ८ ॥
प्राकारशैलश्रृंगाणि प्रासादाश्च चकंपिरे । चुक्षुभुः सीरभृच्छार्ङ्गिदशार्हा अपरेऽपि च ॥ ९ ॥

नेमि–
कुमारस्य
कृष्णायुधैः
क्रीडनम् ।

---

१ अतिदीप्यमानम् । २ सूर्यबिंबम् । ३ सर्पराजशरीरवद्भीषणान् । ४ जन्यं युद्धं तदेव नाट्यं तस्य नांद्यां तूर्यं वाजित्रसमानम् ।

स्तंभानुन्मूल्य करिणस्त्रेसुस्त्रोटितश्रृंखलाः । पलायाञ्चक्रिरे चाश्वा निरस्तमुखबन्धनाः ॥ १० ॥
तद्ध्वनेर्वज्रनिर्घोषादिवामूर्छन् पुरीजनाः । अस्त्रागाराररक्षकाश्च निपत्यास्थुर्मृता इव ॥ ११ ॥
इति दध्यौ च गोविन्दः शंखः केनैष वादितः । किं चक्री कश्चिदुत्पन्नो वज्री वा भुवमागतः ॥ १२ ॥
मयापि वादिते शंखे क्षोभः सामान्यभूभुजाम् । अनेन शंखे त्वाध्माते मम रामस्य चाभवत् ॥ १३ ॥
इति कृष्णं चिन्तयन्तमस्त्रारक्षा व्यजिज्ञपन्। लीलया पाञ्चजन्योऽद्य पूरितोऽरिष्टनेमिना ॥ १४ ॥
तच्छ्रुत्वा विस्मयापन्नोऽश्रद्दधानश्च चेतसि । यावत्तस्थौ हरिस्तावत्तत्रोपेयाय नेम्यपि ॥ १५ ॥
कृष्णः कृतावहित्थो[१]ऽथ नेमिनाथं ससंभ्रमः । उपवेश्यासनेऽनर्घ्ये सगौरवमभाषत ॥ १६ ॥
पाञ्चजन्योऽधुना भ्रातः किमयं पूरितस्त्वया । तन्नादेन मही सर्वा क्षोभिताद्यापि वर्तते ॥ १७ ॥
आमेति नेमिनाप्युक्ते तद्दोर्बलमपि स्वयम् । परीक्षितुमनाः कृष्णस्तं सगौरवमब्रवीत् ॥ १८ ॥
पाञ्चजन्यं पूरयितुं मदृते नापरः क्षमः । भवता पूरिते त्वस्मिन् भ्रातः प्रीतोऽस्मि संप्रति ॥ १९ ॥
मां विशेषात् प्रीणयितुं स्वदोःस्थामापि[२] दर्शय । युध्यस्व बाहुयुद्धेन मयैव सह मानद ॥ २० ॥
एवमस्त्विति तेनोक्ते कुमारपरिवारितौ । अस्त्रागारं जग्मतुस्तौ भ्रातरौ वीरकुञ्जरौ ॥ २१ ॥
प्रकृत्या सदयो नेमिर्दध्याविति ममोरसा । दोष्णा पादेन वाक्रान्तः कथं कृष्णो भविष्यति ॥ २२ ॥

नेमिकुमार-
सार्द्धं
कृष्णस्य
बलपरीक्षा ।



---

१ कृताऽवहित्था भावविशेषो येन सः । २ स्वभुजाबलम् ।

यथासौ याति नानर्थं मद्भुजस्थाम वेत्ति च । तथा कार्यमिति ध्यात्वा जनार्दनमभाषत ॥ २३ ॥
प्राकृतानामिदं युद्धं मुहुर्भूलुठनाकुलम् । मिथो दोर्नामनेनैव तद्भूयाद्युद्धमावयोः ॥ २४ ॥
तत्प्रपद्य वचो विष्णुः शाखिशाखामिवायताम् । दध्रे भुजां तां च नेमिर्नालनाममनामयत् ॥ २५ ॥
तथैव नेमिनाथोऽपि दध्रे वामभुजं निजम् । तत्र सर्वौजसा विष्णुर्ललंबे द्रौ[1] कपिर्यथा ॥ २६ ॥
दोःस्तंभो विष्णुना नेमेर्नानाम्यत मनागपि । वनस्तंबेरमेणेव[2] दंतभूमिर्महागिरेः ॥ २७ ॥
मुक्त्वा नेमिभुजस्तंभं निहूनुवानो विलक्षताम् । नेमिनाथं समालिंगन्नित्यवोचत शार्ङ्गभृत् ॥ २८ ॥
यथा ममौजसा रामो मन्यते तृणवज्जगत् । तथा मन्ये तृणायाहं[3] विश्वं भ्रातस्तवौजसा ॥ २९ ॥
इत्युक्त्वा व्यसृजन्नेमिं विष्णुरुचे च सीरिणम् । दृष्टं भ्रातस्त्वया भ्रातुर्वीर्यं त्रिभुवनोत्तरम् ॥ ३० ॥

नेमिकुमार-
सार्द्धं
कृष्णस्य
बलपरीक्षा ।

यथार्धचक्री दोष्ण्यस्याभवं पक्षीव पादपे । मन्ये तथौजसामुष्य चक्री वज्री च नो समः ॥ ३१ ॥
ईदृशेनौजसासौ किं समग्रमपि भारतम् । न साधयति किं तिष्ठत्येवमेवानुजः स नौ[4] ॥ ३२ ॥
ऊचे रामो यथा स्थाम्ना ज्ञायते चक्रितोऽधिकः । तथैव शान्तया मूर्त्या लक्ष्यते राज्यनिःस्पृहः ॥ ३३ ॥
इति रामोक्तेऽपि हरिं साशंकमनुजौजसा । प्रेक्ष्योचे देवता मा स्म ताम्यः श्रृणु जिनोदितम् ॥ ३४ ॥
पुरा नमिजिनेनोक्तं नेमिरर्हन् भविष्यति । कुमार एव सन्नेष नार्थो राज्यश्रियास्य तत् ॥ ३५ ॥



---

१ वृक्षे । २ वनहस्तिना । ३ तृणतुल्यम् । ४ आवयोः ।

प्रतीक्षमाणः समयं जन्मतो ब्रह्मचार्ययम् । आदास्यते परिव्रज्यां मान्यथा कृष्ण चिन्तय ॥ ३६ ॥
इति देवतयाप्युक्तः प्रीतो रामं विसृष्टवान् । जगामान्तःपुरं कृष्णो नेमिं चाजूहवत्तदा ॥ ३७ ॥
रत्नसिंहासनासीनौ तत्रोभौ शार्ङ्गिनेमिनौ । वारस्त्रीलोठ्यमानांभःकुंभौ सपदि सस्नतुः ॥ ३८ ॥
उन्मृष्टांगौ देवदूष्यैर्विलिप्तौ दिव्यचंदनैः । तत्रैव विदधाते च भोजनं हरिनेमिनौ ॥ ३९ ॥
अथोचे सौविदान् कृष्णो भ्राता नेमिरसौ मम । स्वस्मादप्यधिकस्तेन न स्खल्योऽन्तःपुरे क्वचित् ॥ ४० ॥
समस्तानामपि भ्रातुर्जायानां मध्यवर्त्यसौ । रमतां नेमिकुमारो न दोषो वोऽस्ति कश्चन ॥ ४१ ॥
पत्नीश्चोवाच भामाद्याः प्राणभूतो मम ह्ययम् । नेमिर्वो देवरो मान्यः क्रीडनीयोऽपशंकितम् ॥ ४२ ॥
इत्युक्ते शार्ङ्गिणा तत्रान्तःपुरे ताभिरर्चितः । निर्विकारो विजहार नेमिर्भोगपराङ्मुखः ॥ ४३ ॥
आत्मनो निर्विशेषेण सहैवारिष्टनेमिना । हरिः सान्तःपुरः प्रीतो रेमे क्रीडाचलादिषु ॥ ४४ ॥
कृष्णोऽन्यदा वसन्तर्तौ पौरैः सर्वैश्च वृष्णिभिः । सान्तःपुरो रैवतकोद्याने नेमियुतो ययौ ॥ ४५ ॥
चिक्रीडुर्विविधं तत्र कुमारा नागरा अपि । उद्याने नन्दन इव सुरासुरकुमारकाः ॥ ४६ ॥
बकुलस्य तले केऽपि बकुलामोदशालिनीम् । मदिरां स्मरजीवातुं पपुरापानभूमिषु[1] ॥ ४७ ॥
केऽप्युपावीणयन् केऽपि वसन्तेनोच्चकैर्जगुः[2] । ननृतुः केऽपि च क्षीवाः[3] सस्त्रियः किन्नरा इव ॥ ४८ ॥

कृष्णान्तःपुरेण नेमिकुमारस्य विवाहाय प्रेरणम् ।

१ मद्यपानस्थानेषु । २ वसन्तो रागविशेषः । ३ मत्ताः ।

चंपकाशोकबकुलादिषु केऽप्यवचिच्यिरे । पुष्पाणि सप्रियाः पुष्पाहरविद्याधरा इव ॥ ४९ ॥
स्वयं ग्रथित्वा कुसुमाभरणानि मृगीदृशाम् । अंगेषु निदधुः केऽपि विदग्धा मालिका इव ॥ ५० ॥
नव्यपल्लवतल्पेषु लतावेश्मसु केऽपि च । कांदर्पिका इव सुरा रेमिरे रमणीजनैः ॥ ५१ ॥
केऽपि गाढतरश्रांता लुलन्तः सारणीतटे । भोगिनो[1] भोगिन[2] इव पपुर्मलयमारुतम् ॥ ५२ ॥
केऽपि कंकिल्लिशाखावलंबिदोलासु साङ्गनाः । आन्दोलनेन चिक्रीडू रतिस्मरविडंबिनः ॥ ५३ ॥
प्रियायाः पादघातेन केचित् कंकिल्लिपादपान् । मद्यगंडूषदानेन केचिच्च बकुलद्रुमान् ॥ ५४ ॥
सरागदृष्टिदानेन केचित्तिलकशाखिनः । गाढालिंगनदानेनापरे कुरुबकद्रुमान् ॥ ५५ ॥
अप्यन्यदोहदैर्वृक्षानपरानपि कामिनः । विशेषपुष्पितीचक्रुः स्थिताः पुष्पेषु[3]शासने ॥ ५६ ॥
॥ त्रिभिर्विशेषकम् ॥

कृष्णान्तः पुरेण नेमिकुमारस्य विवाहाय प्रेरणम् ।

कृष्णोऽपि नेमिना सार्धं भामादिस्त्रीभिरावृतः । क्रीडन्नितस्ततोऽभ्राम्यत् वने वन्य इव द्विपः ॥ ५७ ॥
पश्यन्नेमिं हरिर्दध्यौ नेमेर्भोगेषु चेन्मनः । भवेत्तदा कृतार्था श्रीः सौभ्रात्रं[4] च तदैव मे ॥ ५८ ॥
आलंबनोद्दीपनैस्तद्विभावै[5]रसकृन्मया । एषोऽनुकूल्यः पूर्येत यद्येवं मे मनोरथः ॥ ५९ ॥

१ विलासिनः । २ सर्पाः । ३ पुष्पाण्येवेषवो बाणा यस्य सः कामस्तस्य शासने । ४ सुभ्रातुर्भावः सौभ्रात्रम् । ५ रत्याद्युद्बोधको लोके विभावः काव्यनाट्यः ।

एवं विचिन्त्य गोविन्दो ग्रथित्वा च स्वयं स्रजम् । नेमेः कण्ठे निचिक्षेप मुक्ताहारमिवापरम् ॥ ६० ॥
विदग्धाः सत्यभामाद्या अपि भावविदो हरेः । कुसुमाभरणैश्चित्रैः श्रीनेमिमुपतस्थिरे ॥ ६१ ॥
पीनोन्नतकुचाग्राभ्यां स्पृशन्ती कापि पृष्ठतः । नेमेर्बबन्ध धम्मिल्लं बन्धुरैः पुष्पदामभिः ॥ ६२ ॥
उदस्तदोर्लता [१]प्रादुर्दोर्मूला कापि नेमिनः । शिरस्युत्तंसमग्रस्था विदधे हरिवल्लभा ॥ ६३ ॥
विधृत्य पाणिना कर्णे कापि कर्णावतंसकम् । नेमिनो रचयामास स्मरस्येव जयध्वजाम् ॥ ६४ ॥
बाह्वोः पुष्पाङ्गदं कापि भूयो भूयो नवं नवम् । बबंध नेमिनः क्रीडाकालक्षेपविधित्सया ॥ ६५ ॥
एवं ता विदधुर्नेमेरुपचारमृतूचितम् । तासु श्रीनेमिनाथोऽपि निर्विकारमुपाचरत् ॥ ६६ ॥
एवं विचित्रक्रीडाभिरहोरात्रं जनार्दनः । स्थित्वा पुनर्द्वारिकायां जगाम सपरिच्छदः ॥ ६७ ॥
समुद्रविजयोऽप्यु[२]त्को नेमिपाणिग्रहोत्सवे । तस्थौ दशार्हा अन्येऽपि शार्ङ्गपाणिश्च सर्वदा ॥ ६८ ॥
वसन्तर्तुरतीयाय सनेमेः क्रीडतो हरेः । घर्मर्तुश्चाययौ प्रौढीकुर्वन्नर्कमिव स्मरम् ॥ ६९ ॥
बालातपोऽप्यसह्योऽभूत् प्रताप इव शार्ङ्गिणः । निशायामपि नाशाम्यद्घर्मः कर्मेव देहिनाम् ॥ ७० ॥
वाससी श्वेतमसृणे रंभा[*]न्तस्त्वक्सनाभिनी । मृगनाभीधूपिते च युवानस्तत्र पर्यधुः ॥ ७१ ॥
तालवृन्तं करा[३]द्दंतिकर्णतालचलाचलम् । नेषदप्यमुचन्नार्यो मन्मथस्येव शासनम् ॥ ७२ ॥
विचित्रकौसुमरसद्विगुणीकृतसौरभैः । भूयो भूयोऽभ्यषिञ्चन् स्वं युवानश्चन्दनांबुभिः ॥ ७३ ॥

कृष्णान्तःपुरेण नेमिकुमारस्य विवाहाय प्रेरणम् ।

१ प्रादुर्भूतं दोर्मूलं यस्याः सा । २ उत्सुकः । ३ दंतिनः कर्णतालवच्चलम् । * कदली ।

नारीभिर्नलिनीनालान्याहितान्यभितो हृदि । मुक्ताहारेभ्योऽप्यधिकं सौभाग्यमुपलेभिरे ॥ ७४ ॥
निपीडयन्तो बाहुभ्यां गाढगाढं मुहुर्मुहुः । युवानो नोरसोऽमुञ्चञ्जलार्द्रां वल्लभामिव ॥ ७५ ॥
एवं ग्रीष्मे घर्मभीष्मे कृष्णः सान्तःपुरोऽपि हि । ययौ रैवतकोद्यानसरसीं नेमिना सह ॥ ७६ ॥
तदन्तर्मज्जनक्रीडां कर्तुं विष्णुः सनेम्यथ । सान्तःपुरः प्रविवेश हंसवन्मानसांभसि ॥ ७७ ॥
तत्राकंठं निमग्नानां वदनैर्विष्णुयोषिताम् । नवोद्भिन्नाब्जिनीखंडभ्रान्तिः सद्योऽप्यजायत ॥ ७८ ॥
आचिक्षेप हरिः कांचित् स्वयमञ्जलिवारिणा । छेका[1] प्रत्यक्षिपत् सापि गंडूषपयसैव तम् ॥ ७९ ॥
काभिश्च विलगन्तीभिर्भीरुभिर्जलभीरुभिः । दधौ सशा[2]लभंजीकस्तंभशोभां जनार्दनः ॥ ८० ॥
असकृद्वीचय इवोल्लसन्त्यो हरिणीदृशः । रभसादास्फलंति स्म शार्ङ्गपाणेरुरस्तटे ॥ ८१ ॥
जलाघातेन ताम्रत्वं दधुर्मृगदृशां दृशः । स्वभूषणाञ्जनापोहजातयेव रुषाधिकम् ॥ ८२ ॥
विपक्षनामग्रहणेनाहूता कापि शार्ङ्गिणा । ताडयामास पद्मेन स[3]र्वलेनेव दन्तिनम् ॥ ८३ ॥
चिरमन्यां वीक्ष्यमाणां काचिदभ्येत्य चक्षुषोः । सरोरुहरजोमिश्रैर्जघानांभोभिरुद्धतैः ॥ ८४ ॥
शार्ङ्गिणं परितो भ्रेमुर्भूयो भूयो मृगीदृशः । स्मारयन्त्यो गोपभावलीलाह[4]ल्लीसकश्रियम् ॥ ८५ ॥
निर्विकारो नेमिरपि तत्र भ्रातृपरोधतः । भ्रातुर्जायाभिरक्रीडद्द्वेष्ट्यमानः सन[5]र्मभिः ॥ ८६ ॥

कृष्णान्तःपुरेण नेमिकुमारस्य विवाहाय प्रेरणम् ।

---

१ चतुरा । २ सपुत्तलिकस्तंभशोभाम् । ३ सर्वं लातीति सर्वलं शस्त्रविशेषः । ४ स्त्रीमंडलकृतं नृत्यम् । ५ नर्मवाक्यसहिताभिः ।

क्व यासि देवरेदानीमित्युक्त्वा हरियोषितः । नेमिं युगपदाजघ्नुश्चपेटाताडितैर्जलैः ॥ ८७ ॥
पाणिभिः कृष्णपत्नीनां जलाच्छोटनपातिभिः । उत्पल्लवस्तरुरिवारिष्टनेमिरराजत ॥ ८८ ॥
स्त्रीस्पर्शज्ञापनायांभःक्रीडाव्याजेन नेमिनः । ताः कंठे शिश्लिषुर्वक्षस्याजघ्नुर्दोष्णि चाप्यधु ॥ ८९ ॥
सहस्रपत्रं श्रीनेमेरातपत्रमिवोपरि । शुद्धान्तच्छत्रधारीव[1] क्रीडया काप्यधारयत् ॥ ९० ॥
काचिच्च नलिनीनालं नेमिनः कंठकन्दले । चिक्षेप नर्मणा स्तंबेरमस्यालानदामवत् ॥ ९१ ॥
यत् किंचनाप्यपदिश्य शतपत्रेण नेमिनम् । काप्याजघान हृदये स्मरास्त्रैरप्यनाहते ॥ ९२ ॥
अविकारः पुनर्नेमिकुमारोऽपि प्रजावतीः[2] । क्रीडयामास ताः सर्वाः कृतप्रतिकृतैश्चिरम् ॥ ९३ ॥
क्रीडन्तं भ्रातरं पश्यंस्तथाहृष्यज्जनार्दनः । तत्रांभसि चिरं तस्थौ नन्दीवर इव द्विपः ॥ ९४ ॥
समापितांभःक्रीडोऽथ सरसो निर्ययौ हरिः । भामारुक्मिण्यादयोऽपि गत्वा तीरेऽवतस्थिरे ॥ ९५ ॥
सरसो निरगान्नेमिकुमारोऽपि मरालवत् । शिश्रिये तीरदेशं च रुक्मिण्यादिभिराश्रितम् ॥ ९६ ॥
उत्थाय रुक्मिणी तत्र स्वयं रत्नासनं ददौ । ममार्ज चांगं श्रीनेमेर्निजेनोत्तरवाससा ॥ ९७ ॥
नर्मप्रश्रयपूर्वं च सत्याभाषिष्ट नेमिनम् । सदा नः सहसे तेनाभीता त्वां वच्मि देवर ॥ ९८ ॥
षोडशस्त्रीसहस्राधिभर्तुर्भ्रातापि शार्ङ्गिणः । अप्येकामपि किं कन्यां न ह्युद्वहसि सुन्दर ॥ ९९ ॥

कृष्णान्तःपुरेण नेमिकुमारस्य विवाहाय प्रेरणम् ।

---

१ अंतःपुरस्य छत्रधारी । २. भ्रातृपत्नीः (भाभी 'लोके') ।

त्रैलोक्ये तेऽप्रतिरुपं रुपं लावण्यपावितम् । यौवनं च नवोद्भेदं सत्येवं किमियं स्थितिः ॥ १०० ॥
पितरौ भ्रातरश्चैते भ्रातुर्जाया वयं च ते । याचामहे विवाहाय कुरुष्वैषां समीहितम् ॥ १०१ ॥
वंडमात्र[१] इवैकांगो विना पत्नीपरिग्रहम् । कालं कियन्तं नेतासि विमृश स्वयमप्यहो ॥ १०२ ॥
किमज्ञो नीरसो वाऽसि क्लीबो वासीति शंस नः । स्त्रीभोगेन विनासि त्वं कुमारारण्यपुष्पवत् ॥ १०३ ॥
यथा प्रावर्तयत्तीर्थं प्रथमं वृषभध्वजः । तथा स एव विवाहमंगलान्यप्यदर्शयत् ॥ १०४ ॥
समये प्रतिपद्येथा ब्रह्मापि हि यथारुचि । गार्हस्थ्ये नोचितं ब्रह्म मंत्रोद्गार इवाशुचौ ॥ १०५ ॥
अथावदज्जांबवती त्वद्वंशे मुनिसुव्रतः । कृतोद्वाहो जातसूनुर्जज्ञे तीर्थकरः प्रभुः ॥ १०६ ॥
ततः परस्तादर्वाक् च श्रूयन्ते जिनशासने । कृतोद्वाहाश्च मुक्ताश्च वेत्सि त्वमपि तन्ननु ॥ १०७ ॥
मुमुक्षुर्नूतनोऽसि त्वं मुक्तानामपि वर्त्म यः । विहाय जन्मतोऽप्येवं यदभूः स्त्रीपराङ्मुखः ॥ १०८ ॥
कृतप्रणयकोपोचे भामा सखि वृथैव किम् । अमुं वदसि साम्ना त्वं सामसाध्यो न खल्वयम् ॥ १०९ ॥
उक्तः सानुनयं पित्रा भ्रात्रा च ज्यायसाप्ययम् । अपरैश्च विवाहार्थे मेने न खलु तानपि ॥ ११० ॥
अस्माभिरेष संभूय तत्सर्वाभिर्निरुध्यताम् । न मंस्यतेऽस्मद्वचश्चेन्मोक्तव्यस्तन्न सर्वथा ॥ १११ ॥
अथोचिरे लक्ष्मणाद्या आराध्यो देवरो ह्यसौ । सकोपमिव नो वाच्यमुपायोऽस्य प्रसादनम् ॥ ११२ ॥

कृष्णान्तःपुरेण नेमिकुमारस्य विवाहाय प्रेरणम् ।

---

१ वंडः स्त्रीरहितः भाषायां 'वांढो' इति ख्यातः ।

इत्युक्ते पादयोर्नेमे रुक्मिण्याद्या हरिस्त्रियः । निपेतुः प्रार्थयमाना विवाहाय कृताग्रहाः ॥ ११३ ॥
तथार्थ्यमानं ताभिश्च प्रेक्ष्य कृष्णोऽपि नेमिनम् । उपेत्य प्रार्थयांचक्रे पाणिग्रहणकर्मणि ॥ ११४ ॥
अन्येऽपि यदवो नेमिमूचुर्भ्रातुर्वचः कुरु । शिवासमुद्रविजयौ मोदयान्यानपि स्वकान् ॥ ११५ ॥
एवं तैः साग्रहैर्नेमिरुपरुद्धो व्यचिंतयत् । अहो अज्ञत्वमेतेषां धिग्दाक्षिण्यं ममाप्यदः ॥ ११६ ॥
न केवलं स्वयममी पतंति भवसागरे । आबद्धस्नेहशिलया पातयन्ति परानपि ॥ ११७ ॥
वाङ्मात्रेणानुमंतव्यममीषामधुना वचः । आत्मनीनं विधातव्यमवश्यं समये मया ॥ ११८ ॥
ऋषभस्तीर्थकृद्यच्च विवाहं विदधे पुरा । तत्तथा भोग्यकर्मत्वाद्विभिन्ना[1] कर्मणां गतिः ॥ ११९ ॥

श्रीनेमिकुमाराय राजीमति-मार्गणम् ।

एवं विमृश्य श्रीनेमिस्तद्वचः प्रत्यपद्यत । तच्छ्रुत्वा जहृषुः सर्वे समुद्रविजयादयः ॥ १२० ॥
तत्रातिवाह्य ग्रीष्मर्तुं गोविन्दः सपरिच्छदः । जगाम द्वारकां नेमियोग्यकन्येक्षणोत्सुकः ॥ १२१ ॥
तमूचे सत्यभामाथ भगिनी मे कनीयसी । अस्ति राजीमती नाम्नानुरुपारिष्टनेमिनः ॥ १२२ ॥
कृष्णोऽप्युवाच तामेवं सत्ये सत्यं हितासि मे । नेमिनाथानुरुपस्त्रीचिन्ताब्धेरुद्धृतोऽस्मि यत् ॥ १२३ ॥
अथोत्थाय स्वयं कृष्ण उग्रसेनगृहं ययौ । यदुभिः पुरलोकैश्च वीक्ष्यमाणः ससंभ्रमैः ॥ १२४ ॥
उग्रसेनोऽप्यर्घपाद्यादिना सत्कृत्य शार्ङ्गिणम् । सिंहासने चोपवेश्य पप्रच्छागमकारणम् ॥ १२५ ॥



१ विचित्रा ।

कृष्णोऽप्युवाच ते कन्या राजन्राजीमतीति या । गुणैर्मदधिकस्यार्हा नेमेर्मदनुजस्य सा ॥ १२६ ॥
भोजोऽपि निजगादैवं भाग्यैर्नः फलितं प्रभो । हरिर्यद्गृहमायाति कृतार्थांश्च करोति नः ॥ १२७ ॥
एतद्गृहमियं लक्ष्मीरेते वयमियं सुता । सर्वं चान्यत्तवायत्तं स्वायत्ते प्रार्थनापि का ॥ १२८ ॥
इत्युक्त्वा मुदितः कृष्णः समुद्रविजयाय तत् । गत्वाचख्याववादीच्च समुद्रविजयोऽप्यदः ॥ १२९ ॥
भक्तिः पितृषु ते वत्स वात्सल्यं भ्रातृषूच्चकैः । भोगाभिमुख्यं यन्नेमेरकार्षीर्नः प्रमोदकृत् ॥ १३० ॥
इयत्कालं मनस्येव विलीनोऽभून्मनोरथः । अरिष्टनेमिर्यत्कन्याविवाहमनुमंस्यते ॥ १३१ ॥
अथ क्रोष्टुकिमाहूय समुद्रविजयो नृपः । पप्रच्छ दिवसं नेमिराजीमत्योर्विवाहने ॥ १३२ ॥
उवाच क्रोष्टुकिश्चैवं शुभारंभास्तपात्यये[1] । न खल्वन्येऽपि युज्यन्ते विवाहस्य तु का कथा ॥ १३३ ॥
समुद्रस्तं बभाषेऽथ कालक्षेपोऽत्र नार्हति । नेमिः कथंचित् कृष्णेन विवाहाय प्रवर्तितः ॥ १३४ ॥
मा भूद्विवाहप्रत्यूहो नेदीयस्तद्दिनं वद । गान्धर्व इव वीवाहो भूयाद्भवदनुज्ञया ॥ १३५ ॥
विमृश्य क्रोष्टुकिश्चाख्यद्यद्येवं तद्यदूद्वह । श्रावणस्य श्वेतषष्ठ्यां कार्यमेतत्प्रयोजनम् ॥ १३६ ॥
सत्कृत्य क्रोष्टुकिं राजा व्यस्राक्षीत्तं च वासरम् । भोजायाख्यापयामास ततो द्वावप्यसज्जताम् ॥ १३७ ॥
कृष्णोऽपि द्वारकापुर्यां प्रत्यट्टं प्रतिगोपुरम् । प्रतिगेहं रत्नमंचतोरणादीनकारयत् ॥ १३८ ॥

श्रीनेमि–कुमाराय राजीमति–मार्गणम् ।



---

१ तपर्तोरत्यये नाशे वर्षास्वित्यर्थः ।

श्रीनेमि-
कुमार-
विवाहो-
त्सवः ।

विवाहासन्नदिवसे दशार्हाः सीरिशार्ङ्गिणौ । श्रीशिवारोहिणीदेवक्यादयश्चापि मातरः ॥ १३९ ॥
रेवत्याद्या बलपत्न्यो भामाद्याश्च हरिप्रियाः । धात्र्यो महत्तराश्चान्यास्तारमारब्धगीतयः ॥ १४० ॥
प्राङ्मुखं स्थापयामासुर्नेमिनाथं महासने । स्नपयामासतुः प्रीत्या स्वयं च बलशार्ङ्गिणौ ॥ १४१ ॥
बद्धप्रतिसरं[1] नेमिं करे नाराचधारिणम् । कृत्वा जगाम गोविन्द उग्रसेननिकेतने ॥ १४२ ॥
तत्र राजीमतीं बालामबालेन्दुसमाननाम् । कृष्णोऽधिवासयामास तेनैव विधिना स्वयम् ॥ १४३ ॥
पुनर्ययौ निजगृहं व्यतिक्रम्य च शर्वरीम्[2] । नेमिं संवाहयामास गन्तुं वैवाहिकौकसि ॥ १४४ ॥
अथ श्वेतातपत्रेण विभान् श्वेतैश्च चामरैः । सदशश्वेतसंव्यानो मुक्ताभरणभूषितः ॥ १४५ ॥
कृष्णांगरागो गोशीर्षचन्दनेनातिहारिणा । आरुरोहारिष्टनेमिः स्यन्दनं श्वेतवाजिनम् ॥ १४६ ॥
पुरो नेमिकुमारस्य कुमाराः कोटिशोऽचलन् । तुरंगहेषानिर्घोषैर्बधिरीकृतदिङ्मुखाः ॥ १४७ ॥
पार्श्वतो भूभुजोऽभूवन्निभारुढाः सहस्रशः । पृष्ठे दशार्हा गोविन्दो मुशली चावतस्थिरे ॥ १४८ ॥
महार्घ्यशिबिकारुढाः सर्वाश्चान्तःपुरस्त्रियः । चेलुर्मंगलगायिन्योऽपरा अपि वरस्त्रियः ॥ १४९ ॥
एवं महर्द्ध्या श्रीनेमिः प्रतस्थे राजवर्त्मनि । पठद्भिर्मंगलान्युच्चैः पुरो मंगलपाठकैः ॥ १५० ॥
मार्गे गृहाट्टवलभीस्थितानां पौरयोषिताम् । दृशो निपेतुः प्रेमार्द्रा नेमौ मंगललाजवत् ॥ १५१ ॥

१ बद्धं प्रतिसरं करसूत्रं यस्य तम् । २ रात्रिम् ।

पौरैर्मिथो दर्श्यमानो वर्ण्यमानश्च संमदात् । उपोग्रसेनसदनमाससाद शिवासुतः ॥ १५२ ॥
नेम्यागमतुमुलेन स्तनितेनेव केकिनी । गाढोत्कंठाभवद्राजीमती [1]राजीवलोचना ॥ १५३ ॥
सख्यस्तामूचिरे भावविदो धन्यासि सुन्दरि । त्रैलोक्यसुन्दरो यस्या नेमिः पाणिं ग्रहीष्यति ॥ १५४ ॥
नेम्यागन्ता यद्यपीह तथाप्यत्युत्सुका वयम् । तमायान्तं गवाक्षस्थाः पश्यामः कमलेक्षणे ॥ १५५ ॥
मनोगतार्थाभिधानान्मुदिता सापि संभ्रमात् । राजीमत्यभिगवाक्षं प्रचचाल सखीवृता ॥ १५६ ॥
धम्मिल्लं मालतीगर्भं बिभ्रती सेन्दुमेघवत् । पराभवन्ती नेत्राभ्यां श्रवणोत्तंसपंकजे ॥ १५७ ॥
समुक्ताकुंडलाभ्यां च कर्णाभ्यां जितशुक्तिका । सयावकाधरदला पक्वबिंबेव बिंबिका ॥ १५८ ॥
[2]संनिष्कं बिभ्रती कंठे [3]हेममेखलकंबुवत् । हारांकितौ च वक्षोजौ [4]चक्रावात्तबिसाविव ॥ १५९ ॥
राजती पाणिपद्मेनाब्जखंडेनेव निम्नगा । मुष्टिसंग्राह्यमध्या च मान्मथीव धनुर्लता ॥ १६० ॥
सौवर्णफलकेनेव नितंबेन मनोरमा । रंभोरुरेणिकाजंघा रत्नतुल्यनखावलिः ॥ १६१ ॥
सदशश्वेतवसना सगोशीर्षविलेपना । विमानगर्भे देवीव गवाक्षे निषसाद सा ॥ १६२ ॥
॥ षड्भिः कुलकम् ॥



तत्र स्थिता च सापश्यद्दूरादपि हि नेमिनम् । प्रत्यक्षमिव कंदर्पं हृदि कंदर्पदीपिनम् ॥ १६३ ॥



१ कमलनेत्रा । २ सनिष्कं कंठभूषणम् । ३ हेम्नो मेखला यस्मिन्स चासौ कंबुश्च तद्वत् । ४ चक्रो चक्रवाकपक्षिणौ ।

निध्यायन्ती दृशा नेमिं सा दध्याविति चेतसा । दुःप्रापोऽयं वरोऽस्माकं मनसोऽपि न गोचरः ॥ १६४ ॥
एषोऽपि यदि मे भर्ता त्रैलोक्यस्यैकभूषणम् । संपद्यते तदा किं मे न पूर्णं जन्मनः फलम् ॥ १६५ ॥
यद्यप्ययमिहायातः परिणेतुमनाः स्वयम् । तथापि नाहं प्रत्येमि कैः पुण्यैः प्राप्यते ह्यसौ ॥ १६६ ॥
एवं तस्याश्चिन्तयन्त्याः पस्पन्दे दक्षिणेक्षणम् । बाहुश्च दक्षिणो जज्ञे संतापश्च मनोऽङ्गयोः ॥ १६७ ॥
राजीमती तत्सखीनामाचख्यौ गद्गदाक्षरम् । नेत्राभ्यामश्रु वर्षन्ती धारागृहवधूरिव ॥ १६८ ॥
सख्योऽप्यूचुः सखि शान्तं पापं हतममंगलम् । सकलाः कुलदेव्यस्ते भवंतु शिवतातयः[1] ॥ १६९ ॥
धीरा भव वरस्तेऽसावागात् पाणिग्रहोत्सुकः । अनिष्टचिन्ता ते केयं वर्तमाने महोत्सवे ॥ १७० ॥
शुश्राव नेमिश्चागच्छन् प्राणिनां करुणस्वरम् । किमेतदित्यपृच्छच्च संविदानोऽपि[2] सारथिम् ॥ १७१ ॥
अथाख्यत् सारथिर्नाथ किं न जानास्यमी हि ते । विवाहे भोज्यसात् कर्तुं नाना प्राणिन आहृताः ॥१७२॥
मेषादयो भूमिचरास्तित्तिर्याद्या नभश्चराः । ग्राम्या आटविकाश्चामी स्वामिन् यास्यन्ति पंचताम् ॥ १७३ ॥
आरक्षै रक्ष्यमाणाश्च सन्त्यमी वाटकान्तरे । आरटन्तः प्राणभयं सर्वेषां हि महद्भयम् ॥ १७४ ॥
ततो नेमिर्दयावीरो बभाषे निजसारथिम् । यत्रैते प्राणिनः सन्ति स्यन्दनं नय तत्र मे ॥ १७५ ॥
तथैव सारथिश्चक्रे ददर्श भगवानपि । विविधान् प्राणिनः प्राणापहारचकितात्मनः ॥ १७६ ॥

श्रीनेमि-
कुमारेण
पशु-
भोचनम् ।

१ शिवे कल्याणे तातिराधिक्यं याभ्यस्ताः । २ सम्यग्जानन्नपि ।

ग्रीवायां रज्जुभिर्बद्धाः केऽपि केऽपि च पादयोः । केऽपि क्षिप्ताः पञ्जरान्तः केऽपि पाशेषु पातिताः । १७७ ।
उन्मुखा दीननयना वेपमानशरीरकाः । ते प्रेक्षांचक्रिरे नेमिं प्रीणकं दर्शनादपि ॥ १७८ ॥
पाहि पाहीति ते नेमिं स्वस्वभाषाभिरब्रुवन् । तांश्च सारथिमाज्ञाप्य नेमिनाथोऽप्यमोचयत् ॥ १७९ ॥
स्वं स्वं स्थानं ततस्तेषु गतेषु प्राणिषु प्रभुः । रथं निवर्तयामास पुनर्निजगृहं प्रति ॥ १८० ॥
शिवा समुद्रविजयः कृष्णो रामोऽपरेऽपि हि । विहाय स्वस्वयानानि नेमिनः पुरतोऽभवन् ॥ १८१ ॥
शिवासमुद्रविजयावूचाते साश्रुलोचनौ । कस्मादकस्मादप्यस्माद्विनिवृत्तस्त्वमुत्सवात् ॥ १८२ ॥
नेमिरप्यब्रवीदेते प्राणिनो बन्धनैर्यथा । बद्धास्तथा वयमपि तिष्ठामः कर्मबन्धनैः ॥ १८३ ॥
यथैषां बन्धनान्मोक्षः कर्मबन्धात्तथात्मनः । कर्तुं दीक्षामुपादास्ये सौख्याद्वैतनिबन्धनाम् ॥ १८४ ॥
तन्नेमिवचनं श्रुत्वा तौ द्वावपि मुमूर्छतुः । रुरुदुर्यदवः सर्वेऽप्यनुद्धत[1]विलोचनाः ॥ १८५ ॥
शिवासमुद्रविजयौ समाश्वास्य जनार्दनः । रुदितं च प्रतिषिध्य बभाषेऽरिष्टनेमिनम् ॥ १८६ ॥
मम रामस्य तातानां सदा मान्योऽसि मानद । रुपं निरुपमं चेदं यौवनं च नवं तव ॥ १८७ ॥
किं च सापि स्नुषा राजीमती राजीवलोचना । तवानुरुपा तद्ब्रूहि किं ते वैराग्यकारणम् ॥ १८८ ॥
ये चैते पशवो दृष्टास्त्वया तेऽपि हि मोचिताः । पितृणां बान्धवानां च तत्पूरय मनोरथम् ॥ १८९ ॥

---

१ अनुद्धतानि मन्दानि विलोचनानि येषां ते ।



श्रीनेमि–
कुमारं
विवाहाया–
ऽभ्यर्थन्तो
यादवाः ।

पितरौ शोकनिमग्नौ न ह्युपेक्षितुमर्हसि । तत्रापि हि कुरु भ्रातः सर्वसाधारणीं कृपाम् ॥ १९० ॥
प्रीणिताः प्राणिनो दीना यथैते भवता तथा । भ्रातॄन् प्रीणय रामादीनपि स्वोद्वाहदर्शनात् ॥ १९१ ॥
अथोचे भगवान्नेमिः पित्रोः शोकस्य कारणम् । न किंचिदपि पश्यामि भवतां चापि बान्धव ॥ १९२ ॥
वैराग्यकारणं मे तु चतुर्गतिरयं भवः । दुःखान्येवानुभूयन्ते यत्रोत्पन्नैः शरीरिभिः ॥ १९३ ॥
भवे भवे च पितरौ भ्रातरोऽन्येऽपि चाभवन् । न कोऽपि कर्मदायादः स्वयं स्वं कर्म भुज्यते ॥ १९४ ॥
छिद्यते दुःखमन्यस्य यदन्येन हरे तदा । पित्रोरर्थे प्रदीयेरन् प्राणा अपि विवेकिना ॥ १९५ ॥
परं जन्तुर्जरामृत्युप्रायदुःखानि सत्स्वपि । पुत्रादिषु स्वयं भुंक्ते त्राता कोऽपि न कस्यचित् ॥ १९६ ॥
दृष्टेरानन्दमात्रं चेत् पुत्रास्तातस्य सन्ति तत् । विनापि मां महानेमिप्रमुखाः सुखहेतवः ॥ १९७ ॥
जरत्पान्थ इवाहं तु संसाराध्वगतागतैः । खिन्नोऽस्मि प्रयतिष्ये तच्छेदे [1]तद्धेतुकर्मणाम् ॥ १९८ ॥

श्रीनेमिकुमारस्य स्वजनान्यप्रत्युतरः ।

कर्मच्छेदः परिव्रज्यां विना न खलु साध्यते । तामेवाहं तदादास्ये मा निर्बन्धं वृथा कृथाः ॥ १९९ ॥
समुद्रविजयोऽथोचे वत्स [2]गर्भेश्वरो ह्यसि । सुकुमारशरीरश्च कथं कष्टं सहिष्यसे ॥ २०० ॥
ग्रीष्मकालातपा घोराः सोढव्याः सन्तु दूरतः । विनातपत्रमन्यर्तुतापा अपि सुदुःसहाः ॥ २०१ ॥
क्षुत्पिपासादयः सोढुं शक्यन्ते नेतरैरपि । किं पुनर्भवता तात [3]सुरभोगार्हवर्ष्मणा ॥ २०२ ॥

---

१ तस्य संसारस्य हेतुभूतानां कर्मणां छेदे प्रयतिष्य इत्यन्वयः । २. गर्भादिवेश्वरः श्रीमानित्यर्थः । ३ देवभोगाय योग्यं शरीरं यस्य तेन ।

अथावदन्नेमिनाथः किमिदं दुःखमुच्यते । उत्तरोत्तरदुःखौघान्नरकाञ्चानतां नृणाम् ॥ २०३ ॥
आसाद्यते तपोदुःखैर्मोक्षोऽनन्तसुखात्मकः । विषयप्रभवैः सौख्यैर्नरकोऽनन्तदुःखदः ॥ २०४ ॥
स्वयं विमृश्य तद्ब्रूत किं कर्तुं युज्यते नृणाम् । सर्वोऽपि विमृशन् वेत्ति विमृशेद्विरलः पुनः ॥ २०५ ॥
तच्छ्रुत्वा पितरौ कृष्णोऽन्येऽपि रामादयोऽविदन् । प्रव्रज्यानिश्चयं नेमे रुरुदुश्चोच्चकैः स्वरम् ॥ २०६ ॥
स्वजनस्नेहनिगडांस्त्रोटयन्नेमिकुञ्जरः । सारथिप्रेरितरथो ययावथ निकेतनम् ॥ २०७ ॥
ज्ञात्वा च समयं तत्राभ्येयुर्लोकान्तिकामराः । नेमिं नत्वा च ते प्रोचुर्नाथ तीर्थं प्रवर्तय ॥ २०८ ॥
द्रविणैर्वासवादिष्टजृम्भकामरपूरितैः । प्रारेभे वार्षिकं दानं प्रदातुं भगवानपि ॥ २०९ ॥
व्यावृत्तं नेमिनं दृष्ट्वा श्रुत्वा च व्रतकांक्षिणम् । राजीमत्यपतत् पृथ्व्यां मल्लीवाकृष्टपादपा ॥ २१० ॥
तां सख्यः सिषिचुर्भीताः शीताम्भोभिः सुगन्धिभिः । अवीजयन् व्यजनैश्च कदलीदलनिर्मितैः ॥ २११ ॥
अवाप्तसंज्ञा चोत्थाय कपोललुलितालका । अश्रुधारातिम्यमानकञ्चुका[१] विललाप सा ॥ २१२ ॥
नासीन्मनोरथोऽप्येष यन्नेमिः स्याद्वरो मम । केनास्यभ्यर्थितो दैव यन्नेमिर्मे वरः कृतः ॥ २१३ ॥
विपरीतं कुतोऽकार्षीरकांडे दंडपातवत् । एकस्त्वमसि मायावी त्वं च विश्वासघातकः ॥ २१४ ॥
यद्येवं प्रागपि ज्ञातं स्वभाग्यप्रत्ययान्मया । क्वायं जगत्त्रयोत्कृष्टो वरो नेमिरहं क्व च ॥ २१५ ॥

श्रीनेमि–
कुमारस्य
वार्षिकदानं,
राजीमति–
विलापश्च ।



---

१ अश्रुधारया तिम्यमानमार्द्रं कञ्चुकं यस्याः सा ।

आत्मनोऽननुरुपाहं ज्ञाता नेमे त्वया यदि । तत्प्रपद्य विवाहं मे जनितः किं मनोरथः ॥ २१६ ॥
जनयित्वा च किं भग्नः स्वामिन्मम मनोरथः । महतां प्रतिपन्नं हि यावज्जीवमपि स्थिरम् ॥ २१७ ॥
प्रतिपन्नाद्भवन्तोऽपि चलन्ति यदि तत्प्रभो । मर्यादा लंघयिष्यन्ति निश्चितं जलराशयः ॥ २१८ ॥
यद्वा तवापि नो दोषो दोषो मत्कर्मणामयम् । भवत्पाणिगृहीतात्वं वचसैव यदासदम् ॥ २१९ ॥
चारु मातृगृहं दिव्यमंडपो रत्नवेदिका । विवाहायावयोरन्यदप्येतदभवन्मुधा ॥ २२० ॥
धवलैर्गीयते यत्तन्न सर्वं सत्यमीदृशी । सत्योक्तिस्त्वं हि मे भर्ता गीतोऽस्यादौ न चाभवः ॥ २२१ ॥
किं युग्मिनां[1] विघटनमकार्षं पूर्वजन्मनि । पाणिस्पर्शसुखमपि यत्पत्युर्नाहमाप्नवम् ॥ २२२ ॥
विलपन्तीति सा जघ्ने हस्ताब्जाभ्यामुरःस्थलम् । हारं च त्रोटयामास स्फोटयामास कंकणे ॥ २२३ ॥
सख्यस्तामूचिरे सैवं विषादं सखि मा कृथाः । कस्तेन सह संबन्धः कार्यं वा तेन किं तव ॥ २२४ ॥
निःस्नेहो निःस्पृहो लोकव्यवहारपराङ्मुखः । गृहवासात् सदा भीरुर्वसतेर्वन्यजीववत् ॥ २२५ ॥
निर्दाक्षिण्यो निष्ठुरश्च स्वैरी वैरी च नन्वयम् । यातश्चेद्यातु तन्नेमिः साधु ज्ञातोऽधुनैव हि ॥ २२६ ॥
यद्यसौ परिणीय त्वां भवेदेवं हि निर्ममः । कूपे प्रक्षिप्य ते वर्तिकर्तनं[2] स्यात्तदा कृतम् ॥ २२७ ॥
अन्येऽपि यदुकुमारा भूयांसः सन्ति सद्गुणाः । प्रद्युम्नशांबप्रमुखास्तेष्वस्तु रुचितो वरः ॥ २२८ ॥

१ दंपतीनाम् । २ रज्जुकर्तनम् ।



राजीमति–
विलापः ।

त्वं हि संकल्पमात्रेण दत्ताभूः सुभ्रु नेमये । कन्यैवासि तदद्यापि मुग्धे तदपरिग्रहात् ॥ २२९ ॥
राजीमती सकोपोचे सख्यः किमिदमुच्यते । अस्मत्कुलकलंकाय कुलटाकुलसन्निभम् ॥ २३० ॥
नेमिर्जगत्त्रयोत्कृष्टः कोऽन्यस्तत्सदृशो वरः । सदृशो वास्तु किं तेन कन्यादानं सकृत् खलु ॥ २३१ ॥
मया वृतश्च मनसा वचसा च स वृष्णिसूः । गुरूपरोधिनाप्यस्मि प्रपन्ना तेन गेहिनी ॥ २३२ ॥
पर्यणैषीन्न मां सोऽद्य त्रैलोक्यैकवरो वरः । भोगैरपि कृतं तर्हि प्रकृत्यानर्थहेतुभिः ॥ २३३ ॥
न स्पृष्टा पाणिना तेन यद्यप्युद्वाहकर्मणि । पाणिः स्प्रक्ष्यति तस्यैव व्रतदानकृतेऽपि माम् ॥ २३४ ॥
इत्थं कृतप्रतिज्ञा सा प्रतिषिध्य सखीजनम् । कालं निनाय ध्यायन्ती नेमिमेवोग्रसेनजा ॥ २३५ ॥
इतश्च भगवान्नेमिर्ददौ दानं दिने दिने । रुरुदुश्च समुद्राद्या बाला इव सवेदनाः ॥ २३६ ॥
राजीमत्याः प्रतिज्ञां तां जनाज्ज्ञानत्रयादपि । विदाञ्चकार भगवान्निर्ममोऽस्थात्तथापि हि ॥ २३७ ॥
ददौ च वार्षिकं दानं निर्निदानं जगद्गुरुः । दीक्षाभिषेकं चक्रुश्च शक्राद्या नाकिनायकाः ॥ २३८ ॥
नाम्नोत्तरकुरौ रत्नशिबिकायां शिवासुतः । आरुरोहोह्यमानायां सुरैर्नरवरैरपि ॥ २३९ ॥
चामरे तत्र दध्राते शक्रेशानौ पुरः प्रभोः । छत्रं सनत्कुमारस्तु माहेन्द्रः खड्गमुत्तमम् ॥ २४० ॥
ब्रह्मेन्द्रो दर्पणं पूर्णकुंभं लान्तकवासवः । स्वस्तिकं च महाशुक्रः सहस्रारः शरासनम् ॥ २४१ ॥
श्रीवत्सं प्राणताधीशो नंद्यावर्तं तथाच्युतः । चमराद्यास्तु शेषेन्द्रा बभूवुः शस्त्रधारिणः ॥ २४२ ॥



श्रीनेमि–
कुमार–
दीक्षा ।

पितृभिर्मातृभी रामकृष्णाद्यैश्च समावृतः । प्रतस्थे भगवान्राजपथेनाथ महामनाः ॥ २४३ ॥
स्वगृहाभ्यर्णमायातो राजीमत्येक्षितः प्रभुः । सद्यो नवीभूतशुचा सामूर्छच्च मुहुर्मुहुः ॥ २४४ ॥
ततश्च प्रययौ नेमिरुज्जयन्ताद्रिभूषणम् । सहस्राम्रवणं नामोपवनं नन्दनोपमम् ॥ २४५ ॥
आविष्कृतस्मितमिव प्रोन्मीलन्नवकतकैः । गलितैर्जंबुभिर्नीलबद्धोर्वीकमिवाभितः ॥ २४६ ॥
कदंबपुष्पपर्यंकशयानोन्मत्तषट्पदम् । उद्धर्हबर्हिणारब्धकेकाव्याकुलतांडवम् ॥ २४७ ॥
स्मरास्त्रागारसदृशस्फुटत्कुटजकाननम् । मालतीयूथिकामोदपर्यस्तपथिकव्रजम् ॥ २४८ ॥
प्रविश्योद्यानमुत्तीर्य शिबिकायाः शिवात्मजः । यन्मुमोचाभरणादि प्रादात्[1]तद्धरये[2] हरिः ॥ २४९ ॥
॥ चतुर्भिः कलापकम् ॥

श्रीनेमि–कुमार–दीक्षा ।

त्रिशत्यां जन्मतोऽब्दानामतीतायां शिवात्मजः । श्रावणस्य श्वेतषष्ठ्यां पूर्वाह्ने त्वाष्ट्रगे विधौ ॥ २५० ॥
कृतषष्ठः कचोत्पाटं विदधे पञ्चमुष्टिकम् । केशान् शक्रः प्रतीयेष स्कन्धे दूष्यं न्यधाद्विभोः ॥ २५१ ॥
प्रक्षिप्य केशान् क्षीराब्धौ शक्रः पुनरुपेत्य च । न्यषेधत्तुमुलं सामायिकं च प्रभुराददे ॥ २५२ ॥
मनःपर्ययसंज्ञं च जज्ञे ज्ञानं जगद्गुरोः । तदा सुखं समुत्पेदे नारकाणामपि क्षणम् ॥ २५३ ॥
अनुनेमिकुमारं च सहस्रं प्राव्रजन्नृपाः । शक्रः कृष्णादयो नेमिं नत्वा चागुः स्वमाश्रमम् ॥ २५४ ॥

१ कृष्णाय । २ इन्द्रः ।

अथ गोष्ठे द्वितीयेऽह्नि वरदत्तद्विजौकसि । पारणं परमान्नेन चकार परमेश्वरः ॥ २५५ ॥
वृष्टिं गन्धांबुपुष्पाणां गंभीरं दुन्दुभिध्वनिम् । चेलोत्क्षेपं वसुधारां विदधुर्विबुधास्तदा ॥ २५६ ॥
ततो विहर्तुमन्यत्र घातिकर्मक्षयोद्यतः । नेमिनाथः प्रववृते निवृत्तः कर्मबंधनात् ॥ २५७ ॥
इतश्च नेमेरनुजो रथनेमिः स्मरातुरः । जज्ञे राजीमतीं पश्यन्निन्द्रियाणां वशंवदः ॥ २५८ ॥
सोऽपूर्वैर्वस्तुभी राजीमतीं नित्यमुपाचरत् । तद्भावाविदुरा[1] सापि मुग्धा न निषिषेध तम् ॥ २५९ ॥
भ्रातृस्नेहादुपास्तेऽसौ नित्यं मामित्यमंस्त सा । ममोपचारं रागेण गृह्णात्येषेति सोऽपि हि ॥ २६० ॥
ययौ च तुच्छधीर्नित्यं राजीमत्याः स वेश्मनि । भ्रातुर्जायापदेशेन तस्यां नर्म चकार च ॥ २६१ ॥
रहःस्थितामन्यदा तां रथनेमिरदोऽवदत् । मुग्धे परिणयामि त्वां यौवनं मा मुधा नय ॥ २६२ ॥
भोगानभिज्ञो मद्बन्धुस्त्यक्तवांस्त्वां मृगाक्षि यत् । स एव वञ्चितो भोगसुखानां किं गतं तव ॥ २६३ ॥
प्रार्थ्यमानोऽपि नाभूत्ते स वरो वरवर्णिनि[2] । अहं प्रार्थयमानस्त्वामस्मि पश्यान्तरं महत् ॥ २६४ ॥
हेतुं पूर्वोपचाराणां तेन भावेन तस्या सा । तदानीमेव चाबोधि स्वभावसरलाशया ॥ २६५ ॥
बोधयामास सा तं च धर्मज्ञा धर्मशंसनात् । तस्मादध्यवसायात्तु न व्यरंसीत् स दुर्मतिः ॥ २६६ ॥
अन्येद्युर्दुग्धमाकंठं पपौ राजीमती सुधीः । तत्रायाते[3] तु मदनफलं जघ्रौ च वान्तिकृत् ॥ २६७ ॥

राजीमति–
कृतो
रथनेमि–
प्रतिबोधः ।

१ तस्य भावमविदुरानभिज्ञा । २ वरं वृणुते सा वरवर्णिनी तत्संबुद्धौ । ३ तत्र तस्मिन् रथनेमाविति यावत् ।

ऊचे च रथनेमिं सा स्थालमानय काञ्चनम् । सोऽप्यानिनाय सा तत्र पीतदुग्धं ववाम च ॥ २६८ ॥
रथनेमे पिबेदं त्वमित्युवाचोग्रसेनजा । सोऽभ्यधात् किमहं श्वास्मि वान्तपानाय वक्षि यत् ॥ २६९ ॥
साप्यब्रवीदपातव्यमिदं त्वमपि वेत्सि किम् । सोऽवोचत् केवलो नाहं बाला अपि विदन्त्यदः ॥ २७० ॥
राजीमती जगादाथ यदि जानासि तर्ह्यरे । नेमिनाथेन वान्तां मामुपभोक्तुं किमिच्छसि ॥ २७१ ॥
तस्य भ्रातापि भूत्वा त्वं कथमेवं चिकीर्षसि । मातः परमिदं वादीर्नरकायुर्निबन्धनम् ॥ २७२ ॥
एवं तयोक्तस्तूष्णीको ह्रीणः[1] क्षीणमनोरथः । रथनेमिनिजं धाम जगाम विमनायितः ॥ २७३ ॥
राजीमती च श्रीनेमावनुरागपरायणा । संविग्ना गमयन्त्यस्थाद्वासरान् वर्षसन्निभान् ॥ २७४ ॥

श्रीनेमिनाथस्य केवलोत्पत्तिः ।

नेमिनाथोऽपि हि चतुःपञ्चाशद्वासरीं व्रतात् । विहृत्यागाद्रैवतके सहस्राम्रवणे वने ॥ २७५ ॥
वेतसस्य तले तत्र ध्यानान्तरविवर्तिनः । श्रीनेमेरष्टमस्थस्य घातिकर्माणि तुत्रुटुः ॥ २७६ ॥
आश्विनस्यामावास्यायां पूर्वाह्णे त्वाष्ट्रगे विधौ । केवलज्ञानमुत्पेदे स्वामिनोऽरिष्टनेमिनः ॥ २७७ ॥
सद्यः सुरेन्द्राश्चलितासनास्तत्र समाययुः । चक्रुः समवसरणं प्राकारत्रयभूषितम् ॥ २७८ ॥
प्रविश्य पूर्वद्वारेण विंशधन्वशतोन्नतम् । तत्र प्रदक्षिणीचक्रे चैत्यवृक्षं जगद्गुरुः ॥ २७९ ॥
तीर्थाय नम इत्युक्त्वा द्वाविंशः सोऽथ तीर्थकृत् । पूर्वसिंहासने पूर्वाभिमुखः समुपाविशत् ॥ २८० ॥



१ लज्जितः ।

श्रीनेमि–
नाथस्य
केवलो–
त्पत्तिः ।

श्रीनेमेः प्रतिरुपाणि दिक्ष्वन्यास्वपि तत्क्षणम् । रत्नसिंहासनस्थानि विचक्रुर्व्यन्तरामराः ॥ २८१ ॥
अथ तस्थुर्यथास्थानं देवा देव्यश्चतुर्विधाः । दत्तेक्षणाः स्वामिमुखे चकोरा इव शीतगौ[1] ॥ २८२ ॥
तथा च समवसृतं स्वामिनं शैलपालकाः । गत्वाचख्युः स्वनाथाय देवकीतनुजन्मने ॥ २८३ ॥
रुप्यस्य द्वादश कोटीः सार्धास्तेभ्यः प्रदाय सः । प्रचचाल गजारुढो नेमिनाथं विवन्दिषुः ॥ २८४ ॥
समं दशार्हैर्दशभिर्मातृभिर्भ्रातृभिस्तथा । कोटिसंख्यैः कुमारैश्च समग्रान्तःपुरेण च ॥ २८५ ॥
महीभुजां षोडशभिः सहस्रैश्च समावृतः । ऋद्ध्या महत्या समवसरणं प्रययौ हरिः ॥ २८६ ॥
दूरादप्यवरुह्येभाद्राज्यचिह्नान्यपास्य च । उदग्द्वारेण समवसरणे प्राविशद्धरिः ॥ २८७ ॥
तत्र प्रदक्षिणीकृत्य नेमिं नत्वा च शार्ङ्गभृत् । अनुशक्रं निषसाद यथास्थानमथापरे ॥ २८८ ॥
इन्द्रोपेन्द्रौ पुनर्नत्वा जिनेन्द्रमथ नेमिनम् । प्रारेभाते स्तोतुमेवं गिरा भक्तिपवित्रया । २८९ ॥
नमस्तुभ्यं जगन्नाथ विश्वविश्वोपकारिणे । आजन्म ब्रह्मनिष्ठाय दयावीराय तायिने[2] ॥ २९० ॥
दिष्ट्या कर्माणि घातीनि स्वामिन् घातितवानसि । शुक्लध्यानेन दिवसैश्चतुःपञ्चाशतापि हि ॥ २९१ ॥
न केवलं यदुकुलं त्वया नाथ विभूषितम् । इदं जगत्त्रयमपि केवलालोकभास्वता ॥ २९२ ॥
[3]अस्ताघो यस्तथा स्वामिन्नपारश्च भवांबुधिः । गुल्फगोष्पदमात्रं स स्यात्त्वत्पादप्रसादतः ॥ २९३ ॥

---

१ शीता गावः किरणा यस्य तस्मिंश्चन्द्रे । २ रक्षित्रे । ३ अगाधः ।

सर्वस्य भिद्यते स्वान्तं ललनाललितैः प्रभो । अभेद्यो वज्रहृदयस्त्वत्तो नान्यो जगत्यपि ॥ २९४ ॥
त्वयि व्रतनिषेधिन्यो बन्धूनां ता गिरोऽधुना । भवन्ति पश्चात्तापाय तवर्द्धिं पश्यतामिमाम् ॥ ॥ २९५ ॥
दुराग्रहैर्बन्धुवर्गैर्दिष्ट्या न स्खलितस्तदा । जगत्पुण्यैरस्खलितोत्पन्नकेवल पाहि नः ॥ २९६ ॥
यत्र तत्र स्थितस्यापि यद्वा तद्वापि कुर्वतः । त्वमेव देव हृदये भूयाः किमपरेण मे ॥ २९७ ॥
इति स्तुत्वा विरतयोस्तत्रेन्द्रोपेन्द्रयोः प्रभुः । सर्वभाषानुगगिरा प्रारेभे धर्मदेशनाम् ॥ २९८ ॥
विद्युद्विलासचपलाः श्रियः सर्वशरीरिणाम् । संयोगा विप्रयोगान्ताः स्वप्नप्राप्तार्थसन्निभाः ॥ २९९ ॥
गत्वरं यौवनपि मेघच्छायासहोदरम् । अंबुबुद्बुदकल्पानि वपूंष्यपि वपुष्मताम् ॥ ३०० ॥
तस्मादसारे संसारे सारमत्र न किंचन । सारं तु दर्शनज्ञानचारित्रपरिपालनम् ॥ ३०१ ॥

श्रीनेमि–
नाथस्य
देशना ।

तत्त्वानां श्रद्दधानत्वं सम्यग्दर्शनमुच्यते । यथावस्थिततत्त्वानां बोधो ज्ञानं प्रकीर्तितम् ॥ ३०२ ॥
सावद्ययोगविरतिश्चारित्रं मुक्तिकारणम् । सर्वात्मना यतीन्द्राणां देशतः स्यादगारिणाम् ॥ ३०३ ॥
देशचारित्रविरतो विरतानामुपासकः । भवस्वरुपं जानानः श्रावको जीवितावधि ॥ ३०४ ॥
मद्यं मांसं नवनीतं मधूदुंबरपञ्चकम् । अनन्तकायमज्ञातफलं रात्रौ च भोजनम् ॥ ३०५ ॥
[1]आमगोरससंपृक्तद्विदलं पुष्पितौदनम् । दध्यहर्द्वितयातीतं कुथितान्नं च वर्जयेत् ॥ ३०६ ॥

१ अनुष्णगोरसेन संपृक्तं यद्विदलम् ।

श्रीनेमि–नाथ–देशना ।

मदिरापानमात्रेण बुद्धिर्नश्यति दूरतः । वैदग्धी बन्धुरस्यापि दौर्भाग्येणेव कामिनी ॥ ३०७ ॥
पापाः [1]कादम्बरीपानविवशीकृतचेतसः । जननीं हा प्रीयीयन्ति[2] जननीयन्ति च प्रियाम् ॥ ३०८ ॥
न जानाति परं स्वं वा मद्याच्चलितचेतनः । स्वामीयति वराकः स्वं स्वामिनं किंकरीयति ॥ ३०९ ॥
मद्यपस्य शबस्येव लुठितस्य चतुष्पथे । मूत्रयन्ति मुखे श्वानो व्यात्ते बिवरशंकया ॥ ३१० ॥
मद्यपानरसे मग्नो नग्नः स्वपिति चत्वरे । गूढं च स्वमभिप्रायं प्रकाशयति लीलया ॥ ३११ ॥
[3]वारुणीपानतो यान्ति कान्तिकीर्तिमतिश्रियः । विचित्राश्चित्ररचना विलुठत्कज्जलादिव ॥ ३१२ ॥
भूतात्तवन्नरीनर्ति[4] रारटीति सशोकवत् । दाहज्वरार्तवद्ऽभूमौ सुरापो लीलुठीति च ॥ ३१३ ॥
विदधत्यङ्गशैथिल्यं ग्लपयन्तीन्द्रियाणि च । मूर्छामतुच्छां यच्छन्ती [5]हाला हालाहलोपमा ॥ ३१४ ॥
विवेकः संयमो ज्ञानं सत्यं शौचं दया क्षमा । मद्यात्प्रलीयते सर्वं [6]तृण्या वह्निकणादिव ॥ ३१५ ॥
रसोद्भवाश्च भूयांसो भवन्ति किल जन्तवः । तस्मान्मद्यं न पातव्यं हिंसापातकभीरुणा ॥ ३१६ ॥
दत्तं न दत्तमात्तं च नात्तं कृतं च नो कृतम् । मृषोद्यराज्यादिव हा स्वैरं वदति मद्यपः ॥ ३१७ ॥
गृहे बहिर्वा मार्गे वा परद्रव्याणि मूढधी : । वधबन्धादिनिर्भीको गृह्णात्याच्छिद्य मद्यपः ॥ ३१८ ॥

---

१ कादम्बरी मदिरा । २ जननीं प्रियामिव कुर्वन्तीति प्रीयीयन्ति एवं सर्वत्र । ३ वारुणी मदिरा । ४ अतिशयेन पुनः पुनर्वा नृत्यतीति नरीनर्ति एवं सर्वत्र । ५ हाला मदिरा । ६ तृणसमूहस्तृण्या ।

बालिकां युवतीं वृद्धां ब्राह्मणीं श्वपचीमपि । भुङ्क्ते परस्त्रियं सद्यो मद्योन्मादकदर्थितः ॥ ३१९ ॥
रटन् गायन् लुठन् धावन् कुप्यंस्तुष्यन् रुदन् हसन् । स्तंभन्नमन् भ्रमंस्तिष्ठन् सुरापः पापराण्नटः ॥ ३२० ॥
पिबन्नपि मुहुर्मद्यं मद्यपो नैव तुष्यति । जन्तुजातं कवलयन् कृतान्त इवै सर्वदा ॥ ३२१ ॥
दोषाणां कारणं मद्यं मद्यं कारणमापदाम् । रोगातुर इवापथ्यं तस्मान्मद्यं विवर्जयेत् ॥ ३२२ ॥
चिखादिषति[1] यो मांसं प्राणिप्राणापहारतः । उन्मूलयत्यसौ मूलं दयाख्यं धर्मशाखिनः ॥ ३२३ ॥
चिखादिषति यो मांसं दयां यो हि चिकीर्षति । ज्वलति ज्वलने वल्लीं स रोपयितुमिच्छति ॥ ३२४ ॥
हन्ता पलस्य[2] विक्रेता संस्कर्ता भक्षकस्तथा । क्रेतानुमन्ता दाता च घातकाः सर्व एव ते ॥ ३२५ ॥
ये भक्षयन्त्यन्यपलं स्वकीयपलपुष्टये । त एव घातका यन्न वधको भक्षकं विना ॥ ३२६ ॥
मिष्टान्नान्यपि विष्टासात्[3] अमृतान्यपि मूत्रसात् । स्युर्यस्मिन्नङ्गकस्यास्य कृते कः पापमाचरेत् ॥ ३२७ ॥
मांसास्वादनलुब्धस्य देहिनं देहिनं प्रति । हन्तुं प्रवर्तते बुद्धिः शाकिन्या इव दुर्धियः ॥ ३२८ ॥
ये भक्षयन्ति पिशितं[4] दिव्यभोज्येषु सत्स्वपि । सुधारसं परित्यज्य भुञ्जते ते हलाहलम् ॥ ३२९ ॥
न धर्मो निर्दयस्यास्ति पलादस्य कुतो दया । पललुब्धो न तद्वेत्ति विद्याद्वोपदिशेन्न हि ॥ ३३० ॥
नान्यस्ततो गतघृणो[5] नरकार्चिष्मदिन्धनम्[6] । स्वमांसं परमांसेन यः पोषयितुमिच्छति ॥ ३३१ ॥

१ खादितुमिच्छति । २ मांसस्य । ३ विष्टाधीनानि विष्टासत् । ४ मांसम् । ५ गता घृणा दया यस्य सः ।
६ नरकस्याग्निस्तस्मिन्निन्धनतुल्यम् ।



श्रीनेमि–
नाथ–
देशना ।

श्रीनेमि–
नाथ–
देशना ।

शुक्रशोणितसंभूतं विष्टारसविवर्धितम् । लोहितं स्त्यानतामाप्तं[1] कोऽश्नीयादकृमिः[2] पलम् ॥ ३३२ ॥
सद्यः संमूर्च्छितानन्तजन्तुसन्तानदूषितम् । नरकाध्वनि पाथेयं कोऽश्नीयात् पिशितं सुधीः ॥ ३३३ ॥
अन्तर्मुहुर्तात्परतः सुसूक्ष्मा जन्तुराशयः । यत्र मूर्च्छन्ति तन्नाद्यं नवनीतं विवेकिभिः ॥ ३३४ ॥
एकस्यापि हि जीवस्य हिंसने किमघं भवेत् । जन्तुजातमयं तत्को नवनीतं निषेवते ॥ ३३५ ॥
अनेकजन्तुसंघातनिघातनसमुद्भवम् । जुगुप्सनीयं लालावत् कः स्वादयति माक्षिकम्[3] ॥ ३३६ ॥
भक्षयन्माक्षिकं क्षुद्रजन्तुलक्षक्षयोद्भवम् । स्तोकजन्तुनिहन्तृभ्यः शौनिकेभ्योऽतिरिच्यते ॥ ३३७ ॥
एकैककुसुमक्रोडाद्रसमापीय मक्षिकाः । यद्वमन्ति मधूच्छिष्टं तदश्नन्ति न धार्मिकाः ॥ ३३८ ॥
अप्यौषधकृते जग्धं मधु श्वभ्रनिबन्धनम् । भक्षितः प्राणनाशाय कालकूटकणोऽपि हि ॥ ३३९ ॥
मधुनोऽपि हि माधुर्यमबोधैरहहोच्यते । आसाद्यन्ते यदास्वादाच्चिरं नरकवेदनाः ॥ ३४० ॥
उदुम्बरवटप्लक्षकाकोदुम्बरशाखिनाम् । पिप्पलस्य च नाश्नीयात् फलं कृमिकुलाकुलम् ॥ ३४१ ॥
अप्राप्नुवन्नन्यभक्ष्यमपि क्षामो बुभुक्षया । न भक्षयति पुण्यात्मा पञ्चोदुम्बरजं फलम् ॥ ३४२ ॥
आर्द्रः कन्दः समग्रोऽपि सर्वः किसलयोऽपि च । स्नुहिलवणवृक्षत्वक्कुमारीगिरिकर्णिका: ॥ ३४३ ॥
शतावरीविरुढानि गडूची कोमलाम्लिका । पल्यंकोऽमृतवल्ली च वल्लः शूकरसंज्ञितः ॥ ३४४ ॥

१ वृद्धित्वम् । २ अकृमि रोगरहितो मानवः । ३ मधु ।

अनन्तकायाः सूत्रोक्ता अपरेऽपि कृपापरैः । मिथ्यादृशामविज्ञाता वर्जनीयाः प्रयत्नतः ॥ ३४५ ॥
स्वयं परेण वा ज्ञातं फलमद्याद्विशारदः । निषिद्धे विषफले वा मा भूदस्य प्रवर्तनम् ॥ ३४६ ॥
अन्नं प्रेतपिशाचाद्यैः सञ्चरद्भिर्निरङ्कुशैः । उच्छिष्टं क्रियते यत्र तत्र नाद्याद्दिनात्यये ॥ ३४७ ॥
घोरान्धकाररुद्धाक्षैः पतन्तो यत्र जन्तवः । नैव भोज्ये निरीक्ष्यन्ते तत्र भुञ्जीत को निशि ॥ ३४८ ॥
मेधां पिपीलिका हन्ति यूका कुर्याज्जलोदरम् । कुरुते मक्षिका वान्तिं कुष्टरोगं च कोलिकः ॥ ३४९ ॥
कंटको दारुखंडं च वितनोति गलव्यथाम् । व्यञ्जनान्तर्निपतितस्तालु विध्यति वृश्चिकः ॥ ३५० ॥
विलग्नश्च गले वालः स्वरभंगाय जायते । इत्यादयो दृष्टदोषाः सर्वेषां निशि भोजने ॥ ३५१ ॥
नाप्रेक्ष्य सूक्ष्मजन्तूनि निश्यद्यात्प्रासुकान्यपि । अवश्यं जन्तुसंपातः संभवेदशने तदा ॥ ३५२ ॥
संसजज्जीवसंघातं भुञ्जाना निशि भोजनम् । राक्षसेभ्यो विशिष्यन्ते मूढात्मानः कथं न ते ॥ ३५३ ॥
वासरे च रजन्यां च यः खादन्नेव तिष्ठति । श्रृंगपुच्छपरिभ्रष्टः स्पष्टं स पशुरेव हि ॥ ३५४ ॥
अह्नो मुखेऽवसानेऽपि यो द्वे द्वे घटिके त्यजन् । निशाभोजनदोषज्ञोऽश्नात्यसौ पुण्यभाजनम् ॥ ३५५ ॥
अकृत्वा नियमं दोषाभोजनाद्दिनभोज्यपि । फलं भजेन्न निर्व्याजं न वृद्धिर्भाषितं विना ॥ ३५६ ॥
ये वासरं परित्यज्य रजन्यामेव भुञ्जते । ते परित्यज्य माणिक्यं काचमाददते जडाः ॥ ३५७ ॥
उलूककाकमार्जारगृध्रशंबर[1]शूकराः । अहिवृश्चिकगोधाश्च जायन्ते रात्रिभोजनात् ॥ ३५८ ॥

---

१ मच्छः ।



श्रीनेमि-
नाथ-
देशना ।

करोति विरतिं धन्यो यः सदा निशी भोजनात् । सोऽर्धं पुरुषायुषस्य स्यादवश्यमुपोषितः ॥ ३५९ ॥
रजनीभोजनत्यागे ये गुणाः परितोऽपि तान् । सद्गतेरेव जनकान् कः संख्यातुमलं भवेत् ॥ ३६० ॥
आमगोरससंपृक्तद्विदलादिषु जन्तवः । दृष्टाः केवलिभिः सूक्ष्मास्तस्मात्तानि विवर्जयेत् ॥ ३६१ ॥
जन्तुमिश्रं फलं पुष्पं पत्रं चान्यदपि त्यजेत् । संधानमपि संसक्तं[1] दयाधर्मपरायणः ॥ ३६२ ॥
एवं दयाप्रधानः सन् भोज्येष्वपि विविक्तधीः । श्रावकोऽपि क्रमयोगात् संसारात् परिमुच्यते ॥ ३६३ ॥
देशनां तां प्रभोः श्रुत्वा वरदत्तो नरेश्वरः । परं संसारवैराग्यमाससाद व्रतोत्सुकः ॥ ३६४ ॥
नत्वाथ कृष्णः पप्रच्छ सर्वस्त्वय्यनुरागवान् । राजीमत्या विशेषानुरागे किं नाम कारणम् ॥ ३६५ ॥
ततो धनधनवतीभवादारभ्य नेम्यपि । तया सह स्वसम्बन्धमाख्यादष्टभवावधि ॥ ३६६ ॥
अथोत्थाय नमस्कृत्य वरदत्तमहीपतिः । कृताञ्जलिर्जगन्नाथं नेमिनाथं व्यजिज्ञपत् ॥ ३६७ ॥
त्वत्तः श्रावकधर्मोऽपि प्रपन्नः स्यान्महाफलः । जन्तूनां स्वातिनक्षत्रजीमूतादिव पुष्करम्[2] ॥ ३६८ ॥
परं गुरौ त्वयि प्राप्ते नाहं तुष्यामि तावता । को हि कल्पद्रुमे प्राप्ते पत्रमात्रमभीप्सति ॥ ३६९ ॥
तव प्रथमशिष्यत्वमभीप्सामि प्रयच्छ मे । संसारतारणीं दीक्षां दयां कुरु दयानिधे ॥ ३७० ॥
इत्युक्तवन्तं तं भूपं स्वयं प्राव्राजयत् प्रभुः । क्षत्राणां विंशतिशती तदनु प्राव्रजत्तथा ॥ ३७१ ॥

तीर्थ–
स्थापना ।



---

१ संसक्तं जन्तुसंसक्तं संधानमप्याचारमपि त्यजेत् संधानं भाषायां "अथाणु" इति ख्यातम् । २ जलम् ।

धनदेवधनदत्तौ बन्धू धनभवात्तु यौ । अमात्यो विमलबोधोऽपराजितभवात्तु यः ॥ ३७२ ॥
स्वामिना ते सह भ्रान्ता भवेऽस्मिन्भूभुजस्त्रयः । तत्रायाता राजीमत्याः प्रसंगात् प्राग्भवैः श्रुतैः ॥ ३७३ ॥
उत्पन्नजातिस्मरणा जातवैराग्यसंपदः । अरिष्टनेमिपादान्ते तदैवाददिरे व्रतम् ॥ ३७४ ॥
॥ त्रिभिर्विशेषकम् ॥

तीर्थ-
स्थापना ।

तैः सह वरदत्तादीनेकादश गणाधिपान् । स्थापयामास विधिवन्नेमिनाथो जगद्गुरुः ॥ ३७५ ॥
स्वाम्याख्यत्रिपदीं तेभ्यो ध्रौव्योत्पादव्ययात्मिकाम् । तत्त्रिपद्यनुसारात्ते द्वादशांगीमसूत्रयन् ॥ ३७६ ॥
यक्षिणी राजपुत्री च भूरिकन्यासमावृता । प्राव्रजत्तां तदा स्वामी प्रत्यष्ठाच्च प्रवर्तिनीम् ॥ ३७७ ॥
दशार्हा उग्रसेनश्च वासुदेवश्च लाङ्गली । प्रद्युम्नाद्याः कुमारांश्च श्रावकत्वं प्रपेदिरे ॥ ३७८ ॥
शिवारोहिणीदेवक्यो रुक्मिण्याद्याश्च योषितः । जगृहुः श्रावकधर्ममन्याश्च स्वामिसन्निधौ ॥ ३७९ ॥
एवं समवसरणे तस्मिन् संघः प्रभोरभूत् । चतुर्विधो धर्म इव पृथिवीतलपावनः ॥ ३८० ॥
यातप्रथमपौरुष्यां व्यस्राक्षीद्देशनां प्रभुः । द्वितीयपौरुषीं चक्रे वरदत्तस्तु देशनाम् ॥ ३८१ ॥
भगवन्तं ततो नत्वा वासवाद्या दिवौकसः । कृष्णाद्या भूभुजोऽन्येऽपि स्थानं निजनिजं ययुः ॥ ३८२ ॥
तत्तीर्थजन्मा गोमेधस्त्र्यास्यः श्यामो नृवाहनः । मातुलिंगपर्शुचक्रधारिदक्षिणदोस्त्रयः ॥ ३८३ ॥
सनकुलशूलशक्तिदक्षिणेतरदोस्त्रयः । स्वामिनो नेमिनो जज्ञे तदा शासनदेवता ॥ ३८४ ॥

तत्तीर्थजन्मा कुष्मांडी स्वर्णाभा सिंहवाहना । आम्रलुंबीपाशधरवामेतरभुजद्वया ॥ ३८५ ॥
पुत्रांकुशधरवामकरयुग्माभवत्प्रभोः । अंबिकेत्यभिधानेन भर्तुः शासनदेवता ॥ ३८६ ॥
ताभ्यां सदाधिष्ठितसन्निधानो व्यतीत्य वर्षाशरदां च नेमिः ।
भद्रेभगामी जनभद्रकामी विहर्तुमन्यत्र ततश्चचाल ॥ ३८७ ॥

❖ ❖ ❖

इत्याचार्यश्रीहेमचंद्रसूरिविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्येऽष्टमे पर्वणि अरिष्टनेमिकुमारक्रीडादीक्षाकेवलज्ञानोत्पत्तिवर्णनो नाम नवमः सर्गः ।

❖ ❖ ❖



श्रीनेमि–
नाथविहारः ।

# दशमः सर्गः ।

द्रौपदी–
हरणम् ।

इतश्च पांडवाः कृष्णप्रसादात् स्वपुरे स्थिताः । वारकेण प्रमुदिता द्रौपद्या सह रेमिरे ॥ १ ॥
द्रौपद्याश्चान्यदा वेश्मन्याययौ नारदो भ्रमन् । तया त्वविरतोऽसावित्यवज्ञाय न सत्कृतः ॥ २ ॥
भाविनी दुःखभागेषा कथं न्विति निचिन्तयन् । निर्ययौ तद्गृहात् क्रुद्धो विरुद्धो नारदो मुनिः ॥ ३ ॥
अत्र कृष्णभयात्तस्या अपश्यन्नप्रियावहम्[1] । जगाम धातकीखंडभरते नारदस्ततः ॥ ४ ॥
तत्र चंपाजुषो विष्णोः कपिलाख्यस्य सेवकम् । पुर्यां सोऽमरकंकायां स्त्रीलोलं पद्ममभ्यगात् ॥ ५ ॥
स राजोत्थाय नीत्वान्तःपुरे स्वाः स्त्रीः प्रदर्शयन् । ऊचे नारदमीदृश्यो दृष्टाः किं क्वापि योषितः ॥ ६ ॥
सेत्स्यत्यर्थो ममानेनेत्यामृशन्नारदोऽवदत् । कूपमंडूकवद्राजन् किमेताभिः प्रमोदसे ॥ ७ ॥
जंबूद्वीपस्य भरते नगरे हस्तिनापुरे । पांडवानां महिष्यस्ति द्रौपदीति पदं श्रियाः ॥ ८ ॥
तस्याः पुरस्तादेता हि चेट्य एवाखिला अपि । इत्युदित्वा नारदर्षिरुत्पत्यागमदन्यतः ॥ ९ ॥

---

१ अप्रियकरम् ।

अथेप्सुर्द्रौपदीं पद्मनाभः पातालवासिनम् । तपसा साधयामास पूर्वसंगतिकं[1] सुरम् ॥ १० ॥
प्रत्यक्षीभूतममरं किं करोमीति वादिनम् । पद्मस्तमूचेऽत्रानीय द्रौपदीं मे समर्पय ॥ ११ ॥
सोऽप्याख्यत्पांडवान् मुक्त्वा द्रौपदी नान्यमिच्छति । त्वन्निर्बन्धादानयामीत्युक्त्वा गजपुरे ययौ ॥ १२ ॥
ततोऽवस्वापनीं दत्वा प्रसुप्तां द्रौपदीं निशि । अपहृत्य समानीयार्पयत् पद्माय सोऽमरः ॥ १३ ॥
प्रबुद्धा द्रौपदी तत्राप्रेक्षमाणा निजां स्थितिम्[2] । किं स्वप्नमिन्द्रजालं वेत्यामृशाद्विधुरा सती ॥ १४ ॥
बभाषे पद्मनाभस्तां मा भैषीर्मृगलोचने । आनायिता मयासि त्वं भुंक्ष्व भोगान्मया सह ॥ १५ ॥
द्वीपोऽयं धातकीखंडोऽमरकंका पुरी त्वसौ । राजाहं पद्मानाभोऽत्र बुभूषुस्तेऽधुना पतिः ॥ १६ ॥

द्रौपदी-
हरणम् ।

प्रत्युत्पन्नमतिर्द्रौपद्यूचे मासान्तरे यदि । कोऽपि नैष्यति मदीयः करिष्ये त्वद्वचस्तदा ॥ १७ ॥
अशक्यात्रागतिर्नृणां जंबूद्वीपजुषामिति । विमृशंस्तद्वचो मेने पद्मश्छद्मपरोऽपि हि ॥ १८ ॥
न भोक्ष्ये मासपर्यन्तेऽप्यहं पतिं विना कृता । द्रौपदीत्यभिजग्राह सतीव्रतमहाधना ॥ १९ ॥
पांडवा अप्यपश्यन्तः प्रभाते द्रौपदीं गृहे । भृशमन्वेषयामासुर्जलस्थलवनादिषु ॥ २० ॥
तद्वार्तामपि ते नापुस्तन्माताख्यच्च शार्ङ्गिणे । स एव शरणं तेषां बन्धुश्च विधुरेषु सः ॥ २१ ॥
कृष्णोऽपि कृत्यमूढोऽस्थाद्यावत्तावत्समाययौ । स नारदमुनिर्द्रष्टुं तमनर्थं स्वयं कृतम् ॥ २२ ॥



१ पूर्वमित्रम् । २ स्थानम् ।

किं दृष्टा द्रौपदी क्वापीत्यनुयुक्तः[1] स विष्णुना । ऊचेऽगां धातकीखंडेऽमरकंकापुरीमहम् ॥ २३ ॥
तत्र भूपस्य पद्मस्य सद्मनि द्रुपदात्मजाम् । अद्राक्षमहमित्युक्त्वा जगामोत्पत्य सोऽन्यतः ॥ २४ ॥
बभाषे पांडवान् कृष्णः पद्मेन द्रौपदी हृता । एष तामाहरिष्यामि मा खिद्यध्वं मनागपि ॥ २५ ॥
ततः सपांडवो विष्णुर्महानीकसमावृतः । जगाम मागधाभिख्यप्राचीनांभोधिरोधसि ॥ २६ ॥
ऊचुश्च पांडवाः कृष्णं स्वामिन्नत्यन्तभीषणः । संसार इव चापारः पारावारो[2]ऽयमुद्धतः ॥ २७ ॥
मग्नास्तिष्ठन्ति कुत्रापि लेष्टुवत् पर्वता इह । तिष्ठन्ति पर्वतप्रायाण्यत्र यादांसि कुत्रचित् ॥ २८ ॥
कृतशोषप्रतिज्ञश्च[3] वाडवोऽत्रास्ति कुत्रचित् । वेलन्धरसुराश्चात्र कैवर्ता इव कुत्रचित् ॥ २९ ॥
उद्वर्त्यन्तेऽत्रोर्मिभिश्च कमंडलुनिभा घनाः । अलंघ्यो मनसाप्येष लंघनीयः कथं ततः ॥ ३० ॥

द्रौपदी–
हरणम् ।

का वश्चिन्तेति तानुक्त्वा कृष्णः कृष्णेतराशयः । तीरे निषद्य तपसाराधयामास सुस्थितम् ॥ ३१ ॥
आविर्भूय सुरः सोऽपि किं करोमीत्यभाषत । कृष्णोऽप्यूचे पार्थिवेन पद्मेन द्रौपदी हृता ॥ ३२ ॥
सा यथा धातकीखंडद्वीपादानीयते द्रुतम् । तथा कुरु सुरश्रेष्ठ लवणोदधिदैवत ॥ ३३ ॥
देवोप्यूवाच पद्मस्य पूर्वसंगतनाकिना । हृत्वा समर्पिता कृष्ण तद्वत्तामर्पयामि वः ॥ ३४ ॥
यद्वा नेदं रोचते वस्ततः सबलवाहनम् । क्षिपाम्यंभोनिधौ पद्मं द्रौपदीमर्पयामि वः ॥ ३५ ॥

१ पृष्टः । २ समुद्रः । ३ कृता शोषे शोषणे प्रतिज्ञा येन सः ।

कृष्णोप्यूचे मेति कार्ष्णीः पांडवानां ममापि च । षण्णां रथानां तोयान्तर्देहि मार्गमनाहतम् ॥ ३६ ॥
यथा तत्र स्वयं गत्वा तं वराकं विजित्य च । आनयामो वयं कृष्णां पन्था ह्येष यशस्करः ॥ ३७ ॥
सुस्थितोऽपि तथा चक्रे कृष्णोऽपि हि सपांडवः । अब्धिं स्थलमिवोल्लंघ्यामरकंकां ययौ पुरीम् ॥ ३८ ॥
स्थित्वा तद्बहिरुद्यानेऽनुशिष्य हरिणा स्वयम् । दारुकः प्रेषितो दौत्ये[1] ययौ पद्मनृपान्तिके ॥ ३९ ॥
तत्पादपीठं पापेनाक्रामन् भृकुटिभीषणः । कुन्ताग्रेणार्पयँल्लेखं दारुकः पद्ममब्रवीत् ॥ ४० ॥
पाण्डवानां वासुदेवसहायानां प्रिया त्वया । जंबूद्वीपस्य भरतादानीता द्रुपदात्मजा ॥ ४१ ॥
दत्तमार्गोऽम्बुधिनापि कृष्णः पांडुसुतैः सह । आगतोऽस्त्यर्प्यतां कृष्णां जिजीविषसि यद्यरे ॥ ४२ ॥
पद्मोऽप्यूचे स तत्रैव वासुदेव इह त्वहो । आत्मषष्ठो[2] मम कियान् गच्छ सज्जय तं युधि ॥ ४३ ॥
अभ्येत्य तद्वचः कृष्णायाचख्यौ दारुकोऽपि हि । आगाद्युयुत्सुः पद्मोऽपि संनह्य सह सेनया ॥ ४४ ॥
तस्यापतत्सु सैन्येषु वारिधेरिव वीचिषु । स्मेराक्षः पुंडरीकाक्षः पांडवानित्यभाषत ॥ ४५ ॥
योत्स्यन्ते किं भवन्तोऽत्र सह पद्मेन भूभुजा । अथवा युध्यमानं मां प्रेक्षिष्यन्ते रथस्थिताः ॥ ४६ ॥
तेऽप्यूचुः सह पद्मेन वयं योत्स्यामहे प्रभो । राजाद्य पद्मनाभो वा वयं चेति कृताश्रवाः ॥ ४७ ॥
ततश्च ते युयुधिरे पद्मेन पृथिवीभुजा । जिताश्च पुनरप्येत्य वासुदेवमदोऽवदन् ॥ ४८ ॥

१ दूतकर्मणि । २ आत्मना षष्ठः कृष्णः ।



द्रौपद्यान–
यनहितोः
गतानां
पाण्डवानां
पराजयः ।

स्वामिन् बलीयान् पद्मोऽयं बलवत्सैनिकावृतः । त्वयैव जय्यो नास्माभिः कुरुष्वेह यथोचितम् ॥ ४९ ॥
कृष्णोप्यूचे जिता यूयं तदैव ननु पांडवाः । राजा पद्मो वयं वेति गदितं वचनं यदा ॥ ५० ॥
राजाहमेव नो पद्म इत्युदित्वा जनार्दनः । युधि चचाल दध्मौ च पांचजन्यं महास्वनम् ॥ ५१ ॥
बलत्रिभागः पद्मस्य तच्छंखध्वनिनात्रुटत् । गतिर्मृगकुलस्येव सिंहनादेन सर्पता ॥ ५२ ॥
शार्ङ्गं चास्फालयच्छार्ङ्गी तस्यापि ध्वनिना पुनः । बलत्रिभागः पद्मस्यात्रुटद्दुर्बलरज्जुवत् ॥ ५३ ॥
अवशिष्टतृतीयांशबलः पद्मो रणांगणात् । प्रणश्यामरकंकायां प्रविवेश झगित्यपि ॥ ५४ ॥
लोहार्गलासनाथानि पिदधे गोपुराणि सः । कृष्णोऽपि प्रज्वलन् क्रोधादुत्ततार रथादथ ॥ ५५ ॥
समुद्घातेन जज्ञे च नरसिंहवपुर्हरिः । क्रुद्धोऽन्तक इव व्यात्ताननदंष्ट्राभयंकरः ॥ ५६ ॥
नर्दन्नत्यूर्जितं सोऽथ विदधे पाददर्दरम्[1] । चकंपे वसुधा तेन हृदयेन सह द्विषाम् ॥ ५७ ॥
प्राकाराग्राणि बभ्रंसुः पेतुर्देवकुलान्यपि । कुट्टिमानि व्यशीर्यन्त शार्ङ्गिणः पाददर्दरैः ॥ ५८ ॥
गर्तेषु लिल्यिरे केऽपि केऽपि तोयेषु चाविशन् । निपेतुर्मूर्च्छिताः केऽपि तत्पुर्यां नृहरेर्भयात् ॥ ५९ ॥
क्षम्यतां देवि रक्षास्मादन्तकादिव शार्ङ्गिणः । इति जल्पन् ययौ पद्मः शरणं द्रुपदात्मजाम् ॥ ६० ॥
साप्यूचे मां पुरस्कृत्य स्त्रीवेशं विरचय्य च । प्रयाहि शरणं कृष्णं तथा जीवसि नान्यथा ॥ ६१ ॥

१ पादघातम् ।



कृष्णेन
द्रौपदीहर्तुः
पराजयः ।

द्वयोर्वासु–
देवयोः
शंखनाद–
मिलनम् ।

इत्युक्तः स तथा चक्रे नमश्चक्रे च शार्ङ्गिणम् । शरण्यो वासुदेवोऽपि मा भैषीरित्युवाच तम् ॥ ६२ ॥
द्रौपदीं चार्पयामास पांडवानां जनार्दनः । ववले च रथारुढः सह तैस्तेन वर्त्मना ॥ ६३ ॥
तदा च तत्र चंपायामुद्याने पूर्णभद्रके । भगवान् समवासार्षीन्मुनिसुव्रततीर्थकृत् ॥ ६४ ॥
कपिलस्तत्सभासीनो विष्णुः पप्रच्छ तं प्रभुम् । स्वामिन्ममेव कस्यायं शंखनादः श्रवोतिथिः[1] ॥ ६५ ॥
शंखध्वनिः कृष्णविष्णोरेष इत्यर्हतोदिते । एकत्र किं हरी स्यातामित्यपृच्छत्स केशवः ॥ ६६ ॥
द्रौपदीपद्मकृष्णानां वृत्तान्तं भगवानपि । समाचख्यौ कपिलाय कपिलोऽप्येवमब्रवीत् ॥ ६७ ॥
जंबुद्वीपार्धभरतेशस्य कृष्णस्य नाथ किम् । भवाम्यहं स्वागतिकोऽभ्यागतस्यातिथेरिह ॥ ६८ ॥
स्वाम्यूचे न यथैकत्र द्वितीयोऽर्हन्न चक्रभृत् । न च विष्णुस्तथान्येन न मिलेत् कारणागतः ॥ ६९ ॥
श्रुत्वापीत्यर्हतो वाचं कपिलः कृष्णमीक्षितुम् । ययावब्धेस्तटे कृष्णरथसीमंतिताध्वनि ॥ ७० ॥
ईक्षांचक्रे च कृष्णस्य मध्येऽम्भोनिधि गच्छतः । रजतस्वर्णपत्राभान् श्वेतपीतरथध्वजान् ॥ ७१ ॥
कपिलो विष्णुरेषोऽहमुत्कस्त्वां द्रुष्टुमागतः । तद्वलस्वेत्यक्षराढ्यं शंखं दध्मौ स शार्ङ्गभृत् ॥ ७२ ॥
[2]आगमाम वयं दूरं त्वया वाच्यं न किंचन । इति व्यक्ताक्षरध्वानं शंखं कृष्णोऽप्यपूरयत् ॥ ७३ ॥
तच्छंखध्वनिमाकर्ण्य ववले कपिलो हरिः । गत्वा कंकापुरीं पद्मं किमेतदिति चावदत् ॥ ७४ ॥

---

१ कर्णातिथिः । २ अद्यतन्यां उत्तम पुरुष बहुवचनम् ।

पद्मोऽप्यकथयत् स्वांगो[1]ऽवोचद्यत् स्वामिनि त्वयि । कृष्णेनाहं पराभूतो जंबूभरतविष्णुना ॥ ७५ ॥
रे दुरात्मन्नसमानविग्रहेति वदन् हरिः । पद्मं निर्वासयामास तद्राज्ये तत्सुतं न्यधात् ॥ ७६ ॥
कृष्णोऽप्यंभोधिमुत्तीर्य पांडवानेवमब्रवीत् । आपृच्छे सुस्थितं यावत्तावद्गंगाम[2]तीत भोः ॥ ७७ ॥
ततस्ते नावमारुह्य गंगाश्रोतोऽतिभीषणम् । द्वाषष्टियोजनपृथूत्तीर्यान्योऽन्यमदोऽवदन् ॥ ७८ ॥
द्रक्ष्यामोऽद्य बलं विष्णोर्नौरत्रैव निर्धार्यताम् । विना नावं कथं गंगाश्रोतोऽसावुत्तरिष्यति ॥ ७९ ॥
एवं ते कृतसंकेता निलीयास्थुर्नदीतटे । इतश्च कृतकृत्यः सन् कृष्णोऽप्यागात्सरिद्वराम् ॥ ८० ॥
तत्रा[3]पश्यन् हरिर्नावं दोष्ण्येकस्मिन् सवाजिनम् । रथं न्यस्यान्यदोष्णांभस्तरीतुमुपचक्रमे ॥ ८१ ॥
गंगामध्ये गतः श्रान्तः कृष्णश्चैवमचिंतयत् । अहो पांडुसुताः शक्ता गंगां तेरुस्तरीं विना ॥ ८२ ॥
गंगा तच्चिन्तितं ज्ञात्वा ददौ स्ताघं क्षणादपि । उत्ततार ततस्तां च सुखेनैव जनार्दनः ॥ ८३ ॥
युष्माभिः कथमुत्तीर्णा गंगेत्यूचे स पांडवान् । नावोत्तीर्णास्माभिरिति प्रत्यूचुस्तेऽपि शार्ङ्गिणम् ॥ ८४ ॥
वालयित्वा न किं प्रैषि नौरित्युक्तास्तु शार्ङ्गिणा । तेऽवोचन् प्रेषिता नौर्न युष्मदोजः परीक्षितुम् ॥ ८५ ॥
कृष्णोऽप्युवाच कुपितो मदोजो ज्ञास्यथाधुना । न ज्ञातमब्धितरणेऽमरकंकाजयेऽपि च ॥ ८६ ॥
इत्युक्त्वा लोहदंडेन रथांस्तेषां ममर्द सः । अभूच्च पत्तनं तत्र नामतो रथमर्दनम् ॥ ८७ ॥

पाण्डवैः कृष्णबल-परीक्षणम् ।

१ स्वापराध । २ इणक्–गतौ पंचमी–मध्यम पुरुष बहुवचनम् । ३ शतृ प्रत्ययान्तम् ।

ततो निर्विषयांश्चक्रे पांडवान् कंससूदनः । संभूय शिबिरेणाथ द्वारकां नगरीं ययौ ॥ ८८ ॥
पांडवाः स्वपुरं गत्वा तत् कुन्त्या आचचक्षिरे । कुन्त्यपि द्वारकां गत्वा वासुदेवमभाषत ॥ ८९ ॥
त्वया निर्वासिताः कुत्र तिष्ठन्तु मम सूनवः । अस्मिन् भरतवर्षार्द्धे न सा भूर्भवतो न या ॥ ९० ॥
कृष्णोऽप्यूचे दक्षिणाब्धे रोधस्यभिनवां पुरीम् । निवेश्य पांडुमथुरां वसन्तु तव सूनवः ॥ ९१ ॥
कुन्ती गत्वा तदाचख्यौ सुतेभ्यः कृष्णशासनम् । तेऽपीयुः पांडुविषयं वार्धिवेलापवित्रितम् ॥ ९२ ॥
कृष्णोऽपि हास्तिनपुरेऽभिषिषेच परीक्षितम् । पौत्रं जामेः सुभद्राया अभिमन्युतनूद्भवम् ॥ ९३ ॥
इतश्च भगवान्नेमिः पावयन् पृथिवीतलम् । क्रमेण भद्दिलपुरं पुरप्रवरमीयिवान् ॥ ९४ ॥
आसंश्च तस्मिन्नगरे सुलसानागयोः सुताः । देवक्युदरजाः षट् ते ये दत्ता नैगमेषिणा ॥ ९५ ॥

देवकन्या स्वषट्सुत-परिज्ञानम् ।

तेऽथ द्वात्रिंशतं कन्याः प्रत्येकं परिणिन्यिरे । श्रीनेमिना बोधितास्तु तत्पार्श्वे जगृहुर्व्रतम् ॥ ९६ ॥
सर्वे चरमदेहास्ते द्वादशांगधराः क्रमात् । विजह्रुः स्वामिना सार्धं तपस्यन्तस्तपो महत् ॥ ९७ ॥
इतश्च भगवान्नेमिर्विहरन् द्वारकां ययौ । सहस्राम्रवणे तत्रोपवने समवासरत् ॥ ९८ ॥
षट् च ते देवकीपुत्राः षष्ठान्ते पारणार्थिनः । त्रिधा युगलिनौ भूत्वा प्राविशन् द्वारिकां पुरीम् ॥ ९९ ॥
तेभ्योऽनीकयशोऽनन्तसेनौ द्वौ देवकीगृहम् । गतौ तौ वीक्ष्य कृष्णाभावित्यमोदत देवकी ॥ १०० ॥
सा प्रत्यलाभयत् सिंहकेसरैर्मोदकोत्तमैः । तौ जग्मतुस्ततश्चान्यौ तत्सौदर्यावुपेयतुः ॥ १०१ ॥

अजितसेननिहतशत्रू नाम्ना महामुनी । सा प्रत्यलाभयत्तावप्यथान्यौ समुपेयतुः ॥ १०२ ॥
नाम्ना देवयशःशत्रुसेनौ श्रमणपुंगवौ । तौ च नत्वा देवकीत्थमपृच्छद्रचिताञ्जलिः ॥ १०३ ॥
भूयो भूयोऽपि दिङ्मोहात् किं नु यूयमिहागताः । किं वा मे मतिमोहोऽयं यूयं न हि त एव हि ॥ १०४ ॥
अथवा स्वर्गकल्पायामप्यस्यां पुरि संपदा । नोचितं भक्तपानादि प्राप्नुवन्ति महर्षयः ॥ १०५ ॥
तावूचतुर्न दिङ्मोहोऽस्माकं षट् सोदरा वयम् । भद्दिलपुरवास्तव्याः सुलसानागयोः सुताः ॥ १०६ ॥
धर्मं श्रुत्वा नेमिपार्श्वे प्राव्रजाम वयं हि षट् । भूत्वा च त्रीणि युग्मानि क्रमात्ते गृहमागताः ॥ १०७ ॥
ततश्च देवकी दध्यौ कथं नाम षडप्यमी । कृष्णस्य सदृशा एवं तिला[1] अपि तिलस्य न ॥ १०८ ॥

देवकन्या स्वषट्सुत-परिज्ञानम् ।

[2]जीवदष्टसुता चाहमतिमुक्तकसाधुना । पुराख्यातास्मि तेनैते किं स्युर्मम तनूरुहाः ॥ १०९ ॥
विमृश्यैवं द्वितीयेऽह्नि तत्प्रष्टुं नेमिनोऽन्तिके । ययौ समवसरणे देवकी देवनिर्मिते ॥ ११० ॥
ज्ञात्वा स्वाम्यपि तद्भावमूचे तेऽमी सुताः खलु । समर्पिताः सुलसाया जीवन्तो नैगमेषिणा ॥ १११ ॥
सा तथा तत्र षट् साधून् पश्यंत्युत्प्रस्नवस्तनी । ववन्दे च बमाषे च साधु दृष्टाश्च हे सुताः ॥ ११२ ॥
राज्यं प्रकृष्टमथवा दीक्षा मत्कुक्षिजन्मनाम् । किं त्वेतन्मम खेदाय स्वयं नैकोऽपि लालितः ॥ ११३ ॥
भगवानप्यथोवाच मुधा मा ताम्य देवकि । पूर्वकर्मफलं ह्येतदिह जन्मन्युपस्थितम् ॥ ११४ ॥



---

१ ते एव कृष्णस्य सदृशास्तिला अपि तिलस्य सदृशा न । २ अष्टमः सुतो भावीत्यपेक्षयोक्तमिदम् ।

सपत्न्याः सप्त रत्नानि त्वमाहार्षीः पुरा भवे । रुदत्याश्चार्पितं तस्या रत्नमेकं पुनस्त्वया ॥ ११५ ॥
तच्छ्रुत्वा देवकी निन्दत्यात्मप्राग्जन्मदुष्कृतम् । ययौ स्वगृहमस्थाच्च पुत्रजन्माभिकांक्षिणी ॥ ११६ ॥
किमेवं विमना मातरित्युक्ता शार्ङ्गपाणिना । सा बभाषे निःफलेन जीवितव्येन किं मम ॥ ११७ ॥
त्वं वर्धितो नन्दगृहे नागधाम्नि च तेऽग्रजाः । कलकंठ्येव[1] नापत्यं मया किमपि लालितम् ॥ ११८ ॥
इच्छामि तत्सुतं वत्स बाललालनकौतुकात् । पशवोऽपि हि धन्यास्ते स्वयं स्वापत्यलालकाः ॥ ११९ ॥
एष ते पूरयाम्यर्थमित्युक्त्वा प्रययौ हरिः । आराधयामास शक्रसेनान्यं नैगमेषिणम् ॥ १२० ॥
देवोऽप्युवाच ते मातुर्भविष्यत्यष्टमः सुतः । उद्भिन्नयौवनो धीमान् स परं प्रव्रजिष्यति ॥ १२१ ॥
अनु तद्वचनं स्वर्गाच्च्युत्वा देवो महर्द्धिकः । देवक्याः कुक्षिमायासीज्जज्ञे च समये सुतः ॥ १२२ ॥
नाम्ना गजसुकुमालं रुपात् कृष्णमिवापरम् । तं स्वयं लालयामास देवकी देवसन्निभम् ॥ १२३ ॥
सोऽत्यन्तवल्लभो मातुर्भ्रातुश्च प्राणसन्निभः । द्वयोर्नेत्रेन्दीवरेन्दुः क्रमेण प्राप यौवनम् ॥ १२४ ॥
प्रभावतीमभिधया द्रुमस्य पृथिवीपतेः । कन्यां गजसुकुमालः पित्रादेशादुपायत ॥ १२५ ॥
सोमशर्मद्विजसुतां सोमाख्यां क्षत्रियाभवाम् । सोऽनिच्छन्नप्युपयेमे मातृभ्रात्रोर्निर्देशतः ॥ १२६ ॥
तदैव तत्र समवासार्षीन्नेमिस्तदन्तिके । धर्मं गजसुकुमालः सभार्योऽवहितोऽशृणोत् ॥ १२७ ॥

देवकन्या
देवप्रभावेण
पुत्रप्राप्तिः ।

---

१ कलकंठी भाषायां "कोयल" इति ख्यातम् तदपत्यानि काक्या लाल्यन्त इति लोकप्रसिद्धम् ।

गज–सुकुमाल–दीक्षा, उपसर्गः, केवलं मोक्षश्च ।

ततश्चोत्पन्नवैराग्यः पत्नीभ्यां सहितो गजः । पितरौ समनुज्ञाप्य स्वामिपार्श्वेऽग्रहीद्व्रतम् ॥ १२८ ॥
गजे प्रव्रजिते चाथ तद्वियोगासहिष्णवः । पितरौ कृष्णमुख्याश्च भ्रातरो रुरुदुस्तराम् ॥ १२९ ॥
सायं स स्वामिनं पृष्ट्वा श्मशाने प्रतिमां व्यधात् । बहिर्गतेन दृष्टश्च ब्रह्मणा सोमशर्मणा ॥ १३० ॥
सोमशर्माचिन्तयच्च यत्पाखंडचिकीरयम् । विडंबनाय मत्पुत्रीमुपयेमे दुराशयः ॥ १३१ ॥
इति क्रुद्धस्तच्छिरसि सोमशर्मा विरुद्धधीः । ज्वलच्चितांगारपूर्णं [1]घटीकंठमतिष्ठपत् ॥ १३२ ॥
तेनातिदह्यमानोऽपि सोऽधिसेहे समाहितः । दग्धकर्मेन्धनो जातकेवलश्च ययौ शिवम् ॥ १३३ ॥
प्रातश्चचाल कृष्णोऽपि रथस्थः सपरिच्छदः । द्रष्टुं गजसुकुमालमुत्कंठापूर्णमानसः ॥ १३४ ॥
निर्गच्छन् द्वारकायाश्च बहिरैक्षिष्ट स द्विजम् । वहन्तमिष्टकां मूर्ध्ना वृद्धं देवालयं प्रति ॥ १३५ ॥
तस्यानुकंपया कृष्ण आपाका[2]त्स्वयमिष्टकाम् । निन्ये देवकुले तस्मिन् लोकोऽनैषीच्च कोटिशः ॥ १३६ ॥
कृतार्थं तं द्विजं कृत्वा ययौ नेमिं जनार्दनः । न चापश्यद्गजं तत्र मुक्तं निधिमिवात्मना ॥ १३७ ॥
क्व मे भ्राता गज इति पप्रच्छ स्वामिनं हरिः । सोमद्विजाद्गजमोक्षमाचख्यौ भगवानपि ॥ १३८ ॥
ततो मुमूर्छ गोविंदो लब्धसंज्ञः पुनः प्रभुम् । पप्रच्छ भ्रातृवधको ज्ञातव्यः स कथं मया ॥ १३९ ॥
भगवानप्यभाषिष्ट मा कुपः सोमशर्मणे । त्वद्भ्रातुः स हि सहायः सद्यो मोक्षस्य साधने ॥ १४० ॥

१ स्फुटितघटकपालम् । २ यत्रेष्टकाः पच्यन्ते तत् स्थानमापाकमिति कथ्यते ।

सिद्धिः स्याच्चिरसाध्यापि सहायवशतः क्षणात् । यथा त्वयाद्य वृद्धस्य ब्राह्मणस्येष्टकार्पणात् ॥ १४१ ॥
सोमशर्मा न कुर्याच्चेत् कर्म त्वद्भ्रातुरीदशम् । तत्कथं तस्य सिद्धिः स्यात्कालक्षेपं विनैव हि ॥ १४२ ॥
स्वमुद्बद्धुं व्रजंस्त्वां च विशन्तं पुरि वीक्ष्य यः । भिन्नमूर्धा म्रियते तं जानीथा भ्रातृघातकम् ॥ १४३ ॥
ततः कृष्णो रुदन् भ्रातुः संस्काराद्यकरोत् स्वयम् । प्राविशच्च पुरीं सोममैक्षिष्ट च तथा मृतम् ॥ १४४ ॥
बन्धयित्वा पादयोस्तं पुर्यामभ्रमयन्नरैः । बहिश्च क्षेपयामास गृध्रादीनां नवं बलिम् ॥ १४५ ॥
तेन शोकेन यदवो बहवो नेमिसन्निधौ । प्रवव्रजुर्दशार्हाश्च वसुदेवं विना नव ॥ १४६ ॥
शिवा च स्वामिनो माता सप्त चापि सहोदराः । अन्येऽपि हरिकुमाराः प्राव्रजन्नन्तिके प्रभोः ॥ १४७ ॥
राजीमत्यपि संविग्ना प्राव्राजीत्स्वामिनोऽन्तिके । नन्दकन्यैकनासा च बह्व्यश्चान्या यदुस्त्रियः ॥ १४८ ॥
कन्योद्वाहप्रत्याख्यानाभिग्रहं हरिराददे । सर्वा दुहितरस्तस्य प्राव्रजन् स्वामिनोऽन्तिके ॥ १४९ ॥
विना च कनकवतीं रोहिणीं देवकीं तथा । वसुदेवस्य पत्न्योऽपि प्राव्रजन्नेमिसन्निधौ ॥ १५० ॥
गृहेऽपि कनकवत्याश्चिन्तयन्त्या भवस्थितिम् । उत्पेदे केवलज्ञानं सद्यस्त्रुटितकर्मणः ॥ १५१ ॥
नेमिना ज्ञापितैर्देवैः सा क्लृप्तमहिमा ततः । प्रव्रज्यां स्वयमादत्त ययौ च स्वामिनोऽन्तिके ॥ १५२ ॥
दृष्ट्वा नेमिं वनेऽगच्छद्दिनानि त्रिंशतं ततः । विहितानशना मृत्वा मोक्षं कनकवत्यगात् ॥ १५३ ॥
नैषधिः सागरचन्द्रो रामपौत्रो विरक्तधीः । अणुव्रतधरोऽग्रेपि तदाभूत् प्रतिमाधरः ॥ १५४ ॥



गज–
सुकुमाल–
शोकेन
बहुनां
यादवानां
दीक्षा ।

बहिर्गत्वोपस्मशानं कायोत्सर्गं दधौ च सः । नभःसेनेन दृष्टश्च तच्छिद्रान्वेषिणा सदा ॥ १५५ ॥
तमूचे च नभःसेनः पाखंडिन् किं करोष्यदः । लभस्व कमलामेलाहरणच्छद्मनः फलम् ॥ १५६ ॥
इत्युक्त्वा तस्य शिरसि निधाय घटकंठकम् । अपूरयच्चितांगारैर्नभःसेनो दुराशयः ॥ १५७ ॥
तत्सम्यगधिसह्याशु विपन्नः सागरः सुधीः । स्मृतपञ्चपरमेष्ठिनमस्कारो दिवं ययौ ॥ १५८ ॥
सदस्यूचेऽन्यदा शक्रो यत्कृष्णो गुणकीर्तनम् । दोषान् विहाय कुरुते नीचयुद्धैर्न युध्यते ॥ १५९ ॥
तद्वचोऽश्रद्दधत्कश्चिदागाद्द्वारवतीं सुरः । तदा च स्वेच्छया रन्तुं रथस्थः प्राचलद्धरिः ॥ १६० ॥
विचक्रे तेन देवेन कृष्णांगः श्वा मृतः पथि । दुर्गन्धेनाखिलं लोकं बाधमानोऽतिदूरतः ॥ १६१ ॥
तं प्रेक्ष्य केशवोऽवोचदहो कृष्णतनोः शुनः । अस्यास्ये पांडुरा दंताः शोभन्ते सुतराममी ॥ १६२ ॥
देवोऽथाश्वहरीभूयाश्वरत्नं शार्ङ्गिणोऽहरत् । प्रधाविताननुपदं कृष्णसैन्याञ्जिगाय च ॥ १६३ ॥
ततोऽधावत् स्वयं कृष्णो नेदीयानब्रवीच्च तम् । किं हरस्यश्वरत्नं मे मुञ्चेदानीं क्वयासि भोः ॥ १६४ ॥
देवोऽप्युवाच मां युद्धे विजित्याश्वं गृहाण भोः । कृष्णोऽप्यूचे रथं तर्हि त्वमादत्स्व रथी ह्यहम् ॥ १६५ ॥
देवोऽप्युवाच पर्याप्तं रथेनेभादिना च मे । युद्धैश्च बाहुयुद्धाद्यैः कुरु किं तु युताहवम्[1] ॥ १६६ ॥
प्रत्यभाषत गोविन्दो जितोऽस्मि नय वाजिनम् । न जातु नीचयुद्धेन युध्ये सर्वात्ययेऽपि[2] हि ॥ १६७ ॥

शक्रेण कृता कृष्णप्रशंसा देवपरीक्षा च ।

---

१ मिलितयुद्धम् । २ सर्वनाशेऽपि ।

तुष्टोऽथ सोऽमरः शक्रवृत्तान्ताख्यानपूर्वकम् । वरं वृणु महाभागित्यवोचत जनार्दनम् ॥ १६८ ॥
देवं कृष्णोऽप्यभाषिष्ट संप्रति द्वारिका पुरी । रोगोपसर्गैर्बहुला तच्छान्त्यै किञ्चिदर्पय ॥ १६९ ॥
कृष्णायादात् सुरो भेरीमाख्यच्च यदियं त्वया । षण्मास्यन्ते षण्मास्यन्ते वादनीयात्मनः पुरी ॥ १७० ॥
अस्याः श्रुतेन शब्देनोपसर्गाः प्राक्तना हरे । क्षयं यास्यन्त्यथ नवा षण्मासीं नैव भाविनः ॥ १७१ ॥
इत्युक्त्वा स ययौ देवस्तां भेरीं केशवोऽपि हि । तथैव वादयामास रुक्छान्तिश्चाभवत् पुरि ॥ १७२ ॥
भेरीख्यातिमथ श्रुत्वा कोऽपि दाहज्वरार्दितः । आगाद्देशान्तरादाढ्यो भेरीपालमुवाच च ॥ १७३ ॥
द्रव्यलक्षं गृहाणेदमुपकाराय मेऽनघ । भेरीखंडं पलमात्रं विश्राणय कृपां कुरु ॥ १७४ ॥
भेरीपालोऽप्यर्थलुब्धस्ततखंडं तस्य दत्तवान् । भेरी चन्दनखंडेनापूरिष्ट श्लिष्टसन्धिना ॥ १७५ ॥
सोऽन्येभ्योऽपि ददावेवमर्थलुब्धस्तथा यथा । चन्दनच्छेदकन्थाभूत् सा भेरी मूलतोऽपि हि ॥ १७६ ॥
अन्यदा त्वशिवे जाते शार्ङ्गभृत्तामवादयत् । सभामपि न तन्नादोऽत्यगान्मशकनादवत् ॥ १७७ ॥
किमेतदिति कृष्णेन पृष्टाः प्रत्ययिता नरा । कन्थीकृतां रक्षकेण तां भेरीमाचचक्षिरे ॥ १७८ ॥
तमारक्षमहन् कृष्णो भेरीमन्यां ततोऽमरात् । लेभे चाष्टमभक्तेन महद्भिः किं दुरासदम् ॥ १७९ ॥
तां भेरीं वादयामास रोगशान्त्यै जनार्दनः । वैद्यावप्यादिशद्धन्वन्तरिवैतरणी तथा ॥ १८० ॥
तत्र वैतरणिर्भव्यश्चिकित्सां यस्य योचिता । तामाख्यायाकरोत्तस्य ददौ स्वमपि भेषजम् ॥ १८१ ॥

रोगापहारिणी
दिव्यभेरी ।

धन्वन्तरिस्तु विदधे चिकित्सां पापसंयुताम् । अस्माकं विहितं नेदमिति तं साधवोऽभ्यधुः ॥ १८२ ॥
सोऽपि प्रतिबभाषे तान् साधुयोग्यो मया न हि । आयुर्वेदः कोऽप्यपाठि मा स्म कृध्वं वचो मम ॥ १८३ ॥
एवं द्वावपि तौ वैद्यौ पुर्यां तत्राचिकित्सताम् । श्रीनेमिं चान्यदापृच्छत् कृष्णः क्व गतिरेतयोः ॥ १८४ ॥
अथाचचक्षे भगवान् सप्तम्यां नरकावनौ । अप्रतिष्ठानमावासं वैद्यो धन्वन्तरिर्गमी ॥ १८५ ॥
वैद्यो वैतरणिर्विन्ध्यवने भावी प्लवङ्गमः । उद्यौवनो यूथपतिस्तत्रैव च भविष्यति ॥ १८६ ॥
वने तत्रैकदा सार्थेनागमिष्यन्ति साधवः । तेष्वेकः श्रमणः पादे भग्नशल्यो भविष्यति ॥ १८७ ॥
प्रतीक्ष्यमाणान् सोऽन्यर्षीन् वक्ष्यत्येवं यदत्र माम् । मुक्त्वा यातान्यथा सर्वे सार्थभ्रष्टा मरिष्यथ ॥ १८८ ॥
तं छायास्थंडिले मुक्त्वा ते प्रयास्यन्ति साधवः । तत्पादशल्यमाक्रष्टुमक्षमा दीनचेतसः ॥ १८९ ॥



कपियूथपतिः सोऽपि तत्रैष्यत्यथ तं मुनिम् । दृष्ट्वा किलकिलारावं करिष्यन्त्यग्रवानराः ॥ १९० ॥
तन्नादरुष्टो यूथेशः सोऽग्रे स्थास्यति तमृषिम् । प्रेक्ष्य ध्यास्यति कुत्रेदृग्जनं वीक्षितपूर्व्यहम् ॥ १९१ ॥
स्मरिष्यति ततः पूर्वजातिं स्वां तच्च वैद्यकम् । गिरेर्विशल्यारोहिण्यावानेष्यत्यौषधी ततः ॥ १९२ ॥
विशल्यां दशनैः पिष्ट्वा पादे तस्य निधास्यति । सद्यो विशल्यं तत्पादं रोहिण्यारोहयिष्यति ॥ १९३ ॥
द्वारवत्यां वैतरणिवैद्योऽभूवं पुरा ह्यहम् । लिखिष्यत्यक्षराण्येवं मुनेस्तस्य पुरश्च सः ॥ १९४ ॥
तच्चरित्रं श्रुतपूर्वी मुनिर्धर्मं गदिष्यति । त्र्यहं कृत्वा कपिः प्रायं सहस्रारे गमिष्यति ॥ १९५ ॥

स द्रक्ष्यत्यवधिज्ञानात् प्रायस्थस्यात्मनः शवम् । नमस्कारान् प्रयच्छन्तमभ्यर्णस्थं मुनिं च तम् ॥ १९६ ॥
भक्तिमानमरस्तं च मुनिं नत्वा वदिष्यति । त्वत्प्रसादेन देवर्द्धिर्महतीयं ममाभवत् ॥ १९७ ॥
स्वसाधुभिस्तं च साधुं स नीत्वा योजयिष्यति । स साधुस्तां कपिकथां साधूनां कथयिष्यति ॥ १९८ ॥
तच्छ्रुत्वा श्रद्दधद्धर्मं नेमिं नत्वा ययौ हरिः । विहर्तुमन्यतोऽगच्छत्ततश्च भगवानपि ॥ १९९ ॥
अन्यदा प्रावृडारंभे जगदाप्यायको[1]ऽब्दवत्[2] । द्वारकायां नेमिनाथ उपेत्य समवासरत् ॥ २०० ॥
शुश्रूषमाणस्तं कृष्णो बभाषे भगवन् कथम् । विहरध्वे न वर्षासु यूयमन्येऽपि साधवः ॥ २०१ ॥
स्वामी बभाषे वर्षासु नानाजीवाकुला मही । जीवाभयप्रदास्तत्र सञ्चरन्ति न साधवः ॥ २०२ ॥
कृष्णो इत्युवाच यद्येवं गच्छदागता मया । भूयाञ्जीवक्षयो भूयःपरिवारेण जायते ॥ २०३ ॥ मुनिशुश्रूषा-प्रभावः ।
तद्वर्षासु बहिर्गेहान्निःसरिष्यामि न ह्यहम् । अभिगृह्येति गत्वा च कृष्णो वेश्माविशन्निजम् ॥ २०४ ॥
कस्यापि प्रावृषं यावत् प्रवेशो मम वेश्मनि । न प्रदेय इति द्वाःस्थानादिदेश च शार्ङ्गभृत् ॥ २०५ ॥
वीरो नाम कुविन्दोऽभूत् पुर्यां तत्रातिवैष्णवः । कृष्णं विलोक्यार्चित्वा च बुभुजे नान्यथा तु सः ॥ २०६ ॥
प्रवेश सोऽलभमानस्तदा च हरिसद्मनि । द्वारस्थो हरिमुद्दिश्य पूजां चक्रे दिने दिने ॥ २०७ ॥
कदाऽपि न च सोऽभुंक्त विष्णोरनवलोकनात् । व्यतीतासु च वर्षासु निर्ययौ वेश्मतो हरिः ॥ २०८ ॥

१ जगत्तृप्तिकरः । २ मेघवत् ।

उपातिष्ठन्त सर्वे तं राजानो वीरकश्च सः । किं कृशोऽसीति पप्रच्छ वासुदेवोऽपि वीरकम् ॥ २०९ ॥
द्वाःस्थास्तस्य यथावस्थां शशंसुः कार्श्यकारणम् । कृष्णोऽप्यस्खलितं चक्रे सकृपस्तं स्ववेश्मनि ॥ २१० ॥
ततश्च वन्दितुं नेमिं कृष्णोऽगात् सपरिच्छदः । यतिधर्मं च शुश्राव स्वामिनं चेत्यभाषत ॥ २११ ॥
न श्रामण्यक्षमोऽस्मीश तथापि नियमोऽस्तु मे । अन्यैर्ग्राहयितुं दीक्षां तथाताननुमोदितुम् ॥ २१२ ॥
प्रव्रजिष्यति यः कश्चिद्वारयिष्याम्यहं न तम् । पुत्रस्येव करिष्ये च तस्य निष्क्रमणोत्सवम् ॥ २१३ ॥
अभिगृह्येत्यगाद्विष्णुर्विवाह्या नन्तुमागताः । ऊचे स्वकन्याः स्वामिन्यो दास्यः किं वा भविष्यथ ॥ २१४ ॥
ता अप्यूचुर्भविष्यामः स्वामिन्य इति शार्ङ्गिणम् । शार्ङ्ग्यप्यूचे नेमिपार्श्वे तर्हि प्रव्रजतानघाः ॥ २१५ ॥
इति प्राव्राजयत् कन्या विवाहार्हाः क्रमेण सः । राज्ञ्येका चान्यदा प्रोचे स्वां सुतां केतुमञ्जरीम् ॥ २१६ ॥
पृष्टा तातेन वत्से त्वं भाषेथा अविशंकितम् । अहं दासीभविष्यामि न पुनः स्वामिनी प्रभो ॥ २१७ ॥
विवाहयोग्या सा मात्रा प्रेषिता पितुरन्तिके । ययौ तथोचे पित्रा च साप्यूचे मातृशिक्षितम् ॥ २१८ ॥
कृष्णोऽपि दध्यौ मत्पुत्र्योऽप्यटिष्यन्ति भवाटवीम् । विमाननां[1] च प्राप्स्यन्ति सर्वथा तत्र सांप्रतम्[2] ॥ २१९ ॥
यथा नैवं वदन्त्यन्यास्तथास्त्विति धिया हरिः । वीरं कुविन्दमवदत् प्रकृष्टं किं कृतं त्वया ॥ २२० ॥
प्रकृष्टं न मया चक्रे किंचित्तमिति वादिनम् । ऊचे हरिस्तथापि त्वं विचिन्त्याख्याहि किंचन ॥ २२१ ॥

प्रव्रज्या-प्रोत्साहन-कृते कृष्णा-भिग्रहः स्वसुता-प्रतिबोधश्च ।

१ अपमानम् । २ युक्तम् ।

बभाषे वीरकोऽप्येवं बदरीस्थो मया पुरा । कृकलासो*ऽश्मना हत्वा पातितश्च मृतश्च सः ॥ २२२ ॥
रथांग[1]कृतरेखायां मार्गे तोयं वहन्मया । धृतं वामांघ्रिणाक्रम्य तच्च दूरमपासरत् ॥ २२३ ॥
वस्त्रपातघटस्यान्तः प्रविष्टा मक्षिका मया । द्वारे वामकरं दत्वा रणन्त्यो विधृताश्चिरम् ॥ २२४ ॥
आस्थानस्थो द्वितीयेऽह्नि कृष्णो राज्ञां पुरोऽवदत् । स्वकुलस्याननुरुपं चरितं वीरकस्य भोः ॥ २२५ ॥
सावधाना ततस्तेऽपि कृष्णं जीवेति भाषिणः । श्रोतुमारेभिरे भूयः कृष्णोऽप्येवमभाषत ॥ २२६ ॥
येन रक्तस्फटो[2] नागो निवसन् बदरीवने । निजघ्ने भूमिशस्त्रेण वेमतिः[3] क्षत्रियो ह्ययम् ॥ २२७ ॥
चक्रोत्खाता येन गंगा वहन्ती कलुषोदकम् । धारिता वामपादेन वेमतिः क्षत्रियो ह्ययम् ॥ २२८ ॥
येन घोषवती सेना वसन्ती कलसीपुरे । निरुद्धा वामहस्तेन वेमतिः क्षत्रियो ह्ययम् ॥ २२९ ॥
योग्यो ममायं जामाता सुव्यक्तपुरुषव्रतः । इत्युक्त्वा वीरकं स्माह गृह्यतां केतुमञ्जरीम् । २३० ॥
सोऽनिच्छन् भ्रुकुटिं कृत्वा कृष्णेनोक्तस्तु तत्सुताम् । परिणीय गृहे निन्ये वीरकः केतुमञ्जरीम् ॥ २३१ ॥
शय्याधिरुढा तस्थौ च तद्गृहे केतुमञ्जरी । तदादेशकरश्चासीद्वीरकोऽपि दिवानिशम् ॥ २३२ ॥
किं केतुमञ्जर्याज्ञां ते करोतीति च शार्ङ्गिणा । पृष्टोऽन्यदावदद्वीरस्तदाज्ञाकारको ह्यहम् ॥ २३३ ॥
कृष्णोऽपि हि बभाषे तं कर्म सर्वं न चेन्निजम् । प्रसह्य तां कारयसि तत्त्वं गुप्तौ[4] प्रवेक्ष्यसि ॥ २३४ ॥

१ रथचक्रेण कृतायां रेखायाम् । २ रक्ता स्फटा फणा यस्य सः । ३ तन्तुवायः । ४ कारागृहे । * लोके 'काचींडो' ।



प्रव्रज्या–
प्रोत्साहन–
कृते कृष्णा–
भिग्रहः
स्वसुता–
प्रतिबोधश्च ।

कृष्णाशयज्ञो वीरोऽपि गत्वोचे केतुमञ्जरीम् । पानं कुरुष्व वस्त्रार्थे किमासीनैव तिष्ठसि ॥ २३५ ॥
कोलिकस्त्वं न वेत्सीति विब्रुवाणां च तां क्रुधा । वीरकस्ताडयामास निःशंकं तुरिरज्जुभिः ॥ २३६ ॥
रुदन्ती सा पितुर्गत्वा तमाख्यत्स्वपराभवम् । कृष्णोऽप्यूचे त्वया स्वाम्यं त्यक्त्वा दास्यं हि याचितम् ॥२३७॥
सावदत्तर्हि मे स्वाम्यमधुनापि प्रयच्छत । कृष्णोऽवदद्वीरकस्य वशेऽसि न ममाधुना ॥ २३८ ॥
सनिर्बन्धं तया प्रोक्तः कृष्णो वारितवीरकः । नीत्वा प्रव्राजयामास तां नेमिस्वामिसन्निधौ ॥ २३९ ॥
अन्यदा सर्वसाधूनां द्वादशावर्तवन्दनम् । कृष्णो ददौ नृपास्त्वन्ये निर्वीर्यास्त्ववतस्थिरे ॥ २४० ॥
सर्वेषामपि साधूनां वासुदेवानुवर्तनात् । तत्पृष्ठतो वीरकोऽपि अदाद्द्वादशावर्तनम् ॥ २४१ ॥
बभाषे स्वामिनं कृष्णः षष्ट्यग्रत्रिशताहवैः । न तथाहं परिश्रान्तो वन्दनेनामुना यथा ॥ २४२ ॥
सर्वज्ञोऽप्यवदत् कृष्ण बह्वद्य भवतार्जितम् । पुण्यं क्षायिकसम्यक्त्वं तीर्थकृन्नामकर्म च ॥ २४३ ॥
उद्धृत्य सप्तमावन्यास्तृतीयनरकोचितम् । आयुर्बद्धं त्वया प्रान्ते करिष्यसि निकाचितम् ॥ २४४ ॥
कृष्णोऽप्युवाच भगवन् पुनर्यच्छामि वन्दनम् । नरकायुर्यथा प्राग्वन्मम त्रुटति मूलतः ॥ २४५ ॥
स्वाम्यूचे ध[1]र्मशीलातो भवेत्ते द्रव्यवन्दनम् । फलं तु प्राप्यते भाववन्दनादन्यथा न तु ॥ २४६ ॥
वीरकस्य फलं कृष्णेनानुयुक्तोऽवदत् प्रभु । फलमस्य वपुःक्लेशस्त्वच्छ[2]न्दाद्वन्दते ह्यसौ ॥ २४७ ॥

कृष्णस्य मुनिवन्दन-प्रभावेण, क्षायिक-सम्यक्त्व-तीर्थकृन्नाम-कर्मार्जनम् चतुःनरक-स्फेटनं च ।

---

१ हे धर्मशील । २ त्वदनुसरणात् ।

॥ ३४५ ॥

भगवन्तं नमस्कृत्य भावयन् भगवद्वचः । जगाम द्वारकापुर्यां कृष्णोऽथ सपरिच्छदः ॥ २४८ ॥
कृष्णस्य ढंढणापन्त्यां कुमारो ढंढणाभिधः । उद्यौवनः पर्यणैषीद्बह्वीर्नृपकुमारिकाः ॥ २४९ ॥
सोऽन्यदा स्वामिनः पार्श्वे श्रुत्वा धर्मं विरक्तधीः । दीक्षामुपाददे पित्रा कृतनिष्क्रमणोत्सवः ॥ २५० ॥
विजह्रे स्वामिना सार्धं बहूनां च मतोऽभवत् । एवं च तिष्ठतस्तस्योदगात् कर्मान्तरायकम् ॥ २५१ ॥
यत्र यत्र ययौ तत्र तत्राप न स किञ्चन । समं तेन ययुर्ये च मुनयोऽपि तथैव ते ॥ २५२ ॥
ततस्ते साधवो नेमिनाथायेदं व्यजिज्ञपन् । शिष्यस्त्रैलोक्यनाथस्य पुत्रः कृष्णस्य ढंढणः ॥ २५३ ॥
महेभ्यधार्मिकोदारजनायामपि पुर्यसौ । भिक्षामपि न लभते स्वामिन् किं तत्र कारणम् ॥ २५४ ॥
स्वाम्याख्यन्मगधेष्वासीद्धान्यपूरकनामनि । ग्रामे पुरा नृपायुक्तो नाम्ना विप्रः पराशरः ॥ २५५ ॥
राजक्षेत्राणि स [1]ग्राम्यैरवापयदथान्यदा । प्राप्तेऽपि भोजने ग्राम्यान् भोजनायामुचन्न हि ॥ २५६ ॥
क्षुधितैस्तृषितैः श्रान्तैर्वृषभैर्हालिकैश्च सः । अकर्षयद्बलात् क्षेत्रे सीता[2]मेकां पृथक् पृथक् ॥ २५७ ॥
कर्मान्तरायमर्जित्वा मृत्वा भ्रान्त्वा भवं च सः । ढंढणोऽयमभूत्तच्च कर्मैतस्याधुनोदितम् ॥ २५८ ॥
तच्छ्रुत्वा जातसंवेगो ढंढणः स्वामिनोऽन्तिके । परलब्ध्या न भोक्ष्येऽहमित्यभिग्रहमग्रहीत् ॥ २५९ ॥

कृष्णस्य-
ढंढणकुमार-
दीक्षां-
ऽतरायो-
दयश्च ।

१ ग्रामे भवा ग्राम्यास्तैः २ क्षेत्रे हलकृता रेखा सीता कथ्यते ।

सहमानो ढंढणर्षिस्तमलाभपरीषहम् । अभुञ्जानः परलब्ध्या कालं कमपि सोऽनयत् ॥ २६० ॥
वासुदेवोऽन्यदापृच्छन्नेमिनाथं सभास्थितम् । मध्येऽमीषां महर्षीणां को हि दुष्करकारकः ॥ २६१ ॥
स्वाम्याख्यद्दुःकरकराः सर्वेऽमी ढंढणस्त्वति । इयन्तं योऽत्यगात् कालं सोढ्वऽलाभपरीषहम् ॥ २६२ ॥
ततो नत्वा प्रभुं कृष्णः प्रविशन् द्वारकापुरीम् । अपश्यड्ढंढणं साधुं यान्तं गोचरचर्यया ॥ २६३ ॥
गजादुत्तीर्य कृष्णस्तं नमश्चक्रेऽतिभक्तितः । दृष्ट्वैकश्रेष्ठिनाचिन्ति धन्यः कृष्णेन यो नतः ॥ २६४ ॥
विहरन् ढंढणोऽप्यागात्तस्यैव श्रेष्ठिनो गृहे । मोदकैर्बहुमानेन स तु तं प्रत्यलाभयत् ॥ २६५ ॥
ढंढणोऽप्येत्य सर्वज्ञं नत्वा चैवं व्यजिज्ञपत् । कर्मान्तरायकं किं मे क्षीणं भिक्षां यदाप्नवम् ॥ २६६ ॥
स्वाम्यूचे नान्तरायं ते क्षीणं लब्धिस्त्वियं हरेः । हरिणा वन्दितोऽसीति श्रेष्ठी त्वां प्रत्यलाभयत् ॥ २६७ ॥
रागादिरहितः सोऽथ परलब्धिरसाविति । परिष्ठापयितुं भिक्षां प्रारेभे स्थंडिलावनौ ॥ २६८ ॥
पूर्वार्जितानि कर्माणि जीवानां दुःक्षयाण्यहो । इति स्थिरध्यानजुष उत्पेदे तस्य केवलम् ॥ २६९ ॥
नेमिं प्रदक्षिणीकृत्य ततः केवलिपर्षदि । ढंढणर्षिरुपाविक्षत् पूजितस्त्रिदशैरपि ॥ २७० ॥
विजह्रे भगवान्नेमिर्ग्रामाकरपुरादिषु । भूयो भूयो द्वारकायां पुर्यां च समवासरत् ॥ २७१ ॥
तत्रैकदा स्थिते नाथेऽकस्माद्वृष्टिरजायत । भिक्षां भ्रान्त्वा रथनेमिः प्रतिस्वामिः चचाल च ॥ २७२ ॥
प्रविवेश गुहां चैकां तया वृष्ट्या स विद्रुतः । वन्दित्वा स्वामिनं राजीमती चापि न्यवर्तत ॥ २७३ ॥



श्रीढंढणर्षे-
केवलम् ।

राजीमत्या रथनेमि-प्रतिबोधः ।

साध्व्यस्तत्सहचर्योऽथ वृष्टिभिताः प्रदुद्रुवुः । राजीमती गुहां तां तु विवेशाजानती सती ॥ २७४ ॥
प्राक्प्रविष्टमपश्यन्ती रथनेमिं तमोवशात् । उद्वापयितुममुचद्वस्त्राण्यूर्ध्वस्थिता तु सा ॥ २७५ ॥
रथनेमिर्विवस्त्रां तां प्रेक्ष्य कामार्दितोऽवदत् । पुरापि प्रार्थिताभूस्त्वं संभोगावसरोऽधुना ॥ २७६ ॥
रथनेमिं स्वराज्ज्ञात्वा गोपितांगा झगित्यपि । बभाषे युज्यते नेदृक् कदाचित् कुलजन्मनाम् ॥ २७७ ॥
सर्वज्ञस्यानुजोऽसि त्वं शिष्यस्तस्यैव तत्तव । अद्यापि केयं बुद्धिर्भो लोकद्वयविरोधिनी ॥ २७८ ॥
सर्वज्ञशिष्या भूत्वा ते पूरयिष्ये न वाञ्छितम् । वाञ्छ्याप्यनया तु त्वं पतिष्यसि भवार्णवे ॥ २७९ ॥
चैत्यद्रव्यंहृतिः[1] साध्वीशीलभंगर्षिघातने । तथा प्रवचनोड्डाहो मूलाग्निर्बोधिशाखिनः ॥ २८० ॥
प्रविशन्ति वरं घोरे ज्वलितेऽपि हुताशने । वान्तं भोक्तुं न हीच्छन्ति कुले जाता अगंधने ॥ २८१ ॥
धिगस्तु ते यशस्कामिन् यस्त्वं जीवितकारणात् । पातुं समीहसे वांतं श्रेयस्ते मरणं खलु ॥ २८२ ॥
सुताहं भोजराजस्यान्धकवृष्णेर्भवान् सुतः । मा कुले गन्धिनौ भूव संयमं निभृतश्चर ॥ २८३ ॥
नारीदर्शं[2] स्पृहयसि यदि त्वं मदनातुरः । वाताहतो हठ[3] श्वास्थितात्मा तद्भविष्यसि ॥ २८४ ॥
तयैवं बोधितः सोऽपि पश्चात्तापपरो मुहुः । सर्वां विमुच्य भोगेच्छां तीव्रं व्रतमपालयत् ॥ २८५ ॥
प्रभोरग्रे दुश्चरितं तदालोच्य स शुद्धधीः । छद्मस्थो वत्सरं स्थित्वा केवलज्ञानमासदत् ॥ २८६ ॥

---

१ हृतिः हरणम् । २ नारीं दृष्ट्वेति नारीदर्शनम् । ३ हठो जलवत्यौषधिविशेषः ।

विहृत्यान्यत्र चान्येद्युर्भूयो रैवतकाचले । श्रीनेमिः समवासार्षीद्भव्यांभोरुहभास्करः ॥ २८७ ॥
कृष्ण पालकशांबादिपुत्रानूचे यथा प्रगे । य पूर्वं वन्दिता नाथं तस्मै दास्येऽश्वमीप्सितम् ॥ २८८ ॥
तच्छ्रुत्वा शांबकुमारः प्रातरुत्थाय तल्पतः । गृहेऽपि तिष्ठन् भावेन नेमिनाथमवन्दत ॥ २८९ ॥
महत्यां पालको रात्रावुत्थाय वरवाजिना । गत्वा प्रभुमभव्यत्वाद्धृद्याक्रोशन्नवन्दत[1] ॥ २९० ॥
दर्पकाश्वं पालकेन याचितो हरिरब्रवीत् । दास्ये तस्याश्वमाख्यता यं स्वामी पूर्ववन्दकम् ॥ २९१ ॥
गत्वा च विष्णुना पृष्ट स्वाम्यादौ केन वन्दितः । स्वाम्याख्यत् पालकेनादौ द्रव्याच्छांबेन भावतः ॥ २९२ ॥
किमेतदिति कृष्णेन पृष्टो भूयोऽभ्यधात् प्रभुः । अभव्यः पालको ह्येष भव्यो जांबवतीसुतः ॥ २९३ ॥

द्रव्यभाव–वन्दनम् ।

रथाङ्गपाणिः कुपितोऽथ पालकं तं भावहीनं निरवासयद्द्रुतम् ।
दत्वा यथायाचितमश्वपुंगवं शांबं महामंडलिकं व्यधात् पुनः ॥ २९४ ॥

**इत्याचार्यश्रीहेमचंद्रसूरिविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्येऽष्टमे पर्वणि द्रौपदीप्रत्याहरणगजसुकुमालादिचरितवर्णनो नाम दशमः सर्गः ।**



---

१ हृदि आक्रोशन् ।

# एकादशः सर्गः ।

द्वारिका–
कृष्णादीनां
क्षयस्य
हेतुकथनम् ।

श्रीनेमिनाथमन्येद्युर्देशनान्ते जनार्दनः । नमस्कृत्य विनीतात्मा पप्रच्छेति कृताजलिः ॥ १ ॥
द्वारकाया यदूनां च मम च स्यात् क्षयः कथम् । हेतोः कुतोऽप्यन्यकृतः स्वयं कालवशेन वा ॥ २ ॥
अथाख्यद्भगवान् शौर्यपुरस्य बहिराश्रमे । पराशर इति नाम्ना प्रथितस्तापसाग्रणीः ॥ ३ ॥
कन्यां नीचकुलां काञ्चिद्यमुनाद्वीपके गतः । स सिषेवे सुतश्चाभूत्तयोर्द्वैपायनाह्वयः ॥ ४ ॥
परिव्राड् ब्रह्मचारी च दान्तश्च यदुसौहृदात् । निवसंस्तत्र शांबाद्यैर्मद्यांधैर्निहनिष्यते ॥ ५ ॥
स क्रुद्धो धक्ष्यति पुरीं द्वारकां यदुभिः सह । जरत्कुमारात् स्वभ्रातुस्तव चान्तो भविष्यति ॥ ६ ॥
अरे कुलांगारकोऽयमित्यन्तः कलुषाशयैः । जराकुमारो ददृशे यदुभिः सकलैरपि ॥ ७ ॥
भूत्वापि वसुदेवस्य सूनुः किं भ्रातृघात्यहम् । तत्सर्वथान्यथा कर्तुं यतेऽहमिति चिन्तयन् ॥ ८ ॥
उत्थाय नेमिं नत्वा च जारेयस्तूणयुग्मभृत् । कोदंडी कृष्णरक्षार्थं वनवासमशिश्रयत् ॥ ९ ॥
द्वैपायनोऽपि तच्छ्रुत्वा लोकश्रुत्या प्रभोर्वचः । द्वारकाया यदूनां च रक्षार्थं वनवास्यभूत् ॥ १० ॥

कृष्णोऽपि स्वामिनं नत्वा विवेश द्वारकां पुरीम् । मद्यमूलो ह्यनर्थः स्यादिति मद्यं न्यवारयत् ॥ ११ ॥
कृष्णाज्ञया समीपाद्रौ कदंबवनमध्यतः । कादंबर्यां कन्दरायां शिलाकुंडेषु भूरिशः ॥ १२ ॥
पुराकृतानि मद्यानि सर्वे द्वारवतीजनाः । गृहश्रोतोजलमिव नीत्वा नीत्वा प्रतत्यजुः ॥ १३ ॥
सिद्धार्थः सारथिर्भ्राता बलदेवमथावदत् । पुर्याः कुलस्य चेदृक्षां कथं द्रक्ष्यामि दुर्दशाम् ॥ १४ ॥
तस्मान्मां विसृज स्वामिपादान्तेऽहं यथा व्रतम् । अधुनैव हि गृह्णामि कालक्षेपं सहे न हि ॥ १५ ॥
उदश्रुस्तं बलोऽप्यूचे भ्रातर्युक्तं वदस्यदः । विस्रष्टुमक्षमेणापि विसृष्टोऽसि मयानघ ॥ १६ ॥
तपस्तप्त्वा विपन्नस्त्वं देवीभूतो विपद्गतम् । संबोधयेः समये मां भ्रातृस्नेहमिमं स्मरन् ॥ १७ ॥
आमेत्युदीर्य सिद्धार्थः प्राव्राजीत् स्वामिनोऽन्तिके । षण्मासीं च तपस्तीव्रं तप्त्वा मृत्वा दिवं ययौ ॥ १८ ॥
इतश्च या शिलाकुंडेष्वासीत् क्षिप्ता सुरा जनैः । नानाद्रुपुष्पसंपातात्तदा स्वाद्वी बभूव सा ॥ १९ ॥
तदा च मासे वैशाखे कोऽपि शांबस्य पुरुषः । अटन् ययौ तत्र तृषा तां च दृष्ट्वा सुरां पपौ ॥ २० ॥
ततः प्रमुदितस्तेन दृतिमापूर्य[1] सीधुना[2] । ययौ वेश्मनि शांबस्य तच्चोपायनमार्पयत् ॥ २१ ॥
तत्सीधु दृष्ट्वा सामोदं सप्रमोदो हरेः सुतः । पायं पायं जगादैवं कुत्र लब्धमिदं त्वया ॥ २२ ॥
सोऽप्याख्यत्सीधु तत्रस्थं शांबोऽप्यह्नि द्वितीयके । समं कुमारैर्दुर्दान्तैर्ययौ कादंबरीं गुहाम् ॥ २३ ॥

शांबादीनां
मद्यपानं
द्वैपायन-
मुनि-
ताडनं च ।

---

१ जलपात्रम् "मसक" इति भाषायाम् । २ मद्येन ।

कादंबरीगुहायोगान्नाम्ना कादंबरीं सुराम् । तां प्रेक्ष्य शांबो मुमुदे तृषितो निम्नगामिव ॥ २४ ॥
भृत्यैरानाय्य तां शांबः पुष्पितद्रुवनान्तरे । बद्धापनः[1] पपौ मित्रभ्रातृभ्रातृव्यसंयुतः ॥ २५ ॥
चिरात्प्राप्तेति जीर्णेति सद्द्रव्यैः संस्कृतेति च । पिबन्तस्तां सुरां ते तु न तृप्तिमुपलेभिरे ॥ २६ ॥
द्वैपायनर्षिं ध्यानस्थमग्रे तं गिरिमाश्रितम् । ददृशुर्मद्यपानान्धाः क्रीडन्तस्ते कुमारकाः ॥ २७ ॥
शांबो बभाषे स्वानित्थमयं मे नगरी कुलम् । हन्ता तद्धन्यतामेष हनिष्यति हतः कथम् ॥ २८ ॥
ततस्ते कुपिताः सर्वे लेष्टुभिः पादताडनैः । चपेटाभिर्मुष्टिभिश्च तमाजघ्नुर्मुहुर्मुहुः ॥ २९ ॥
पतितं तं महीपृष्ठे मृतप्रायं विधाय ते । ययुः पुरीं द्वारवतीं विविशु स्वस्ववेश्मसु ॥ ३० ॥
तच्चाज्ञासीच्चरैः कृष्णो दध्यौ चैवं विषादभाक् । अहो दुर्दांततामीषां कुमाराणां कुलान्तकृत् ॥ ३१ ॥
ततः कृष्णः सरामोऽगात्तत्र द्वैपायनं मुनिम् । अपश्यत् कोपरक्ताक्षं महाहिमिव दृग्विषम् ॥ ३२ ॥
महामात्र इव व्यालमतिमात्रभयंकरम् । त्रिदंडिनं सान्त्वयितुं तमारेभे जनार्दनः ॥ ३३ ॥
क्रोध एव महाशत्रुर्यो दुःखं नेह केवलम् । प्रदत्ते किं तु सततं जन्मलक्षेषु जन्मिनः ॥ ३४ ॥
अज्ञानैर्मद्यपानान्धैरपराद्धं ममात्मजैः । तत्सहस्व महर्षे त्वममर्षो युज्यते न ते ॥ ३५ ॥
कृष्णेनेत्युच्यमानोऽपि नाशाम्यत् स त्रिदंडिक । इत्यूचे च कृतं कृष्ण भवतः सान्त्वभाषितैः ॥ ३६ ॥

शांबादीनां
मद्यपानं
द्वैपायन-
मुनि-
ताडनं च ।



१ बद्धमापानं मद्यपानस्थानं येन सः ।

यत्पुत्रैस्ताड्यमानेन निदानं विहितं मया । सलोकां द्वारकां दग्धुं न मोक्षोऽत्र युवां विना ॥ ३७ ॥
कृष्णं न्यषेधद्रामोऽपि मा बान्धव मुधैव हि । परिव्राजमनुनयामुकं वारितवामकम्[1] ॥ ३८ ॥
वक्राङ्घ्रिनासिकाहस्ताः स्थूलोष्ठोदरनासिकाः । विलक्षणाक्षा हीनाङ्गाः शान्तिं यान्ति न जातुचित् ॥ ३९ ॥
अस्मिन् खलूक्त्वा तद्भ्रातर्न नाशो भाविवस्तुनः । सर्वज्ञभाषितं चापि सर्वथा नान्यथा भवेत् ॥ ४० ॥
ततश्च शोकसन्तप्तः कृष्णः स्वसदनं ययौ । द्वैपायननिदानं च द्वारिकायां प्रकट्यभूत् ॥ ४१ ॥
अघोषयद्द्वितीयेऽह्नि नगर्यामिति शार्ङ्गभृत् । विशेषाद्धर्मनिरतास्तिष्ठतातः परं जनाः ॥ ४२ ॥
तथारेभे जनः सर्वोऽप्युपेत्य भगवानपि । श्रीनेमिः समवासार्षीत्तत्र रैवतकाचले ॥ ४३ ॥
तत्र गत्वा च नत्वा च कृष्णः शुश्राव देशनाम् । जगन्मोहमहानिद्राविद्रावणरविप्रभाम् ॥ ४४ ॥
प्रद्युम्नशाम्बौ निषध उल्मुकः सारणादयः । कुमाराः प्राव्रजन् केऽपि श्रुत्वा तां धर्मदेशनाम् ॥ ४५ ॥
रुक्मिणीजाम्बवत्याद्या बह्व्यश्च यदुयोषितः । स्वामिनः पादपद्मान्ते भवोद्विग्नाः प्रवव्रजुः ॥ ४६ ॥
आचख्यौ कृष्णपृष्टश्च सर्वज्ञो भगवानिदम् । द्वैपायनो द्वादशेऽब्दे धक्ष्यति द्वारिकामिमाम् ॥ ४७ ॥
दध्यौ च कृष्णो धन्यास्ते समुद्रविजयादयः । येऽग्रेऽपि प्राव्रजन् धिङ्मां राज्यलुब्धमदीक्षितम् ॥ ४८ ॥
ज्ञात्वा तदाशयं स्वामी प्रोचे कृष्ण कदापि हि । न शार्ङ्गिणः प्रव्रजन्ति निदानेन कृतार्गलाः ॥ ४९ ॥

1 वारितो निवारितः सन् वाम एव वामकः कुटिल इति यावत् ।



द्वैपायनकृतं
द्वारिका–
विनाश–
निदानम् ।

गच्छन्त्यवश्यं तेऽधस्तात्त्वं गामी वालुकाप्रभाम् । श्रुत्वेति कृष्णः सद्योऽपि नितान्तविधुरोऽभवत् ॥ ५० ॥
भूयोऽभ्यधत्त सर्वज्ञो मा विषीद जनार्दन । तत उद्धृत्य मर्त्यस्त्वं भावी वैमानिकस्ततः ॥ ५१ ॥
च्युत्वा भाव्यत्र भरते गंगाद्वारपुरेशितुः । जितशत्रोः सुतोऽर्हंस्त्वं द्वादशो नामतोऽममः ॥ ५२ ॥
ब्रह्मलोकं बलो गामी मर्त्यो भावी ततश्च्युतः । ततोऽपि देवश्च्युत्वा स भाव्यन्त्र भरते पुमान् ॥ ५३ ॥
उत्सर्पिण्यां प्रसर्पन्त्यां पृथिवीश जनार्दन । तीर्थनाथस्य ते तीर्थे स मोक्षमुपयास्यति ॥ ५४ ॥
इत्युदित्वा जगन्नाथो विहरन्नन्यतो ययौ । तं नत्वा वासुदेवोऽपि जगाम द्वारिकां पुरीम् ॥ ५५ ॥
तथैव घोषणां कृष्णः पुनः पुर्यामकारयत् । विशेषतो धर्मनिष्ठो लोकः सर्वो बभूव च ॥ ५६ ॥
मृत्वा द्वैपायनोऽप्यग्निकुमारेषूदपद्यत । सस्मार पूर्ववैरं च द्वारकामाजगाम च ॥ ५७ ॥
चतुर्थषष्ठाष्टमादिरतं तत्राखिलं जनम् । देवपूजाप्रसक्तं चापश्यद्द्वैपायनोऽसुरः ॥ ५८ ॥
धर्मप्रभावतस्तत्रोपसर्गं कर्तुमक्षमः । छिद्राण्यन्वेषयन् सोऽस्थाद्वर्षाण्येकादशोग्रधीः[1] ॥ ५९ ॥
प्राप्तेऽब्दे द्वादशे लोको दध्यौ यत्तपसामुना । भ्रष्टो द्वैपायनो नष्टो जितश्चेति रमामहे ॥ ६० ॥
रन्तुं प्रवृत्तास्ते स्वैरं मद्यपा मांसखादिनः । लेभेऽवकाशं छिद्रज्ञस्तदा द्वैपायनोऽपि हि ॥ ६१ ॥
उत्पाता विविधाश्चैवं कल्पान्तोत्पातसन्निभाः । प्रादुरासन् द्वारकायामन्तकद्वारदर्शिनः ॥ ६२ ॥

तपः-
प्रभावेण
द्वारिका-
रक्षणम् ।



---

१ मारकबुद्धिः ।

निपेतुरुल्का निर्घाताश्चाभवन् भूरकम्पत । ग्रहाश्च मुमुचुर्धूमं धूमकेतुविडम्बकम् ॥ ६३ ॥
अङ्गारवृष्टिं विदधे सच्छिद्रं रविमंडलम् । अकस्मादुपरागश्च चन्द्रमार्तंडयोरभूत् ॥ ६४ ॥
अट्टहासं लेण्यमयाश्चक्रुर्वेश्मसु पुत्रकाः । उद्भ्रूका[1] जहसुश्चापि चित्रालिखितदेवताः ॥ ६५ ॥
पुर्यन्तः श्वापदाश्चेरुः स च द्वैपायनासुरः । शाकिनीभूतवेतालादिभिः परिवृतोऽभ्रमत् ॥ ६६ ॥
स्वप्नेष्वपश्यन् पौराः स्वं रक्ताम्बरविलेपनम् । पङ्कमग्नं कृष्यमाणं दक्षिणाभिमुखं तथा ॥ ६७ ॥
प्रणेशुः सीरचक्रादिरत्नानि बलकृष्णयोः । ततो विचक्रे संवर्तं वातं द्वैपायनासुरः ॥ ६८ ॥
स सर्वतोऽप्याजहार पुर्यां काष्ठतृणादिकम् । जनान् प्रणश्यतो दिग्भ्योऽप्यानीय न्यक्षिपत्पुरे ॥ ६९ ॥
दिग्भ्योऽष्टाभ्योऽपि वातेन तेनोन्मूलितशाखिना । अपूर्यत समग्रापि दारुभिर्द्वारकापुरी ॥ ७० ॥ द्वारिका-विनाशः ।
षष्टिं बाह्याः कुलकोटीर्द्वासप्ततिं तु मध्यगाः । संपिंड्य द्वारकापुर्यां सोऽसुरोऽग्निमदीपयत् ॥ ७१ ॥
धगग्धगिति जज्वाल क्षयानल इवानलः । नीरन्ध्रैर्धूमसन्तानैर्विश्वमप्यन्धकारयन् ॥ ७२ ॥
पदमप्यक्षमा गन्तुं मिथो निगडिता इव । सबालवृद्धास्ते पौराः पींडीभूयावतस्थिरे ॥ ७३ ॥
वसुदेवं देवकीं च रोहिणीं च रथे हरिः । आरोपयत् सरामोऽथ तानाक्रष्टुं प्रदीपनात् ॥ ७४ ॥
न चेलुस्तुरगास्तत्र न चेलुर्वृषभा अपि । सुरेण स्तंभितास्तेन वार्तिकेणेव पन्नगाः ॥ ७५ ॥

१ उद्गता भ्रूः भ्रूकुटिर्येषां ते ।

ततः स्वयं बलोपेन्द्रौ तमाचकृषतू रथम् । भग्नमक्षयुगं सद्यस्तडत्तडिति कांडवत् ॥ ७६ ॥
तथापि तौ स्वसामर्थ्यात्तं द्वारे निन्यतू रथम् । पाहि हा राम हा कृष्णेत्याक्रन्दैर्दीनमानसौ ॥ ७७ ॥
अथ द्वारं कपाटाभ्यां झटित्येवासुरः प्यधात् । रामः पार्ष्णिप्रहारेणाभांक्षीत्तौ मृत्कपालवत् ॥ ७८ ॥
भुवा ग्रस्त इव रथस्तथापि निरगान्न हि । सोऽपि देवोऽवदद्रामकृष्णौ किंमोह एष वाम् ॥ ७९ ॥
अहो पुरापि युवयोराख्यातं यद्युवां विना । न मोक्षः कस्यचिदिह विक्रीतं हि तपो मया ॥ ८० ॥
ततस्ते पितरोऽवोचन् हे वत्सौ गच्छतं युवाम् । युवाभ्यां ननु जीवद्भ्यां जीवन्ति यदवोऽखिलाः ॥ ८१ ॥
कृतेन पौरुषायत्तं युवाभ्यां कृतमेव हि । बलीयसी पुनरियं दुर्लंघ्या भवितव्यता ॥ ८२ ॥
दीक्षा श्रीनेमिपादान्तेऽस्मकाभिर्भाग्यवर्जितैः । नोपात्तानुभविष्यामः फलमद्य स्वकर्मणाम् ॥ ८३ ॥
इत्युक्तेऽपि यदा रामकृष्णौ नागच्छतां तदा । वसुदेवो देवकी च रोहिणी चैवमूचिरे ॥ ८४ ॥
अतः परं नः शरणं श्रीनेमिस्त्रिजगद्गुरुः । वयं चतुर्विधाहारप्रत्याख्यानमकृष्महि ॥ ८५ ॥
अर्हतः सिद्धसाधूंश्च धर्मं चार्हदुदीरितम् । अतः परं प्रपन्नाः स्मः शरणं शरणेच्छवः ॥ ८६ ॥
न वयं कस्यचित् कोऽपि नास्मदीय इति स्वयम् । विहिताराधनास्तस्थुर्नमस्कारपरायणाः ॥ ८७ ॥
तेषु द्वैपायनोऽथाग्निं ववर्षानलमेघवत् । विपद्य च ययुः स्वर्गं वसुदेवादयस्त्रयः ॥ ८८ ॥
रामकृष्णौ बहिः पुर्या जीर्णोद्यानेऽथ जग्मतुः । दह्यमानां पुरीं तत्र स्थितौ द्वावप्यपश्यताम् ॥ ८९ ॥



द्वारिका-
विनाशः ।

माणिक्यभित्तयोऽभूवंश्चूर्णसादश्मखंडवत्[1] । गोशीर्षचन्दनस्तंभा भस्मसाच्च पलालवत् ॥ ९० ॥
प्राकारकपिशीर्षाणि तडत्तडिति तुत्रुटुः । तलान्यपि निकेतानां फडप्फडिति पुस्फटुः ॥ ९१ ॥
ज्वालानां नान्तरं तत्राभूज्जलानामिवार्णवे । एकानलमभूत्सर्वमेकार्णवमिव क्षये ॥ ९२ ॥
ज्वालाहस्तैर्ननर्तेव जगर्जेवानलः स्वनैः । धूमव्याजात्पौरमत्स्येष्वानायमिव[2] चानयत् ॥ ९३ ॥
अथोचे सीरिणं कृष्णो धिग्धिक् क्लीब इवाधुना । अहं तटस्थः पश्यामि दह्यमानां निजां पुरीम् ॥ ९४ ॥
यथा नालं पुरीं त्रातुं तथा न द्रष्टुमुत्सहे । आर्य ब्रूहि क्वगच्छावो विरुद्धं सर्वमावयोः ॥ ९५ ॥
बभाषे बलभद्रोऽपि सुहृत्सम्बन्धिबान्धवाः । अस्माकं पांडुतनयास्तद्यावस्तन्निकेतनम् ॥ ९६ ॥

द्वारिका-
विनाशः ।

कृष्णोऽप्यूचे तदानीं ते मया निर्विषयीकृताः । कथं तद्धाम्नि यास्यावः स्वापकारेण लज्जितौ ॥ ९७ ॥
ऊचे रामोऽप्युपकारं सन्तो दधति चेतसि । कदापि कुस्वप्नमिव नापकारं स्मरन्ति तु ॥ ९८ ॥
अनेकधा सत्कृतास्ते कृतज्ञाः पांडुसूनवः । पूजामेव करिष्यन्ति भ्रातर्विमृश मान्यथा ॥ ९९ ॥
इत्युक्तः सीरिणा शार्ङ्गी प्राचलत्पूर्वदक्षिणाम् । उद्दिश्य पांडवपुरीं तां पांडुमथुराभिधाम् ॥ १०० ॥
इतश्च पुर्यां ज्वलन्त्यां रामसूः कुब्जवारकः । चरमांगोऽधिसौधाग्रमूर्ध्वबाहुरदोऽवदत् ॥ १०१ ॥
शिष्यः श्रीनेमिनाथस्याधुना व्रतधरोऽस्म्यहम् । आख्यातः स्वामिना चाहं चरमांगः शिवं गमी ॥ १०२ ॥

१ चूर्णाधीनाश्चूर्णसात् । २ आनायं जालम् ।

प्रमाणमर्हदाज्ञा चेत्तद्दह्येऽहं किमग्निना । इत्युक्ते जृंभका देवास्तं निन्युः स्वामिनोऽन्तिके ॥ १०३ ॥
श्रीनेमिः पल्लवे देशो तदा हि समवासरत् । तत्र च प्राव्रजत् कुब्जवारकः स महामनाः ॥ १०४ ॥
प्रागप्रव्रजिता यास्तु रामकृष्णादियोषितः । नेमिं स्मरन्त्यो विहितानशनास्ता विपेदिरे ॥ १०५ ॥
षष्टिर्द्वासप्ततिश्चापि निर्दग्धाः कुलकोटयः । षण्मास्येवं पुरी दग्धा प्लाविता चाब्धिना ततः ॥ १०६ ॥
इतश्च गच्छन् कृष्णोऽपि हस्तिकल्पं पुरं पथि । प्राप्तः सन् क्षुद्भवां पीडां शशंस हलधारिणे ॥ १०७ ॥
बभाषे बलभद्रस्तं त्वत्कृते भक्तहेतवे । यास्याम्यत्र पुरे तिष्ठेरप्रमत्तोऽत्र बान्धव ॥ १०८ ॥
विधुरं यदि मे किञ्चित्कुतोऽप्यत्र भविष्यति । करिष्यामि तदा क्ष्वेडां तामाकर्ण्य त्वमापतेः ॥ १०९ ॥

कृष्णबल-
रामयोर्हस्ति
कल्पेशेन
सह युद्धम् ।

इत्युक्त्वा प्राविशद्रामस्तत्पुरं पुरवासिभिः । देवताकारभृत् कोऽयमित्याश्चर्यान्निरीक्षितः ॥ ११० ॥
अग्निना द्वारका दग्धा तस्या निर्गत्य सीर्ययम् । आयात इति लोकेऽभूत् किंवदन्ती विमर्शजा[1] ॥ १११ ॥
अंगुलीयेन रामोऽपि कान्दुकाद्विविधं स्वयम् । जग्राह भोज्यं मदिरां कटकेन च शौंडिकात्[2] ॥ ११२ ॥
तदादाय बलोऽगच्छद्यावद्गोपुरसन्निधौ । तं दृष्ट्वा तावदारक्षा विस्मिता नृपतिं ययुः ॥ ११३ ॥
धृतराष्ट्रसुतस्तस्मिन्नच्छदंतोऽभवन्नृपः । कृष्णगृह्यैः पांडुपुत्रैर्हतशेषीकृतः पुरा ॥ ११४ ॥
आरक्षास्तं तदेत्यूचुर्महार्घे कटकोर्मिके । दत्वा दस्युवदादत्त त्वत्पुरे मद्यभोजने ॥ ११५ ॥

---

१ विचाराज्जनिता । २ शौंडिको मद्यविक्रेता ।

कृष्णबल–
रामयोर्हस्ति
कल्पेशेन
सह युद्धम् ।

मूर्त्या च सीरिणस्तुल्यो गच्छन्नस्त्यधुना बहिः । स दस्युर्वा बलो वास्तु नास्त्यागोऽस्मास्वतः परम् ॥ ११६ ॥
अच्छदन्तो बलं हन्तुं सबलस्तत्र चाययौ । गोपुरस्य कपाटौ चाकारयत् पातितार्गलौ ॥ ११७ ॥
भक्तपाने बलो मुक्त्वा स्तंभमुन्मूल्य दन्तिनः । कृतक्ष्वेडोऽथारिबलं निहन्तुमुपचक्रमे ॥ ११८ ॥
क्ष्वेडामाकर्ण्य कृष्णोऽपि धावितः पार्ष्णिघाततः । भंक्त्वा कपाटौ प्राविक्षत् पुरमौर्व इवार्णवम् ॥ ११९ ॥
कृष्णस्तत्परिघं गृह्णन् परसैन्याञ्जघान तान् । इत्युवाच च राजानमच्छदन्तं वशंवदम् ॥ १२० ॥
नागाद्दोःस्थाम नौ क्वापि किमरे भवता कृतम् । स्वराज्यं निभृतो भुंक्ष्व मुक्तोऽस्मादागसो ह्यसि ॥ १२१ ॥
इत्युक्त्वा बुभुजाते तौ गत्वोद्याने पुराद्बहिः । प्रत्यपाचि प्रस्थितौ च कौशांबवनमीयतुः ॥ १२२ ॥
मद्यपानात् सलवणाशनाद्ग्रीष्मवशाच्छ्रमात् । शोकात्पुण्यक्षयाच्चाप तत्र कृष्णो भृशं तृषाम् ॥ १२३ ॥
अथावदद्बलं कृष्णस्तृषया तालु शुष्यति । वृक्षच्छायाकुलेऽप्यस्मिन्न वने गन्तुमीश्वरः ॥ १२४ ॥
बभाषे बलभद्रोऽपि यास्यामि भ्रातरंभसे । विश्राम्यन्नत्र तिष्ठ त्वमप्रमत्तस्तरोस्तले ॥ १२५ ॥
पादं जानूपरि न्यस्य स्वं च पीतेन वाससा । प्रच्छाद्याध्वतरोर्मूले सुप्तो निद्रां ययौ हरिः ॥ १२६ ॥
पुनरप्यवदद्रामो हे भ्रातः प्राणवल्लभ । यावदायाम्यहं तावदप्रमत्तो भवेः क्षणम् ॥ १२७ ॥
उन्मुखीभूय चावोचद्वनदेव्यो ममानुजः । युष्माकं शरणेऽस्त्येष त्रातव्यो विश्ववल्लभः ॥ १२८ ॥

इत्युक्त्वा सोऽम्भसेऽगच्छत्तत्रागच्छच्च धन्वभृत् । व्याघ्रत्वग्वसनो [1]लम्बकूर्चो व्याधो जरासुतः ॥ १२९ ॥
मृगव्येन भ्रमंस्तत्रापश्यत् कृष्णं तथास्थितम् । मृगबुद्ध्या तले चाहञ्[2]जारेयस्तीक्ष्णपत्रिणा ॥ १३० ॥
वेगादुत्थाय कृष्णोऽपि जगादाहं विनागसा । छलात्पादतले विद्धः केनानाभाष्य पत्रिणा ॥ १३१ ॥
हतपूर्वी क्वचिन्नाहमज्ञातज्ञातिनामकम् । भवानपि तदाख्यातु निजं गोत्रं च नाम च ॥ १३२ ॥
द्रुमान्तरस्थः सोऽप्यूचे हरिवंशाब्धिशीतगोः । वसुदेवदशार्हस्य जराकुक्षिभवः सुतः ॥ १३३ ॥
जराकुमारो नाम्नाहमग्रजो रामकृष्णयोः । कृष्णरक्षार्थमत्रागां श्रुत्वा श्रीनेमिनो वचः ॥ १३४ ॥
अब्दानि द्वादशाभूवन्नद्येह वसतो मम । मानुषं चेह नाद्राक्षं कस्त्वमेवं ब्रवीषि भोः ॥ १३५ ॥
कृष्णोऽथावोचदेह्येहि पुंव्याघ्र हरिरस्म्यहम् । तव भ्राता स एवैष यस्यार्थे वनवास्यभूः ॥ १३६ ॥
वृथा प्रयासस्ते जज्ञे द्वादशाब्दानि बान्धव । दिङ्मोहेनेव पान्थस्थ सुदूरोल्लंघिताध्वनः ॥ १३७ ॥
श्रुत्वेति किमयं कृष्ण इति तत्रैव सत्वरम् । जरत्कुमार आयासीद्दृष्ट्वा कृष्णं मुमूर्छ च ॥ १३८ ॥
कथमप्याप्तसंज्ञः सञ्जारेयः करुणं रुदन् । पप्रच्छ कृष्णं हा भ्रातः किमेतत्किमिहागमः ॥ १३९ ॥
किं द्वारका पुरी दग्धा किं यदूनां क्षयोऽभवत् । सा नूनं नेमिवाक् सर्वा सत्या तेऽवस्थयानया ॥ १४० ॥
कृष्णोऽपि सर्वमाचख्यौ जारेयोऽपि रुदन् पुनः । इत्यूचे हा मया भ्रातुरागतस्योचितं कृतम् ॥ १४१ ॥

जराकुमारेण कृष्णमरणम् ।



१ दीर्घश्मश्रुः । २ जराया अपत्यं जारेयः ।

कनिष्ठं दुर्दशामग्नं भ्रातरं भ्रातृवत्सलम् । त्वां निहन्तुर्मम स्थानं क्व नाम नरकावनौ ॥ १४२ ॥
वनवासं तव त्राणबुद्ध्याकार्षमहं किल । न जाने विधिना यत्ते स्थापितः पुरतोऽन्तकः ॥ १४३ ॥
हे पृथ्वि देहि विवरं वरमद्यैव येन ताम् । अनेनैव शरीरेण प्रयामि नरकावनिम् ॥ १४४ ॥
अतः परमिह स्थानमधिकं नरकादपि । सर्वदुःखाधिके भ्रातृहत्यादुःख उपस्थिते ॥ १४५ ॥
वसुदेवस्य पुत्रोऽहं किं भ्राता तव चाभवम् । किं वाभूवं मनुष्योऽपि यः कर्माकार्षमीदृशम् ॥ १४६ ॥
सर्वज्ञवचनं श्रुत्वा तदैव न मृतोऽस्मि किम् । जनमात्रे मयि मृते किं न्यूनं स्यात्सति त्वयि ॥ १४७ ॥
ततो बभाषे कृष्णस्तं कृतं भ्रातः शुचा तव । न त्वया न मया वापि लंघ्यते भवितव्यता ॥ १४८ ॥
अवशिष्टस्त्वमेवैको यदुभ्यो जीव तच्चिरम् । याहि याह्यन्यथा रामस्त्वां हन्यान्मद्वधक्रुधा ॥ १४९ ॥

जराकुमारेण कृष्णमरणम् ।

अभिज्ञानं कौस्तुभं मे गृहाण व्रज पांडवान् । वृत्तान्तं कथयेः सर्वं सहायाः सन्तु ते तव ॥ १५० ॥
अपसार्यं[1] त्वया किञ्चिद्विपरीतैः पदैरितः । पदानुसारी रामस्त्वां यथा प्राप्नोति न द्रुतम् ॥ १५१ ॥
मद्वाचा क्षमयेः सर्वान् पांडवानपरानपि । मयैश्वर्यजुषा पूर्वं क्लेशितान् प्रेषणादिभिः ॥ १५२ ॥
एवं पुनः पुनः कृष्णेनोक्तः सोऽपि तथैव हि । कृष्णपादाच्छरं कृष्ट्वा जगामोपात्तकौस्तुभः ॥ १५३ ॥

१ गन्तव्यम् ।

जारये च गते पादवेदनार्तो जनार्दनः । उदङ्मुखः प्राञ्जलिश्च वक्तुमेवं प्रचक्रमे ॥ १५४ ॥
नमोऽर्हद्भ्यो भगवद्भ्यः सिद्धेभ्यश्च नमो नमः । आचार्येभ्य उपाध्यायसाधुभ्यश्च त्रिधा नमः ॥ १५५ ॥
नमो भगवते विश्वस्वामिनेऽरिष्टनेमिने । त्यक्त्वास्मदादीन् यः पापांस्तीर्थं प्रावर्तयद्भुवि ॥ १५६ ॥
इत्युक्त्वा संस्तरे तार्णे[1] स्थित्वा जानूपरि क्रमम् । न्यस्य प्रावृत्य वस्त्रेण कृष्ण पुनरचिन्तयत् ॥ १५७ ॥
धन्यः स भगवान्नेमिर्वरदत्तादयश्च ते । प्रद्युम्नाद्याः कुमाराश्च रुक्मिण्याद्याश्च मत्स्त्रियः ॥ १५८ ॥
गृहवासं परित्यज्य भववासनिवन्धनम् । ये प्रवव्रजिरे तं तु धिङ्मां प्राप्तविडंबनम् ॥ १५९ ॥
एवं भावयतस्तस्य भंजन्नंगानि सर्वतः । चुकोप प्रबलो वायुः कृतान्तस्येव सोदरः ॥ १६० ॥

जराकुमारेण कृष्णमरणम् ।

तृष्णाशुग्घातवातैस्तैरर्दितोऽथ जनार्दनः । भ्रश्यद्विवेकः सद्योऽपि पुनरेवमचिन्तयत् ॥ १६१ ॥
पराभूतो न केनापि जन्मतो नृसुरैरपि । द्वैपायनेन प्रथमं नीतोऽहं कीदृशीं दशाम् ॥ १६२ ॥
इयत्यपि गते तं चेत्पश्याम्युत्थाय तत्स्वयम् । अन्तं नयामि स कियान् कः स्यात्तं रक्षितुं क्षमः ॥ १६३ ॥

इति क्षणं ध्यानमवाप्य रौद्रं समासहस्रं परिपूरितायुः ।
निकाचितैः कर्मभिरर्जितां प्राक् कृष्णस्तृतीयामवनीमवाप ॥ १६४ ॥



१ तृणनिर्मिते ।

कौमारान्तः षोडशाब्दानि विष्णोः षट्पञ्चाशन्मंडलित्वे जये तु ।
वर्षाण्यष्टाथो नवागुः शतानि विंशान्युच्चैरर्धचक्रित्वकाले ॥ १६५ ॥

कृष्णस्य कुमारा-वस्थादीनां कालः ।

* * * * *

इत्याचार्यश्रीहेमचंद्रसूरिविरचिते त्रिषष्टिशलाकापुरुषचरिते
महाकाव्येऽष्टमे पर्वणि द्वारकादाहकृष्णावसानकीर्तनो
नामैकादशः सर्गः ।



ॐ

# द्वादशः सर्गः ।

पद्मपत्रपुटेनाम्भो रामोऽथादाय सत्वरः । स्खल्यमानोऽपशकुनैः कृष्णाभ्यर्णमुपाययौ ॥ १ ॥
सुप्तोऽसौ सुखमस्तीति बुद्ध्या तस्थौ क्षणं बलः । दृष्ट्वा च मक्षिकाः कृष्णाः कृष्णास्याद्वस्त्रमाक्षिपत् ॥ २ ॥
ततोऽज्ञासीन्मृतं बन्धुं बलः सद्योऽथ मूर्च्छया । पपात जगतीपृष्ठे कृन्तमूल इव द्रुमः ॥ ३ ॥
कथंचिल्लब्धसंज्ञः सन् सिंहनादं बलोऽकरोत् । वित्रेसुः श्वापदास्तेन चकंपे चाखिलं वनम् ॥ ४ ॥
इत्युवाच च येनेह सुखसुप्तो ममानुजः । विश्वैकवीरः पापेन निजघ्ने स्वं स शंसतु ॥ ५ ॥
स मे समक्षीभवतु सत्यं हि सुभटो यदि । सुप्तप्रमत्तभ्रूणर्षिस्त्रीषु हि प्रहरेत् कः ॥ ६ ॥
इत्युच्चैःशब्दमाक्रोशन् रामो बभ्राम तद्वनम् । भूयः कृष्णमुपेयाय तमालिंग्य रुरोद च ॥ ७ ॥
हा भ्रातरवनीवीर हा मदुत्संगलालित । हा कनिष्ठगुणज्येष्ठ विश्वश्रेष्ठ क्व तिष्ठसि ॥ ८ ॥
विना भवन्तं न स्थातुमीशोऽस्मीति पुराऽवदः । वचोऽपि नाधुना दत्से क्व सा प्रीतिर्जनार्दन ॥ ९ ॥
नापराधं स्मरामि स्वं रुषितश्च निरीक्ष्यसे । किं वा यो मे विलम्बोऽभूत् स ते रोषस्य कारणम् ॥ १० ॥



बलराम–
विलापः ।

स्थानेऽसि रुषितो भ्रातस्तथाप्युत्तिष्ठ संप्रति । गच्छत्यस्तं रविः स्वप्नकालो नैष महात्मनाम् ॥ ११ ॥
एवं च प्रलपन् रामस्तामतीयाय यामिनीम् । उत्तिष्ठोत्तिष्ठ हे भ्रातः प्रातरप्येवमब्रवीत् ॥ १२ ॥
अनुत्तिष्ठन्तमुत्थाय तमथ स्नेहमोहितः । रामः स्कन्धे समारोप्याभ्राम्यद्गिरिवनादिषु ॥ १३ ॥
कृष्णकायं वहन्नर्चन् पुष्पाद्यैरन्वहं बलः । षण्मासानतिचक्राम भ्रातृस्नेहविमोहितः ॥ १४ ॥
तत्रैव पर्यटत्येवं वर्षाकालः समाययौ । सिद्धार्थः सोऽमरीभूतो ददर्शावधिना च तम् ॥ १५ ॥
सोऽचिन्तयच्च यदहो भ्राता मे भ्रातृवत्सलः । मृतं कृष्णं वहन्नस्ति तदेनं बोधयाम्यहम् ॥ १६ ॥
मामेषोऽर्थितपूर्वी[1] यन्मां त्वं विपदि बोधयेः । ध्यात्वेत्यद्रेरुत्तरन्तं चक्रे सोऽश्ममयं रथम् ॥ १७ ॥
उत्तीर्य विषमाच्छैलात् सोऽभज्यत रथः समे[2] । कुटुंबिरुपस्तं[3] देवः सन्धातुमुपचक्रमे ॥ १८ ॥
बलस्तमूचे किं मुग्ध रथं सन्धातुमिच्छसि । उत्तीर्य विषमादद्रेर्यः समे खंडशोऽभवत् ॥ १९ ॥
देवोऽप्यूचे यत्सहस्रेष्वहतो यो युधं विना । मृतो जीवेद्यदा ह्येष स्यात्सज्जो मे रथस्तदा ॥ २० ॥
आरोपयितुमारेमे देवोऽथाश्मनि पद्मिनी । बलोऽप्युवाच किं ग्राव्णि प्ररोहत्यब्जिनीवनम् ॥ २१ ॥
प्रत्युवाचामरोऽप्येवमयं तव यदानुजः । जीविष्यति सरोजिन्यस्तदारोक्ष्यन्त्यमूरपि ॥ २२ ॥
किञ्चिदग्रे पुनर्भूत्वासिञ्चद्दग्धद्रुमं सुरः । बलोऽप्यूचे दग्धतरुः किं सिक्तोऽपि प्ररोहति ॥ २३ ॥

---

१ अर्थितः पूर्वं येन सः । २ समानभूमिमागे । ३ तं रथम् ।



देवकृतो
बलराम–
प्रतिबोधः ।

तं प्रत्युवाच देवोऽपि यदा स्कन्धस्थितं तव । जीविष्यति शवं वृक्षः प्ररोक्ष्यति तदा ह्ययम् ॥ २४ ॥
गोपीभूयामरः सोऽग्रे गोशवास्येषु नूतनाः । दुर्वाः प्रक्षेप्तुमारेभे जीवद्गव्याननेष्विव ॥ २५ ॥
बलभद्रो बभाषे तमस्थिभूता इमाः कदा । गावो दुर्वाश्चरिष्यन्ति त्वद्दत्ता मूढमानस ॥ २६ ॥
देवोऽभ्यधाद्यदा ह्येष जीविष्यति तवानुजः । इमा अपि तदा गावश्चरिष्यन्ति तृणान्यहो ॥ २७ ॥
रामोऽपि विममर्शैवं किं सत्यं मे मृतोऽनुजः । एकवाक्यतयामी यद्वदन्त्येवं पृथक् पृथक् ॥ २८ ॥
देवस्तच्चिन्तितं ज्ञात्वा सद्यः सिद्धार्थरुपभृत् । पुरो भूत्वाब्रवीदेष सिद्धार्थः सारथिस्तव ॥ २९ ॥
तदा प्रव्रजितो मृत्वा देवभूयमगामहम् । त्वां बोधयितुमत्रागामर्थितोऽस्मि पुरा त्वया ॥ ३० ॥
जराकुमारात् कृष्णस्य वधः प्रोक्तो हि नेमिना । जज्ञे च स तथा नैवान्यथा सर्वज्ञभाषितम् ॥ ३१ ॥
जराकुमारः कृष्णेनाभिज्ञाने निजकौस्तुभम् । अर्पयित्वा प्रेषितोऽगात् पांडवानां निकेतने ॥ ३२ ॥
बलोऽप्युवाच सिद्धार्थ साध्वहं बोधितस्त्वया । किं करोम्यधुना भ्रातृव्यय[1]व्यसनपीडितः ॥ ३३ ॥
सिद्धार्थोऽप्यभ्यधाच्छ्रीमन्नेमिभ्रातुर्विवेकिनः । परिव्रज्यां विना नान्यद्युज्यतेऽतः परं तव ॥ ३४ ॥
आमेत्युक्त्वा बलस्तेन देवेन सहितस्ततः । कृष्णकायस्य संस्कारमकरोत् सिन्धुसंगमे ॥ ३५ ॥
दीक्षां जिघृक्षुं रामं च ज्ञात्वा श्रीनेम्यपि द्रुतम् । विद्याधरमृर्षि प्रैषीदेकमेकः कृपालु[2]षु ॥ ३६ ॥

देवकृतो
बलराम-
प्रतिबोध;
दीक्षा च ।



---

१ व्ययो नाशः । २ कृपालुषु एकोऽद्वितीयः ।

तत्पार्श्वे प्राव्रजद्रामस्तपस्तीव्रं चकार च । तुङ्गिकाशिखरे गत्वा सिद्धार्थोऽस्थाच्च रक्षकः ॥ ३७ ॥
मासपारणकेऽन्येद्युर्बलः क्वापि पुरे विशन् । कयापि[1] सार्भया पौर्या कूपकंठस्थयैक्ष्यत ॥ ३८ ॥
रामस्य रुपातिशयालोकनव्यग्रचित्तया । कुम्भस्थाने पुत्रकंठे तया रज्जुरबध्यत ॥ ३९ ॥
कूपे तं क्षेप्तुमारेभे सा यावत्तावदैक्ष्यत । बलेन चिन्तितं चेदं धिङ्मे रुपमनर्थकृत् ॥ ४० ॥
नातः परं पुरग्रामादिषु वेक्ष्यामि किं त्वहम् । वने काष्ठादिहारिभ्यः पारयिष्यामि भिक्षया ॥ ४१ ॥
तां नारीं बोधयित्वाथ तदेव हि वनं बलः । जगाम तेपे च तपो दुस्तपं मासिकादिकम् ॥ ४२ ॥
आनीतं भक्तपानादि तृणकाष्ठादिहारिभिः । दत्तं च तैः प्रासुकं च गृहित्वा पारयन्मुनिः ॥ ४३ ॥
काष्ठादिहारकास्ते च गत्वा चख्युः स्वभूभुजम् । देवरुपः पुमान् कोऽपि चरन्नस्ति वने तपः ॥ ४४ ॥

बलदेवमुनेः साधना ।

इत्याशशंकिरे ते च किमस्मद्राज्यकांक्षया । करोति तप ईदृक्षं मंत्रं वा साधयत्यसौ ॥ ४५ ॥
इमं हन्मस्ततो गत्वेत्यालोच्य युगपच्च ते । ईयुः सर्वाभिसारेण मुने रामस्य सन्निधौ ॥ ४६ ॥
ततश्च देवः सिद्धार्थस्तस्य सन्निहितः सदा । विचक्रेऽनेकशः सिंहाञ्गतोऽपि भयंकरान् ॥ ४७ ॥
राजानश्चकितास्ते च नमस्कृत्य बलं ययुः । नरसिंह इति ख्यातो बलभद्रस्तदाद्यभूत् ॥ ४८ ॥
वने तपस्यतस्तस्य धर्मदेशनयाग्र्या[2] । वासिता व्याघ्रसिंहाद्या बहवः प्रशमं ययुः ॥ ४९ ॥



---

१ अर्भेण बालकेन सहितया । २ अग्रया श्रेष्ठ्या ।

केऽपि श्रावकतां भेजुः केऽपि भद्रकतां पुनः । कायोत्सर्गं व्यधुः केऽपि केऽपि चानशनं तदा ॥ ५० ॥
मांसाहारान्निवृत्तास्ते बभूवुः पारिपार्श्विकाः । तिर्यग्रूपधराः शिष्या इव राममहामुनेः ॥ ५१ ॥
रामप्राग्भवसंबन्धः कोऽपि जातिस्मरो मृगः । अतिसंवेगमापन्नः सदा सहचरोऽभवत् ॥ ५२ ॥
उपास्योपास्य रामर्षिं स मृगो वनमभ्रमत् । अगवेषयदायातान् सान्नान् काष्ठादिहारिणः ॥ ५३ ॥
यदापश्यत्तदैवैत्य रामर्षिं ध्यानसंस्थितम् । पर्यस्यन् शिरसा पादे भिक्षादातॄन् व्यजिज्ञपत् ॥ ५४ ॥
रामस्तदुपरोधेन ध्यानं मुक्त्वा क्षणादपि । भिक्षायै निरगात्तेन हरिणेनाग्रगामिना ॥ ५५ ॥
तत्रान्येद्युर्वने भव्यदारुभ्यो रथकारुकाः । आययुश्छिच्छिदुश्चापि वृक्षान् सारानृजून् बहून् ॥ ५६ ॥
तान् प्रेक्ष्य स भ्रमन्नेणः[1] सद्यो राममजिज्ञपत् । ध्यानं चापारयत्तस्योपरोधात् स महामुनिः ॥ ५७ ॥
तेषु भोक्तुं निषण्णेषु भिक्षार्थं मासपारणे । रामर्षिराययौ तत्र हरिणेनाग्रगामिना ॥ ५८ ॥
रथकाराग्रणी रामं प्रेक्ष्य प्रीतो व्यचिन्तयत् । अहो अत्राप्यरण्येऽसौ कल्पद्रुरिव कोऽप्यृषिः ॥ ५९ ॥
अहो रुपमहो तेजः प्रशमः कोऽप्यहो महान् । कृतार्थः सर्वथाप्यस्मि मुनिनातिथिनामुना ॥ ६० ॥
रथकारो विचिन्त्यैवं पञ्चांगस्पृष्टभूतलः । बलर्षये नमस्कृत्य भोज्यपानान्युपानयत् ॥ ६१ ॥
अथ दध्यौ बलमुनिः श्राद्धः कोऽप्येष शुद्धधीः । कर्मार्जितुं स्वर्गफलं भिक्षां मे दातुमुद्यतः ॥ ६२ ॥

बलदेवमुनेः साधना ।

---

१ एणो मृगः ।

न चेद्गृह्णाम्यमूं भिक्षां तदेतस्य हि सद्गतेः । कृतो मयान्तरायः स्यादृह्णाम्येतेन हेतुना ॥ ६३ ॥
एवं विचिन्त्य भगवान् कारुण्यक्षीरसागरः । स्वकायनिरपेक्षोऽपि भिक्षां तस्मादुपाददे ॥ ६४ ॥
ऊर्ध्वाननो मृगः सोऽपि बाष्पांभःप्लाविताक्षणः । मुनिं वनच्छिदं चापि पश्यन्निदमचिन्तयत् ॥ ६५ ॥
अहो कृपानिधिः स्वामी निरपेक्षो वपुष्यपि । अन्वग्रहीद्रथकारं तपसामेक आश्रयः ॥ ६६ ॥
अहो वनच्छिद्धन्योऽयं जन्म चास्य महाफलम् । येनायं भगवानेवं पानान्नैः प्रतिलंभितः ॥ ६७ ॥
अहं पुनर्मन्दभाग्यो न तपः कर्तुमीश्वरः । प्रतिलंभयितुं नापि धिङ्मां तिर्यक्त्वदूषितम् ॥ ६८ ॥
एवं त्रयोऽपि ते यावद्धर्मध्यानपराः स्थिताः । महावाताहतस्तावदर्धच्छिन्नोऽपतत्तरुः ॥ ६९ ॥
ते त्रयस्तरुणा तेन पतितेन हता मृताः । पद्मोत्तरविमानान्तर्ब्रह्मलोकेऽभवन् सुराः ॥ ७० ॥
व्रतमब्दशतं राम पालयित्वा गतो दिवम् । ददर्शावधिना कृष्णं तृतीयनरके गतम् ॥ ७१ ॥
शरीरं वैक्रियं कृत्वा भ्रातृस्नेहेन मोहितः । उपकृष्णं ययौ रामः कृष्णमालिंग्य चावदत् ॥ ७२ ॥
रामोऽहं भवतो भ्राता त्वां त्रातुं ब्रह्मलोकतः । अत्रायातोऽस्मि किं तुभ्यं करोमि प्रीतये वद ॥ ७३ ॥
स इत्युक्त्वोद्दध्रे कृष्णं पाणिना सोऽपि पाणितः । शीर्त्वा पारदवद्भूमौ पपात च मिमेल च ॥ ७४ ॥
आदावालिङ्गनाज्ज्ञात आख्यायोद्धरणात्ततः । रामः कृष्णेनाभ्युत्थाय नमश्चक्रेऽतिसंभ्रमात् ॥ ७५ ॥



बलदेवमुनेः
स्वर्ग-
गमनम् ।

तं जगाद बलो भ्रातरुक्तं श्रीनेमिना तदा । दुःखान्तं[1] विषयसुखं प्रत्यक्षं तत्तवाधुना ॥ ७६ ॥
त्वां कर्मयंत्रितं स्वर्गे न नेतुमहमीश्वरः । तिष्ठामि सन्निधौ तत्ते मनःप्रीतिकृते हरे ॥ ७७ ॥
कृष्णोऽप्युवाच हे भ्रातस्तिष्ठतापि त्वयात्र किम् । त्वयि सत्यपि भोक्तव्यं नरकायुरुपार्जितम्[2] ॥ ७८ ॥
नरकादपि दुःखाय यन्ममावस्थयानया । बभूवासुहृदां हर्षो म्लानिश्च सुहृदां तदा ॥ ७९ ॥
तद्गच्छ भरते चक्रशार्ङ्गशंखगदाधरम् । पीतवस्त्रं तार्क्ष्यकेतुं दर्शयेर्मां विमानगम् ॥ ८० ॥
नीलाम्बरं तालकेतुं लाङ्गलायोग्रधारकम् । दर्शयेः स्वं च सर्वत्र विमानस्थं पदे पदे ॥ ८१ ॥
यथा ह्यनश्वरौ रामकृष्णौ स्वेच्छाविहारिणौ । इति लोके प्रघोषः स्यात्पूर्वन्यत्कारबाधकः ॥ ८२ ॥
प्रतिपद्य तथा रामो जगाम भरतावनौ । तथैव कृत्वा ते रुपे दर्शयामास सर्वतः ॥ ८३ ॥
एवमूचे च भो लोकाः कृत्वा नौ प्रतिमाः शुभाः । प्रकृष्टदेवताबुद्ध्या यूयं पूजयतादरात् ॥ ८४ ॥
वयमेव यतः सृष्टिस्थितिसंहारकारिणः । वयं दिव इहायामो यामश्च स्वेच्छ्या दिवम् ॥ ८५ ॥
निर्मिता द्वारकास्माभिः संहृता च यियासुभिः । कर्ता हर्ता च नान्योऽस्ति स्वर्गदा वयमेव च ॥ ८६ ॥
एवं तस्य गिरा लोकः सर्वो ग्रामपुरादिषु । प्रतिमाः कृष्णहलिनोः कारं कारमपूजयत् ॥ ८७ ॥
प्रतिमार्चनकर्तृणां महान्तमुदयं ददौ । स सुरस्तेन सर्वत्र तद्भक्तोऽभूज्जनोऽखिलः ॥ ८८ ॥

१ दुःखपरिणामम् । २ श्रीनेमिना मम नरकगमनकथनावसरे ।



बलदेवस्य देवीभूय नरके कृष्णेन मिलनम् ।

इति भ्रातृवचो रामसुरोऽनुष्ठाय भारते । ब्रह्मलोकं पुनरगाद्दुर्मना भ्रातृदुःखतः ॥ ८९ ॥
इतश्च स जरासूनुः पांडवान् समुपास्थितः । आख्याच्च द्वारकादाहादिकं कौस्तुभमर्पयन् ॥ ९० ॥
सद्योऽपि शोकमग्नास्ते रुदन्तो वत्सरावधि । प्रेतकार्याणि कृष्णस्य विदधुः सोदरा इव ॥ ९१ ॥
तान् प्रविव्रजिषूञ्ज्ञात्वा श्रीनेमिः प्राहिणोन्मुनिम् । धर्मघोषं चतुर्ज्ञानं मुनिपञ्चशतीयुतम् ॥ ९२ ॥
जारेयं न्यस्य ते राज्ये द्रौपद्यादिसमन्विताः । तस्यर्षेः प्राव्रजन् पार्श्वे चक्रुः साभिग्रहं तपः ॥ ९३ ॥
कुन्ताग्रेण प्रदत्तोञ्छं[1] ग्रहीष्यामीत्यभिग्रहम् । जग्राह भीमः स[2] त्वस्य षड्भिर्मासैरपूर्यत ॥ ९४ ॥
द्वादशांगधरास्ते तु विहरन्तो महीं क्रमात् । प्रचेलुर्नेमिनं नन्तुमुत्काः पञ्चापि पांडवाः ॥ ९५ ॥

पाण्डव-
द्रौपद्यादीनां
दीक्षा ।

इतश्च मध्यदेशादौ विहृत्य परमेश्वरः । उदीच्यां राजपुरादिपुरेषु व्यहरत् प्रभुः ॥ ९६ ॥
शैले ह्रीमति गत्वा च म्लेच्छदेशेष्वनेकशः । विहरन् पार्थिवामात्यप्रभृतीन् प्रत्यबोधयत् ॥ ९७ ॥
आर्यानार्येषु विहृत्य भूयो ह्रीमत्यगाद्विभुः । ततः किरातदेशेषु व्याहार्षीद्विश्वमोहहृत् ॥ ९८ ॥
उत्तीर्य ह्रीमतः शैलाद्विजह्रे दक्षिणापथे । भव्यारविन्दखंडानि बोधयन्नंशुमानिव ॥ ९९ ॥
आरभ्य केवलादेवं भर्तुर्विहरतोऽभवन् । अष्टादश सहस्राणि श्रमणानां महात्मनाम् ॥ १०० ॥
चत्वारिंशत्सहस्राणि व्रतिनीनां सुमेधसाम् । चतुर्दशपूर्वभृतां तथा शतचतुष्टयी ॥ १०१ ॥



---

१ उञ्छ भक्तम् । २ सोऽभिग्रहः ।

अवधिज्ञानभाजां च शतानि दश पञ्च च । तानि वैक्रियलब्धीनां तानि केवलिनामपि ॥ १०२ ॥
सहस्रमेकं साधूनां मनः पर्यायशालिनाम् । श्रमणानां शतान्यष्टौ वादलब्धिमतां पुनः ॥ १०३ ॥
श्रावकाणां लक्षमेकं नवषष्टिसहस्रयुक् । श्राविकास्त्रिलक्ष्येकोनचत्वारिंशत्सहस्रयुक् ॥ १०४ ॥
एवं परीवारवृतः सुरासुरनृपान्वितः । निर्वाणसमयं ज्ञात्वा ययौ रैवतके प्रभुः ॥ १०५ ॥
सुरेन्द्रैस्तत्र समवसरणे रचिते व्यधात् । पर्यन्तदेशनां स्वामी विश्वानुग्रहकाम्यया ॥ १०६ ॥
तया देशनया वृद्धास्तत्र केऽपि प्रवव्रजुः । केचिद्भेजुः श्रावकत्वं भद्रकत्वमथापरे ॥ १०७ ॥
ततः प्रपेदेऽनशनं पादपोपगमं प्रभु : । मासिकं सह साधूनां षट्त्रिंशैः पंचभिः शतैः ॥ १०८ ॥
त्वाष्ट्रे[1] शुचिसिताष्टम्यां शैलेशीध्यानमास्थितः । सायं तैर्मुनिभिः सार्धं नेमिर्निर्वाणमासदत् ॥ १०९ ॥
अथ प्रद्युम्नशाम्बाद्याः कुमाराः प्रययुः शिवम् । महिष्योऽष्टौ च कृष्णस्य भगवद्बन्धवोऽपि च ॥ ११० ॥
भूयांसो व्रतिनोऽन्येऽपि व्रतिन्यश्चापरा अपि । राजीमतीप्रभृतयः प्रययुः पदमव्ययम् ॥ १११ ॥
चतुरब्दशतीं गेहे छद्मस्थो वत्सरं पुनः । केवली पञ्चाब्दशतीमित्यायू रथनेमिनः ॥ ११२ ॥
ईदृगायुःस्थिती राजीमत्यप्यासीत्तपोधना । कौमारच्छद्मवासित्वकेवलित्वविभागतः ॥ ११३ ॥
शिवासमुद्रविजयौ माहेन्द्रं कल्पमीयतुः । दशार्हा अपरेऽपीयुर्देवभूयं महर्द्धिकम् ॥ ११४ ॥

१ चित्रायां ।



श्रीनेमिनाथ–
निर्वाणम् ।

कौमारे त्रिवर्षशती छद्मकेवलयोः पुनः । सप्तवर्षशतीत्यब्दसहस्रायुः शिवासुतः ॥ ११५ ॥
श्रीनमिजिननिर्वाणाच्छ्रिनेमिस्वामिनिर्वृतिः । अतिक्रान्तेषु वर्षाणामभूल्लक्षेषु पञ्चसु ॥ ११६ ॥
शक्राज्ञया वैश्रवणो विचक्रे शिबिकां प्रभोः । अंगं विधिवदर्चित्वा शक्रस्तत्र स्वयं न्यधात् ॥ ११७ ॥
चक्रुश्चितां च नैर्ऋत्यामधिरत्नशिलातलम् । गोशीर्षचन्दनप्रायैरिन्धनैरथ नाकिन : ॥ ११८ ॥
उत्पाट्य स्वामिशिबिकां तत्रानिन्ये पुरन्दरः । चितायामथ चिक्षेप श्रीनेमिस्वामिनो वपुः ॥ ११९ ॥
शक्राज्ञयाग्निकुमाराश्चितायामग्निमादधुः । तमथ ज्वालयामासुर्द्रुतं वायुकुमारकाः ॥ १२० ॥
क्षीरोदांभोभिरब्दाश्च कालाग्निं निरवापयन् । जगृहुश्च प्रभोर्दंष्ट्राः शक्रेशानादिवासवाः ॥ १२१ ॥
शेषाण्यस्थीन्यन्यदेवास्तद्देव्यः कुसुमानि च । भूपा वस्त्राणि लोकाश्च जगृहुर्भस्म नेमिनः ॥ १२२ ॥
स्वामिसंस्कारवैडूर्यशिलायां तत्र वज्रभृत् । वज्रेण स्वामिनोऽलेखील्लक्षणानि च नाम च ॥ १२३ ॥
तस्यां शिलायां मघवा रचयामास पावनम् । श्रीनेमिनाथप्रतिमासनाथं चैत्यमुच्चकैः ॥ १२४ ॥
एवं कृत्वा च शक्राद्याः स्वं स्वं स्थानं ययुः सुराः । इतश्च पांडवाः प्रापुर्हस्तकल्पे पुरे तदा ॥ १२५ ॥
अस्माद्द्वादश योजनानि स गिरिर्नेमिं प्रगे वीक्ष्य तत् कुर्मो मासिकपारणं वयमिति प्रीत्या वदन्तो मिथः ॥
तस्मिन् हस्तिपुरे जनादिति तदा ते शुश्रुवुर्यत्प्रभुनेमिर्निर्वृतिमासमाद भगवांस्तैस्तैर्वृतः साधुभिः ॥ १२६ ॥

श्रीनेमिनाथ–
निर्वाणम् ।

आकर्ण्य तद्गुरुशुचो विमलाद्रिमीयुः पांडोः सुताः विदधिरेऽनशनं च तत्र ।
उत्केवलाः शिवमगुर्द्रुपदात्मजा तु सा ब्रह्मलोकमगमत्परमर्द्धिधाम ॥ १२७ ॥
द्वाविंशोऽर्हन्नथ च नवमः शार्ङ्गभृत्सीरपाणिस्तद्वैरी चेत्यतुलमहसः कीर्तिताः पर्वणीह ।
चत्वारोऽपि प्रवचनदिशं सम्यगुद्वीक्ष्य येषामेकैकोऽपि श्रुतिपथगतो विस्मयाय त्रिलोक्याम् ॥ १२८ ॥

इत्याचार्यश्रीहेमचंद्रसूरिविरचिते त्रिषष्टिशलाकापुरुषचरिते महाकाव्येऽष्टमपर्वणि बलदेवस्वर्गगमननेमिनिर्वाणपांडवनिर्वाणवर्णनो नाम द्वादश सर्गः ।

* * * * *

# अष्टमं पर्व समाप्तम् ।



पाण्डवानां निर्वाणं, द्रौपद्या स्वर्ग गमनं च ।